ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

# नव्यव्याकरणम् १

## मध्यमा १

## ( ધોરણ 11 )

### प्रतिज्ञापत्रम्

भारतं मम देशः।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति।

**मूल्यम् : ₹ 29.00**

**गुजरातराज्यशालापाठ्यपुस्तकमंडलम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम् - 382010**

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तकाः सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्**
श्री नरेन्द्र पण्डया

**लेखनम्**
श्री क्षितिश्वरनाथ पाण्डेय (कन्वीनर)
श्री पंकज ठाकर
श्री राघवेन्द्र झा
श्री भावेश जोषी

**समीक्षणम्**
डॉ. वाचस्पति मिश्रा
श्री कृष्णप्रसाद निरौला
श्री विशालकुमार महेता
डॉ. विनोदकुमार झा
श्री विरल उपाध्याय
श्री निशांत महेता

**संयोजनम्**
डॉ. क्रिष्ना दवे
(विषय-संयोजकः -अंग्रेजी)

**निर्माणायोजनम्**
श्री हरेन शाह
(उपनियामकः - शैक्षणिकः)

**मुद्रणसंयोजनम्**
श्री हरेश एस. लीम्बाचीया
(उपनियामकः- उत्पादनम्)

## प्रास्ताविकम्

प्राच्यगुरूकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चातर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **नव्यव्याकरणम् १, मध्यमा १ ( धो२ण 11 )** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव।

**पी. भारती** (IAS)
नियामकः — कार्यवाहकःप्रमुखः
ता.06-07-2019 — गान्धीनगरम्

**प्रथमावृत्ति : 2019**
**प्रकाशक** : गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामकः
**मुद्रक** :

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

( क ) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

( ख ) स्वातन्त्र्याय अम्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

( ग ) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

( घ ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

( च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

( छ ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

( ज ) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

( झ ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

( ट ) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

( ठ ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

* भारतीय संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| 1. | भट्टोजिदीक्षितस्य परिचय: | 1 |
| 2. | मंगलाचरणम् | 5 |
| 3. | अथपरिभाषाप्रकरणम् | 22 |
| 4. | अथाच् सन्धिप्रकरणम् | 27 |
| 5. | अच् सन्धिप्रकरणम् | 36 |
| 6. | अथ प्रकृतिभावप्रकरणम्-2 | 47 |
| 7. | हल्सन्धिप्रकरणम् | 60 |
| 8. | हल्सन्धिप्रकरणम्-2 | 68 |
| 9. | हल्सन्धिप्रकरणम्-3 | 77 |
| 10. | अथ विसर्गसन्धिप्रकरणम् | 86 |
| 11. | अथ स्वादिसन्धिप्रकरणम् | 95 |
| 12. | अथ अकारान्त-अजन्तपुँल्लिङ्गप्रकरणम् | 106 |
| 13. | अथ इकारान्त-अजन्तपुँल्लिङ्गप्रकरणम् | 133 |
| 14. | अथोकारान्ताजन्तपुँल्लिङ्गप्रकरणम् | 149 |
| 15. | अथ ऋकारान्त-अजन्तपुँल्लिङ्गप्रकरणम् | 156 |
| 16. | एकारान्ताजन्तपुँल्लिङ्गप्रकरणम् | 161 |
| 17. | ओकारान्ताजन्तपुँल्लिङ्गप्रकरणम् | 163 |
| 18. | अजन्तस्त्रीलिङ्गप्रकरणम् | 166 |
| 19. | अथाजन्तनपुंसकलिङ्गप्रकरणम् | 193 |
| 20. | विशिष्ट परिभाषाणां दिग्दर्शनम् | 206 |
| 21. | सूत्रगणपाठ: | 212 |
| 22. | सूत्रसूचि: | 215 |

# 1 भट्टोजिदीक्षितस्य परिचयः

**प्रस्तावना**

**वयम्  इदानीं वैयाकरणसिद्धान्त कौमुद्याः कांचन् अंशान् अस्मिन् पाठ्यग्रन्थे प्रकरणरूपेण पठिष्यामः । तदत्र स्वाभाविकी जिज्ञासा जायते यदस्याः कौमुद्याः कर्ता कः ? तदानीं स्मर्यते भट्टोजीदीक्षितः। अस्य दीक्षितस्य कालः** 1510 **त** : 1600 **शताब्द्यां वर्तते इति युधिष्ठिरमीमांसकानां मतम् ।**

---

पूर्व वयं पठितवन्तः यत् त्रिमुनि व्याकरणम् इति, तर्हि सूत्रकर्ता - पाणिनिः, वार्तिककारः कात्यायनः, भाष्यकर्ता - पतञ्जलिः वर्तते । सूत्राणां ग्रन्थः अष्टाध्यायी वर्तते । यस्याः अष्टानाम् अध्यायानामध्ययनेन सन्धेः समासादीनां ज्ञानं भवतिस्म, गच्छता कालेन जनानां परिश्रमक्षमता फलवती च बुद्धिः शीघ्रफललाभः, अल्पश्चश्रमः, इति सर्वं कारणमादाय प्रक्रिया-क्रमः प्रवर्तितः। यस्मिन् संज्ञा-सूत्राणि, सन्धिसूत्राणि, समाससूत्राणि अपि च सर्वेषां व्याकरणपाठ्यसामग्रीणां पृथक् - पृथक् क्रमेण प्रकरणं विभज्य भट्टोजिदीक्षितेन वैयाकरण-सिद्धान्त कौमुद्याः संरचना कृता । सोऽयं दीक्षितः इति कौमुद्या संरचनां 1600 - 1650 वर्षे कृतवान् इति यद्विक्रमसंवत् - 1657 त. 1707 इति वर्षे अस्य विदुषः स्थितिकालः डॉ. वेल्वालकरः स्वीकरोति ।

शेषकृष्ण-विरचित प्रक्रिया कौमुद्याः व्याख्यायाः सं. 1514 वर्षस्य एकः हस्तलेखः पूना-भण्डारकर शोधसंस्थाने वर्तते। अनेन उपरोक्तस्य कालस्यैव पुष्टिर्जायते यतो हि शेषकृष्णः दीक्षितस्य गुरुरासीत् ।

अयं दीक्षितः महाराष्ट्रियः ब्राह्मणः आसीत् । अस्य पितुर्नाम श्रीलक्ष्मीधरः आसीत्। अस्य अनुजः रंगोजी-भट्टः यः कौण्डभट्टस्य पिता आसीत् । अस्य वंशवृक्षः इत्थं वर्तते ।

**लक्ष्मीधरः**
- रंगोजीभट्टः
  - कौण्डभट्टः
- भट्टोजीदीक्षितः
  - भानुदीक्षितः
  - वीरेश्वरः
    - हरिदीक्षितः

भट्टोजीदीक्षितस्य गुरुः शेषकृष्णः आसीत् । शेषकृष्णः नृसिंहस्य पुत्रः आसीदिति पण्डितराजजगन्नाथ कृत प्रौढमनोरमा खण्डनेन ज्ञायते । शेषकृष्णात् दीक्षितः व्याकरण-शास्त्रा-ध्ययनं कृतवान् किन्तु प्रौढमनोरमायाः मंगलाचरणे

ध्यायं ध्यायं परं ब्रह्म स्मारं-स्मारं गुरोर्गिरः ।
सिद्धान्तकौमुदी-व्याख्यां कुर्मः प्रौढमनोरमाम् ॥

इत्यत्र गुरोर्गिरः इत्यत्र एकवचननेन ज्ञायते एकस्मादेव गुरोः सर्वविद्या लाभोऽस्य जातः ।

अस्यैव पुष्टिः हरिदीक्षितकृत-शब्दरत्नेन भवति ।

अयं दीक्षितः व्याकरणस्य न, अपितु नैकेषु शास्त्रेषु निपुणः, अनेकेषां ग्रन्थानां रचयिता च वर्तते । अस्य वैदुष्यं सर्वतोमुखी वर्तते । ऋग्वेदमाधारीकृत्य ऋग्वेदभाष्यसारः। अस्य एकः हस्तलेखः मद्रास हस्त-लेख संग्रहालये अमरटीकायाः वर्तते ।

भट्टोजीदीक्षितः फिट्सूत्रमाधारीकृत्य व्याख्याद्वयीं रचितवान् (1) शब्दकौस्तुभस्य प्रथमाध्यायस्य द्वितीयपादस्य स्वरप्रकरणस्य । (2) सिद्धान्तकौमुद्याः स्वरप्रकरणस्य च रचनां चकार। उभयोः टीकयोः सामान्यभेदः । दीक्षितः फिट् सूत्राणां वृत्तिमपि रचितवान् । तस्याः व्यारव्यानं प्रौढमनोरमायां कृतवान् । तत्र केवलं सप्ततः अष्ट-सूत्राणामुपरि विचारो वर्तते ।

व्याकरण शास्त्रस्य दार्शनिकग्रन्थः वैयाकरण-भूषणसारः तस्य रचयिता अपि दीक्षित एव। तत्र प्रमाणम्

फणि-भाषित भाष्यब्धेः शब्दकौस्तुभ उद्धृतः ॥

तत्र निर्णीत एवार्थः सक्षेपेणेह कथ्यते ॥ (मंगलाचरणवैयाकरणभूषणसार)

शब्दकौस्तुभस्य रचना दीक्षितेन कृता स च भाष्यानुसारिणी वर्तते । भूषणसारस्य व्याख्याता कौण्डभट्टः। शब्दकौस्तुभातिरिच्य ये ग्रन्था दीक्षितेन रचितास्तेषां नामानि -

धर्मशास्त्रे - (1) अशौचप्रकरणम् (2) तिथिनिर्णयः (3) त्रिस्थ्रलीसेतुः । वेदान्ते -1 वेदान्ततत्त्वविवेकः (2)दीपनव्याख्या (3) अद्वैत कौस्तुभः (4) तत्त्वसिद्धान्तचन्द्रिका।

विविध विषया : (1) तत्त्वाधिकारनिर्णयः (2) वेदभातष्यसारः (3) तत्त्वसिद्धान्तदीपिका (4) तैतिरीयसान्ध्य-भाष्य ।

व्याकरणे : (1) शब्द कौस्तुभः (2) वैयाकरणसिद्धान्त कौमुदी (3) प्रौढमनोरमा (4) धातुपाठनिर्णयः (5) लिङ्गानुशासनवृत्तिः (6) वैयाकरणभूषणकारिका ।

अस्यव्याकरण-ग्रन्थेषु प्राथमिकरचना शब्दकौस्तुभः । शब्दकौस्तुभः अष्टाध्यायाः विस्तृत व्याख्यानम् अस्ति अस्मिन् ग्रन्थे महाभाष्यस्य विषयेऽपि चर्चा विद्यते अस्य ग्रन्थस्य विषयाणां विभाजनं महाभाष्यम् इव आह्निकानुसारि वर्तते ।

शब्दकौस्तुभस्य पश्चात् वैयाकरण सिद्धान्त कौमुदी, वैयाकरण भूषणकारिका इति द्वयोः ग्रन्थयोः रचनां चकार। वैयाकरणसिद्धान्तकौमुद्याः अन्ते लिखितं वर्तते -

इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम् ।

विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे ॥

अनेन स्पष्टीभवति यत्सिद्धान्तकौमुदी इति ग्रन्थापेक्षया शब्दकौस्तुभः प्रौढग्रन्थोऽस्ति । शब्दकौस्तुभस्य मूले शेषावतारपतञ्जलेः कृतं महाभाष्यं वर्तते यथा भूषणसारस्य प्रारंभे - विद्यते

फणिभाषित भाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।

तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते ॥

पतञ्जलिकृत महाभाष्यं तद् समुद्रं ततः शब्दकौस्तुभः नामकः ग्रन्थः निर्मितः । तत्र येऽर्थाः निर्णीता, त एव संक्षेपेण कौण्डभट्टेन वैयाकरणभूषणसारे लिखिताः । किन्तु दुःखस्यायं विषयः यदस्य शब्दकौस्तुभ ग्रन्थः इदानीं तृतीया-ध्यायस्य चतुर्थाह्निकं यावदेवोपलभ्यते । अस्य ग्रंथस्य नैकाः टीकाः विद्यन्ते । शब्दकौस्तुभस्य पश्चात् प्रक्रिया ग्रन्थेषुतवैयाकरणसिद्धान्त-कौमुदी मुख्यं स्थानं भजति। यस्या अध्ययनं विना न कोऽपि पण्डितो भवितु मर्हति ।

## वैयाकरण-सिद्धान्त-कौमुदी

पाणिनिव्याकरणस्य प्रक्रियाग्रन्थेषु दीक्षितस्येयं कौमुदी सर्वाधिका प्रसिद्धा लोकप्रिया उपयोगिनी च वर्तते । रामचन्द्राचार्यस्य प्रक्रिया कौमुद्याः उपयोगितां परिलक्ष्य तस्या न्यूनतां विचार्य स्वविवेक बुद्धया अनुत्तमेन प्रयासेन यां कौमुदीं चकार सा स्वकोटिगतानां सर्वेषां ग्रन्थानां महिमानं समापयामास ।

अस्या वैया-करण-सिद्धान्त-कौमुद्याः महिमा एतादृशं यद्य यावत अस्यपाठनं पठनं तद्वदेव भवति यथाआरंभे रचनाकाले आसीत् ।

इयं कौमुदी भागद्वये विभक्तेविर्तते - पूर्वाद्धम् उत्तरार्धञ्च । पूर्वार्धे संज्ञा सन्धिः सुबन्त स्त्री प्रत्ययः कारक-समास स्तथातद्वितप्रकरणानां विवेचनं वर्तते ।

उत्तरार्धे भ्वादिगणसहितः दशगणः ण्यन्तादिप्रक्रियाः पूर्वकृदन्तप्रकरणम्, उत्तरकृदन्तम् अन्ते अष्टाध्यायी. क्रमेण वैदिकप्रक्रिया यत्र वैदिकशब्दानां विचारो वर्तते । पुनश्च स्वरप्रक्रियायां प्रक्रियाक्रमेण व्याख्यानं कृतं वर्तते । अत्र सामान्य स्वरात् पश्चात् धातुस्वरः प्रातिपदिकस्वरः, फिटसूत्रम्, प्रत्ययस्वरः, समासस्वरः, तिङन्तस्वरः अन्ते लिंगनुशासनम् अस्ति।

वैयाकरणसिद्धान्तकौमुद्यां 3386 सूत्राणि सन्ति। वैदिक प्रक्रियायां 263 सूत्राणि, स्वर प्रक्रियायां 329 आहत्य 3978 सूत्राणि भवन्ति । एतेषु माहेश्वर सूत्राणां सम्मेलनेन 3992 तथा स्वरसिद्धान्त चन्द्रिकानुसारं 3995 सूत्राणि सन्ति अत्रोणादिफिट् सूत्राणि च सम्मिलितानि च वर्तन्ते । सिद्धान्तकौमुद्याः केचन् विषयाः न्यूनाः तेषां पूरणाय भट्टोजीदीक्षितेन तस्यैव टीका प्रौढ़मनोरमा विरचिता इयं मनोरमा विदुषामाह्लादनार्थं वर्तते । गच्छता कालेन मूलग्रन्थरुपेण प्रौढ़मनोरमायाः अध्ययनमध्यापनम् आरब्धम् इदानीं यावत् प्रचलति ।

यथा प्रक्रिया कौमुद्याः न्यूनतामाधारीकृत्य भट्टोजी दीक्षितेन सिद्धान्त कौमुदी रचिता तथैव स्वगुरुकृत प्रक्रियाप्रकाशस्यापि कुत्रचित् खण्डनं प्रौढमनोरमायां कृतवान् । इदं दृष्ट्वा पण्डितराजजगन्नाथः एनं गुरुद्रोही इत्युपाधिं प्रदत्तवान् । एतदेव न अपितु प्रौढ़मनोरमायाः खण्डनें मनोरमाकुचमर्दिनीं ग्रन्थं चकार । सहैव दीक्षितस्य शब्दकौस्तुभस्य खण्डनमपि कृतवान् पण्डितराजकृतखण्डनस्य निराकरणं दीक्षितस्यपुत्रः भानुदीक्षितः मनोरमामण्डनेन कृतवान् ।

**स्वाध्यायः**

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

**(1) सूत्रकारः कोऽस्ति ?**

(क) पाणिनिः (ख) कात्यायनः (ग) पतञ्जलिः (घ) दीक्षितः

**(2) भट्टोजिदीक्षितस्य कालः कः ?**

(क) त्रयोदशशताब्द्यम् (ख) चतुर्दशशताब्द्याम्

(ग) पञ्चदशशताब्द्याम् (घ) पञ्चदशतः शोडशशताब्द्याम्

**(3) भट्टोजिदीक्षितस्य गुरुः आसीत् ?**

(क) पाणिनिः (ख) कात्यानः (ग) पतञ्जलिः (घ) शेषकृष्णः

**(4) शेषकृष्णरचितग्रन्थस्य किं नाम ?**

(क) प्रक्रियाकौमुदी (ख) सिद्धान्तकौमुदी

(ग) प्रक्रियाप्रकाशः (घ) प्रक्रियाकौमुदीव्याख्यानम्

**(5) शब्दकौस्तुभो वर्तते ?**

(क) भाष्यानुसारी (ख) कौमुद्यनुसारी (ग) दर्शनग्रन्थः (घ) एतेषु एकमपि न

**(6) अमरटीकायाः हस्तलेखो विद्यते ?**

(क) मद्रासे (ख) कलकत्तानगरे (ग) अहमदाबादनगरे (घ) वश्पतने

(7) **स्वरसिद्धान्तचन्द्रिकानुसारं वैयाकरणसिद्धान्तकौमुद्याः सूत्रसंख्या अस्ति ?**

(क) 3992 (ख) 3978 (ग) 3386 (घ) 3995

(8) **मनोरमाकुचमर्दिनी ग्रन्थस्य रचयिता -**

(क) दीक्षितः (ख) कौण्डभट्टः (ग) कात्यायनः (घ) जगन्नाथः

**2. एकैकवाक्येन उत्तरं लिखत ।**

(1) दीक्षितस्य प्राथमिक रचना का ?

(2) शब्दकौस्तुभः कस्मात् उद्धृत ?

(3) रामचन्द्राचार्यः कं ग्रन्थं रचितवान् ?

(4) कौमुद्याः कौ द्वौ भागौ स्तः ?

(5) दीक्षितस्य कृते गुरुद्रोही इति शब्दः कः प्रदत्तः ?

**3. सविस्तरम् उत्तरं लिखत ।**

(1) दीक्षितस्य वंश-वर्णनं कुरुत ।

(2) सिद्धान्तकौमुद्याः संक्षेप-वर्णनम् ।

(3) दीक्षितस्य कालः सप्रमाणम् ।

(4) दीक्षित-कृतग्रन्थाः ।

(5) कौमुद्याः संरचनायाः कारणानि ।

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं पदपरिचयमन्वयं सरलसंस्कृतेन भावार्थं च लिखत।

◆

# 2 संज्ञाप्रकरणम्

**प्रस्तावना**

**अयं ग्रन्थः भट्टोजीदीक्षितस्य अस्ति । अतः दीक्षितः अनेन श्लोकेन मंगलाचरणं करोति । मंगलाचरणेन विघ्ननाशः तथा शिष्टाचारविषयः अपि तदेव आश्रित्य नमस्कारो विधीयते ।**

**मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च। वैयाकरणसिद्धान्त - कौमुदीयं विरच्यते ॥**

अहं भट्टोजीदीक्षितः मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च इयं वैयाकरणासिद्धान्त-कौमुदीं करोमि ।

अथवा

मया भट्टोजीदीक्षितेन मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च, इयं वैयाकरणसिद्धान्त कौमुदी विरच्यते ।

मुनित्रयम् इत्यत्र मुनीनां त्रयं मुनित्रय, षष्ठी समासः यस्य समुदाय-स्य त्रयोऽवयवा तादृशः समवायः, तं नमस्कृत्य नमः कृत्वा इति नमस्कृत्य । पुनश्च तेषां मुनीनां वचांसि विचार्य परिभाव्य पर्यालोच्य ।

तेषाम् उक्तयः तदुक्तयः ताः तदुकतीः अर्थात् पाणिनेरुक्तिः सूत्र-पाठ गणपाठादथ चकात्यायनस्य वार्तिकानि पतञ्जलेः महाभाष्यं च विचार्य तेषां त्रयाणां 'यथोत्तरं मुनीनां प्रमाण्यमिति' च पर्यालोच्य कौमुद्याः प्रणयनं क्रियते । अनेन कौमुद्याः प्रामाणिकतामपि सूचयति ।

केचन् वदन्ति परिभाव्य शब्दस्य अर्थः तिरस्कृत्य इति भवति, अनादरः परिभवः परिभावस्ति-रस्क्रिया एतस्मिन्नर्थे प्राचीनानां माधवादीनामुक्तीः तिरस्कृत्य इत्यर्थः । वस्तुतः तदुक्तीः पदेन मुनीनां कथने विचार एवार्थः संगतः ।

व्याकरणमधीयते विदन्ति वा वैयाकरणाः, तेषां सिद्धान्ताः वैयाकरणसिद्धान्ता स्तेषां कौमुदी, चन्द्रिका इव, प्रकाशिका इत्यर्थः । वैयाकरणानां सिद्धान्तास्तुपूर्वमेव आसन् किमनया? तदाह प्राचीनानां सिद्धान्तान् पर्यालोच्य यथा प्रक्रिया कौमुद्यादी नाम् इति अभिप्रायो वर्तते ।

इयं पदस्य प्रयोगः उपस्थितस्य वस्तुनः कृते, किन्तु कौमुदी निर्मिता न वर्तते, तर्हि इयम् इति निर्देशः तत्कृते असंगतस्तदाह बुद्धिगतत्वादेव इयम् इति निर्देशः सार्थकः ।

मुनित्रयम् अत्र नमः योगे 'नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च' इति चतुर्थी-विभक्तिः, हरये नमः इति-वत् कथं न भवति।

तदाह-''उपपदविभक्तेः कारक विभक्तिर्बलीयसी'' । पदमाश्रित्य जायमाना विभक्तिः उपपदविभक्तिः, क्रियामाश्रित्य जायमाना कारकविभक्तिः। कृत्य इत्यत्र कृधातोः स्वीकृत्य तद्योगे मुनित्रयम् इत्यत्र द्वितीयाविभक्तिः। अन्यथा मुनित्राय इत्येव स्यात्।

स्वयंभुवे नमस्कृत्य ब्रह्मणेऽमिततेजसे इति मनुस्मृतेः मङ्गलाचरणे स्वयंभुवेऽत्र चतुर्थी कथमभूत् ?

तदाह-स्वयंभुवमनुकूलयितुमित्यर्थ-विवक्षायां क्रियार्थोपपदस्य च कर्मणि स्थानिनः इति चतुर्थी मूले एव स्फुटीभविष्यति। अपरञ्च जहत्स्वार्थावृतिपक्षे नमः पदस्य निरर्थकत्वात् तद्योगे चतुर्थी न । अर्थवद्ग्रहणपरिभाषायाः प्रवृत्तेः।

कस्यापि ग्रन्थस्य प्रारंभे अनुबन्धचतुष्टयं भवति ते च के.?

विषयश्चाधिकारी च सम्बन्धश्च प्रयोजनम्।
बिनानुबन्धं ग्रन्थादौ मंगलं नैव शस्यते ॥

(1) अत्र वैयाकरणसिद्धान्ताः प्रतिपाद्यविषयाः ।

(2) अनायासेन सरलतया तदवगमः प्रयोजनम् ।

(3) तस्य ग्रन्थस्य च जन्यजनकभाव संबंधः ।

(4) वैयाकरणसिद्धान्तजिज्ञासुरिति अधिकारी सूचितम् ।

---

**अथ संज्ञा-प्रकरणम्**

**(1) अइउण्।**

**(2) ऋलृक्।**

**(3) एओङ्**

**(4) ऐऔच्।**

**(5) हयवरट्।**

**(6) लण्।**

**(7) ञमङणनम्।**

**(8) झभञ्।**

**(9) घढ़धष्।**

**(10) जबगडदश्।**

**(11) खफछठथचटतव्।**

**(12) कपय्।**

**(13) शषसर।**

**(14) हल्।**

**इति माहेश्वराणि सूत्राण्यणादि संज्ञार्थानि। एषामन्त्या इतः। लण् सूत्रेऽकारश्च । हकारादिष्वकार उच्चारणार्थः।**

---

अथ मंगलाचरणाद् अनन्तरं संज्ञा - प्रकरणं प्रारभ्यते । किं नाम संज्ञात्वम् ? सम्यक् ज्ञायते अनया इति संज्ञा। तस्याः प्रकरणम् । प्रक्रियते अनेन अस्मिन् वा प्रकरणम् । नाम विषयैकदेशसम्बद्ध प्रकरणमिति उच्यते । अतः सन्धिः तद्गतां उपयोगिन्यः संज्ञाः अस्मिन् प्रकरणे आयान्ति ।

अइउणआदिपठनेन केचन शंकां कुर्वन्ति इमानि कानि सन्ति इति ?

तदुत्तररूपेण उच्यते महेश्वराद् आगतानि । तत्र किं प्रमाणम् महेश्वराद आगतानि माहेश्वराणि यथा पाणिनिशिक्षायाम्-

''येनाक्षर समाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥''

नन्दिकेश्वरकृतकाशिकायामप्युक्तम्

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धान् एतद्विमर्शे शिवसूत्र-जालम् ॥

नटराजराजः शिव चतुर्दशवारं ढक्कां ननाद, तदेव सूत्रजालरूपेण पाणिनिना लब्धः तस्मात्सन-कादि ऋषीणामपि उद्धारो जातः । एषु चतुर्दशसूत्रेषु अन्त्याः वर्णाः इत्संज्ञकाः सन्ति । तेन अणादिप्रत्याहाराणां सिद्धि-जार्यते । व्यंजनवर्णेषु हकारा-दिषु अकारः उच्चारणस्य कृते वर्तते

**लणसूत्रेऽकारश्च :** सर्वत्र हकारादिषु अकार: उच्चारणार्थो वर्तते किन्तु लण्सूत्रघटकाकार: इत्संज्ञकस्तस्य फलम् – अकारस्य इत्संज्ञात्वात् आदिरन्त्येन सहेता अन्त्येन अकारेण इत्संज्ञकेन, आदिवर्ण: हयवरट् सूत्र-घटक रकार: स मध्यस्थस्य लकारस्य वोधक: सन् स्वस्यापि बोधक: तेन र इति उच्चारणेन रलयो: संज्ञा ।

केनचिदुच्यते रटलानां संज्ञा कथं न इति। तदुत्तररुपेण प्रत्याहारेषु इत्संज्ञकानां ग्रहणं न भवति ।

अइउण् – णकारानुबन्धेन – अण् प्रत्याहार:

ऋलृक् – ककारानुबंधेन – अक् इक् उक् त्रय: ।

एओङ् – ङकारानुबन्धेन – एङ् संज्ञार्थ: ।

ऐऔच् – चकारानुबन्धेन – अच् इच् ऐच् एच् संज्ञा ।

हयवरट् – टकारानुबन्धेन – अट् एक एव ।

लण् – सूत्रेणकारेण – अण् इण् यण् त्रय: ।

ञमङणनम् – मकारेण – अम् ञम् ङम् ।

झभञ् – ञकारेण यञ् इत्येक एव

घढधष् – षकारेण – झष् भष् द्वौ भकत: ।

जबगडदश् – शकारेण – अश् हश् वश् झश् जश् बश् षट् ।

खफछठथटचटतव् – वकारेण – छव् एकैव ।

कपय् – यकारेण – यय् मय् झय् खय् चय्

शषसर् – रकारेण – यर् झर् खर् पर् शर्

हल् – लकारेण – अल्, हल् वल् रल् झल् शल्

सम्पूर्णमिदम् इत्थम् उक्तम् –

एकस्मान् ङयवणटा: द्विभ्यां षस्त्रिभ्य: एव कणमा: स्यु: ।

ज्ञेयो चयौ चतुर्भ्योर: पञ्चभ्य: शलौ षड्भ्य: ॥

---

**(1) हलन्त्यम् । 1 । 3 । 33 हल् ( मा.सू.14 ) इति सूत्रेऽन्त्यमित्स्यात् ।**

**(2) आदिरन्त्येन सहेता । 1 । 1 । 71 ॥ अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् । इति हल्संज्ञायाम्।**

---

(1) हलन्त्यम् इत्येकपदं सूत्रम् ।

अनुवृत्ति: इत्।

सूत्रप्रकार-संज्ञासूत्रमिदम् ।

सूत्रार्थ : हल् इति सूत्रे अन्तिमस्य वर्णस्य इत्संज्ञा भवति ।

विशेषार्थ : लकारस्य इत्संज्ञाया: फलम् – इत्पदार्थे ज्ञाने सति आदिरन्त्येन सहेता सहकारेण हल् पदार्थज्ञानं जायते । हल् इति ज्ञानात् हलन्त्यमिति इत्संज्ञाज्ञानम् । इत्संज्ञाज्ञाने जाते ''आदिरन्त्येन सहेता'' प्रवर्तते ।

(2) पदच्छेद: – आदि:, अन्त्येन, सह, इता चतुष्पदमिदं सूत्रम् ।

अनुवृत्ति: – स्वं रूपम् ।

सूत्रप्रकार : संज्ञासूत्रमिदम् । प्रत्याहारसंज्ञा क्रियते ।

सरलार्थ : अन्तिमेन इत्संज्ञकेन सह आदिवर्णः मध्यगानां वर्णानां बोधं कृत्वा स्वस्यापि बोधको भवति ॥ यथा–हल् इति सूत्रे लकारः इत्संज्ञकः तत्सहितः आदिवर्णः हयवरट्सूत्रघटकहकारः, स–हकारः मध्यगतानां यवरलत – शषसर् हल् इति यावत्सर्वेषां वर्णानां बोधकः भवति, तेन हल् प्रत्याहारे सर्वे व्यञ्जनवर्णाः आगच्छन्ति ।

अनेन हल् संज्ञा क्रियते । हल्पदवाच्याः वर्णाः इमे सन्ति –

ह, य, व, र, ल, ञ, म, ङ, ण, न, झ, भ, घ, ढ, ध, ज, ब, ग, ड, द, ख, फ, छ, ठ, थ, च, ट, त, क, प, श, ष, स, (ल्) इति सन्ति ।

इदानीं हल्वर्णाः ज्ञाताः तदनन्तरं 'हलन्त्यम्' द्वितीयं सूत्रं प्रस्तौति ग्रन्थकारः भट्टोजीदीक्षितः ।

---

**2. हलन्त्यम् ।1 ।2 ।3॥ उपदेशेऽन्त्यं हलित्स्यात् । उपदेश आद्योच्चारणम् । ततः अण् अच् इत्यादि संज्ञासिद्धौ ।**

**3. उपदेशेऽजनुनासिक इत् ।1 ।3 ।2 ।। उपदेशेऽजनुनासिकोऽजित्संज्ञः स्यात् । प्रतिज्ञानुनासिक्याः पाणिनीयाः । लण् सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा । प्रत्याहारेष्वितां न ग्रहणम् ।**

---

1.3.3 हल् अन्त्यम् द्विपदमिदं सूत्रम्

अनुवृत्ति : उपदेशे इत् ।

सूत्रप्रकारः संज्ञासूत्रमिदम् ।

सूत्रार्थ : उपदेशावस्थायाम् अन्त्यस्य हलः इत्संज्ञा भवति ।

उपदेश : पाणिनिकात्यात्यनपतञ्जलीनां व्याकरणशास्त्रसम्बन्धि सूत्रवार्तिक–भाष्यरूपात्मक–स्वरुपं गृह्यते । उपउपसर्ग कदिश्धातोरूच्चारणार्थः । पाणिनिना उच्चरितत्वात् सूत्राणि अइउण् वृद्धिरादैच् आदीनि तेषामन्तिमवर्णाः इत्संज्ञकाः भवन्ति। इत्संज्ञायाः फलं तस्य लोपः इति लोपप्राप्तौ सत्यामित्संज्ञायाः निरर्थकत्वात् णादयोऽणाद्यर्थाः इति नियमद्वारा रक्षणेन आदिरन्त्येन सहेता इति अन्तिमो वर्णः णकारः आदिमः अकारः मध्यगौ इकारोकारो बौध्यौ भवतः, एवमेव अच्प्रत्याहारे अकार आदिवर्णः, इ उ ऋ लृ ए ओ ऐ औ इति मध्यगाः, चकारः अन्तिमः, अकारादिचकारान्त–घटकसमुदायोऽच्–पदवाच्यः। तदेव मूले उपदेशपदार्थे हलपदार्थे इत्पदार्थे ज्ञाते सति अण् अच् इत्यादिसंज्ञा सिद्ध्यति।

1.3.2 **उपदेशे अच्, अनुनासिकः, इत् ।**

सूत्रप्रकारः संज्ञासूत्रम्

सरलार्थः उपदेशावस्थायां विद्यमानस्य अचः इत्संज्ञा भवति ।

विशेषार्थः आचार्य पाणिनिप्रोक्तवर्णानाम् उपदेशत्वं अनुनासिकत्वं च सर्वमान्यं वर्तते ।

लण्–सूत्रे यः अकारो वर्तते स इत्संज्ञकः तत्फलं लण् सूत्रस्थावर्णेन उच्चार्यमाणः य हयवरट् इति सूत्रस्य रेफः तेन सह रप्रत्याहारः सिद्ध्यति । तेन र इत्युच्च्यमाने रेफलकारयोः संज्ञा । अत्र अकारः अनुनासिको नास्ति यतो हि – मुखनासिका वचनोऽनुनासिकः इति सूत्रद्वारा नासिकया यस्य उच्चारणं स एव अनुनासिकः तर्हि अकारः तादृशः नास्ति कथं तर्हि इत्संज्ञेति ?

तदानीम् उच्यते – ''प्रतिज्ञानुनासिक्याः –पाणिनीया'' इति प्रतिज्ञायते अभ्युपगम्यते इति प्रतिज्ञा, प्रतिज्ञानुनासिक्यं येषां ते प्रतिज्ञानुनासिक्याः पाणिनिशिष्याः । चिह्नविशेषेणाचार्य परम्परया, सूत्र द्वारा अनुनासिक विज्ञानं क्रियते । लण्सूत्रेऽकारश्चेति इत्यत्र अनुनासिकं विनापि आचार्यलक्षण द्वारा परम्परया अनुनासिकं अभ्युपगम्येत्संज्ञा क्रियते तत्फलं लण् सूत्र स्थावर्णेन सहोच्चार्यमाणो रेफो – रलयोः संज्ञा।

**प्रत्याहारेष्वितां न ग्रहणमिति** : अण्, अक्, अच्, एते प्रत्याहाराः तत्र मध्यगतानाम् इत्संज्ञकवर्णानां ग्रहणं न क्रियते यथा–अच् इति प्रत्याहारः अइउण् अकाराद् आरभ्य ऐऔच् इति चकारपर्यन्तः तत्र मध्ये णकारः, ककारः द्वौ अपि आगच्छतः

तर्योग्रहणं न भवति, यदि क्रियते चेद् ''मुखनासिक''- इति सूत्रे ककारस्य अच्त्वं स्वीकृत्य सकारघटक: य इकार: तस्य यणादेशेन यकार: स्यात् तन्न दृश्यते अत: पाणिनिनिर्देशेन ज्ञायते यत् प्रत्याहारेषु इत्संज्ञकानां वर्णानां ग्रहणं न भवति।

अत्र शंका समुदेति यत् प्रत्याहार इति पदस्य कोऽर्थ? तच्च केनापि संज्ञा कृता न वर्तते तदुत्तररुपेण उच्यते आदिरन्त्येनेत्येतत्सूत्रेण कृता: संज्ञा: प्रत्याहारशब्देन व्यवह्रियन्ते । अपरञ्च प्रत्याह्रियन्ते सक्षिप्यन्ते वर्णा: यत्राऽसौ प्रत्याहार:॥ 'आ-दिरन्त्येन सहेता' इति सूत्रं यां संज्ञा करोति सा प्रत्याहार:। तत्सङ्ख्या ४२ वर्तत इति ।

---

**4 ऊकालोऽज्झ्रस्वदीर्घप्लुत: ।1।1 ।27 ॥ वां काल इव कालो यस्य सोऽच् क्रमाद् ह्रस्व दीर्घप्लुत संज्ञ: स्वात् । स प्रत्येकमुदात्तादिभेदेनत्रिधा। उश्च ऊश्च ऊरूश्च इति व:।**

**5. उच्चैरुदात्त:।1।1 ।29 ॥ ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञ: स्यात् । आये ।**

**6. नीचैरनुदात: 1।2 ।30 ॥ स्पष्टम् । अर्वाङ्।**

---

**4. ऊकाल:, अच् ह्रस्वदीर्घप्लुत: त्रिपदात्मकमिदम् ।**

सूत्रप्रकार: संज्ञासूत्रमिदम् ।

समास: उकाल: इव कालोयस्य अच: स: अच् ।

ह्रस्वश्च दीर्घश्च प्लुतस्य ह्रस्वदीर्घप्लुत: सौत्रं पुंस्त्वमेकवचनम् ।

सरलार्थ : ह्रस्व-उकार:, दीर्घोकार: प्लुतोकार: त्रयाणां सम्मेलनेन बहुवचने व: षष्ठीबहुवचने वाम् इति रूपम्। तदेव वां काल इव कालो यस्य, सोऽच्ह्रस्वदीर्घप्लुतसंज्ञको भवति । यथा अ इति एकमात्रिक: ह्रस्व: । आ द्विमात्रिक: दीर्घ: ऊ३ त्रिमात्रिक: प्लुत: कथ्यते । अत्र कारिका विद्यते -

एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।

त्रिमात्रस्तु प्लुतो ज्ञेय: व्यञ्जनं चार्धमात्रकम् ॥

ऽ यस्य ह्रस्वदीर्घप्लुतसंज्ञा भवति तादृश: अच् पुन: उदात्तादिभेदेन अर्थात् उदात्तानुदात्तस्वरितभेदेन त्रिप्रकारक: भवति।

**विशेष:** - अत्र प्रश्न: समुदेति यत् ऊकालो - इत्यत्र वर्णसमाम्नाये प्राथम्येन पठित अकारोऽतोऽत्र अकालोऽजझ्रस्व इति कथं न ? तदा उच्यते - कुक्कुटरूतन्यायेन, अस्याशय: यदा आचार्य: सूत्रप्रणयनं करोतिस्म तदानीं प्रात: काले कुक्कुट: वदतिस्म तत्र तस्योच्चारणे ह्रस्वदीर्घप्लुतानां समावेशोऽपि वर्तते तत्कारणात् अपरञ्च प्रकृतिशिक्षाकारणात् ऊकाल: स्वीकृत:।

**5. उच्चै: उदात्त: द्विपदमिदंसूत्रम् ।**

**अनुवृत्ति:** -अच्।

**सूत्रप्रकार:** संज्ञासूत्रम् उदात्तसंज्ञा ।

**अर्थ :** उच्चारणस्थानानां यदूर्ध्वभाग: तत उत्पन्न: अच् उदातसंज्ञको भवति उच्चारणस्थानमग्रे आगमिष्यमति । अत्र आ इति ''निपाता आद्युदात्ता:'' इति फिट्सूत्रेण (12-4) उदात्त: । यत् शब्द: अन्तोदात: तत: जस् विभक्तौ ''अनुदातौ सुप्पितौ'' इति अनुदात: ''त्यदादीनाम:'' इति दकारस्य अकारे 'अतो गुणे' इति पररुपे सति ''एकादेश उदातेनोदात:'' इति अकार उदात्त:, जश: शी - ई, य - ई अत्र उदातानुदाततयो: गुणैकादेशे सति 'ये' ''एकादेश उदातेनोदात:'' इति एकार उदात्त:।

अयं ऋग्वेदस्य 1।16 ।18 मंत्र: आये तन्वन्ति रश्मिभिस्तिर: समुद्रमोजसा मरूद्भिरवन् आगहि।

अत्र 'आ ये इति' द्वौ अपि उदातौ स्त:।

**6. नीचैः अनुदात्तः द्विपदमिदं सूत्रम् ।**

**अनुवृत्तिः** - अचः।

**संज्ञासूत्रम्** - अनुदातसंज्ञा ।

नीचैः शब्दस्यार्थः ताल्वादिभागस्य अधःस्थानमपेक्षितम् ।

**अर्थः** ताल्वादिषु स्थानेषु नाम उच्चारणस्थानेषु अधोभागात् उत्पन्नः अच् अनुदात्तसंज्ञाकः ।

**उदाहरणम्** - अर्वा्ङः इत्यत्र अकारः, अनुदातः **विग्रहः** अर्वन्तमञ्चतीति ऋधातोः वनिप्प्रत्ययेऽनुबन्धलोपे गुणे अर्वन् वकारोत्तरवर्ती य अकारः ''अनुदात्तौ सुप्पितौ'' इत्यनेन अनुदात्तः ऋधातोः कारणत्वात् धांतोः इति आद्युदातः इत्थमर्वन् आद्युदात्तः । अर्वन् अञ्च क्विन् उपपदसमासे क्विन् प्रत्ययलोपे नलोपे दीर्घे संयोगान्तलोपे वकारघटकः अकारः एकादेश उदातेनोदात्तः इति उदातः, उदात-स्वरं विहाय पूर्वस्वरः अकार- ''अनुदातं पदमेकवर्जम्'' इति नियमेन अनुदात्तः जातः ।

---

**(7) समाहार : स्वरितः ।1 ।2 । 31 ॥ उदात्तानुदातत्त्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात् ।**

**(8) तस्यादित उदात्तमर्धह्रस्वम् । 1 ।2। 32॥ ह्रस्वग्रहणमतन्त्रम्। स्वरितस्या-दितोऽर्धमुदात्तं बोध्यम् । उत्तरार्धं तु परिशेषादनुदात्तम् । तस्य चोदात्तस्वरितपरत्वे श्रवणं स्पष्टम् अन्यत्र तूदात्तश्रुतिः प्रातिशाख्ये प्रसिध्दा । क्व वोऽश्वाः । रथानां न येऽराः । शतचक्रं योऽह्यः । इत्यादिष्वनुदात्तः । अग्निमीले इत्यादावुदात्तश्रुतिः ।**

---

**(10) समाहारः, स्वरितः द्विपदमिदंसूत्रम्।**

**अनुवृत्तिः** उदात्तानुदात्तयोः । समाहरणं समाहारः। स्वरितः स्वरः ।

**सूत्रप्रकारः** संज्ञासूत्रम् (स्वरितसंज्ञा)

**सरलार्थः** उदात्तधर्मस्य अनुदात्तस्य च यत्र समभागो भवति स स्वरित इति उच्यते ।

**उदाहरणम्** - अकुहविसर्जनीयानां कण्ठः इति नियमेन अकारस्योच्चारणस्थानं कण्ठः।




**(8) तस्यादितः उदात्तमर्धह्रस्वम्।**

**पदच्छेदः** - तस्य, आदित उदात्तम्, अर्धह्रस्वम् चतुष्पदात्मकमिदं सूत्रम्।

**अनुवृत्तिः** नैव अपेक्षते ।

**सूत्रप्रकारः** नियमसूत्रम् इदम् । तस्य इत्युक्ते स्वरितस्य इति ज्ञातव्यम् ।

**सरलार्थ :** स्वरितस्य स्वरस्य आदिभागः यदर्धं तदुदात्तम् तदति-रिक्तमुत्तरभागोऽ धर्मनुदात्तं भवति ।

ह्रस्वग्रहणमतन्त्रमिति - ह्रस्व-स्वरिते अर्धमुदात्तमर्धमनुदात्तं संभवति किन्तु दीर्घप्लुतयोः अर्धह्रस्वमिति न भवितुं शक्यते तदेव आदाय उच्यते 'ह्रस्वग्रहणम्' अतन्त्रम् नाम अविवक्षितम् ।

**विशेषार्थ :** न विद्यते तन्त्रं वाच्यार्थलक्षणं प्रधानं यस्य तद् अतन्त्रम् अविवक्षितमित्यर्थः। स्वरितस्य स्वरस्य आदितः अर्धमुदात्तो भवति, शेष-भागः अनुदात्तः, अनुदात्तस्य स्पष्टं श्रवणं तदानीं भवति यदा ततः परम् उदातो वा स्वरितो भवेत्। तद्विपरीतं उदात्तस्वरितौ न भवतः चेत् अनुदात्तभागस्य उदात्ततर-नामकश्रुतिः ऋग्वेदे प्रसिद्धा वर्तते ।

तस्योदात्ततरोदात्तदर्धमात्राधर्मेव वा ।

अनुदात्तः परः शेषः स उदातश्रुतिः ॥ ऋक्. प्राति. 3, 4-5

**उदाहरणम्** – क्व वोऽश्वाः इत्युदाहरणे क्व इत्यत्र ह्रस्वःस्वरितः, ततः परं वो इति उदात्तपदम् उदात्ते परे अनुदात्तश्रुतिः स्पष्टीभवति **क्व** किमोऽत् इति किम्शब्दात् अत् प्रत्यये 'किम + अत्' अतो गुणे इति पररूपम् अत् प्रत्ययस्य तकारस्येत्संज्ञकत्वात् तित्स्वरितमिति स्वरितस्वरः ।

**वः** अनुदात्तं सर्वमपादादौ इति अनुदात्तः । अश्वाः – अश्धातोः अंशूप्रुषिलटि–कणिखटिविशिभ्यः क्वन् । अनुबंधलोपे 'अंश+वन्' नलोपे, जस्–प्रत्यये, सर्वणदीर्घे रूत्वे, विसर्गे, अश्वाः ञिनित्यादिर्नित्यम् नित्वात् आद्युदात्तः । **वः** – अश्वा– वोऽश्वा 'एकादेश उदातेनोदात्तः' पूर्वरूपे सति अनुदात्तोदात्तयोः **वो** उदात्तः ।

इत्थं क्व इति स्वरितादनन्तरं वो इति उदात्तः, इति कारणात् उत्तरार्धे स्वरितभागे अनुदात्तस्य श्रवणम् उपरोक्तनियमेन जायते यत् अनुदात्त (–) अनेन चिह्नेन भवति । यत्र उपरिचिह्नं भवति । तत्स्वरितस्य अधः चिह्नमनुदात्तस्य भवति । क्व इति ह्रस्व–स्वरितस्योदाहरणम् अस्ति ।

**दीर्घस्वरितस्योदाहरणम्** – रथानां येऽराः । 'यत्' शब्दात् जस् विभक्तौ अनुबन्धलोपे 'यत्–अस्' त्यदादीनामः इति अत्वे पररूपे 'य–अस्' जसःशी अनुबन्धलोपे य–ई गुणे, ये इत्यत्र एकारः फिट्स्वरेण अन्तोदात्तः ।

**अराः** अर+जस् 'फिषोऽन्त उदात्त' इति उणादिसूत्रेण अन्तोदात् कारणात् अकारः अनुदात्तः । ये+अराः इत्यत्र एङःपदान्तादति 6, 1, 109 इत्यनेन पूर्वरूपे सति (ए + अ = अ) उदात्तः ए तथा अनुदात्तः अकार द्वयोरेकादेशेन एकारः स्वरितेवाऽनुदाते पदादौ 8.2.6 इति स्वरितः ।

इत्थं येर इति एकारः स्वरितः तत्पश्चात् अराघटक आ उदात्तः अतः उत्तरार्धे स्वरितभागे अनुदातस्य श्रवणं भवति अत्र स्वरितः द्विमात्रिकः (2) ।

**शतचक्रं योऽ३ह्यः** स्वरित परके स्वरिते अनुदात–श्रवणस्य उदाहरणम् इदम्। यत् – शब्दात् सुप्रत्यये अनुबन्धलोपे यत् इति फिषोऽन्तोदात्तः इति फिट्सूत्रात् अन्तोदात्तः त्यादादीनामः इति अत्वे, पररूपे च यस् ससजुषो रुः इति रुत्वे यर् –अह्यः अतो रोरप्लुतादप्लुते इति रेफस्य उत्वे 'य उ अह्यः' आद्गुणः इति गुणे, उदात्तानुदात्तयोः ओकाराकारयोः सम्मेलनेन स्वरितस्वरः, ओकारात् पश्चात् ह्यः अपि स्वरितः ओ३ इत्यस्य उत्तरार्धभागे अनुदात्तस्य श्रवणं त्रिमात्रिकं स्पष्टम् कम्प इत्युच्यते ।

**अग्निमीले** – इति वाक्यांशे इले क्रियापदमस्ति । पदपाठे पृथगन्वयकारणात् तिङ्ङतिङः इति सर्वानुदात्तः । संहितापाठे अग्निपदे ग्नि इति प्रत्यस्वरेण अन्तोदात्तः इकार उदात्तः । प्रारंभिक अकारानुदातः तत्पश्चात् इकार अनुदात्तकारणात् स्वरितः ईकारस्य पश्चात् आगतः वर्णः मूलरुपेण अनुदात्तः, न उदात्तः, न च स्वरितः अतः स्वरितस्य पूर्वभागे उदात्तस्य श्रवणं भवति अवशिष्टानुदात्तस्य श्रवणं न, ले इत्यत्र एकश्रुतिर्भवति। तदेव वैदिकसाहित्ये **प्रचय** इत्युच्यते। एकश्रुतौ स्वरमिश्रणे उदात्तानुदातयोरंशस्य पार्थक्यं न भवति । प्रचयवर्णाः चिह्नरहिताः भवन्ति इति ज्ञेयम् ।

**स** – उदात्तानुदात्तस्वरित स्वदीर्घप्लुतसंज्ञकोऽच् पुनः अननुनासिकः अनुनासिक भेदेन द्विधा भवति ।

---

**(9) मुखनासिकावचनोऽनुनासिकः 1, ।1,।8॥ मुखसहित नासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात्। तदित्थम् अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः। लृवर्णस्य द्वादश, तस्य दीर्घाभावात्। एचामपि द्वादश, तेषां ह्रस्वाभावात्।**

---

**(6) पदच्छेदः** – मुखनासिकावचनः, अनुनासिकः।

**सूत्रप्रकारः** – संज्ञासूत्रम् ।

**समासः** – मुखसहिता नासिका मुखनासिका, उच्यते असौ वचनः। मुखनासिकया वचनः मुखनासिकावचनः। नासिकामनुगतः अनुनासिकः ।

**सूत्रार्थः** मुखेन सह नासिकया वचनः वर्ण उच्चरितो भवति, तस्य अनुनासिक संज्ञा भवति। यथा ञमङणना एते अनुनासिकाः ये अनुनासिका न भवति ते अननुनासिकेति उच्यन्ते। यथा – क ख ग घ इत्येवमादयः ।

एवं प्रकारेण – ह्रस्वदीर्घप्लुतोदात्तानुदात्तानुनासिकाननुनासिकभेदेन अ इ उ ऋ इति चतुर्ण्णामपि प्रत्येकेषाम् 18 भेदाः भवन्ति ।

| ह्रस्वभेदाः | दीर्घभेदाः | प्लुतभेदाः |
|---|---|---|
| (6) | (6) | (6) – 18 |
| (1) उदात्त | उदात्त | उदात्त |
| (क) अनुनासिक | अनुनासिकः | अनुनासिकः |
| (ख) अननुनासिकः | अननुनासिकः | अननुनासिकः |
| (2) अनुदात्तः | अनुदात्तः | अनुदात्त |
| (क) अनुनासिकः | अनुनासिक | अनुनासिक |
| (ख) अननुनासिकः | अननुनासिकः | अननुनासिकः |
| (3) स्वरितः | स्वरितः | स्वरितः |
| (क) अनुनासिकः | अनुनासिकः | अनुनासिकः |
| (ख) अनुनासिकः | अननुनासिकः | अननुनासिकः |

लृकारः दीर्घो न भवति तस्य प्लुतह्रस्वदीर्घमेलनेन 12 भेदाः। ए ऐ औ च ह्रस्वा न भवति अतः 12 भेदाः।

**(10) तुल्यास्यप्रयत्नं सवर्णम्।1।1।9॥ ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्। अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा । लृतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ। ञमङणनानां नासिका च। एदैतोः कण्ठतालू। ओदोतौः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। नासिकानुस्वारस्य।**

(10) **पदच्छेदः** – तुल्यास्यप्रयत्नं, सवर्णम्, द्विपदं, सूत्रम् ।

**सूत्रप्रकारः** – संज्ञाविधायकं, सवर्णसंज्ञा ।

**सूत्रार्थः** – ययोः, द्वयोः वर्णयोः उच्चारणस्थानम् आभ्यन्तर यत्नश्च तुल्यं भवति तयोः परस्परं सवर्णसंज्ञा भवति।

**उदाहरणम्** – यथा अ + आ, इति द्वयोः अकारहकारयोश्च। तथैव ककारवकारयोश्चसवर्णसंज्ञा भवति ।

**विशेषः** उच्चारणस्थानम् – आस्यम् मुखम् तत्रैव सर्वे वर्णाः जायन्ते यथा – तालु कण्ठः जिह्वादन्तादयः एतेषा स्थानम् मुखे वर्तते। अस्यन्ते उच्चार्यन्ते वर्णा अनेनेति आस्यम् ।

**समासः** आस्ये भवम् आस्यम् शरीरावयवाद् यत् । प्रकृष्टो यत्नः प्रयत्नः। आस्यं च प्रयत्नश्च आस्यप्रयत्नौ, तुल्यौ आस्यप्रयत्नौ यस्य वर्णजालस्य तत्तुल्यास्यप्रयत्नम् । समानः वर्णः। सवर्णः। वर्णजालस्य उदाहरणात् सवर्णम् इति ।

**अकुहविसर्जनीयानां कण्ठः** अकारः हकारः क ख ग घ ङ विसर्गः एते अष्टौ कण्ठस्थानात् उत्पद्यन्ते ।

**इचुय** – इ च छ ज झ ञ य श एते तालुजाः ।

**ऋटुरषा** – ऋ ट ठ ड ढ णस्य एते मूर्धन्याः ।

**लृतुलस** – लृ त थ द ध न ल स एते दन्त्याः ।

**उपूपध्मा** – उ प फ ब भ म उपध्मानीयाः एते ओष्ठ्याः ।

**ञमङण** – ञ म ङ ण न एते वर्णाः नासिकया अपि उच्चार्यन्ते।

**एदैतोः** – ए ऐ द्वयोः कण्ठतालू स्थाने स्तः ।

**1 – तन्मिथः परस्परम् ।**

**यत्नोद्विधा, आभ्यन्तरो बाह्यश्च। आद्यश्चतुर्धा – स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात् । तत्र स्पृष्टं प्रयत्नं स्पर्शानाम् । ईषत्स्पृष्टमन्तस्थानाम् । विवृतमूष्मणां स्वराणां च। ह्रस्वस्यावर्णस्य प्रयोगे संवृतम् । प्रक्रियादशायां तु विवृतमेव।**

ओ. औ. इति वर्णयोः कण्ठोष्ठम् स्थानद्वयम् अस्ति। व इति वर्णस्य दन्ताः ओष्ठौ च उच्चारणस्थानम्। ककारखकारयोः प्राग् अग्रे अर्धविसर्गः जिह्वामूलीय इति उच्यते तस्य स्थानं जिह्वायाः मूलभागो वर्तते ।

**यत्नोद्विधा** – वर्णानामुत्पत्तेः प्राग्भावी, उर्ध्वगामी च यत्न इति कथ्यते। स द्विप्रकारकः यथा आभ्यन्तरो प्रथमः यः वर्णानाम् उत्पत्तेः पूर्वो भवति। स आद्यः आभ्यन्तरयत्नः चतुर्धा नाम चतुष्प्रकारकः स्पृष्टम्, ईषत्स्पृष्टम्, विवृतम्, संवृतः। तेषु चतुर्षु आभ्यन्तरयत्नेषु स्पर्शानां स्पृष्टं प्रयत्नोऽस्ति। अन्तः स्थानाम् ईषत्स्पृष्टप्रयत्नोऽस्ति। उष्मणां (शषसह) इति वर्णनां स्वराणां च विवृतप्रयत्नोऽस्ति। ह्रस्वस्य अवर्णस्य प्रयोगे संवृतम्। केनापि वर्णेन सह शास्त्रीय-प्रक्रिया भवति चेत् विवृतो यत्नो भवति।

**आभ्यन्तरयत्नबोधकं चक्रम्**

(1) स्पृष्टप्रयत्नः क – तः मपर्यन्तम्, 25 वर्णाः (स्पर्शाः)

(2) ईषत्स्पृष्टप्रयत्नः – य व र ल यण् 4 वर्णाः (अन्तस्थाः)

(3) विवृतप्रयत्नः – अ इ उ ऋ लृ ए ओ ऐ ओ अच् (स्वराः)

(4) संवृतप्रयत्नः – अकारः केवलः प्रक्रियादशां विहाय ।

**एतच्च सूत्रकारेण ज्ञापितम्। तथाहि (11) अ अ । 8 । 4 । 68 ॥ (इति) विवृतमनूद्य संवृतोऽनेन विधीयते। अस्य चाष्टाध्यायीं सम्पूर्णां प्रत्यसिद्धत्वाच्छास्त्रदृष्ट्या विवृतत्वमस्त्येव। तथा च सूत्रम् (12) पूर्वत्रासिद्धम्। 8।2।1॥ अधिकारोऽयम्। तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिध्दा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्। बाह्यप्रयत्नस्त्वेकादशधा-विवारः संवारः श्वासो नादो घोषोऽघोषोऽ ल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति**

(11) **पदच्छेदः** – अ, अ ।

**समासः** – अत्र नास्ति।

**अनुवृत्तिः** – नागच्छति।

**सूत्रप्रकारः** – विधिसूत्रम् ।

**सरलार्थः** – विवृतस्य अकारस्य संवृतोऽकारो भवति।

**विशेषार्थः** प्रथमः अकारः लुप्तषष्ठीको वर्तते, यस्यार्थः स्थानलाभात् अकारस्यस्थाने, द्वितीयोऽकारः प्रथमान्तः विधेयः अस्ति। विभक्तेरभावो यद्दृश्यते तत् छन्दोवत् सूत्राणि भवन्ति इति नियमात् । प्रथमोऽकारः विवारः द्वितीयः संवारः, अतः अकः सवर्णे दीर्घः इति दीर्घो न भवति।

इदं सूत्रम् अन्तिमसूत्रम् अष्टाध्याय्या अत एव सर्वापेक्षपा असिद्धं भवति। अकार-आकारयोः ह्रस्व-दीर्घयोः सवर्णाभावात् अकः सवर्णे दीर्घः इति दीर्घो न भविष्यति, तदनेन अकारस्य विवृतं विधानं कृतवान् तत्फलम् – दण्ड +आढकम् प्रभृतीनि रूपाणि सिद्ध्यन्ति।

**(12) पदच्छेदः**– पूर्वत्र, असिद्धम् द्विपदं सूत्रम्।

**समासः**– न सिद्धम् इति असिद्धम् नञ् समासः।

**सूत्रप्रकारः**– अधिकारसूत्रम्।

**सरलार्थः**– अष्टाध्याय्याः अष्टौ अध्यायाः सन्ति। तत्र एकस्मिन् अध्याये 4 पादाः सन्ति तत्र 7 अध्यायाः अष्टमाध्यायस्य प्रथमपादः इति पर्यन्तं सपादसप्ताध्यायी, अतः पर त्रयः पादाः त्रिपादी उच्यते, तत्र सपादसप्ताध्यायीं प्रति त्रिषु पादेष्वपि यानि सूत्राणि सन्ति तेषु पूर्वापेक्षया उत्तरमसिद्धम् भवति।

---

**खयां यमाः खयः  क  पौ विसर्गः शर एव च**

**एते श्वासानुप्रदाना अघोषाश्च विवृण्वते ।1।**

**कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः**

**अयुग्मा वर्गयमगाः यणश्चाल्पासवः स्मृताः।2 ॥**

---

**बाह्यप्रयत्नस्त्वेकादशधा–**

| | |
|---|---|
| (1) विवारः | (2) संवारः |
| (3) श्वासः | (4) नादः |
| (5) घोषः | (6) अघोषः |
| (7) अल्पप्राणः | (8) महाप्राणः |
| (9) उदात्तः | (10) अनुदात्तः |
| (11) स्वरितः | |

खयां यमाः खयप्रत्याहारस्थवर्णाः तेषां च ये यमाः जिह्वामूलीयः, उपध्मानीयः, विसर्गः, शरप्रत्याहारवर्णाः एते श्वासनामकबाह्यप्रयत्नवन्तः अघोषप्रयत्नवन्तः विवारप्रयत्नवन्तः च सन्ति। एतदतिरिक्ता ये वर्णाः सन्ति हश् तत्सम्बन्धी यमाः, अनुस्वारः घोष प्रयत्नवन्तः संवारप्रयत्नवन्तः नादप्रयत्नवन्तः भवन्ति। अयुग्माः प्रथम–तृतीय–पञ्चमाः कगङ.ाः इत्यादयः एवं वर्गस्य यमगाः अल्पासवः नाम अल्पप्राणाः भवन्त तेषामुच्चारणे अल्पवायुः लगति।

**वर्गेष्वाद्यानाम्**– क वर्गः क ख ग घ ङ ।
च वर्ग च छ ज झ ञ ।
ट वर्गः ट ठ ड ढ ण ।
त वर्ग – त थ द ध न ।
प वर्ग – प फ ब भ म ।

एषु पञ्चमाः वर्णाः ङ ण ञ न म् इति ।

तेषु परेषु पूर्वसदृशो वर्णः यमः वैदिकप्रातिशाख्ये प्रसिद्धः यथा–पलिक्क्नी चख्खनतुः अग्ँ्गनः घ्नन्तिः रेखांकिताः यमाः इति।

---

**वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशवर्णः प्रातिशाख्ये प्रसिद्धः। पलिक्क्नीः, चख्खनतुः, अग्निः घ्नन्ति। इत्यत्र क्रमेण कखगघेभ्यः परे तत्सदृशा एव यमाः। तत्र वर्गाणां प्रथमद्वितीयाः खयः तथा तेषामेव यमाः, जिह्वामूलीयोपध्मानीयौ विसर्गः शषसाश्चेत्येतेषां विवारः श्वासोऽघोषश्च। अन्येषां तु संवार नादोघोषश्च। वर्गाणां प्रथमतृतीयपञ्चमाः प्रभमतृतीययमौ यरलवाश्चाल्पप्राणाः। अन्ये महाप्राणा इत्यर्थः।**

---

बाह्यप्रयत्नेषु – वर्गाणां – क वर्ग च वर्ग ट वर्ग त वर्ग पवर्गाणां प्रथमद्वितीयाः कचटतपाः खफछठथाः नाम खयः इति उच्यतेले। एतेषां यमाः जिह्मूलीयः, उपदमानीयः, विसर्गः, शषस इत्येषां विवारः श्वासः अघोषः बाह्यप्रयत्नः।

अन्येषां हश्प्रत्याहारे समागतानां वर्णानां संवारः नादः घोषः प्रयत्नोऽस्ति। वर्गाणां कवर्गादीनां प्रथमतृतीयपञ्चमाः कगङ.चजञप्रभृतीनां प्रथम तृतीयवर्णानां ये यमाः। य र ल व एतेषामल्पप्राणप्रयत्नः। अन्ये द्वितीयचतुर्थवर्णाः शषसहाः महाप्राणप्रयत्नवन्तः।

इदानीमुच्यते आभ्यन्तर यत्नस्य सवर्ण संज्ञायामुपयोगः तर्हि बाह्यप्रयत्नं किमर्थम् ? तदाह – आन्तरतत्म्यपरीक्षाया मुपोक्ष्यन्ते – अस्याभिप्रायः अग्रे नादस्य घोषस्य संवारस्य तादृशो वर्गचतुर्थः वाग्–हरिः इति प्रयोगे हकारस्य स्थाने पूर्वसवर्णः घकारः आन्तरतम्यतादेव जायते ।

तत्रस्पृष्टं प्रयत्नं स्पर्शानाम् पूर्वोक्तं तर्हि के स्पर्शाः? इति जिज्ञास्य कादयोमावसानाः स्पर्शाः कतः म इति यावत् ये वर्णास्ते स्पर्शसंज्ञकाः। एवमेव के अन्तः स्थाः? यणः अन्तःस्था यरलवा इत्यर्थः। शषसहा उष्माणः। अच्ः अ इ उ ऋ लृ ए ओ ऐ औ इति स्वराः कथ्यन्ते। ᳵक प इति जिह्नामूलीयः। फ फ इति उपध्मानीयः। एकारऐकारयोः स्थानप्रयत्नसाम्यादपि उभयोः न सावर्ण्यम् यदि सवर्णंस्यात्तर्हि ऐऔच् इति सूत्रस्य प्रारंभो न स्यात् । अत एकार ऐकारयोः द्वादश द्वादश इति आहत्य 24 भेदा न भवन्ति इति।

अञ्झलोः सवर्णसंज्ञा विवृतमूष्मणां स्वराणां च इति कृत्वा भवति तस्य निषेधो नाऽझलौ इत्यनेन क्रियते। अतो वर्णसमाम्नायस्य अकोरण सह एव हकारस्य सवर्ण–संज्ञा–याः निषेधः। दीर्घाकारेण या सवर्णसंज्ञा तस्याः निषेधः न इति वक्तुं शक्यते यतो हि तत्र दीर्घाकारस्य प्रश्लेषः।

तस्य फलम् – विश्वपाभिरित्यत्र आकारस्य हकारं मत्वा होढ़ इति प्राप्तं ढत्वं न भवति, यतो हि आकार हकारयोर्न सवर्णं, नाऽझलौ इत्यनेन निषेधात्।

**अत्र अण् प्रत्याहारः परेणणकारेण** वर्तते तत्कारणात् य वलानां तत्र समावेशात् यँ वँ लँ इति कृत्वा द्वयोः द्वयोः ग्रहणम्। पूर्वाः यवलाः अनुनासिकाः अपरे अननुनासिकाः।

---

**बाह्यप्रयत्नाश्च यद्यपि सर्वणसंज्ञायामनुपयुक्ताः तथाप्यन्तरतम्यपरीक्षायामुयोक्ष्यन्त इति बोध्यम्। कादयो मावसानाः स्पर्शाः। यरलवाः अन्तस्थाः। शषसहा उष्माणः। अचः स्वराः। ᳵक ᳵप इति कपाभ्यां प्रागर्धविसर्ग सदृशो जिह्वामूलीयोपध्मानीयौ। अं अः इत्यचः परावनुस्वारविसर्गौ इति स्थानप्रयत्नविवेकः। ॠलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् (वा. 105) अकारहकायोरिकारश कारयोर्ऋकारषकारयोर्लृकारसकारयोश्चमिथः सावर्ण्ये प्राप्ते (13) नाऽऽज्झलौ। 1। 1। 10॥ आकारसहितोऽच् आच्, स च हल् चेत्येतौ मिथः सवर्णौ न स्तः। तेन दधीत्यस्य हरति, शीतलं, षष्ठं, सान्द्रमित्येतेषु परेषु यणादिकं न । अन्यथा दीर्घादीनामिव हकारादीनामपि ग्रहणकशास्त्रबलादच्त्वं स्यात्। तथा हि सूत्रम्-(12) पूर्वत्रासिद्धम् । 8। 2। 1 ।**

---

अकारात्परमुपरि अं, अनुस्वारः, अः विसर्गः, इति संज्ञा ।

इति- स्थानम् - उच्चारणस्थानम् प्रयत्नः नाम सवर्णसंज्ञोपयोगिसंज्ञाः उक्ताः, अनेन केचन विप्रतिपत्तय दोषाः आ गच्छन्ति त अग्रे अकारहकारयोरित्युच्यते तत्पूर्वं ऋकारलृकारयोः स्थानभेदेऽपि सवर्णसंज्ञा वक्तव्या (1.5) अ + ह, इ + श, ऋ + ष, लृ + स, इति चतुर्षु स्थलेषु स्थानप्रयत्नसाम्यात् सवर्णसंज्ञा जायते इति चतुर्षु स्थलेषु स्थानप्रयत्नसाम्यात् सवर्णसंज्ञा जायते तन्न इति निषेधः क्रियते अग्रिमेन सूत्रेण नाऽझलौ 1.1.30.

**पदच्छेदः** – न, अञ्झलौ ।

**अनुवृत्तिः** तुल्यास्यप्रयत्नं सवर्णम्।

**समासः** आभ्यां सहितः अच् इत्याच् स च हल् च आज्झलौ, न आज्झलौ नाज्झलौ ।

**सूत्रप्रकारः** निषेधसूत्रम् ।

**सरलार्थः** दीर्घाकारप्लुताकाराभ्यां सहितस्य अचः हल्भिः सह सवर्णसंज्ञा न भवति, इत्यर्थः।

**विशेषार्थः** अत्र दीर्घाकारस्य प्लुताकारस्य परस्परदीर्घेण एकः आकारः तस्य नकारेण दीर्घे, अच् हल् इति द्वयोः द्वन्द्वः आज्झलौ।

**साधनिकाः** **दधि+हरति**, अत्र हकारेण सह अकारस्य सवर्णत्वात् यण् प्राप्तिः नाज्झलौ इति सवर्णस्य निषेधे तत्कारणात् यण् न । **दधि+शीतलम्** अत्र प्राप्तसवर्णस्यदीर्घस्य अनेन निषेधे, अन्यथा दीर्घप्राप्तिः अकः सवर्णे दीर्घः इति। **दधि +षष्ठम् दधि+सान्द्रम्** उभयत्र यण्कार्यं न।

---

**(14) अणुदित्सवर्णस्य चाऽप्रत्ययः।1 ।1 ।69 ॥ प्रतीयते विधीयते इति प्रत्ययः – अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात् । अत्राण् परेण णकारेण कु चु टु तु पु एते उदितः। तदेवम् । अ इत्यष्टादशानां संज्ञा। तथेकारोकारौ। ऋकारस्त्रिंशतः। एवम् लृकारोऽपि। एचो द्वादशानाम् । एदैतोरोदौतोश्च न मिथः सावर्ण्यम् 'ऐऔच्' इति सूत्रारम्भ सामर्थ्यात्। तेनैचश्चतुर्विंशतेः संज्ञाः स्युरिति नापादनीयम्। 'नाज्झलौ' (सू.13) इति सावर्ण्यनिषेधो यद्यप्याव्यक्षरसमाम्नायिका नामेव, तथापि हकारस्याऽकारो न सवर्णः, तत्राप्याकारस्य प्रश्लिष्टत्वात्। तेन विश्वपाभिरित्यत्र होढः (624) इति ढत्वं न। अनुनासिकाननुनासिकभेदेन यवला द्विधा। तेनाननुनासिकास्ते द्वयोर्द्वयोः संज्ञा।**

---

अन्यथा – नाज्झलौ इति सूत्राभावे अणुदित् सूत्रेण सवर्णानां यथा अकारेण अष्टादशानां वर्णानां ग्रहणं तथैव अकार हकारयोरिकारशकारयोः स्थानयत्नसाम्यात् अच्त्वमाश्रित्य यणादिकं प्राप्नोति।

अत्र प्रश्नः समुदेति यत् सवर्णविधायकं सूत्रम् – तुल्यास्येति ग्राहकं सूत्रं किम् इति जिज्ञास्य उच्यते अणुदिदिति–

(14) **पदच्छेदः** – अण्, उदित्, सवर्णस्य, च, अप्रत्ययः।

**अनुवृत्तिः** – एवं रूपम् ।

**सूत्रप्रकारः** – संज्ञा विधायकं सूत्रम्।

**समासः** – न प्रत्ययः अप्रत्ययः। उत् इत् यस्य स उदित्। समानः वर्णः यः स सवर्णः, तस्य सवर्णस्य।

**सरलार्थः** – अण् तथा च उदित् यौ उद्देश्यदले भवतः तौ एव सवर्णानां बोधकौस्तः।

**विशेषार्थः** –यद् विधीयते तत्प्रत्ययः तद्भिन्नः अप्रत्ययः अइउणादिसूत्रघटक वर्णाः ते अप्रत्ययाः उद्देश्यभूताः अपि च कु चु टु तु पु एते उदितः। एव सवर्णानां वोधकाः अत अ एकोऽपि अष्टादशानां संज्ञा एवम् इकारोकारौ। ऋकारलृकरयोः द्वयोः सवर्णसंज्ञाऽस्तिः अतः 18 + 12 सम्मेलनेन ऋकारस्य त्रिंशद्भेदाः सन्ति। तथैव लृकारोऽपि 30 प्रकारकाणां संज्ञा। एचो द्वादशानाम्। यवलाः द्वयोः द्वयोः बोधकाः।

---

**(15) तपरस्तत्कालस्य।1 ।1।701 । तः परो यस्मात् स च तात्परश्चो च्चार्यमाणः समकालस्यैव संज्ञा स्यात्। तेन अत् इत् उत् इत्यादयः षण्णां संज्ञा। ऋत् इति द्वादशानाम्।**

**(16) वृद्धिरादैच्।1 ।1 ।1॥ आदैच्च वृद्धिसंज्ञः स्यात्।**

**(17) अदेङः गुणः ।1 । 1 । 2॥ अदेङ् च गुण संज्ञः स्यात्।**

---

(15) **पदच्छेदः** – तपरः तत्कालस्य।

**समासः** – तात् परः तपरः, तः परो यस्मात् सः। स चाऽसौ कालः तत्कालः।

**अनुवृत्तिः** – सवर्णस्य, स्वरूपम्।

**सूत्रप्रकारः** – संज्ञापरिभाषासूत्रम्।

**सरलार्थः** तकारात् परः यः भवति स स्वस्य उच्चारणकालसदृशस्य सवर्णस्य बोधकः। एवमेव तः परो यस्माद् भवति सोऽपि वर्णः समकालस्य सवर्णस्यैव बोधको भवति ।

यथा – अत् इत् उत् इत्यत्र तकारः परो वर्तते अतः ह्स्वः अकारः तस्य षड्भेदाः, इकारः तस्य षड्भेदाः उकारः षडभेदाः तस्यैव बोधकाः भवन्ति। अन्यथा तकारग्रहणाभावे अष्टादशानां बोधकाः भवति। अन्यथा तकारग्रहणाभावे अष्टादशानां बोधका भवन्ति। ऋकारः लृकार मेदेन 6 + 6 द्वादश।

(16) **पदच्छेदः** – वृद्धिः आदैच् द्विपदमिदम् ।

**समासः** – आत् च ऐत् च आदैच्।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – आत्, ऐ, और, इति त्रयाणां वृद्धिसंज्ञा भवति।

**विशेषार्थः** – अत्र तपरकरणात् आकारस्यैव न तु अकारस्य ऐकार औकारयोरेव वृद्धिःसंज्ञा।

(17) **पदच्छेदः** – अदेङ् गुणः द्विपदमिदम्।

**समासः** – अत् च एङ् च अदेङ्।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – अकार (ह्स्वअकारः) ए, ओ, इति त्रयाणां गुणसंज्ञा भवति।

---

**(18) भूवादयो धातवः। 1 । 3 । 1 ॥ क्रियावाचिनो भ्वादयो धातुसंज्ञा स्युः।**

**(19) प्राग्रीश्वरान्निपाताः। 1 । 4 । 53 ॥ इत्यधिकृत्य।**

**(20) चादयोऽसत्वे। 1 । 4 । 57॥ अद्व्यार्थाश्चादयो निपाताः स्युः।**

**(21) प्रादयः। 1। 8। 60॥ अद्रव्यार्थाः प्रादयस्तथा।**

---

(18) **पदच्छेदः**– भूवादयः, धातवः द्विपदमिदम्।

**समासः** – भूश्च वाश्च भूवौ, आदिश्च आदिश्च आदी भूवौ आदी येषां ते भूवादयः।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – क्रियाया वाचका भूप्रभृतयः वासदृशाः धातुसंज्ञकाः भवन्ति।

**विशेषार्थः** – वा इत्यनेन वागतिगन्धनयोः धातोर्ग्रहणात् सादृश्यं क्रियावाचकत्वेन गृहीतम्। अतोऽत्र क्रियावाचक इति पदमुपयुज्यते।

---

(19) **पदच्छेदः** – प्राक्, रीश्वरात्, निपाताः

**सूत्रप्रकारः** – संज्ञाऽधिकारसूत्रम्।

**सरलार्थः** – सूत्रे ईश्वर शब्दस्य प्रयोगमकृत्वा रीश्वरेपि प्रयुक्तः, तत्कथम् ? तत्फलं यदस्य अधिकारस्य अवधिः ईश्वरेतोसुनकसुनौ न अपितु अधिरीश्वरे इत्यत्र रीश्वर इति प्रतीकमादाय ततः प्राक् निपाताः इति अधिकारः अतः स्पष्टप्रतीत्यर्थम् इति। 81 सूत्रेषु निपाताः अस्याधिकारः।

(20) **पदच्छेदः** – चादयः, असत्वे द्विपदमिदं सूत्रम्

**समासः** न सत्वम्, असत्वम् तस्मिन् असत्वे। च आदिर्येषां ते चादयः॥

**अनुवृत्तिः** निपाताः।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

---

**(22) उपसर्गाः क्रियायोगे। 1 । 4। 56॥**

**(23) गतिश्च। 1 । 4। 60॥ प्रादयः क्रियायोगे उपसर्गसंज्ञा गतिसंज्ञाश्च स्युः। प्र परा अप सम अनु अव निस् निर् दुस् दुर् वि आङ नि अधि अपि अति सु उत् अभि प्रति परि उप एते प्रादयः।**

**(24) न वेति विभाषा। 1 । 1। 44 ॥ निषेधविकल्पयोर्विभाषा संज्ञा स्यात्।**

---

**सरलार्थः** लिङसंख्या-भिन्नम् अद्रव्यम्। तादशाः चादयः निपाताः भवन्ति।

**विशेषार्थः** असत्वपदोपादानेन चादिविशेषणत्वेन प्रयुक्तत्वात् द्रव्यवाचिनां चादीनां निपातसंज्ञा न। तदनुसारं स्तोकेन विषेण हतः इति प्रयोगे स्तोकशब्दः विषस्य विशेषणत्वात् पदार्थ सूचितत्वात् निपातसंज्ञा न अतोऽत्र तृतीया स्तोकेन इति जातम्।

(21) **पदच्छेदः** प्रादयः

**समासः** प्र आदिर्येषां ते प्रादयः।

**अनुवृत्तिः** असत्वे, निपातः।

**सूत्रप्रकारः** संज्ञासूत्रम्।

**सरलार्थः** द्रव्य भिन्नेऽर्थे प्रादयः निपाताः भवन्ति।

**विशेषार्थः** यत्र एते द्रव्य रुपेण भवन्ति तत्र न निपातसंज्ञा मया- विः पक्षी, पराः सेनाः उभयत्र पदार्थबोधक न निपातसंज्ञा।

(22) **पदच्छेदः** - उपसर्गाः, क्रियायोगे द्विपद दमिदंसूत्रम्।

**समासः** - क्रियायाः योगः क्रियायोगः तस्मिन् क्रियायोगे ।

**अनुवृत्तिः** - प्रादयः।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - प्रादीनां क्रियायाः योगे उपसर्गसंज्ञा भवति ।

(23) **पदच्छेदः** - गतिः, च, द्विपदम् इदं सूत्रम्।

**अनुवृत्तिः** - प्रादयः क्रियायोगे।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - प्रादीनां क्रियायाः योगे उपसर्गसंज्ञा गतिसंज्ञा च भवति।

---

**(25) स्वं रूपं शब्दस्याशब्दसंज्ञा। 1 । 1 । 68 ॥ शब्दस्य स्वं रूपं संज्ञि शब्दशास्त्रे या संज्ञा तां बिना।**

**(26) येन विधिस्तदन्तस्य। 1 । 1 । 27 ॥ विशेषणं तदन्तस्य संज्ञा स्यात् स्वस्य च रूपस्य। समासप्रत्ययविधौ प्रतिषेधः। उगिद्वर्णग्रहणवर्जम्।**

**(27) विरामोऽवसानम्। 1। 4। 110 ॥ वर्णानामभावोऽवसानसंज्ञः स्यात्।**

---

(24) **पदच्छेदः** - न, वा, इति, विभाषा, चतुष्पदमिदम्।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - निषेधस्य विकल्पस्य च उभयोः विभाषासंज्ञा भवति।

**विशेषार्थः** - विकल्प शब्दार्थः वा, अन्यतरस्याम्, बहुलम् इत्यादिभिरपि उच्यते। विभाषायाः त्रिविधत्वम् उक्तम् (1) प्राप्तविभाषा (2) अप्राप्तविभाषा (3) उभयत्र विभाषा। प्रथमायाः उदाहरणम् विभाषा जसि - वर्णाश्रमेतरे वर्णाश्रमेतराः इत्यत्र द्वन्द्वे च द्वितीया ज्चेत्यादि नित्यतया सर्वनाम संज्ञानिषेधे प्राप्ते विभाषेयाम्। **अप्राप्तविभाषा** यथा - तीयस्य ङित्सु विभाषेति - द्वितीयस्मै द्वितीयायेत्यादि तीयप्रत्ययस्य सर्वादिगणे पाठाभावात् अप्राप्तायां सर्वनामसंज्ञायां विभाषेयम्। **उभयत्रविभाषा** यथा - विभाषा श्वेरिति श्वयतेर्लिटि यडि च सम्प्रसारणे विभाषेयम्।

(25) **पदच्छेदः** – स्वं, रूपं, शब्दस्य, अशब्दसंज्ञा, चतुष्दमिदं सूत्रम्।

**समासः** – शब्दस्य संज्ञा शब्दसंज्ञा, न शब्दसंज्ञा अशब्दसंज्ञा।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – व्याकरणशास्त्रं विहाय शब्दः स्वस्य स्वरूपबोधकः।

**विशेषार्थः** – शब्दः पृथक अर्थश्च पृथक् लोके अग्निः इति उच्चारणेन बोध्यार्थः गम्यते किन्तु व्याकरणे अग्निशब्देन अकारगकारनिकारः गृह्यते। यथा अंग्नेर्ढक् इति अग्निशब्दात् ढक् प्रत्ययः।

(26) **पदच्छेदः** – येन, विधिः, तदन्तस्य त्रिपदमिदं सूत्रम्।

**समासः** – सः अन्ते यस्य तदन्तः, तस्य तदन्तस्य।

**अनुवृत्तिः** – स्वं रूपम्।

**सूत्रप्रकारः** – संज्ञा सूत्रम्।

**सरलार्थः** – विशेषणं तदन्तस्य बोध-को भवति तथा स्वस्व रूपस्य च। किन्तु समास प्रत्यविधौ तदन्तस्य ग्रहणं न भवति। अयं निषेधः उगित्शब्दं, वर्णग्रहणं च विहाय ज्ञातव्यम्। अर्थात् अत्र तदन्तविधि र्भवति।

**विशेषार्थः** – यथा – चिधातोः यत् प्रत्यये अंचो यत् धातोरित्यधिकारः अतः अच् इति विशेषणम्, धातोरिति विशेष्यम् अतः सूत्रार्थः अजन्ताद्धातो र्यत् प्रत्यय इत्यर्थो भवति। इति विशेषणे तदन्त विधि।

येन विशेषणेन समासः वा प्रत्ययविधानं क्रियते तत्र तदन्त-विधिर्न भवति। यथा कष्टंश्रितः कष्टश्रितः, तत्र परमकष्टेन सह श्रित-पदस्य समासो न। प्रत्यविधौ निषेधस्योदाहरणं यथा – नाडायनः नाडादिभ्यः फक इति फक् आयने कृते नाडायनः सूत्रनडस्यगोत्रापत्यं सौत्र नाडिः अत्र अनुशतिकादीनामिति सूत्रेण उभयपदवृद्धिः। अत्र नडादिभ्यः फक् इति न भवति। वर्णग्रहणे तदन्तविधिर्भवति यथा उक् इत् यस्य स उगित् यथा भवत् शब्दात् डीप् तथैव अतिभवत् शब्दात् अपि डीप्। तस्मात् अतिभवती परमभवती प्रभृतिशब्दाः सिद्धयन्ति।

(27) **पदच्छेदः** – विरामः, अवसानम्, द्विप-दमिदं सूत्रम्।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – वर्णानाम् अभावः यदा तस्य अवसानसंज्ञा भवति।

**विशेषार्थः** – विरम्यते अस्मिन्निति विरामः। विराम शब्दस्यार्थः विरामः विश्रामो वर्तते। विरामः उच्चारणाभावः। विरम्यते इति विरामः। पूर्वव्युत्पत्यनुसारं रेफस्य पश्चात् वर्णा न भवन्ति तस्य अवसानसंज्ञा। द्वितीयपक्षे उत्तरवर्ती अवसानस्य अर्थे उच्चार्यमाणस्य अन्तिमस्य वर्णस्य अभावः अवसानसंज्ञकः अवसाने खरि च रस्य विसर्गः।

---

**(28) परः सन्निकर्षः संहिता। 1।4 ।109। वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्।**

**(29) सुप्तिङन्तं पदम्। 1।4 ।14। सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ।**

**(30) हलोऽनन्तराः संयोगः। 1।1 ।7। अज्भिरव्यवहिता हलः संयोग संज्ञाः स्युः।**

---

(28) **पदच्छेदः** – परः सन्निकर्षः संहिता।

**समासः** – संगतः निकर्षः सन्निकर्षः समीपता इत्यर्थः।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – उच्चरितानां वर्णानां सन्निकर्षः सामीप्यं यदि अत्यधिकं भवति, तर्हि तस्य संहिता संज्ञा जायते।

(29) **पदच्छेदः** – सुबन्तं तिङन्तं च द्विपदं सूत्रम्।

**समासः** – सुप् च तिङ च सुप्तिङौ, एतौ अन्ते यस्य तत्।

**सूत्रप्रकारः** –संज्ञासूत्रम्।

**सरलार्थः** – सुप्प्रत्ययान्तस्य तिङ्प्रत्ययान्तस्य च पदसंज्ञा भवति।

**विशेषार्थः** – अपदं न प्रयुञ्जीत इति भाष्यवचनमभिलक्ष्य–तत्सूत्रम् आवश्यकम्। प्रत्ययग्रहणे तदन्ता ग्राह्याः इति नियमानुसारं सुबन्तं तिडन्तम् इत्यर्थलाभः सिद्धः, पुनः सूत्रे अन्तग्रहणं व्यर्थीभूय ज्ञापयति यत् संज्ञाविधौ तदन्तविधिर्न भवति। उदाहरणं गौरी कुमारीतरा।

(30) **पदच्छेदः** – हलः, अनन्तराः, संयोगः त्रिपदमिदं सूत्रम्।

**समासः** – अविद्यमानम् अन्तरं – व्यवधानं येषाम्। हलौ च हलश्च इत्येकशेषः।

**सूत्रप्रकारः** – संज्ञासूत्रम्

**सरलार्थः** – स्वरवर्णेऽव्यवहिताः हलः संयोगसंज्ञकाः भवन्ति।

**विशेषार्थः** – द्वयोः उत वा द्वयाधिक वर्णानां संयोगसंज्ञा। यथा – अग्निः इत्यत्र गकारनकारयोः।

**(31) पदच्छेदः** – ह्रस्वं, लघु, द्विपदम्, इदं सूत्रम्।

**सूत्रप्रकारः** – संज्ञा–सूत्रम्।

**सरलार्थः** – ह्रस्वस्य लघुसंज्ञा भवति।

**विशेषः** – ह्रस्वशब्दो नपुंसकलिंगेऽपि वर्ततेऽतोत्र ह्रस्वमिति लिखितम्।

**(32) पदच्छेदः** – संयोगे गुरु द्विपदं सूत्रम्।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**अनुवृत्तिः** – ह्रस्वम्।

**सरलार्थः** – संयोगे परे ह्रस्वस्य गुरुसंज्ञा भवति। यथा–भिक्षा इत्यत्र क्ष् संयुक्ते परे इकारो गुरुः।

**(33) दीर्घं, च, 1.4.12 – दीर्घं च गुरुसंज्ञं स्यात।**

**अनुवृत्तिः** – गुरु।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थ** – दीर्घस्यापि गुरुसंज्ञा भवति।

**विशेषार्थः** – एतस्य फलम् इजादेश्च गुरुमतोऽनृच्छः इति सूत्रेण ईहाञ्चक्रे इत्यादिषु आम् प्रत्ययो भवति।

## स्वाध्यायः

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

**(1) कौमुदीशब्दस्यार्थः**

(क) प्रकाशः (ख) चन्द्रः (ग) प्रकाशिका (घ) वार्तिकम्

**(2) तदुक्तीः पदस्य अर्थः**

(क) कौमुदी (ख) वार्तिकम् (ग) भाष्यम् (घ) सूत्रवार्तिकभाष्यम्

**(3) हलन्त्यम् इति करोति –**

(क) इत्संज्ञाम् (ख) प्रत्याहारसंज्ञाम् (ग) टिसंज्ञाम् (घ) दीर्घसंज्ञाम्

**(4) उपदेशे नागच्छति–**

(क) धातुः (ख) आद्यभिन्नोच्चारणम् (ग) गणपाठः (घ) लिङ्गानुशासनम्

(5) **प्रत्याहाराः भवन्ति -**

(क) 40 (ख) 41 (ग) 42 (घ) 44

**2. अविभागं योग्योत्तरेण ब विभागेन सह योजयत।**

| **अ विभाग** | **ब विभाग** |
|---|---|
| (क) ऊकालोऽज्झस्व दीर्घ | (क) संज्ञात्रयम् |
| (ख) उच्चैरः | (ख) उदात्तसंज्ञा |
| (ग) मुखनासिका | (ग) सवर्णसंज्ञा |
| (घ) तुल्यास्यप्रयत्न | (थ) संयोगसंज्ञा |
| (ड) हलोऽन्तरा | (उ) अनुनासिकसंज्ञा |

**3. एकैकवाक्येन उत्तरं लिखत ।**

(1) गुणसंज्ञा कस्य भवति ?

(2) अदेङ इत्यत्र तपर ग्रहणं नास्ति वा ?

(3) ग्रहणकं शास्त्रं किं वर्तते ?

(4) अत् इत् उत् एतेषां कति संज्ञा ?

(5) आकारः कतिविधः ?

(6) क्रियावाचकानां धातुत्वं वा प्रातिपदिकत्वम् ?

**4. पञ्चानां पूर्तिं कृत्वा अर्थं लिखत।**

(1) उपसर्गाः

(2) गतिश्च

(3) नवेति

(4) स्वंरुपं

(5) परः सन्निकर्षः

**5. संक्षेपेण उत्तरं लिखत ।**

(1) नाऽज्झलौ इत्यस्य आवश्यकतां लिखत।

(2) उच्चारणस्थानानि ग्रन्थानुसारं लिखत।

(3) आभ्यन्तरबाह्ययत्नयोः विवरणं कुरुत।

(4) स्वराणां के अष्टादशभेदाः तान् लिखत।

(5) गुणवृद्धिसंज्ञयोः को भेद इति लिखत।

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिरव्य तस्य पदच्छेदं पदपरिचयमन्वयं सरलसंस्कृतेन भावार्थं च लिखत।

◆

# 3 अथ परिभाषाप्रकरणम्

**प्रस्तावना**

**संज्ञाप्रकरणस्य अनन्तरं परिभाषाप्रकरणम् आरभ्यते । तर्हि जिज्ञासा स्वाभाविकी परिभाषा - शब्दार्थः कः तदा उच्यते - अव्यवस्थायां व्यवस्था-सम्पादकं सूत्रम् - परिभाषा सूत्रम् अथवा अनियमे नियम - कारिणी परिभाषा परितः सर्वतो भाष्यन्ते नियमाः याभिः ताः परिभाषाः। यैः सर्वेषां नियमानां स्थिरीकरणं भवति तानि परिभाषासूत्राणि। परिभाषा-सूत्राणां विधिनिषेधसूत्रैः सह एकवाक्यता भवति। परिभाषा-सूत्राणि विधिसूत्राणामङ्गानि भवन्ति। यथा अधोदत्तानि सन्ति-**

---

**(34) इको गुणवृद्धी। 1 ।1 ।3॥ गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र इकः इति षष्ठ्यन्तं पदमुपतिष्ठते।**

**(35) अचश्च। 1 ।2 ।28 ॥ ह्रस्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्र अचः इति षष्ठ्यन्तं पदमुपतिष्ठते।**

---

(34) **पदच्छेदः** - इकः गुणवृद्धि द्विपदमिदं सूत्रम्।

**समासः** - गुणश्च वृद्धिश्च गुणवृद्धि।

**अनुवृत्तिः** - गुणः वृद्धिः।

**सूत्रप्रकारः** - परिभाषा-सूत्रम्।

**सरलार्थः** - गुणवृद्धिशब्दयोः उच्चारणं कृत्या यत्र गुणस्य वृद्धेश्च विधानं क्रियते तत्र इभः इति पद ंगच्छति।

**विशेषार्थः** - यथा मिदेर्गुणः मृजेवृद्धिः उभयत्र क्रमशः गुणवृद्धि-शब्दयो-रुपस्थानम् अतः तत्र इकः इति पदं गत्वा सूत्रार्थश्च भवति मृदेरिको गुणः मृजेरिको वृद्धिः स्यात्।

(35) **पदच्छेदः** - अचः च, द्विपदमिदम्।

**अनुवृत्तिः** - अच्, ह्रस्वदीर्घप्लुतः।

**सूत्रप्रकारः** - परिभाषासूत्रम्।

**सरलार्थः** - ह्रस्वदीर्घाप्लुत शब्दमुच्चार्य यत्र अच इति कार्यविधानं क्रियते तत्र अचः इति षष्ठ्यन्तं पदमुपगच्छति।

**विशेषार्थः** - ह्रस्वदीर्घप्लुत-शब्दानां विपरिणामः क्रियते अर्थवशाद् विभक्तेविघरिणामः।

---

**(36) आद्यन्तौ टकितौ। 1 ।1 46॥ टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः।**

**(37) मिदचोऽन्त्यात्परः। 1। 1 ।47॥ अचः इति निर्धारणे षष्ठी। अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित्स्यात्।**

**(38) षष्ठी स्थानेयोगा। 1। 1। 49॥ अनिर्धारितसम्बन्धविशेषा षष्ठी स्थानेयोगा बोध्या। स्थानं च प्रसङ्गः**

---

यथाः -ह्रस्वो नपुंसके प्रातिपदिकस्म। 1 ।4 ।27॥ ह्रस्वस्यविधानं अचः स्थाने क्रियते। अतिरिकुलम् अतिक्रान्तं रायं तत्कुलम् अंति रै इत्यत्र एच इग्ह स्वादेशे इति सहकारेण एकारस्य स्थाने इकाराः अतः अतिरिकुलम् इति।

(36) **पदच्छेदः** - आद्यन्तौ टकितौ द्विपदमिदं सूत्रम्।

**समासः** - आदिश्च अन्तश्च आद्यन्तौ, टश्च कश्चटकौ, तौ इतो ययाः।

**सूत्रप्रकारः** - परिभाषायसूत्रम्।

**सरलार्थः** - टकारः इत् भवति तदा टित् यस्य उक्तः तस्य आद्यवयवो भवति एवमेव ककारः इत् यस्य तादशः कित् यस्य उक्तः तस्य अन्तावयवो भवति।

**विशेषार्थः** – टितः उदाहरणं यथा– षट्त्सन्तः षड् + ध् + सन्तः, डः सि धुट् इति धकारः टित् अतः सकारस्य आद्यावयवः कितः उदाहरणम्–भीषयते इत्यत्र षुक् प्रत्ययागमः भियो हेतु भये षुक्च भीषुक्यते इत्यत्र षुक् कित्वात् अन्तावयवः भवति।

(37) **पदच्छेदः** – मिदचोऽन्त्यात्परः–मित्, अचः, अन्त्यात् परः ।

**समासः** – म इत् यस्य स मित्।

**सूत्रप्रकारः** – परिभाषासूत्रम्।

**सरलार्थः** – मित् आगमः अन्त्यादचः परः तस्यैव अन्यावयवो भवति।

**विशेषार्थः** – यथा वारिणि इत्यत्र वारि + जस जसः शी आदेशे वारि + इ नपुंसकस्य झलचः इति नुम् प्राणो मिदचोऽनेन इकारात्परं कृतवान् अनुबन्धलोपे कृते णत्वे वारिणि इति साधु।

(38) **पदच्छेदः** – षष्ठी, स्थाने–योगा, त्रिपदमिदं सूत्रम्।

**समासः** – स्थानेन योगो यस्याः।

**सूत्रप्रकारः** – परिभाषासूत्रम्।

---

**(39) स्थानेऽन्तरतमः। 1 । 1 । 50॥ प्रसङ्गे सति सदृशतमआदेशः स्यात्।**

**यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः( प.14)।**

---

**सरलार्थः** – यत्र सम्बन्धविशेषो निर्धारितो न भवति तत्र षष्ठी स्थानेन युता भवति।

**विशेषार्थः** – षष्ठी विभक्तेः नैके अर्थाः भवन्ति तेषु समीपम्, आनन्तर्यम् अवयवः, विकारः, स्वस्वामिभावादिप्रमुखाः सन्ति। एषु यत्र षष्ठ्याः कोऽपि सम्बन्धः न प्राप्यते त्र अनियतयोगा षष्ठी इत्युच्यते । एतदृश्या षष्ठ्या सह स्थाने शब्दः युज्यते। स्थानशब्दस्यार्थः अवसरः प्रसङ्गः, यथा दर्भाणांस्थाने शरैः प्रस्तरितत्यम्। इत्यनुसारम् उदुपधायाः गोहः उपधायाः अ निर्देशत्वात् गुह्व यस्य उपधाभूतस्य उकारस्य दीर्घः किन्तु इको यणचि इत्यत्र इकः पदस्य षष्ठी तस्याः स्थाने कश्चनपि निर्देशो नास्ति अतः इकःस्थाने यण् इत्यर्थो भवति।

**पदच्छेदः** स्थाने, अन्तरतमः, द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** – स्थाने।

**सूत्रप्रकारः** – परिभाषासूत्रम्।

**सरलार्थः** – एकस्य स्थानिनः नैकेषा आदेशानां प्राप्तौ सत्यां तेषु यः स्थानार्थगुणप्रमाणतः स्थानिना सदृशतमो भवति स एव आदेशो भवति।

**विशेषार्थः** – स्थान शब्दस्यार्थः – ताल्वादि – उच्चारण – स्थानम् विवक्षितम्। गुणशब्देन प्रयत्नः ग्राह्यः।

प्रमाणशब्देन – एकद्विमात्रादिपरिमाणं ग्राह्यम्।

एषु स्थानस्य उदाहरणम् – दध्यत्र इकारस्य यकारः। अर्थतो यथा 'तृज्वत्क्रोष्टुः' अनेन क्रोष्टुस्थाने क्रोष्टृ एव भवति। गुणतो यथा – वाग्घरिः अत्र हकारस्य स्थाने संवार नादघोषमहाप्राणप्रयत्नवान् घ कार एव भवति। इत्थं आन्तर्यं चतुर्विधं कथितम्।

---

**(40) तस्मिन्निति निर्दिष्टे पूर्वस्य। 1 । 1 । 66॥ सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्।**

**(41) तस्मादित्युत्तरस्य। 1 । 1 । 67॥ पञ्चमीनिर्देशने क्रियमाणं कार्य वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम्।**

---

यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः।

यस्मिन् स्थले नैक अपितु बहुविधमातर्यं भवति तत्र स्थानकृतान्तर्य बलवाद्। इदमित्थं ज्ञायते षष्ठीस्थाने भोगा इति सूत्रे स्थाने पठितः ततः एव अनुवृत्ति द्वारा लाभः स्यात् पुनः स्थानेऽनतरः इति सूजे स्थाने ग्रहणं सूचयति यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्य बलीयः। अतः सुधी + उपास्यः इत्यत्र ईकारस्य स्थाने यकारः क्रियते तत्र यथासंखभमपि न भवितुं शक्नोति, ईकारयकारयोः तुल्यस्थानात् यकार एव गुणः।

(40) **पदच्छेदः** – तस्मिन्, इति, निर्दिष्टे पूर्वस्य, चतुष्वदमिदं सूत्रम्।

**सूत्रप्रकारः** – परिभाषासूत्रम्।

**सरलार्थः** – सप्तम्यर्थपदेन निर्दिष्टं यत्कार्यं तत्पूर्णस्य स्थाने भवति।

**विशेषार्थः** – अत्र सप्तमीविभक्तिः तस्याः अर्थः स्वीक्रियते निर्दिष्टस्य अर्थः अव्यवहितरुपेण उच्चरितत्व। तदनुसारं सप्रम्यानिर्दिष्टः यः शब्दः ततः अव्यवहितस्य पूर्वस्य स्थाने कार्यं भवति। तेन अचि इति सप्तम्यन्तमुद्दिश्य निमित्तं ततः अव्यवहितस्य पूर्वस्य स्थाने कार्य भवति। तेन अचि इति सप्तम्यन्तमुद्दिश्य निमित्तं ततः अव्यवहितस्य पूर्वस्य इकः स्थाने यण् इति।

(41) **पदच्छेदः** – तस्माद्, इति, उत्तरस्य।

**अनुवृत्तिः** – निर्दिष्टे।

**सूत्रप्रकारः** – परिभाषासूत्रम्।

**सरलार्थः** – पञ्चमीनिर्देशेन क्रियमाणं यत्कार्यंतत्र् अन्यैः वर्णैः व्यवधानरहितस्य परस्यस्थाने भवति।

---

**(42) अलोऽन्त्यस्य।1 ।1 ।52। षष्ठीनिर्दिष्टस्यान्त्यस्याल आदेशः स्यात्।**

**(43) ङिच्च।1 ।1 ।53। अयमप्यन्तस्यैव स्यात्। सर्वस्य ( सूत्र-४५ ) इत्यस्यापवादः।**

**(44) आदेः परस्य।1 ।1 ।54। परस्य यद्विहितं तत्तस्यादेर्बोध्यम्। अलोऽन्त्यस्य ( सू.42 ) इत्यस्यापवादः।**

---

(42) **पदच्छेदः** – अलः अन्त्यस्य, द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** – षष्ठी, स्थाने।

**सूत्रप्रकारः** – परिभाषासूत्रम्।

**सरलार्थः** – षष्ठीविभकत्या निर्दिष्टः यः आदेश स अन्त्यस्य अलः स्थाने भवति।

**विशेषार्थः** –त्यदादीनामः अत्र षष्ठी वर्ततेऽतोऽलोऽन्त्यस्य सूत्रं प्रवर्तते तथा अन्त्यस्य स्थाने अकारान्तदेशो भवति यथा यद् घटक दकारस्य अकारादेशः सौ परे।

(43) **पदच्छेदः** – डित्, च, द्विपदमिदं सूत्रम्।

**समासः** – ड इत् यस्य स डित्।

**अनुवृत्तिः** – अलः, अन्त्यस्य, षष्ठी।

**सूत्रप्रकारः** – परिभाषासूत्रम्।

**सरलार्थः** – डित् अपि अन्त्यस्यैव स्थाने भवति।

इदं सूत्रं सर्वस्य अपवादः।

**विशेषार्थः** – षष्ठी निर्दिष्टो योडिदादेशः स अन्त्यस्य अलः स्थाने भवति अनेकाल् शित्सर्वस्य इत्यस्य अपवादः इदं सूत्रम्। अस्योदाहरणम् अवङ् तातङ् अनडादयः।

(44) **पदच्छेदः** – परस्य, द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** – अलः।

**सूत्रप्रकारः** – परिभाषासूत्रम्।

**सरलार्थः** –परस्य स्थाने य–द्विहितं कार्यं तत्तस्य समुदायस्य आदिवर्णस्य स्थाने भवति, यथा – 'उद् + स्थानम्' इत्यत्र तस्मा–दित्युरस्य इत्यनेन विहितं परसवर्णकार्यं परस्य आदि भूतस्य सकारस्य स्थाने जायते। इदम् अलोऽन्तयस्य सूत्रस्य अपवादः।

**(45) अनेकाल् शित्सर्वस्य।1 ।1 ।55॥ स्पष्टम्। अलोऽन्त्य सूत्रापवादः 'अष्टाभ्य औश्' (सू.372) इत्यादौ आदेः परस्य (सू. 44) इत्येतदपि परत्वादनेन बाध्यते।**

**(46) स्वरितेनाधिकारः।1 ।3 ।11 ॥ स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यम्।**

(45) **पदच्छेदः** - अनेकाल्, शित्, सर्वस्य, त्रिपदमिदं सूत्रम्।

**समासः** - एकः च असौ अल् इति एकाल् न एकाल्, इति अनेकाल्, शकारः इत् यस्य सशित्, अनेकालचशित् च इति अनेकाल्शित् समाहार द्वन्द्ववसमासः।

**अनुवृत्तिः** - षष्ठी।

**सूत्रप्रकारः** - परिभाषासूत्रम्।

**सरलार्थः** - अनेकाल् आदेशः शिदादेशश्च सम्पूर्णस्य स्थाने भवतः। इदमलोऽन्त्स्यापवादः। 'अष्टाभ्य औश्' इत्यत्र

**शित्वात् आदेः परस्यापि बाधकः।**

**विशेषार्थः** - अनेकालः उदाहरणम् - अतो भिस् ऐस् अनेकालत्वात् रमैः। शिदुदाहरणं यथा ज्ञानानि इत्यत्र जसशसोः शि' शित्वात् सम्पूर्णस्य जसः स्थाने भवति।

(46) **पदच्छेदः** - स्वरितेना अधिकारः द्विपदमिदं सूत्रम्।

**सूत्रप्रकारः** - परिभाषासूत्रमिदम्।

**सरलार्थः** - स्वरितधर्मेण उच्चरितस्य पदस्यप्रभावः उत्तरेषु सूत्रेषु भवति। अयमधिकारः अस्यानुवृत्तिः उत्तरेषु सूत्रेषु गच्छति। स्वरितरुपात्मकः वर्णधर्मः पाणिनेः प्रतिज्ञायाः द्योतकः। यथा प्रत्ययः, धातोरित्यादि।

परनित्यन्तरङ्गापवादानामुत्तरोतरं बलीयः

**मूलम् - परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः (प. 39) । असिद्धं बहिरङ्गमन्तरङ्गे (प. 51) अकृतव्यूहाः पाणिनीयाः (प. 57) निमित्तं विनाशोन्मुखं दृष्टवा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः। इति परिभाषाप्रकरणम्॥**

**पदच्छेदः** - परनित्यन्तरङ्गपवादानाम्, उत्तरोत्तरं, बलीयः जिपदी परिकार्षेसम्।

**समासः** - परश्च नित्यश्च अन्तरङ्गश्च, अपवादश्च परनित्यन्तरङ्गापवादाः तम्। उत्तरम् उत्तरम् इति उत्तरोत्तरम्।

**सरलार्थः** - परात् नित्यम्, नित्यात् अन्तरङ्गः अन्तराड्गत् अपवादो बलवान् भवति।

**विशेषार्थः** - त्रिपादीस्थसूत्राणां विधिं विहाय विप्रतिषेधेपरं कार्यम् इति सहकारेण पूर्वशास्त्रापेक्षया परशास्त्रं बलवदिति स्वीकरोति। अनेन पूर्वशास्त्रस्य दौर्बल्यं सूच्यते। दुर्बलस्य बलवता वाधः इति इति सर्वविदितमेतत्। तथापि पूर्वशास्त्रं नित्यमस्ति चेदपि परशास्त्रमपि दुर्बलं भवति। पूर्वापेक्षया परस्य प्राबल्यं यथा वृक्षेभ्यः इत्यत्र वृक्ष + भ्यस् सुपिषचेति दीर्घं प्रबाध्य बहुवचने झल्येत् अनेन एत्वं क्रियते। परात् नित्यं - तुदति कृताकृतः प्रसंगो विधिर्नित्यः शविकरणे कृते गुणे अकृते च प्राप्नोति अतः पूर्वश भवति

**परादन्तरङे** - उभये देवमनुष्याः इत्यत्र परमपि विकलपं प्रथम चरम इति बाधित्वा सर्वादीनि-नित्य सर्वनाम-संज्ञा अन्तरङ्गत्वात्।

**परादपवादो** - दध्ना अत्र अस्थिदधिस कथ्यक्षणा मनडुदात्तः इत्यनङ् इह परमपि अनेकालं बाधित्वा उच्च इति अन्तादेशः। येनेनाप्राप्तिन्यायेन तदपवादत्वात्।

नित्यादन्तरंगो यथा ग्रामणि कुले इकोऽचि इति नुमं बाधित्वा ह्रस्वो नपुंसके - इति नपुंसक ह्रस्वः। अन्तरङ्गादपवादो यथा दैत्यारिः अत्र परमपि सर्वर्णदीर्घं प्रबाध्य अन्तरङ्गत्वात् आद्गुणः यणि चप्राप्ते अपवादत्वात् सवर्णदीर्घः।

अकृत, नकृतः अकृतः विशिष्टः ऊहः प्रकृतिप्रत्यय-विवेचनं यैः ते अकृतव्यूहाः पाणिनिशिष्याः।

सरलार्थः यदा निमित्तस्य विनाशः भावी तथा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः। सेंदुषः इत्यत्र वकारस्य संप्रसारणेन उकारः भविष्यति इति ज्ञात्वा इट् न कुर्वन्ति इत्यर्थः।

## स्वाध्यायः

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

(1) **गुणवृद्धि अत्रास्ति समासः**

(क) तत्पुरुषः (ख) द्वन्द्वः (ग) बहुव्रीहिः (घ) कर्मधारयः

(2) **आद्यन्तौ टकितौ इदं करोति।**

(क) धुडागमः (ब) आद्यावयनः (ग) अन्तावयवः (घ) आद्यन्तावयौ

(3) **मिदचोऽन्त्यात्परः अत्र अच इति पदमस्ति।**

(क) सप्तम्यन्तम् (ख) पञ्चम्यत्तम् (ग) षष्ठ्यत्तम् (घ) किमपिन

(4) **स्थानेऽन्तरतमः इत्यत्र आन्तर्यं कतिविधम्?**

(क) द्विविधम् (ख) त्रिविधम् (ग) चतुर्विधम् (घ) पञ्चविधम्

(5) **स्वरितेना-धिकारः इत्यनेन भवति**

(क) अधिकारः (ख) अतिदेशः (ग) अन्त्यादेशः (घ) सर्वादेश-ः

**2. अविभागं योग्योत्तरेण ब विभागेन सह योजयत।**

| अ विभाग | ब विभाग |
|---|---|
| (क) अनेकाल्शित्सर्वस्य | (क) सुद्ध्युपास्यः |
| (ख) आदेः परस्य | (ख) अष्टाभ्यः औश |
| (ग) ङिच्च | (ग) अवडादेशः |
| (घ) तस्मादित्युत्तरस्य | (घ) उत्थानम् |
| (ङ) अलोऽन्त्यस्य | (ङ) यः |

**3. एकैकवाक्येन उत्तरं लिखत ।**

(1) परिभाषा लक्षणं किम् ?

(2) अनेकाल् शब्दस्य कोऽर्थः ?

(3) पाणिनीयाः कीदृशाः भवन्ति ?

(4) सप्तमीनिर्दिष्टो भवति चेत् कार्यं कस्य भवति ?

(5) अचः इति षष्ठ्यन्तं पदं कुत्र उपतिष्ठते?

**4. अधोलिखितानां पूरणं कृत्वा अर्थ लिखित।**

(1) अचश्च

(2) आद्यन्तौ

(3) षष्ठीस्थाने

(4) यत्रानेकविध

(5) आदेः परस्य

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिरव्य तस्य पदच्छेदं पदपरिचयमन्वयं सरलसंस्कृतेन भावार्थं च लिखत।

◆

| 4 | # अथाच्संधिप्रकरणम्-1 |
|---|---|

**प्रस्तावना**

**पूर्वं वयं संज्ञाप्रकरणमधीत-वन्तः तत्र आदिरन्त्येन सहेता इति सूत्रेण ४२ प्रत्याहाराः निर्मिताः यथा - इक यण, अच् तेषामुपयोगः कथं भविष्यति इत्यत्र वयं पठिष्यामः अपरं च संहितायाम् इत्यधिकारः 'परः सन्निकर्षः संहिता' इति सूत्रस्य साहाय्येन अचां संहिता सन्धिः प्रस्तूयते ।**

**(48) इकोयणचि - 6। 1। 77। इकः स्थाने यणस्यादचि संहितायां विषये। सुधी+उपास्यः इति स्थिते। स्थानत आन्तर्यादीकारस्य यकारः। सुध्य्+उपास्यः इति जाते।**

**पदच्छेदः** - इकः यण् अचि त्रिपदमिदंसूत्रम्

**अनुवृत्तिः** - संहितायाम् ।

**सूत्रप्रकारः** - विधिसूत्रम् ।

**सरलार्थः** - इ उ ऋ लृ क् (इक्) वर्णानां स्थाने य, व, र, ल, (यण्) वर्णाः भवन्ति अचि परे (अ इ उ ऋ लृ ए ओ ऐ औ)

**विशेषार्थ :** इको यणचि अत्र अचि इति सत्पम्यन्तं ततः तस्मिन्निति-निर्दिष्टे पूर्वस्य इति सहकारेण अव्यवहितस्य पूर्वस्य इकः स्थाने यण् -यकार, स्थानकृतान्तर्यमादाय भवति । तदेव मूले स्थानत आन्तर्यादीकारस्य यकारः ।

**(48) अनचि च । 8। 4। 47। अचः परस्य यरो द्वे वास्तो न त्वचि। इति धकारस्य द्वित्वम् ।**

**समासः** - न अच्, अनच्, तस्मिन् अनचि ।

**अनुवृत्तिः** - यरः वा, अचः दे ।

**सूत्रप्रकारः** - विधि सूत्रम्

**सरलार्थः** - अचः परस्य यरप्रत्याहार वर्णानां द्वित्वं भवति यद्यग्रे अच् न भवति चेत् ।

**विशेषार्थः** - सु ध य् द् इत्यत्र अच् उद्रारः यर् यकारः अजभिन्नः येकारः, अतोइत्र धकारस्य द्वित्वं भवति । तेन सु ध् ध् य् इति स्थितिः ।

**(49) स्थानिवदादेशोऽनल्विधौ । 1 । 1 । 56 । आदेशः स्थानिवत्स्यात् न तु स्थान्यलाश्रयविधौ । अनेनेह यकारस्य स्थानिवावेनाच्त्वमाश्रित्य अनचि ( सू. 48 ) इतिद्वित्व निषेधो न शंक्यः, अनल्विधौ इति तन्निषेधात् ।**

**(50) अचःपरस्मिन् पूर्वविधौ । 1 । 1 । 57 ॥ अल्विध्यर्थमिदम्। परनिमित्तोऽजादेशः स्थानिवत्स्यात्, स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये । इति यणः स्थानिवद्भावे प्राप्ते**

**पदच्छेद** - स्थानिवद, आदेशः, अनलविधौ त्रिपदमिदं सूत्रम् ।

**समासः** - अलाश्रयः, विधिः, अलविधिः न अल्विधिः अनलविधिः तस्मिन् अनल्विधौ ।

**सूत्रप्रकारः** - अतिदेशसूत्रम् :

**सरलार्थः** - आदेशः स्थानिवत् भवति किन्तु स्थानि सम्बन्धिनः एकवर्णस्य आश्रयं मत्वा (विधानात्) स्थानिवद्भावो न ।

**विशेषार्थः** - सुध्यइत्यत्र य इत्यत्र स्थानिवद्भावेन अच् इति मत्वा 'अनचि च' इत्यस्य प्रवृत्तिः न, इति शंका निरर्थकी यतोहि य इत्यस्य स्थानी ईकारः एकवर्णात्मक अस्ति।

**अल्विधिरित्यत्र** - अलाविधिः। अलःविधिः। अलःविधिः अलिविधिः अल्विधिः इत्यत्र तृतीया पञ्चमी षठी सत्पमी समासोऽस्ति।

(50) **पदच्छेदः** - अचः,परस्मिन्, पूर्वविधौ । त्रिपदमिदं सूत्रम् ।

**समासः** - पूर्वस्य विधिः पूर्वविधिः तस्मिन् पूर्वविधौ ।

**सूत्रप्रकारः** - अतिदेशसूत्रम् ।

**अनुवृत्तिः** - स्थानिवद् आदेश ।

**सरलार्थः** - अल्विद्यौ स्थानिवद्भावार्थ सूत्रमिदम् । परनिमित्तः अज्रूपात्मकादेशः स्थानिवद् भावं प्राप्नोति, यदि तस्मात्पूर्व किमपि कार्यं कर्तव्यं चेत्। इत्थं यणः यकारस्य स्थानिवदभावः प्राप्नोति ।

---

**(51) न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु । 1। 1। 58॥ पदस्य चरमावयवे द्विर्वचनादौ च कर्त्तव्ये परनिमित्तोऽजादेशो न स्थानिवत् । इति स्थानि-वद्भावनिषेधः।**

**(52) झलां जश्झशि । 8। 4। 53॥ स्पष्टम् । इति धकारस्य दकारः।**

---

(51) **पदच्छेदः** - न, पदान्तदिर्वचन

**समास** :- पदान्तश्च, दिर्वचनं च वरे च यलोपश्च स्वरश्च सवर्णश्च अनुस्वारश्च दीर्घश्च जश्च चर्च, इति द्वन्द्व, तेषां विधयः, तेषु विधिषु ।

**अनुवृत्ति** :- अचः परस्मिन् पूर्वविधौः स्थानिवद् आदेशः ।

**सूत्रप्रकार** :- अतिदेशसूत्रम् (निषेधः)

**सरलार्थ** :- पदस्य अन्तिमावयवस्य विधेये तथा दित्वादिकार्य-कर्तव्ये परनिमितिकोऽजादेशः स्थानिवद्भावं न प्राप्नोति । इत्थं स्थानि-वद्भावस्य निषेधः सु ध् ध् य् उपास्यः ।

(1) पदान्तविधेरूदाहरणम् - कानि सन्ति।

(2) द्विर्वचन-विधेरूदाहरणम् - सुद्ध्युपास्यः ।

(3) वरेवि-धेरुदाहरणम् - यायावरः ।

(4) यलोपविधेरूदाहरणम् - कण्डतिः ।

(5) स्वरविधेरूदाहरणम् - चिकीर्षकः ।

(6) अनुस्वारविधेरूदाहरणम् - शिण्ढि ।

(7) सर्वण विधेरूदाहरणम् -

(8) दीर्घविधेरूदाहरणम् - प्रतिदीव्ना ।

(9) जश् विधेरूदाहरणम् - जग्धिः ।

(10)चर्विधेरूदाहरणम् - जक्षतुः ।

(52) **पदच्छेदः** - झलां, जश्, झशि, त्रिपदात्मकमिदं सूत्रम् ।

**सूत्र-प्रकारः** विधिसूत्रम् ।

**सरलार्थः**- झल् प्रत्याहार-वर्णानां स्थाने जश् प्रत्याहार-वर्णः भवति झशि परे। अनेन सु ध् ध् य् इत्यत्र पूर्वधकारस्य दकारे सुदध्य उपास्यः।

---

**(53) अदर्शनं लोपः । 1 । 1। 60 ॥ प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात्।**

**(54) संयोगान्तस्य लोपः । 8 । 2 । 23 ॥ संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात् । इति यलोपे प्राप्ते । यणः प्रतिषेधो वाच्यः ( वा. ४८०६ )। यणो मयो द्वे वाच्ये ( वा.5018 ) मय इति पंञ्चमी यण इति षष्ठी इति पक्षे यकारस्यापि द्विन्वम्। तदिह धकारयकारयोर्द्विन्वविकल्पाच्चत्वारि रूपाणि। एकधमेकयम्। द्विधं द्वियम्। द्विधमेकयम्। एकधं द्वियम्। सद्ध्यपास्यः। मध्वरिः। धात्त्रंशः। लाकृतिः।**

**(54) नादिन्याक्रोशे पुत्रस्य। 8। 4 । 48 ॥ पुत्रशब्दस्य न द्वे स्त आदिनीशब्दे पर आक्रोशे गम्यमाने। पुत्रादिनी त्वमसि पापे। आक्रोशे किम् । तत्त्वकथने द्विवर्वचनं भवत्येव। पुत्रादिनी सर्पिणी। तत्परे च ( वा. 5021 ) पुत्र पुत्रादिनी त्वमसि पापे। ( वा हतजग्धयोः ) ( वा.5022 ) पुत्रहत्ती-पुत्रहती। पुजग्धी पत्रजग्धी ।**

**पदच्छेदः** - अदर्शनम्, लोपः द्विपदमिदं सूत्रम् ।

**अनुवृत्ति :** - इति ।

**सूत्रप्रकार :** - संज्ञासूत्रम् ।

**सरलार्थ :** - विद्यमानस्य वस्तुनः अदर्शनं लोप इति कथ्यते । अदर्शनं नाम अनुपलब्धिः ।

(54) **पदच्छेदः** - संयोगान्तस्य, लोपः द्विपदमिदम् ।

**अनुवृत्ति** :- पदस्य ।

**सूत्रप्रकार** :- विधिसूत्रम् ।

**सरलार्थ** :- संयोगान्तस्य पदस्य अन्त्यवर्णस्य लोपो भवति ।

अनेन सु द् ध् य् इत्यस्य यकारस्य लोपे प्राप्ते ।

(वा. 4806) - यणः य व रल इति वर्णानां लोपो न भवति ।

(वा. 5018) मयः परस्य अव्यहितस्य यणः द्वित्वं भवति। तेन धकार यकारयोर्द्वित्वाद्विकल्पेन चत्वारि रुपाणि भवन्ति। सुध्युपास्यः, सुद्ध्युपास्यः, सुदध्युपास्यः सुध्य्युपास्यः।

विशेषःऽसुध्य्युपास्यः, सुधीभिः उपास्यः इत्यर्थः। विद्वद्भिरुपासनीयः कः ? मध्वरिः, मधुनामकस्य दैत्यस्य अरिः शत्रुः श्रीकृष्णः। मधुशत्रुर्नटोऽपि भवितुमर्हति तदा उच्यते धातुः अंशः तदंशस्तु सम्पूर्णं जगत्, तदा उच्यते लृवर्णस्य इव आकृतिर्यस्य, स श्रीकृष्णः तस्य वंशीवदनकाले कुटिलाकृतिर्भवति स एव विद्वद्धिःसुधीभिरुपास्यो वर्तते।

सुद्धयुपास्यः - सुधी + उपास्यः इत्यत्र 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति सहकारेण 'स्थानेऽन्तरतमः' इत्यस्य च सहयोगेन इकोयणचि इति सकारे कृते सतिसुधय उपास्य इति रूपं ततः अनचि च इति धकारस्य द्वित्वे प्रात्पे स्थानिवद् देश इति यकारस्य द्वित्वमाश्रित्य धकारस्य द्वित्वनिषेध प्रक्रियामां अनल्विषे इति तन्निधौधात्। पुनस्चः परस्मिन् पूर्वधिधौ इति द्विणः स्थानिवद्माव प्राप्ते 'नपदान्तद्विवर्चन' इति स्थानिवद्भावनिषेधे द्वित्वे सुध् ध् य् उपास्यः झलां जस् झशि इति पूर्वधकारस्य दकारे संयोगान्तस्य लोपः इति यणः लोपे प्राप्ते यणःप्रतिषेधोवाच्यः तन्निषेधे यणो मयो द्वे वाच्ये इति वार्तिकेन धकारस्य पक्षे यकारस्य च द्वित्वे चतुर्धारूपाणि भवन्ति सुध्युपास्यः, सुद्ध्य्युपास्यः, सुद्ध्युपास्यः, सुध्पयुपास्यः। अस्यार्थः सुधीभिः उपास्यः। श्रीकृष्णः।

**मध्वरिः** मधु + अरिः इत्यत्र तस्मिन्निभिति निर्दिष्टे स्थानेऽन्तरतमः इति सूत्रद्वयसहकारेण इकोयणचि इत्यनेन इकारस्य वकारे यण कृते मधव् + अरिः अनचि चेत द्वित्वे धकारस्य मध् ध् व् अरिः झलां जश् झशि इति स्थानेऽन्तरतमः सहयोगेन दकारे कृते मद्ध्वरिः वकारस्य संयोगान्त लोपे प्राप्ते यणः प्रतिषेधो वाच्यः इति तन्निषेधे मद्ध्वरिः साधु। द्वित्वाभावे मध्वरिः।

**धात्रंशः** - धांतृ अंशः तस्मिन्निति निर्दिष्टे पूर्वस्य स्थानेऽन्तरतमः इति सूत्र द्वयसहकारेण इकोयणचि इति ऋकारस्य रेफे यणि कृते धातर अंशः अनचिचेति तकारस्य द्वित्वेन धात्रंशः द्वित्वाभावे धात्रंशः इति रूपम्।

अनयैव रीत्या लृ आकृतिः लाकृतिः।

(53) अदर्शनं लोपः

(53) **पदच्छेदः** आदर्शनम् लोपः द्विपदमिदं सूत्रम्।

**समासः** न दर्शनम् अदर्शनं लोपः उच्चारणाभावः अनुपलब्धिः।

**अनुवृत्तिः** इति।

**सूत्रप्रकारः** संज्ञासूत्रम्।

**सरलार्थः** – विद्यमानस्य वस्तुनः अदर्शनस्य लोपसंज्ञा भवति। यथा गौधेरः इत्यत्र यलोपस्य श्रवणं न भवति अतोऽत्र यकार लोप इति उच्यते।

(54) **पदच्छेदः** – संयोगान्तस्य, लोपः । द्विपदमिदं सूत्रम्। समासः – संयोगस्य अन्तः संयोगान्तः तस्य संयोगान्तस्य।

**अनुवृत्तिः** पदस्य।

**सूत्रप्रकारः** विधिसूत्रम्।

**सरलार्थः** संयोगान्तः पदस्य अन्त्यवर्णस्य लोपो भवति।

(55) **पदच्छेदः** – नादिन्याक्रोशे पुत्रस्य। २ । ४ । ४८ ॥

पुत्रशब्दस्य न द्वे स्तः आदिनी शब्दे परे आक्रोशे गम्ययाने। पुत्रादिनी त्वमसि पापे। आक्रोशे किम्? तत्वकथने द्विर्वचने भवत्येव पुत्त्रादिनी सर्पिणी।

**अनुवृत्तिः** यरः, द्वे।

**सूत्रप्रकारः** विधिसूत्रम् (निषेध)

**सरलार्थः** निन्दार्थे गम्यमाने पुत्रशब्दस्य यरः द्वित्वं न भवति। आदिनी शब्दे परे।

**विशेषार्थः** – पुत्रादिनी त्वमसि पापे इत्यत्र अनचि चेति तकारस्य द्वित्वं प्राप्तम्। तस्य अनेन आदिनी शब्दे परे तन्निषेधे यथावद्रूपम्।

तच्चिकथेनं सति वैकल्पिकं द्वित्वं भवत्येव पुत्त्रादिनी सर्पिणी इति प्रयोगे भवत्येव द्वित्वम्। यतोहि अत्र तत्वकथनं वर्तते। तत्परे च (वा. 5021) पुत्रादीनि शब्दे परे पुत्र शब्दस्य तकारस्य नद्वित्वं सम्पद्यते पुत्रपुत्रादिनी त्वमसि पापे।

---

**(56) त्रिप्रभृतिषु शाकटायनस्य। 8 । 4 । 50॥ त्र्यादिषु वर्णेषु संयुक्तेषु वा द्वित्वम्। इन्द्र्रः इन्द्रः। राष्ट्ट्रम् – राष्ट्रम्।**

**(57) सर्वत्र शाकल्यस्य। 8 । 4 । 51॥ द्वित्वं न। अर्कः। ब्रह्मा।**

**(58) दीर्घादाचार्याणाम्। 8 । 4 । 52॥ द्वित्वं न । दात्रम्। पात्रम्।**

---

वा हृतजग्धयोः (वा.5052) हतजग्धशब्दौ परौ चेत् पुत्र शब्दस्य विकल्पेन द्वित्वं भवति। अतोऽत्र पुत्त हती पुत्र हती। पुत्तजग्धी, पुवजग्धी इति सिद्धयति।

(56) त्रिप्रभृतिषु, शाकटायनस्य।

समासः – त्रयाणां प्रभृतिः त्रिप्रभृति तेषु त्रिप्रभृतिषु।

अनुवृत्तिः – अचः यरः द्वे।

सूत्रप्रकारः – विधिसूत्रम् (निषेधः)

सरलार्थः – त्रयः, त्र्याधिकवर्णानां वा संयोगे सति शाकटायनस्य मते द्वित्वं न । अन्येषां मते भवत्येव । यथा– अधो – लिखितौ प्रयोगौ द्वौं स्तः –

इन्त्रद्रः इन्द्रः – राष्ष्ट्रम् राष्ट्रम्।

(57) सर्वत्र, शाकल्यस्य द्विपदमिदं सूत्रम्।

अनुवृत्तिः अचः, यरः, द्वे नः।

सूत्रप्रकारः विधिः (निषेधः)

सरलार्थः शाकल्यस्य मते यत्र यत्र द्वित्वं प्राप्नोति यरः, सर्वत्र न भवति । अर्कः अत्र रेफात् परः ककारः यर् प्रत्याहारे वर्तते तथपि न द्वित्वम्।

(58) **पदच्छेदः** दीर्घाद्, आचार्याणाम् द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** अचः, यरः, द्वे न।

**सूत्रप्रकारः** विधिसूत्रम्। (निषेधः)

**सरलार्थः** दीर्घस्वरवर्णात् परस्य यरो न द्वित्वं भवति।

---

**(59) अचो रहाभ्यां द्वे।8 । 4 । 46॥ अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः। हर्य्यनुभवः, नह्यस्ति।**

**(60) हलो यमां यमि लोपः। 8 । 4 । 64॥ हलः परस्य यमो लोपः स्याद्वा यामि। इति लोपपक्षे द्वित्वाभावपक्षे चैकयंरूपं तुल्यम् लोपारम्भफलंतु। आदित्यो देवताऽस्येत्यादित्यं हविः इत्यादौ। यमां यमि इति यथासंख्यविज्ञानान्नेह। माहात्म्यम्। तादात्म्यम्।**

---

(59) **पदच्छेदः** – अचः, रहाभ्यां, द्वे त्रिपदमिदं सूत्रम्।

**समासः** – रश्व, हश्च रहौ ताभ्यां रहोऽभ्याम्।

**अनुवृत्तिः** – यरः वा।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – अचः परौ रहौ भवतः ततः परं यर् प्रत्याहारवर्णानां द्वित्वं भवति विकल्पेन।

साधनिकाः–हरि अनुभवः इकोयणचि इति यणि कृते, हर् यनुभवः इत्यत्र रेफात् परः यः यर् प्रत्याहारे वर्तते अतः तस्य द्वित्वम्, हर्ययनुभवः द्वित्वाभावे हर्यनुभवः इति रूपम्।

(60) **पदच्छेदः** – हलः यमां यमि लोपः, चतुष्पदात्मकमिदम्।

**अनुवृत्तिः** – अन्यतरस्याम्।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – हलः परस्य यम्वर्णस्य लोपो भवति यमि परे ।

**विशेषार्थः** – अत्र यमांयमि इत्यनेन यथासंख्यमनुदेशः समानाम् इत्यस्य प्रवृतिर्भवति।

माहात्म्यम् – अत्र तकारात् परः म्कारः यम् ततः परं य यम् तस्य लोपः प्राप्ते किन्तु यमाँ यमि इत्यत्त यथासंख्यनिर्देशात् न भवति लोपः, लोपारम्भस्य कि फलम् तदा उच्यते आदित्य शब्दात् ण्य प्रत्ययेऽनुबन्धलोपे आदित्यय भत्वात् अलोपं अत्र हलो यमामिति यकारलोपः तदा आदित्यं हविः इति रूपम् सिद्धयति।

---

**(61) एचोऽयवायावः।6।1। 78॥ एचः क्रमादय् अव् आय् आव् एते स्युरचि।**

**(62) तस्यलोपः।1 ।3 ।9 ॥ तस्येतो लोपः स्यात् । इति यवयोर्लोपो न। उच्चारणसामर्थ्यात्। एवं चेत्संज्ञापीह न भवति। हरये विष्णवे। नायकः। पावकः।**

**(63) वान्तो यि प्रत्यये।6 ।1 ।79॥ यकारादौ प्रत्यये परे ओदौतोरव् आव् एतौ स्तः। गोर्विकारो गव्यम्। ''गोपयसोर्यत्'' (सू.१५३८) नावा तार्य नाव्यम् नौवयोधर्म (सू.१६४३) इत्यादिना यत्। ''गौर्यूतौ'' छन्दस्युपसंख्यानम् (वा.३५४३) अध्वपरिमाणे च (वा.३५४४) गव्यूतिः। ऊतियूति -(सू.३२७४) इत्यादिना यूतिशब्दो निपातितः। ''वान्तः'' इत्यत्र वकाराद् ''गोर्यूतौ'' इत्यत्र छकाराद्वा पूर्वभागे ''लोपो व्योः'' (सू.८७३) इति लोपेन वकारः प्रश्लिष्यते। तेन श्रूयमाणवकारान्त आदेशः स्यात्। वकारो न लुप्यत इति यावत्।**

---

(61) **पदच्छेदः** एचः, अयवायावः द्विपदमिदं सूत्रम्।

**समासः** – अच् च अक् च आय् च, आव् च अयवायावः द्वन्द्ववसमासः।

**अनुवृत्तिः** - अचि, संहितायाम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ए, ओ, ऐ, औ, इति वर्णानां स्थाने अय् अव् आय् आव् आदेशो जायते अचि परे।

**साधनिकाः** हरये - हरे + ए यथासंख्यमनुदेशः समानाम् इति सूत्र सहकारेण एचोऽयवायः इति अय् आदेशं वर्णसम्मेलनेन हरये इति साधु। एवमेव विष्णो ए, नै अकः, पौ अकः, त्रिषु क्रमशः, अव् आय् आव् इति आदेशाः भवन्ति।

**विशेषः** केनापि उच्यते अन्तिम प्रकारकारणाम् इत्संज्ञा कुतो न तदानी मुच्यते उच्चारणसामर्थ्यात्।

(62) **पदच्छेदः** तस्य, लोपः द्विप-पमिदंसूत्रम्। - विधिसूत्रम्।

(63) **पदच्छेदः** वान्तः यिः प्रत्यये, त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** इत्।

**समासः** वकारः अन्ते यस्य स वान्तः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यकारादिप्रत्यये परे ओकारान्तस्य अव् आदेशः तथा औकारान्तस्य आवादेशो भवति।

**साधनिकः** - गव्यम् गोर्विकारो गव्यम् इति विग्रहे गोशब्दात् यत् प्रत्येयऽनुबन्धलोपे गो + य यकारादिप्रत्यये अवादेशे 'गव्यम्' साधु।

गव्यम् - गोर्विकारो गव्यम् इति विग्रहे गोपपसोर्यत् इति यत् प्रत्ययेऽनुबन्धलोपे वान्तो यि प्रत्यये इति वान्तोदेशे (अव) ग अव् य वर्णसम्मेलने गव्यम् इति जाते प्रथमैक वचने गव्यम् इति रूपं सिद्धम्। नाव्यम्। नावा तार्यमिति विग्रहे नौ शब्दात् यत् प्रत्यये अनुबन्धलोपे नौ + यम् वान्तो यि प्रत्यये इति यकारादिप्रत्यये परे वान्ते, अवादेशे विभक्तिकार्ये नाव्यम् जलमित्यर्थः।

गोर्यूतौ छन्दस्युपसंख्यानम् गोशब्दात् यूति शब्दे परे वान्तादे शः निपात्यते छन्दसि गो यूतिः अत्र ग् अव् यूतिः गव्यूतिः। क्रोशयुंगलमित्यर्थः। अत्र अध्वपरिमाणे च इति वार्तिकेन मार्गपरिमाणार्थ भवति ।

**यूतिशब्दः** किमिति प्रश्ने ऊतियूतिसातिहेतिकीर्तयश्च इति यूति शब्दो निपात्यते।

अत्र प्रश्नः समुदेतियत् गो यम् गव्यम् इत्यत्र लोपो व्योर्वलि इति वकारस्य लोपः कथं न भवति तदा उच्यते, वान्तो यि प्रत्यये इत्यत्र वात्तः इति उच्चार्यते तदा वकारान्तः श्रूयमाणः आदेश अन्तः वकारो न लुप्यते इति।

एवं गव्यम् इत्यत्र भत्वात् पदानात्तत्वाभावातवोमानत् प्राप्ति रेव नास्ति। गव्यूतिरित्यत्र मार्ग परिमाण वाचकः संज्ञा शब्दः संज्ञा शब्देषु विकारो न संभवति अतः लौकिकार्थ वाकचकः गव्यूतिशब्दः तत्र वलोपो न।

यका-रादि-प्रत्यये इत्यर्थलाभः - यस्मिन्विधिस्तदादावलग्रहणे इति परिभाषा बलाद्लभ्यते। तेन यकादादि प्रत्यये परे औदौतोरव् आव् एतौ सतः। इत्यर्थः संपद्यते।

---

**(64) धातोस्तन्निमित्तस्यैव । ६। १ । ८० ॥ यादौ प्रत्यये परे धातोरेचश्चेद्वान्तादेशस्तर्हि तन्निमत्तस्यैव, लव्यम् अवश्यलाव्यम्। तन्निमित्तस्यैव इति किम् । ओयते। औयत।**

**(65) क्षय्यजय्यौ शक्यार्थे। 6।1। 81। यान्तादेशनिपातनार्थमिदं। क्षेतुं शक्यं क्षय्यम्। जेतु शक्यं जय्यम्। शक्यार्थे किम्। क्षेतु जेतुं योग्यं क्षेयं पापम्। जेयं मनः।**

---

(64) **पदच्छेदः** - धातोः तन्निमित्तस्य, एव, त्रिपदमिदं सूत्रम्।

**समासः** - सः (या दिप्रत्ययः) निमित्तयेस्य स त निमित्तः। (बहुव्रीहिः)

**अनुवृत्तिः** - वान्तः, यि, प्रत्यये एषः।

**सूत्रप्रकारः** – नियमसूत्रम्।

**सरलार्थः** – य कारा दौ प्रत्यये परे धातोः एचः वान्तादेशो भवति तर्हि यादि प्रत्यय निमित्तकस्यैव।

**साधनिका** – लव्यम् लूधातोः यत् प्रत्ययेऽनुबन्धलोपे लू + य यत् प्रत्ययं आर्धधातुकं मत्वा उकारस्य गुणे लो य, धां–तो–स्तन्निमित्तस्यैव इति अवादेशे ल् अव्य वर्ण सम्मेलने विभक्तिकार्ये लव्यम् साधु। अर्थः कर्तनयोग्यम्।

अवश्यलाव्यम् – लू धातो ण्यत्प्रत्ययेऽनुबन्धलोपे णित्वात् उकारस्य अचोत्रिणति इति औकारे वृद्धौ धातो स्तन्निमित्तस्यैव इति आवादेशे अवश्य इति संयोजनेन अवश्य लाव्यम्।

**विशेषः** – तन्निमित्तस्यैव इति किम् – तन्निमित्तं नाम प्रत्ययं मत्वैव यत्र उकारस्य स्थाने औकारो वा ऐकारः स्यात् तदैव वकारान्तादेशः। यथा ओयते इत्यत्र आ वे लटः लटः स्थाने तप्रत्यये सार्वधातुके यक् अनुबन्धालोपे आवेयत वाकारस्य संप्रसारणेन उकारे संप्रारणाच्च इति पूर्वरुपे 'आ ड यत' आद्गुणः इति गुणे दिव्यात् एत्वे ओयते अत्र यकारनिमितकः ओकारो नास्ति अत एव यकारादौपरऽपि वान्तादेशो न।

औयत इत्यत्रापि आ + उ + यत वृद्धिः औयत इत्यत्र वकरादौ प्रत्यये परेऽपि तन्निमिताभावात् आवादेशो न।

---

**(66) क्रय्यस्तदर्थे।6 ।1 । 82 ॥ तस्मै प्रकृत्यर्थायेदं तदर्थम्। क्रेतारः क्रीणीयुरिति बुद्ध्यापणे प्रसारितं क्रय्यम्। क्रेयमन्यत्। क्रयणार्हमित्यर्थः।**

**(67) लोपः शाकल्यस्य।8। 3 । 19॥ अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे। पूर्वत्रासिद्धम्।**

---

(65) **पदच्छेदः** क्षप्यजय्यौ, शक्यार्थे द्विपदमिदं सूत्रम्।

**समासः** क्षप्यस्च जच्चस्व क्षप्यजच्चौ (शब्दौ)।

**सूत्रप्रकारः** विधिसूत्रम्।

**सरलार्थः** – क्षय्यजययौ शब्दौ शक्यार्थे निपात्येते।

यथा क्षेतुं शक्यं क्षय्यम् क्षिधातौः यत् प्रत्ययः अनुबन्ध लोपे इकारस्य गुणे क्षे पर अणदेशे क्षप्प सु अमादेशे क्षय्यम्।

जप्पम् जिध्रातोः अचोयदिति यत् प्रत्यये सार्वधातुका र्धधातुकयोरिति गुणे य अयादेशेऽनेन क्षय्यम् विभक्तिकार्ये जेतुशक्यमित्यर्थः।

**विशेषार्थः** – शक्यार्थे एव अयादेशः जेतु योग्यं जेयं मनः अत्र शक्यार्थो नास्ति अतोऽत्र जिधातो यप्रत्यये यकारादौ परेऽपि शक्यार्थाभावात् न अयादेशः। क्षेमम्इत्येवपि।

(66) **पदच्छेदः** क्रप्यः तदर्थे। द्विपदमिदं सूत्रम्।

**समासः** – स चाऽसौ अर्थः तदर्थः तस्मिन् तदर्थे।

**सरलार्थः** – तदर्थः धात्वर्थः यथा क्रेतारः' क्रीणीयुः इति बुद्धा आपणे प्रसारितं वस्तु इत्यर्थे क्रय्यम् इति शब्दो निपात्यते। विक्रेतुं योग्यं क्रेयम्।

(67) **पदच्छेदः** लोपः शाकल्यस्य

**अनुवृत्तिः** अपूर्वस्य, अशि, व्योः, पदस्य।

**सूत्रप्रकारः** विधिसूत्रम्।

**सरलार्थः** – अकारात् परः य कारो वा वकारः तस्य लोपो वा अशि परे।

---

**पूर्वत्रासिद्धम् ( सू.१२ ) इति लोपशास्त्रस्यासिद्धत्वान्न स्वरसंधि। हर एहि हरयोहि। विष्ण इह-विष्णविह। श्रिया उद्यतः श्रियायुद्यतः। गुरा उत्कः गुरावुत्कः। कानि सन्ति 'कौ स्तः' इत्यत्रास्तेरल्लोपस्य स्थानिवत्वेन यणावादेशौ प्राप्तौ, 'न पदान्त' ( सू.51 ) इति सूत्रेण पदान्तविधौ तन्निषेधान्न स्तः॥**

---

हरयेहि– हरे + एहि इति दशायाम् एचोऽयवाचावः इति अयादेशे हरयेहि अत्र लोपः शाकल्यस्य इति यकार लोपे सति हर एहि अत्र वृद्धिरेचि इति वृद्धौ प्राप्त। लोपः शाकल्यस्य इति शास्त्रं त्रिपादी वर्ततेऽतः वृद्धिशास्त्रापेक्षया असिद्धे जाते हरय् ए हि यकारत्वात् पुनः वृद्धिर्न।

विष्णो + इह विष्ण + अव् + इह विष्णविह एवं श्रियै + उद्यत: श्रिय् + आय् + उद्यत: श्रियायुद्यत:। गुरौ + उत्क: गुर् + आव् + उत्क: गुरावुत्क:।

**विशेषार्थ:**– कानि सन्ति कौ स्त: उभयत्र सन्ति स्त: इत्यत्र अस् धातु: तस्य अकारस्य श्नसोरल्लोप: इत्यनेन लोप: अच: परस्मिन् पूर्वविधौ इत्यनेन स्थानिवद्भावेसति कानि सन्ति अत्र यण् कौ स्त: इत्यत्र एचोऽयवायाव: इति आद्यदेश: प्राप्नोति। न पदान्तद्विर्वचन वरे यलोप – इत्यादिना पदान्तविधौ स्थानिवद्भावस्य निषेध: अत अकारत्वाभावात् न यणावादेशौ भवत:। वाक्यसंस्कारपक्षे अकृतव्यूहा: परिभाषया समाधानं क्रियते।

(68) **पदच्छेद:** एक: पूर्वपरयो: द्विपदमिदं सूत्रम्।

**समास:** पूर्वश्च परश्च पूर्वपरौ तयो: पूर्वपरयो: (द्वन्द्वसमास)

**सूत्रप्रकार:** – अधिकारसूत्रम्। अस्याधिकार: ख्यत्यात्परस्य 6.1.112 सूत्र यावद् गच्छति।

द्वयो: वर्णयो: स्थाने अयमे का देशं करोति।

आद्– गुण:

**अनुवृत्ति:** अचि, एकपूर्वपरयो:, संहितायाम्।

**सूत्रप्रकार:** धिधिसूत्रम्।

## स्वाध्याय:

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

(1) **इकारस्य यकारो भवति**

(क) क्रमाद् (ख) स्थानकृतसाम्यात् (ग) गुणकृतसाम्यात् (घ) प्रमाणकृतसाम्यात्

(2) **अनचि च इत्यत्र विभक्ति:**

(क) चतुर्थी (ख) तृतीया (ग) सप्तमी (घ) पञ्चमी

(3) **अयवायाव: इत्यत्र आदेशा: सन्ति–**

(क) त्रय: (ख) द्वौ (ग) त्रय: (घ) चत्वार:

(4) **नायक: इत्यस्य पदच्छेदोऽस्ति**

(क) न + आयक: (ख) नाय् + अक: (ग) नै + अक: (घ) ना + यक:

(5) **गुरावुत्क: अत्र सूत्रं प्रवर्तते।**

(क) एचोऽयवायाव: (ख) इको यणचि (ग) अक: सवर्णे दीर्घ: (घ) एकाम पिन

**2. एकैकवाक्येन उत्तरं लिखत ।**

(1) कानि सन्ति अत्रस्थानिवद्भावेन किं प्राप्नोति ?

(2) न पदान्तद्विर्वचनेति सूत्रं कि करोति इति लिखत।

(3) अच: पारिस्मन् पूर्वविधौ अस्य कोऽर्थ: ?

(4) अलोऽन्त्यस्य इति सूत्रं कीद्दृशं किं च तस्योपयोग: ?

(5) क्रप्यस्तदर्थे इत्यत्र तदर्थशब्दस्य कोऽर्थ: ?

**3. अविभागं योग्योत्तरेण ब विभागेन सह योजयत।**

| अ विभाग | ब विभाग |
|---|---|
| (क) धातोस्तन्निमित्तस्यैव | (क) पुत्रादिनी त्वमसिपापे |
| (ख) गोपयसोर्यत् | (ख) लव्यम् |
| (ग) सर्वत्र शाकल्यस्य | (ग) आदित्यम् |
| (घ) नादिन्याक्रोरो पुत्रस्य | (घ) गव्यम् |
| (ङ) हलो यमां यमि लोपः | (ङ) अर्कः |

**4. पञ्चपाणि साधयत।**

सुद्धयुपास्यः। धात्रंशः। नायकः। रमेशः। इन्द्रः। हर्य्यनुभवः।

**5. अधोलिखितानां पूर्ति कृत्वाऽर्थं लिखत।**

(1) न पदान्तद्विवर्चन ..........।

(2) अचः परस्मिन् .......... ।

(3) स्थानिवदादे .......... ।

(4) त्रिप्रभृतषु ............।

(5) धातोस्तन्नि......... ।

**6. संक्षेपेण उत्तरं लिखत।**

(1) तन्निमितस्यैव किम् ? ओयते।

(2) शक्यार्थे किम् ? क्षेतु योग्यं क्षेयं पापम्।

(3) स्थानिवद्भावस्य परिभाषां लिखित्वा उदाहरणं लिखत ।

(4) गव्यम् नाव्यम् इत्यनयोः वकारलोपः कथं न भवति ?

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिरव्य तस्य पदच्छेदं पदपरिचयमन्वयं सरलसंस्कृतेन भावार्थं च लिखत।

◆

| 5 | अच् सन्धिप्रकरण-2 |
|---|---|

**(68) एकः पूर्वपरयोः।6 ।1 ।84॥ इत्यधिकृत्य॥**

**(69) आद् गुणः।6 ।1। 87॥ अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात्संहितायाम्। उपेन्द्रः। रमेशः। गङ्गोदकम्।**

**(70) उरणरपरः ।1 ।1 ।51 ॥ 'ऋ इति त्रिंशतः संज्ञा' इत्युक्तम् तत्स्थाने योऽण् स स्वरः सन्नेव प्रवर्तते। तत्रान्तरतम्यात् 'कृष्णर्द्धिः' इत्यत्रार्। 'तवल्कार' इत्यत्राल्। 'अचोरहाभ्याम्' (सू.५९) इति पक्षे द्वित्वम्।**

---

(68) **पदच्छेदः** एकः पूर्वपरयो द्विपदमिदं सूत्रम्।

**समासः** पूर्वश्च परश्च पूर्वपरौ तयोः पूर्वपरयोः। (द्वन्द्वसमासः)

**सूत्रप्रकारः** अधिकारसूत्रम्।

**अस्याधिकारः** ख्यत्यात्परस्य इति सूत्रं यावद् गच्छति।

**सरलार्थः** पूर्व परयोः स्थाने एकादेशो भवति।

(68) आद, गुणः।

**पदछेदः** - आत् गुणः द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - अचि संहितायाम् एकः पूर्वपरयोः।

**सूत्रप्रकारः** - विधि सूत्रम्।

**सरलार्थः** - अवर्णात् अचि परे द्वयोः स्थाने एकादेशो गुणो भवति।, संहितायाम्।

**साधनिकाः** - उपेन्द्रः उप+ईन्द्रः इत्यत्र अकार - इकारयोः द्वयोःस्थाने आद्गुणः इत्येन-न एकः गुणः इति जिज्ञासायां अकारस्य कण्ठः, इकारस्य तालुः, अतः एदैतोः कष्ठतालु इति नियमात् कण्ठतलुस्थानी एकारः गुणरुपेण जायते, तदा उपेन्द्रः सिद्धयति। रमा+ईशः रमेशः। गंगा+उदकम् गंगोदकम्।

(70) **पदच्छेदः** - उः अण् रपरः, त्रिपदमिंदं सूत्रम्।

**समासः** रः परः यस्मात् सरपरः।

**अनुवृत्तिः** - स्थाने। स्थाने।

**सूत्रप्रकारः** - परिभाषासूत्रम्।

**सरलार्थः** - ऋकारस्य त्रिशंतः संज्ञा, तस्य स्थाने जायमानः अण् रपरः, सन् लक्ष्येप्रवर्तते।

**विशेषार्थः** - र इति प्रत्याहारः तत्र रेफः लः इति द्वौ वर्णो आयातः तेन कृष्णाद्धिः इत्यत्र अर् तवल्कारः इत्यत्र अल् गुणादेशो अलृ-वर्णयोः स्थाने भवति।

**कृष्णद्दिर्धः** - कृष्णस्य ऋद्दिधः कृष्ण ऋद्दिधः अत्र आद्गुणः इत्यनेन अकारऋकारयोः स्थाने गुणः प्राप्तः किन्तु कोऽपि अकारऋकारयोः स्थान-साम्यगुणः नास्ति अतोऽत्र यत्किञ्चित् साम्यमादाय अकुह-इति नियमात् अकारः, सच उरणा रपरः इति सूत्रेण ऋकारस्य स्थाने जायमानवात् रेफेण युतः सन् द्वयोः स्थाने अर् इति कृते कृष्णर्बर्द्धिः इति साधुः।

एवमेव तव लृकारः अत्र अकारलृकारयोः स्थानसाम्यात् उरणरपरः इति रप्रत्याहारबलात् लपरत्वं अल् इति गुणे जाते तवल्कारः अल् इति द्वयोः कण्ठदन्तस्थानिनोः स्थाने कण्ठदन्तिनौ भवतः।

**कृष्णार्द्धिः** - तवल्कारः उभयत्र अचोरहाभ्यां द्वे इति पक्षे दि्र्यम्, तस्य झरो झरि सवर्णे इत्यनेन धलोपे द्वित्वाभावे

लोपे कृष्णर्धिः। असतिलोपे द्विवत्वलोपयोर्वा- कृष्णर्द्धिः। सतिद्वित्वे लोपे चासति - त्रिधम् - कृष्णदिद्धः।

**तवल्कारः** इत्यत्र 'अनचिच' इति लकारस्य द्वित्वम्: यणो मयो द्वे वाच्ये इति ककारस्यद्वित्वे तवल् क्कारः, 3 - तवल्कारः अज् द्वित्वाभाव पक्षे नहि लस्य द्विव्यम् नहि कस्य द्वित्वम्। तवल्लक्कारः लकारककारयोरुभयोद्वित्वम् अनेनैव प्रकारेण चत्वारि रूपाणि भवन्ति।

(72) **पदच्छेदः** - वृद्धिः एचि।

**अनुवृत्तिः** - आत्। एक पूर्वपरयोः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अवर्णाद् एचि् परे भवति तदा पूर्व परयोः स्थाने वृद्धिः एकादेशो भवति।

**विशेषार्थः** - इदम् सूत्रम् आदगुणः सूत्रस्यापवादः।

---

**(71) झरो झरि सवर्णे। 8 ।4।65 । हलः परस्य झरो लोपो वा स्यात्सवर्णे झरि। द्वित्वाभावे लोपे सत्येकधम्। असति लोपे, द्वित्वलोपयोर्वा द्विधम्। सति द्वित्वे लोपे चासति त्रिधम्। कृष्णर्धिः-कृष्णर्द्धिः कृष्णद्द्धिः। 'यण् इति पञ्चमी मय इति षष्ठी' इति पक्षे ककारस्य द्वित्वम्। लस्य तु 'अनचि च' (सू. ४८) इति। तेन 'तवल्कारः' इत्यत्र रूपचतुष्टयम्।**

**द्वित्वं लस्यैव कस्यैव नोभयोरुभयोरपि।**
**तवल्कारादिषु बुधैर्बोध्यं रूपचतुष्टयम्।**

**(72) वृद्धिरेचि ।6।1 ।88॥ आदेचि परे वृद्धिरेकादेशः स्यात्। गुणापवादः। कृष्णैकत्वम्। गङ्गौघः। देवैश्वर्यम्। कृष्णौत्कण्ठ्यम्।**

---

(71) **पदच्छेदः** - झरः, झरि, सवर्णे त्रिपदमिदं सूत्रम्।

**समासः** - समानो वर्णः सवर्णः तस्मिन् सवर्णे।

**अनुवृत्तिः** - अन्यतरस्याम्, हलः लोपः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - हलः परः घः झरः तस्य लोपः सवर्णे झरि। उदाहरणं यथा कृष्णद्र्धिः इत्यत्र हल रेफः ततः पर झर् पूर्वधकारः सवर्णः उत्तरधकारः अतः पूर्वधकारस्य लोपेसति कृष्णर्धिः।

अत्र चत्वारि रुपाणि भवन्ति इति उपरोक्तकारिकया ज्ञायते यथा ''द्वित्वं लस्यैव लकारस्य द्वित्वेंन तवल्लकारः द्वित्वं कस्यैव ककारस्यापि द्वित्वेन तवल्लककारः।

**नोभयोः**- तवल्कारः उभयोरपि - तवल्कारादिषु वुधै र्बोध्यं रूपचतुष्ट्यम्।

(72) वृद्धिः, एचि, द्विपदमिदंसूत्रम्।

**अनुवृत्तिः** आतविशेष गुणापवादः - येननाप्राप्तिन्यायेन इयं वृद्धिः आद्गुणस्य बाधिकाः आद्गुणस्य अवश्यप्राप्तौ इयमा-रभ्यमाणा वृद्धि आदगुणस्य बाधिका कृष्ण एकत्यम् अव प्राप्तगुणो ऽपि न भवति वृद्धया बाध्यते।

---

**(73) एत्येधत्यूठ्सु।6 ।1 ।81 ॥ अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्। पररूपगुणापवादः। उपैति। उपैधते प्रष्ठौहः। 'एजाद्योः' किम्? उपेतः। मा भवान्प्रेदिधत्। पुरस्तादपवादन्यायेनेयं वृद्धिः एङि पररुपम् ( सू. 78 ) इत्यस्यैव बाधिका न तु 'ओमाङोश्च' ( सू.80 ) इत्यस्य। तेन 'अवैहि' इति वृद्धिरसाधुरेव। 'अक्षादूहिन्यामुपसंख्यानम् ( वा.3604 )। अक्षौहिणी सेना। 'स्वादिरेरिणोः' ( वा. 3606 )। स्वैरः। स्वेनेरितुं**

**शीलमस्येति स्वैरी। स्वैरिणी। 'प्रादूहोढोढ्येषैष्येषु ( वा. 3606 ) प्रौहः। प्रौढः। 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ( प. 525 ) 'वश्च-' ( सू.294 ) इति सूत्रे राजेः पृथग्भ्राजिग्रहणाज्ज्ञापकात्। तेनोढग्रहणेन क्तान्तमेव गृह्यते, न तु क्तवत्वन्तस्यैकदेशः। प्रोढवान्। प्रौढिः।**

---

एत्येधत्यूठ्सु।

**समासः** – एति च एधति च उठ् च एत्येधत्युढः तेषु एत्येधत्युढ्सु।

**अनुवृत्तिः** – वृद्धिः एचि आत् पूर्वपरयोः, एकः।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – अवर्णाद् एजादिइण्धातौपरे एधजाहपरे उढ्शव्यावये अचि परे पूर्वपर्योः वृद्धिरेकादेशो भवति। अयं पररुपगुणयोरपवादः।

**विशेषार्थः** – उप+इति इत्यत्र आद्गुणः इति गुणं प्राप्नोति तं प्रबाध्य वृद्धिरेचि इति वृद्धिप्राप्ता तं प्रबाध्य एत्येधव्यूठ्सु इत्यनेन एति इत्यत्र एजादित्वं इण्त्वं चवर्तते अतः पूर्वस्य अकारस्य परस्य च एकारस्य स्थाने ऐकारे कृते उपैति सिद्धमति।

उप + एधते – उपैधते। प्रष्ठ + उहः प्रष्ठौहः। एजादिः इण् धातोः विशेषणम् एजादित्वाभावे उप इतः इत्यत्र वृद्धिर्ने अपि तु गुणः। प्रेदिधत इत्यत्रापि इदिधत् इत्यत्र एजादित्वाभावात् वृद्धिर्न गुण एव।

पुरस्तादपवादन्यायेन–सूत्रक्रमे पूर्वपठिताः अपवादाः अनन्तरान् विद्यीन बाधन्ते नोत्तरान्, तेन एत्येधत्यूठ्सु इति एङि पररूपम् इत्यस्यैव बाधकम् न तु ओमाडोश्च इत्येतत्सूत्रम्। 'अव आ इहि' इत्यत्र गुणे कृते 'अव एहि' अत्र एत्येधव्यूठसु इति वृद्धिः एङि पररूपम् इति पररुपम् तस्य बाधकम्, पुनश्च ओमाडोश्च इति पररूपे कृते अवेहि इति साधु, अवैहि असाधु।

अक्षादुहिन्या– अक्षशब्दात् उहिनी शब्दे परे पूर्वपरयोः स्थाने वृद्धिरैकादेशो भवति। यथाः अक्ष उहिनी अक्षौहिणी पूर्वपदात्संज्ञयामगः इति णत्वम्।

स्वादि – स्वशब्दात् परं इर, इरिन् इति द्वौ भवतश्चेद पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवति स्व इरः स्वैरः। बढेः।

---

**'इष इच्छायां तुदादिः,' 'इष् गतौ दिवादिः,' 'इष आभीक्ष्ण्ये क्र्यादिः' तेषां घञि ण्यति च 'एषः'। 'एष्यः' इति रूपे। तत्र पररूपे प्राप्तेऽनेन वृद्धिः। प्रैषः। प्रैष्यः। यस्तु 'ईष ऊञ्छे यश्च 'ईष गतिहिंसादर्शनेषु' तयोर्दीर्घोपिधत्वात् ईषः। ईष्यः। तत्राद्गुणे प्रेषः प्रेष्यः। 'ऋते च तृतीयासमासे - ( वा. 3607 ) सुखेन ऋतः सुखार्तः, 'तृतीया' इति किम् परमर्तः। 'प्रवत्सतरकम्बलवसनार्णदशानामृणे ( वा. 3608-9 ) प्रार्णम्। वत्सतरार्णमित्यादि।**

---

स्वैरी – स्व + इरिन् इत्यत्र स्वादिरेरिणोः इति वृद्धिः स्वैरिन् उपधा दीर्घेण स्वैरी। नकारान्तवात् स्त्रीलिङ्गे स्वैरिणी।

प्रादूहोढोढ्येषैष्येषु – प्र उपसर्गात् उह, उढ, उढि एष एष्य शब्देषु परेषु पूर्वपरयोः वृद्धिरे कादेशो भवति प्र+ उहः – प्रौहः, प्र + उढ – प्रौढः ।

अर्थवद्ग्रहणे – अर्थवतः ग्रहणम्, अर्थवदग्रहम्। तस्मिन् अर्थवद्ग्रहणे न अनर्थकस्य ग्रहणम् – प्र + उढः अत्र वृद्धिः तथैव प्र उदवान इत्यत्र उढ इत्येकदेशग्रहणं कृत्वा, वृद्धिश्च भवति। यदि एतादृशः स्यात्तर्हि व्रश्चभ्रस्जसृजभृजयजराजभ्राजच्छशां षः राजग्रहणेन भ्राज इत्येक–देशस्य बोधः स्यात्। पुनः भ्राजग्रहणं सूचयति यत् अर्थवदग्रहणे नानर्थकस्य ग्रहणम्। तेन प्रोढवान् इत्यत्र उढ् इति एकदेशमादाय वृद्धिर्न। क्तप्रत्ययस्य ग्रहणं यत्र तत्र त्तकवतु इत्यस्य क्त अनर्थवान्।

प्रौढिः – 'प्र+उढिः' अत्र आद्गुणः इति सूत्रेण गुणः प्राप्तः। तं प्रबाध्य प्रादूहोढोढ्येषैष्येषु इति वृद्धौ प्रौढिः इति साधुः।

प्रैषः प्रैष्यः इत्यत्र इष इच्छार्थकधातोः इष गतौ दिवादिः इष आभीक्ष्ण्ये क्र्यादिधातोः क्रमश घञ्ण्यत् च प्रत्यय कृते एषः आभीक्ष्ण्ये क्र्यादिधातोः क्रमशः घञ् ण्यत् च प्रत्यये कृते एषः एष्यः, अत्र प्र एषः, प्र एष्यः एङिपररूपम् इति पर–रुपे प्राप्ते प्रादूहोढयेषैष्येषु इति वृद्धौ प्रैषः प्रैष्यः इति रुपद्वयम्।

विशेषार्थः ये के-चिद् वदन्ति यत् ईष उच्छे यश्च ईषगतिहिंसादर्शनेषु तयोः ईषः ईष्यः एकारो न भवति दीर्घोपधत्वात् अत एव ईषः ईष्यः इत्येवरूपं तथाऽत्र गुणो जायते तेन प्रेषः प्रेष्यः इति द्वे रुपे भवतः।

ऋते च तृतीयासमासे – तृतीया समासे अकारात् पदं यदि ऋकारः आगच्छति चेत् वृद्धिः एकादेशो जायते सुख +ऋतः अत्र अकार ऋकारयो द्वयोः स्थाने उत्तर इति रपरत्वेन वृद्रिोदशो जातः सुखार्तः।

ऋणस्य+पनयनाय यदन्यदृणं क्रियते। तदृणार्णम्। दशार्णो देशः। नदी च दशार्णा। ऋणशब्दो दुर्गभूमौ जले च।

---

**(74) उपसर्गादृति धातौ।6 ।1।91 ॥ अवर्णान्तादुपसर्गादृकारादौ धातौचपरे वृद्धिरेकादेशः स्यात्। उपार्च्छति। प्रार्च्छति।**

**(75) अन्तादिवच्च।6। 1 । 85 ॥ योऽयमेकादेशःस पूर्वस्यान्तवत्परस्यादिवत्स्यात्। इति रेफस्य पदान्तत्वे।**

**(76) खरवसानयोर्विसर्जनीयः 8 ।3।15 ॥ खर्यवसाने च परे रेफस्य विसर्जनीयः स्यात्पदान्ते। इति विसर्गे प्राप्ते। अन्तवद्भावेन पदान्तरेफस्य न विसर्गः 'उभयथर्क्षु' ( सू. 3630 ) 'कर्तरि चर्षिदेवतयोः' ( सू. 3167 ) इत्यादि-निर्देशात्।**

---

तृतीयेति किम् ? परमर्तः परमश्चासौ ऋतः अत्र परम सु ऋतसु तृतीया नास्ति अतः वृद्धिर्न अपि गुणे रपरे चकृते परमर्तः।

(प्रवरसतर – 3806-9) प्रवत्सतर, कम्बल वसन ऋण दशनशब्देभ्यः परं यदि ऋणशब्द आगच्छति चेत् पूर्वपरयोरेको वृद्धिः आदेशः।

प्रार्णम् – प्र ऋणा म् अत्र 'आद्गुणः' इति गुणे प्राप्ते तं प्रबाध्य उपसर्गादृति धातौ वृद्धि प्राप्ते किन्तु एतेषु र्वसतर कमबालादिषु विशेषात् प्रवत्सतरकम्बलदशानामृणे इति वृद्धौ प्रार्णम्। अत्यधिकम् ऋणम्। वत्सतराय ऋणम् – वत्सरार्णम् यदन्दद् ऋणं तदेव ऋणार्णमित्युच्यते। दशविधानि ऋणानि जलानि यस्यां नद्यां सा दर्शार्णा।

(74) **पदच्छेदः** – उपसर्गाद्, ऋति, धातौ त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** – आत् वृद्धिः पूर्वपरयोः एकः।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – अकारान्ताद् उपसर्गाद् ऋकारादौ धातौ परे पूर्वपरयोः एकः वृद्धिः स्यात्। उप ऋच्छति अत्र पूर्वस्य अकारः उत्तरस्य ऋच्कारः द्वयोः स्थाने आ वृद्धिः रपरत्वेन आर् कृते उपार्च्छति। एवं प्र ऋच्छति – प्रार्च्छति।

(75) **पदच्छेदः** – अन्तादिवत् च द्विपदमिदम्।

**सूत्रप्रकारः** अतिदेशसूत्रम्।

**अनुवृत्तिः** पूर्वपरयोः एकादेशः।

**सरलार्थः** एकादेशस्य पूर्व पूर्व स्थानघटित-धर्मः परस्थानघटित-धर्मः एकादेश-विशिष्टे आयाति। अनेन प्रार्च्छति घटित रेफस्य पदान्तत्वे कृते।

(76) **पदच्छेदः** – खरखसानयोः विसर्जनीयः।

**समासः** खर् च अवसानं च खरवसाने, तयोः खरवसानयोः ।

**अनुवृत्तिः** रः।

**सूत्रप्रकारः** विधिसूत्रम्।

**सरलार्थः** खरि अवसाने च पदान्तस्य रेफस्य विसर्गः।

---

**उपसर्गेणैव धातोराक्षेप सिद्धे 'धातौ' इति योगविभागेन पुनर्वृद्धिःविधानार्थम्। तेन 'ऋत्यकः' ( सू. 92 ) इति पाक्षिकोऽपि प्रकृतिभावोऽत्र न भवति।**

**(77) वा सुप्यापिशलेः। 6।1 ।92॥ अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ परे वृद्धिर्वा स्यात्। आपिशलिग्रहणं पूजार्थम्। प्रार्षभीयति प्रर्षभीयति। सावर्ण्यात्लृवर्णस्य ग्रहणम्। प्राल्कारीयति-प्रल्कारीयति। तपरत्वादीर्घे न। उप ॠकारीयात उपर्कारीयति।**

---

अनेन रेफस्य विसर्गे प्राप्ते किन्तु उभयथर्क्षु कर्तरिचर्षिदेवतयौः इति द्वयोः सूत्रयोर्निदेशात् ज्ञायते यत् पदातत्व-वमाश्रित्य रेफस्य विसर्गो न संपद्यते। अन्यथा पाणिनिना कृतं स्यात् न कृतं तदप्रमाणम्।

अपरञ्च उपसर्गादृति थातौ इत्यत्र धातुसंन्नियोगेन उपसर्गस्य अर्थ लाभः संभवः धातोः पुनर्ग्ररहणम् वृद्धिविद्यानार्थम् तेन ऋत्यक इति सूत्रेण प्राप्तः प्रकृतिभावः पाक्षिकोऽपि न।

(77) **पदच्छेदः** - वा, सुपि, आपिशलेः

**अनुवृत्तिः** आत्, उपसर्गात्, ऋति, धातौ, वृद्धि।

**सूत्रप्रकारः** विधिसूत्रम्।

**सरलार्थः** - अवर्णान्तात् उपसर्गात् ऋकारादौ नामधातौ परे पूर्वपरयोरेक वृद्धिः स्यात्। अत्र आपिशालिग्रहणं सम्माना र्थम्।

**साधनिका** - प्रार्षभीयति - प्र ऋषभीयति अत्र प्रघटकः यः अकारः ऋषभीयति इत्यस्य ऋकारः तयोः द्वयोः स्थाने वृद्धिरुपेण आकारः उरण्रपरः इति रपरत्वेन आर् इति जाते प्रार्षभीयति इति सिद्धयति। वृद्धयभावपक्षे गुणः रपरे च प्रर्षभीयति। ऋलृवर्णयोर्मिथः सावर्ण्यंवाच्यम्, अतः उप+ऋकारीयति इत्यत्रापि सत्यां वृद्धौ उपाल्कारीयति पक्षे उपल्कारीयति।

उपसर्गादृति धातौ तः ऋति इति पदमनुवर्तते अतः तपरस्तत्कालस्य इति सूत्र बलात् ह्रस्वे ऋकारे परे वृद्धि दीर्घे परे न अत एव उप ॠकारीयति इत्यत्र वृद्धिर्न अपितु गुणो जायते।

---

**(78) एङि पररूपम्।6 । 1 ।94॥ आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात्। प्रेजते उपोषति। इह 'वा सुपि' इत्यनुवर्त्य वाक्यभेदेन व्याख्येयम्। तेनैङादौ सुब्धातौ वा। उपेडकीयति-उपैडकीयति। प्रोघीयति-प्रौघीयति। 'एवे चानियोगे' (वा. 3631) नियोगोऽवधारणम्। क्केव भोक्ष्यसे अनवक्लृप्तावेवशब्दः। 'अनियोगे' किम्। तवैव।**

**(79) अचोऽन्त्यादि टि।1।1।64 ॥ अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात्। 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा.3662) तच्चटेः शकन्धुः। कर्कन्धुः। कुलटा। 'सीमन्तः केशवेशे' (वा.3633) सीमान्तोऽन्यः। मनीषा। हलीषा। लाङ्गलीषा। पतञ्जलिः। सारङ्गः**

---

(78) **पदच्छेदः** - एङि पररुपम् द्विपदमिदं सूत्रम्।

**समासः** - परस्य रुपम् पररुपम्।

**अनृवृत्तिः** - आत्, उपसर्गात् धातौ।

**सरलार्थः** - अवर्णान्तात् उपसर्गात् एङ आदिर्यस्य तादृृशः धातुः परेभवति चेत् पररुपमेकादेशो जायते। यथा-

प्रेजते - प्र+एजते इत्यत्र वृद्धिरेचि इति वृद्धिः प्राप्तिरस्ति तं प्रबाध्य एङि पररुपम् इत्यनेन उपसर्गाः क्रियायोगे इति सहकारेण पररुपे कृते प्रेजते साधु।

उपोषति 'उप+ओषति' अत्रापि पूर्ववत् पररुपम्।

अस्मिन् सूत्रे वासुप्यापिशले इत्यतः सुपि इत्यनुवर्तय वाक्यभेदः क्रियते यत् एङादि नामधातौ परे पररुपं विकल्पेन स्यात्, अतः उप+एड-कीयति इत्यत्र पररुपे उपेडकीयति पक्षे वृद्धौ उपैडकीयति एवमेव प्र ओधीयति - प्रोधीयति पक्षे प्रौधीयति। उपेडकीयति - दर्दुरः इव आचरति। प्रोधीमति - प्रवाहवत् आचरति।

(वा. 6361) एवे चाऽनियोगे – अवर्णात् परं यदि अनिश्चयवाचक एव शब्दःतिर्हि पररुपम् एकादेशो भवति। क्व एव क्वेवभोक्ष्यसे। निश्चयार्थे तव एव – तवैव इत्यत्र वृद्धिर्भवति।

(79) **पदच्छेदः** – अचः अन्त्यादि, दि, त्रिपदमिदं सूत्रम्।

**समासः** अन्त्यः आदिर्यस्य तत् अन्त्यादि।

**अनुवृत्तिः** – संज्ञासूत्रम्।

**सरलार्थः** – अचां मध्ये यो अन्त्यः अच् स आदिर्यस्य तट्टिधसंज्ञः स्यात्।

(वा. 3632) शकन्ध्वादिगणपठितानां शब्दानां टेः पररूपं भवति।

**शकन्धुः** – शक अन्धुः अत्र ककारघटक – अकारस्य टि संज्ञा तस्य टेः पररुपं् शकन्धुः।

साधनिका : कर्कन्धुः कर्क अन्धुः अत्र अकः सवर्णे इति दीर्घे प्राप्ते तं प्रबाद्य शकन्ध्वादिषु पररुपं वाच्यम्। इति वार्तिकेन अचोऽत्यादिटि इति सहकारेण टि संज्ञा यां (व्यप देशिवद्भावेन) कृताया पररुपे शकन्धुः। शकः देशविशेषः तत्रत्यानां अन्धुः कूपः शकन्धुःइत्यर्थः।

कर्कन्धुः कर्काणामन्धुः कर्क अन्अधुः इत्यत्र 'अंकः सवर्णे दीर्घः' इति दीर्घः प्राप्तः तं प्रबाध्य अचोऽन्त्यादिटि इत्यनेन टि संज्ञायां (कर्कघटक – अकारस्य) तः तस्य अन्धुः इत्यस्य अकारे परे पररुपे कर्कन्धुः अन्यथा कर्कान्धुः इति अनिष्टंरुपं स्यात्।

कर्कन्टुः बदरीफलम् इत्यमरः।

कुलानाम अटा आटधातोः पचादेरच्

'कुलटा' अटति या सा, कुल+अटा अत्र 'अकः सवर्णे दीर्घः' इति दीर्घे प्राप्ते त प्रबाध्य शक –न्ध्वादि गणपठितत्वात् व्यप देशिवदभावेन पूर्वस्य अकारस्य टिसंज्ञाकारणात् पररुपे कुलटा सिद्धयति।

(3633वा.) सीमन् शब्दस्य टेः पररुपम् अन्तशब्दे परे केशस्य संस्कारोऽर्थः भवति चेद्।

सीमन् अन्तः इत्यत्र अन् इति भागस्य टिसंज्ञायां तस्य अन्तः इति अकारेण सह पररुपं सीमन्तः इति साधुः सीमन्तः संस्कारविशेषः इत्यर्थः। केशसंस्कारदिभन्नेऽर्थे सीमान्तः ग्रामान्तः प्रदेशः।

मनीषा – मनस ईषा अत्र अस भागस्य अचोऽन्त्यादिटि इत्यनेन टिसंज्ञायाम्, तत्फलं शकन्दवादिषु पररुपं वाच्यम् इति अस् भागस्य इकार–रूपे परिवर्तिते मनीषा इति साधुः। बुद्धिः। इत्यर्थः।

मनीषा– मनस ईषा (मनसः ईषा) अत्र अस् भागस्य टिसंज्ञा तस्य ईषाघटकेन ईकारेण सहपररू पे मनीषा रुपं सिद्धयति। यस्यार्थः बुद्धिः। धीषणा।

हलीषा (हलस्य ईषा) हल ईषा द्वयोर्मध्ये आदगुणः इति गुणे प्राप्ते तं प्रबाध्य शकन्ध्वादिषु पररुपं वाच्यम्। इति अकारस्य ईकारेण सहपररुपे हलीषा। लाङ्गलदण्डः।

पतञ्जलिः 'पतत् अञ्जलिः' अत्र अत्–भागस्य टिसंज्ञा टित्वात् पररुपे पतन्जलिः।

सारङ्गः सार+अङ्गं (साराणि अङ्गानि यस्यस) अत्र सारघटकाकारस्य व्यप देशिवद्धावेन टि संज्ञा पररुपे च कृते सारङ्गः पशुपक्षीविशेषार्थः पशुपक्षीभिन्नेऽर्थे – साराङ्गः।

आकृतिगणोयम्– आकृत्या प्रयोगानुसारेण गण्यते लक्षी क्रियते–अयं प्रयोगः शंकन्ह्वादिगणे पठितोऽस्ति तथापि मार्त +अण्डः इत्यत्र पररुपां□ दृश्यते अतः तत्र आकृतिं – दृष्टवा निश्चीयते यदयं शकन्ध्वादिः इति स्वीकृत्य पररुपं क्रियते अकारस्य तदा मार्तण्डः। सूर्यः इति। य दीदं रुपमा कृतिगणत्वेन न स्वीक्रियते चेत्तर्हि मार्त्ताण्डः इत्यनिष्टरूपं स्यात्।

**पशु पक्षिणोः ( ग.सू. 136 ) सारङ्गोऽन्यः। आकृतिगणोऽयम्। मार्तण्डः। 'ओत्वोष्ठयोः समासे वा' ( वा. 3634 ) स्थूलोतुः स्थूलौतुः। बिम्बोष्ठः बिम्बौष्ठः। 'समासे' किम् तवौष्ठः।**

**(80) ओमाङोश्च। 6 । 1 । 95॥ ओमि आङि चात्परे पररूपमेकादेशः स्यात्। शिवायों नमः। शिव एहि शिवेहि।**

(वा 3634) अवर्णात् परे यदि ओतुशब्दः ओष्ठ शब्दः भवति चेत् पररुपं भवति विकल्पेन समासे।

स्थूलोतुः - स्थूल ओतुः इत्यत्र 'ओत्वोष्ठयोः समासे वा' इति वैकल्पिकेन पररुपे कृते स्थूलोतुः पक्षे वृद्धिरेचि इति वृद्धौ स्थूलौतुः साधु। स्थूलमार्जारः। स्थूलाचाऽसौओतुः।

'बिम्बोष्ठः' बिम्ब+ओष्ठः अत्र ओष्ठ शब्दे परे अकारस्य उत्तरस्य ओकारस्य पररूपे कृते बिम्बोष्ठ पररुपाभावे वृद्धो कृते बिम्बौष्ठः इति प्रयोगः।? बिम्बफलवत् एक्लवर्णौओष्ठौ यस्य।

इदम् - पररुपम् समासे भवति, अतः तव ओष्ठः इत्यत्र समासस्या भावात् पररुपं न अपितु वृद्धिरेव तव+ओष्ठ तवौष्ठः।

(80) **पदच्छेदः** - ओमा ङोः च ।

**समासः** ओम् च आङ च ओमाङौ, तयो ओमाङोः।

**अनुवृत्तिः** - आत् पररुपम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थ** - अवर्णात् परौ ओम् आङ उभौ भवतश्चेत् पररुपमेकादेशः स्यात्।

**साधनिका** - शिवेहि शिव + आ + इहि इत्यत्र आकार इकारयोः धातुरुप-सर्गयोः कार्यमन्तरङ्गत्वात् गुणे शिव एहि ओमाङोश्च अनेन अन्तादिवच्च सहकारेण एका-रे आङत्वमाश्रिव्य पररुपे कृते शिवे-हि साधुः।

शिवायो नमः 'शिवाय + ओं नमः इत्यत्र आद्‌गुणः इति गुणे प्राप्ते तं प्रबाध्य ओमाङोश्च इति पररुपे कृते शिवायों नमः इति साधु।

**(81) अव्यक्तानुकरणस्यात इतौ । 6 । 1 । 98 । ध्वनेरनुकरणस्य यो ऽच्छब्दस्तस्मादितौ परे पररुपमेकादेशः स्यात्। पटत् इति पटिति । 'एकाचो न' ( वा. ३६६७ ) श्रदिति ।**

**(82) नाम्रेडितस्यान्त्यस्य तु वा । 6 । 1 । 99 ।। आम्रेडितस्य प्रागुक्तं न स्यात्। अन्त्यस्य तु तकारमात्रस्य वा स्यात्। 'डाचि बहुलं द्वे भवतः' ( वा. 4697 ) इति बहुलवचनाद्वित्वम्।**

(81) **पदच्छेदः** - अव्यक्तानुकरणस्य, अतः इतौ।

**समासः** अव्यक्तं च तदनुकरणम् अव्यक्तानुकरणम्, तस्य अव्यक्तानुकरणस्य।

**अनुवृत्तिः** - पररुपम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ध्वनेः अनुकरणं यो अत् शब्दः तस्मात्परः यदि इति शब्दश्चे त्पररुपमेकादेशो जायते।

**साधनिका:** - पटिति - पटत् + इति इत्यत्र ध्वनेरनुकरणमत् - शब्दो वर्तते तस्मात्परः इति शब्दः अतोऽत्र अत् भागस्य पररुपे कृते पटिति रुपं सिद्धयति ।

**विशेषः** - अव्यक्तः अस्फुटवर्णविभागः वृक्षपतनादिजनितध्वनिः।

(एकाचोन 3637) - ध्वनेरनुकरणात् एकः अच् यस्मिन् तस्मात् इति शब्दः यदि परे आयाति चेद पररुपं न श्रद्+इति श्रदिति एकः अच् शब्दे अतो न भवति पररुपम्।

(82) **पदच्छेदः** न, आम्रेडितस्य, अन्त्यस्य, तु वा ।

**अनुवृत्तिः** – अव्यक्तानुकरणस्य इतौ। अतः परुपरम्।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – आम्रेऽितसंज्ञा यस्य जाता तस्य पररुपं न भवति किंतु अन्ते यः तकारः तस्य विकल्पेन पररुपं भवति।

(4697) डाचि बहुलं द्वे भवतः – डाच् प्रत्यये परे विकल्पेन द्वित्वं भवति इत्यत्र बहुल ग्रहणात् पटत् शब्दस्य द्वित्वेन पटत् पटत् इति अत्र डाजभावः कथं द्वित्वमिति प्रश्ने इति शब्द-पर्युदासात् बहुलबलात् द्वित्वम्।

---

**(83) तस्य परमाम्रेडितम्। 8 । 1 । 2 ॥ द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यात् । पटत्पटेति।**

**(84) झलां जशोऽन्ते । 8 । 2 । 39 ॥ पदान्ते झलां जशः स्युः। पटत्पटदिति ।**

**(85) अकः सवर्णे दीर्घः । 6 । 1 । 101। अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्। दैत्यारिः। श्रीशः। विष्णूदयः।**

---

(83) **पदच्छेदः** तस्य, परम् आम्रेडितम्।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – द्विरुक्त यः शब्दः तस्य यत्परं रुपम्, तदाम्रेडितसज्ञं भवति ।

**साधनिका** – पटत्पटेति – पटत् पटत् इति अत्र तस्य परमाम्रेडितम् इत्यनेन उतरस्य पटत् इत्यस्य अआभ्रेडितसंज्ञायां नाम्रेडितस्यान्त्यस्यतुवा इत्यनेन अव्य-क्तानु-करणस्यात-इतौ इति प्राप्तस्यपररूपस्यतु वा विकल्पे कृते स च तकारमात्रस्य अलोडंज तोडन्त्य तकारस्य पररुपे पटत् पट + इति आद्गुणः इति गुणे पटत्पटेति।

(85) **पदच्छेदः** – झलां, जशः अन्ते त्रिपदमिदं सूत्रम् ।

**अनुवृत्तिः** – पदस्य।

**सूत्रप्रकारः** – विधिसूत्र।

**सरलार्थः** – पदस्य अन्ते झलां स्थाने जशः भवति । पररुपाभावे पटत्पटत् + इति पटत्पटदिति।

(85) **पदच्छेदः** – अकः, सवर्णे दीर्घः त्रिपदमिदंसूत्रम्।

**अनुवृत्तिः** – अचि।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – अक् प्रत्याहारात्परं यदि अच् प्रत्याहारवर्णा सवर्णिनः भवन्ति चेद उभयोः स्थाने दीर्घ एकादेशो भवति।

**दैत्यारिः** – दैत्य + अरिः' अत्र अक अस्ति यकारोत्तरवर्णी अकारः, ततः परः सवर्णः अकारः अतः उभयोदीर्घः एकादेश आकार क्रियते तेन दैत्यारिः साधुः।

**श्रीशः** – श्री + ईशः अत्रापि पूर्वपरयोः द्वयोरिकरयोः एकादेशेन एको दीर्घ ईकारः श्रीशः ।

---

**'अचि किम्' कुमारी शेते। 'नाज्झलौ' ( सू.13 ) इति सावर्ण्यनिषेधस्तु न दीर्घशकारयोः। ग्रहणकशास्त्रस्यं सावर्ण्य विधिनिषेधाभ्यां प्रागनिष्पतेः। 'अकः' किम्। हरये। 'अकोऽकि दीर्घः' इत्येव सुवचम्। 'ऋति सवर्णे ऋ ( ॠ )वा' ( वा.3640 ) होतॄकारः होतृकारः। 'ऌति सवर्णे ऌ ( ॡ ) वा' ( वा. 3641 ) होतॢकारः। पक्षे ऋकारः सावर्ण्यात्। होतृकारः। 'ऋति ( ॠ ) ऋ वा' 'ऌति ( ॡ ) ऌ वा' इत्युभयत्रापि विधेयं वर्णद्वयं द्विमात्रम्। आद्यस्य मध्ये द्वौ रेफो तयोरेका मात्राभितोऽज्भक्तेरपरा। द्वितीयस्य तु मध्ये द्वौ लकारौ शेषं प्राग्वत्।**

---

'विष्णूदयः' 'विष्णु उदयः' अत्र इको यणचि इति यणि प्राप्ते, किन्तु सवर्णे अचि परे अकः सवर्णे दीर्घः तं प्रबाध्य द्वयोः उकारयोः ऊकारः एकादेशे विष्णूदयः इति रूपम् साधु ।

अचिकिम् - सूत्रे अञ्ग्रहणाभावे अंकः सवर्णे दीर्घः इत्येनेन कुमारी शेते इत्यत्र दीर्घप्राप्तिः। तदा उच्यते नाज्झलौ इति निषेधः तदपि न, स च वर्णसमाम्नायिकानामेव निषेधं करोति । तत्सवर्णदीर्घो न भूयात् एतदर्थमच् ग्रहणमावश्यकम्। यदि उच्यते अणुदित्सवर्णस्य इति बलाद् दीर्घ - ईकारशकारयोः सवर्णग्रहणं तदपि न सवर्णविधायकतुल्यास्येति सूत्रं तथा च नाज्झलौ इति द्वयोः एकवाक्यता बोधानन्तरमेव सवर्णग्राहणता । अतः अणुदित् इति ग्राहकता विषयोःऽपि नास्ति।

अकः किम् - हरये-हरे + ए अत्र एकारः अक् नास्ति, अतः दीर्घोन प्राप्नोति । अतः लाघवार्थ भट्टोजीदीक्षितः अंकोऽकि दीर्घः इत्येव सुवचम् इत्युवाच।

(3640 ॠति सवर्णे ॠवा) अकः पश्चाद ॠति सवर्णे परे द्वयोः स्थाने ॠ आदेशो विकल्पेन भवति। अत एव अज रुपद्वयंम् होतॄकारः - होतृकारः।

(3641 ॠति सवर्णे ऌवा) - अकः परं ऌकारः सवर्णः भवति चेत्र पूर्वपरयोः ऌ इति एकादेशो भवति- यथा होतॣकारः, होतृकारः इति रूपद्वयं भवति । होतृ + ॠकारः, होतृ + ऌकारः । ॠकारःऌकारयो ॠत्यकः इति सूत्रेण पाक्षिकः सन्ध्यभावः अग्रे वक्ष्यते ।

---

**मूलम् । इहोभयत्रापि 'ॠत्यकः' (सू. 92) इति पाक्षिकः प्रकृतिभावो वक्ष्यते ।**

**(86) एङः पदान्तादति । 6। 1 । 109।। पदान्तादेङोऽति परे पररूपमेकादेशः स्यात्। हरेऽव। विष्णोऽव।**

**(87) सर्वत्र विभाषा गोः। 6। 1 । 112। लोके वेदे चैङन्तास्य गोरति वा प्रकृतिभावः स्यात्पदान्ते। गो अग्रम् - गोऽग्रम्। 'एङन्तस्य' किम्। चित्रग्वग्रम् 'पदान्ते' किम्। गोः।**

---

(86) **पदच्छेदः** - एङः पदान्ताद् अति त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** - पूर्वम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पदान्ताद् एङः परं यदि ह्रस्वोङकारोभवति चेत् पूर्वरुपम्। यथा -

हरेऽव - हरे+अव इत्यत्र 'एचोऽयवायावः' इत्यनेन अवादेशे प्राप्ते तं प्रबाध्य 'एङः पदान्तादति' इति ह्रस्वे अकारे परे पूर्वरुपे हरेऽव अकारस्य चम्पकपुष्पपुटक वासन्यायेन खण्डाकारो विधीयते ।

विष्णो + अव इत्यात्राऽपि आकारस्य पूर्वरुपेण अवग्रहः । विष्णोऽव इति ।

(87) **पदच्छेदः** - सर्वत्र, विभाषा, गोः त्रिपदमिदं सूत्रम्।

**समासः** - विविधाभाषा इति विभाषा विकल्प इत्यर्थः।

**अनुवृत्तिः** - एङः, पदान्तादअति प्रकृत्या। चतुष्पदमिदं सूत्रम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - लोके वा वेदे एङन्तस्य गोशब्दस्य ह्स्वे अकारे गोशब्दस्य प्रकृतिभावः भवति विकल्पेन।

गवाग्रम् - गो + अग्रम् इत्यत्र 'एचोऽयवायावः' इति नित्यतया अव देशे प्राप्ते तं प्रबाध्य अनेन वैकल्पिक प्रकृति -भावे गो+अग्रम पक्षे एङः पदान्तादति इति पूर्वरुपे गोऽग्रम् इति रूपम्। एङन्तस्य किम् ? चित्राः गावः सन्ति यस्य स, चित्रगु अग्रम् अत्र एङन्तत्वाभावात् यणादेशः अतः तित्रग्वग्रम् ।

**(88) अवङ् स्फोटायनस्य । 6 । 1 । 123॥ 'अति' इति निवृत्तम् । अचि परे पदान्ते गोरवङ् वा स्यात् । गवाग्रम्। 'पदान्ते' किम्। गवि । व्यवस्थितविभाषया गवाक्षः ।**

**(89) इन्द्रे च । 6 । 1 । 124॥ गोरवङ् स्यादिन्द्रे । गवेन्द्रः।**

पदान्तस्यैव प्रकृतिभावः अतः गो + अस् अत्र पदान्तत्वाभावात् न प्रकृतिभावः पूर्वरुपेण गोः इति।

(88) **पदच्छेदः** - अवङ् स्फोटायनस्य, द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - पदान्ताद् गोः, अचि।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पदान्ते गोशब्दस्य स्थाने अवङादेशः वा अचि परे ।

गवाग्रम् - गो + अग्रम् अत्र ङिच्च इति सूत्रसहकारेण अवङ्स्फोटायनस्य इत्यनेन अवङादेशे अनुबन्ध पक्षे लोपे वर्णसम्मेलने गवाग्रम अवङभावे पक्षे- प्रकृतिभावेगो+अग्रम् एङि पररुपम इति पूर्वरुपे गोऽग्रम् रुपद्वयम् साधु।

पदान्ते एव अवङादेशः गो + ई अत्र पदान्तत्वाभावत् एचोऽयवा याव: इति नित्यतया अवादेशः गवि अन्यथा वैकल्पिकं रुपस्यात्। गवाक्षः इत्यत्र कथमवादेश इति प्रश्ने व्यवस्थित विभाषया। तस्यायमाशयः क्वचित् न भवति अंशः क्वचित्तूभयमित्येव लक्ष्यानुसारेण व्यवस्था प्रवृत्ता विभाषा। अतः गवाक्षः इत्यत्र गो + अक्षि + अच् इत्यत्र नित्यमवङ। सर्वत्रविभाषा गोः इत्यतः विभाषामानीय सर्वोऽडर्थोजायते ।

इदं च - देवत्रातो गलो ग्राहइति योगे च सद्विधिः ।

मिथस्तेनविभाष्यन्ते गवाक्षः संशितव्रतः॥ वातायनं गवाक्षः स्यात्।

(89) **पदच्छेदः** - इन्द्रे च, द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - गोः, अवङ्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - गो शब्दस्य अवङादेशो भवति इन्द्रशब्दे परे नित्यम्।

**विशेषार्थः** - अवङ् आदेशे ङकारस्य इत्संज्ञा इति ङित् अतो हेतोः ओकारस्य अवङादेशो जायते । इदं सूत्रं नित्यतया अवङादेशं करोति अन्यथा अवङस्फोटायनस्य इत्यनेनैव स्यात्।

**गवेन्द्रः** - गो + इन्द्रः अत्र अवङस्फोटायनस्य इति वैकल्पिके अवङप्राप्ते तं प्रबाध्यं ङिच्च इति सूत्रसहकारेण 'इन्द्रे च इति अवङादेशे गो + अव + इन्द्रः' आद्गुणः इति गुणे कृते गवेन्द्रः वृषभः इत्यर्थः।

**स्वाध्यायः**

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

**(1) एकः पूर्वपरयोः अस्ति**

(क) विधिसूत्रम् (ख) अतिदेशसूत्रम् (ग) अधिकारसुत्रम् (घ) नियमसूत्रम्

**(2) अकार - इकारयोः स्थाने गुणोभवति**

(क) आ (ख) ए (ग) ओ (घ) अर्

**(3) ऋकारस्य संज्ञा अस्ति**

(क) 18 (ख) 12 (ग) 30 (घ) 16

**(4) तवल्कारः इत्यत्ररूपं भवति -**

(क) द्वयम् (ख) त्रयम् (ग) चतुष्टयम् (घ) पञ्च

**(5) एत्येधत्यूठसु अनेन विधीयते**

(क) वृद्धिः (ख) गुणः (ग) पररुपम् (घ) एकोऽपिन

**2. एकैकवाक्येन उत्तरं लिखत ।**

(1) हरेऽव अत्र केन सूत्रेण पूर्वरुपम् ?

(2) गवेन्द्रः इत्यत्र अवङ भवति वा अव ?

(3) गो अग्रम् अत्र केन प्रकृतिभावः ?

(4) व्यवस्थित-विभाषा शब्दस्य कोऽर्थः ?

(5) होतृकारः अस्य विच्छेदं कुरुत।

**3. निम्नलिखितानि रुपाणि साधयत।**

उपेन्द्रः। गङ्गोदकम् । शकन्धुः । कृष्णर्दिर्धः। गवेन्द्रः। प्रौढवान्। कृष्णौत्कण्ठयम्। उपार्च्छति। प्रार्षभीयति।

**4. सविस्तरम् उत्तरं लिखित ।**

(1) कृष्णार्दिः इत्यस्य रुपचतुष्टयं प्रदर्शयताम्।

(2) अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् सोदाहरणं प्रतिपादताम्।

(3) अन्तरङ्गापवादलक्षणस्पष्टं कृत्वा शिवेहि इति प्रदर्शयताम्।

(4) उपार्च्छति इत्यत्र पदान्तवद्भावेन रेफस्यविसर्गः कुतोन ?

(5) अक्षादुहिन्याम् - इति सोदाहरणं व्याख्यायताम्।

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायताम्।**

(1) अवङस्फोटायनस्य।

(2) सर्वत्र विभाषा गोः ।

(3) अकः सवर्णे दीर्घः ।

(4) झरो झरि सवर्णे ।

(5) तस्य परमाम्रेडितम् ।

**6. अविभागं योग्योत्तरेण ब विभागेन सह योजयत।**

| **अ विभाग** | **ब विभाग** |
|---|---|
| (क) वृद्धिरेचि | (क) इप्रत्याहारः |
| (ख) उरण्रपरः | (ख) देवैश्वर्यम् |
| (ग) अकः सवर्णे दीर्घः | (ग) हरेऽव |
| (घ) एङः पदान्तादति | (घ) विष्णूदयः |
| (ङ) उपसर्गादृति धातौ | (ङ) प्रार्च्छति |

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिरव्य तस्य पदच्छेदं पदपरिचयमन्वयं सरलसंस्कृतेन भावार्थं च लिखत।

◆

# 6 अथ प्रकृतिभावप्रकरणम्

**प्रस्तावना**

भट्टोजिदीक्षितविरचितायां वैयाकरणसिद्धान्तकौमुद्यां प्रकृतिभावप्रकरणं विद्यते। वैयाकरणासिद्धान्तकौमुद्याम् इदं प्रकरणं भिन्नम् प्रकरणं मन्यते । अतः इदं भिन्नं प्रकरणं मत्वा अत्र प्रकृतिभावप्रकरणं लिखितमस्ति। प्लुतप्रगृह्या अचि नित्यम् (सू. 90) इति सूत्राद् आरभ्य **अणोप्रऽगृह्यस्या....** (सू. 110) इति सूत्र-पर्यन्तं प्रकृतिभावप्रकरणं वर्तते। प्रकृतिभावे संहितादशायां यथावस्थितरुपाणि भवन्ति। न काऽपि विकृतिर्जायते ।

---

**(90) प्लुतप्रगृह्या अचि नित्यम् । 6 । 1 । 125॥**

**प्लुताः प्रगृह्याश्च वक्ष्यन्ते, तेऽचि परे नित्यं प्रकृत्या स्युः। एहि कृष्ण३ अत्र गौश्चरति। हरी एतौ। नित्यम् इति किम् ? ''हरी एतौ'' इत्यादावयमेव प्रकृतिभावो यथा स्यात्, इकोऽसवर्णे (सू. 91) इति ह्रस्वसमुच्चितो मा भूत्।**

---

(90) पदच्छेदः - प्लुतप्रगृह्याः, अचि, नित्यं त्रिपदमिदं सूत्रम्।

अनुवृत्तिः - प्रकृत्या।

समासः - प्लुताश्च प्रगृह्याश्च प्लुतप्रगृह्याः (इतरेतरयोगद्वन्द्वः)

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - प्लुतप्रगृह्यसंज्ञकाः शब्दाः ततः परं यदि अच् भवति तदा नित्यं प्रकृतिभावो भवति।

विशेषार्थः - प्लुतप्रगृह्यानाम् अचि परे नित्यं प्रकृतिभावो भवति । एहि कृष्ण३ अत्र गौश्चरति। हरी एतौ। नित्यम् इति शब्द प्रयोगस्य किं प्रयोजनम् ? उत्तरम् - हरी + एतौ इत्यादिप्रयोगेषु प्रकृतिभाव एवस्यात्। इकोऽसवर्णे सूत्रानुसारं ह्रस्वसहितप्रकृतिभावो न स्यात् । तदर्थं नित्यग्रहणम् आवश्यकम्।

साधनिका -

(1) एहि कृष्ण३ अत्र गौश्चरति ।

कृष्ण३ + अत्र इति स्थिते '**अकः सवर्णे दीर्घः**' इति सूत्रेण उभयोः अकारयोः स्थाने सवर्णे दीर्घे प्राप्ते ''**दूराद्धूते** च'' इत्यनेन सूत्रेण अकारस्य ''प्लुतत्वात् **प्लुतप्रगृह्या अचि नित्यम्**'' इति सूत्रेण प्रकृतिभावे अर्थात् सवर्णदीर्घनिषेधे ''कृष्ण३ अत्र'' इति यथावस्थितं रुपमेव जातम्। अतः एहि कृष्ण३ अत्र गौश्चरति इति रूपं सिद्धम्।

(2) हरी एतौ ।

''हरी + एतौ'' इति स्थिते ''**इको यणचि**'' इति सूत्रेण यणादेशे प्राप्ते ''ईदूदेद्द्विवचनं प्रगृह्यम्'' (सू. 100) इत्यनेन प्रगृह्यसंज्ञायां ''**प्लुतप्रगृह्या अचि नित्यम्**'' इति सूत्रेण प्रकृतिभावे ''हरी एतौ'' इति रूपं सिद्धम्।

---

**(91) इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च । 6 । 1 । 127॥**

**पदान्ता इकोऽसवर्णेऽचि परे प्रकृत्या स्युर्ह्रस्वश्च वा । अत्र ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो न कर्तव्य इति भाष्ये स्थितम्। चक्रि अत्र, चक्र्यत्र । पदान्ताः इति किम् ? गौर्यौ । न समासे (वा. 3684) वाप्यश्वः। सिति च (वा. 3684) पार्श्वम्।**

---

(92) पदच्छेदः - इकः, असवर्णे, शाकल्यस्य, ह्रस्वः, च।

समासः - न सवर्णः इति असवर्णः नञ्तत्पुरुषः ।

अनुवृत्ति - पदान्तात् अचि।

सूत्रप्रकार: – विधिसूत्रम्।

सरलार्थ: – असवर्णे अचि परे पदान्ते विद्यमानस्य इक: ह्रस्व: विकल्पेन भवति एवं प्रकृतिभाव: भवति ।

विशेषार्थ: – पदान्तस्य इक: ह्रस्व: विकल्पेन भवति एवं प्रकृतिभाव: भवति, असवर्णे (सवर्णेभिन्ने) अचि परे। अत्र ह्रस्व: विधिना प्रकृतिभाव: सिद्ध: वर्तते। अत्र ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो न कर्तव्य इति भाष्ये स्थितम्। पदान्ता: कथम् ? गौर्यौ अन्यथा गौरि औ इत्यादि अनिष्टरूपाणि भवन्ति।

(वा. 3684) ''न समासे,'' इकोऽसवर्णे इति सूत्रविहितं कार्यं समासे न भवति ।

(वा. 6384) ''सिति च,'' इदं विधानं सकारे इत्संज्ञकप्रत्यये न भवति ।

साधनिका: –

(1) चक्रि अत्र, चक्र्यत्र ।

''चक्री + अत्र'' इति स्थिते '**इको यणचि**' इत्यनेन यणादेशे प्राप्ते तं प्रबाध्य 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इति सूत्रेण ह्रस्वेस प्रकृतिभावे च ''चक्रि + अत्र'' इति स्थिते 'चक्रि अत्र' इति रूपम् सिद्धम्।

ह्रस्वे चक्र्यत्र इति रूपं सिद्धम्।

(2) वाप्यश्व: ।

वाप्याम् अश्व: (सप्तमी तत्पुरुष: समास:) इति लौकिक विग्रहे 'वापी + अश्व:' इति स्थिते ''इकोऽसवर्णे प्रकृतिमाता शाकल्यस्य ह्रस्वश्च'' इत्यनेन ह्रस्वेसमुचिते प्रकृतिभावे च प्राप्ते ''न समासे'' इत्यनेन वार्तिकेन निषेधे 'वापी+अश्व:' इति स्थिते डमावे च '**इको यणचि**' इत्यनेन यणादेशे 'वाप् + य् + अश्व:' वर्णसम्मेलने वाप्यश्व: इति रूपं सिद्धम्।

(3) पार्श्वम्।

पर्शु इति स्थिते ''पर्श्वा णस् वक्तव्य:'' इत्यनेन वार्तिकेन णस् प्रत्यये अनुबन्धलोपे ''पर्शु+अ'' इति स्थितौ णित्–परे आदिवृद्धि: 'पार्शु+अ' 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च इति' सूत्रेण ह्रस्वसमुच्चिते प्रकृतिभावे प्राप्ते '**सिति च**' इत्यनेन वार्तिकेन निषेधे '**इको यणचि**' इति सूत्रेण यणादेशे 'पा + र् + श् + व् + अ' स्थिते संयोगे पार्श्व इत्यस्य प्रातिपदिकसंज्ञायाम् एवं स्वादिकार्ये पार्श्वम् इति रूपं सिद्धम्।

---

**(92) ऋत्यक: 6 । 1 । 128॥**

**ऋति परेऽक: प्राग्वत्। ब्रह्म ऋषि: – ब्रह्मर्षि:। पदान्ता इत्येव। आर्च्छत् । समासेऽप्ययं प्रकृतिभाव:। सप्त ऋषीणाम् सप्तर्षीणाम्।**

---

(92) पदच्छेद: – ॠति अक: द्विदमिदं सूत्रम्।

अनुवृत्ति: – पदान्तात् ह्रस्व:, शाकल्यस्य।

सूत्रप्रकार: – विधिसूत्रम्।

सरलार्थ: – ह्रस्वे ऋकारे परे पदान्ते विद्यमानस्य अक: स्थाने विकल्पेन ह्रस्वसमुच्चित: प्रकृतिभाव: स्यात्।

विशेषार्थ: – यदा ह्रस्व: ऋकार: परे भवति तदा अक्–प्रत्याहारस्य वर्णानां स्थाने ह्रस्वविधानं भवति यथा ब्रह्मा ऋषि:, ब्रह्मिर्षि:। यदान्ता: किम्? आर्च्छत्। ''आ+ऋच्छत्'' चेत् आऋच्छत् इति स्थिते यदि प्रकृतिभाव: भवति चेत् ''अ+ऋच्छत्'' इत्यादि अनिष्टरूपस्य सिद्धि: भवति, तन्निवृत्यर्थं पदान्तग्रहणम् आवश्यकम् 'आ+ऋच्छत्' इत्यत्र ''आटश्च'' इत्यनेन वृद्धि: ''आर्च्छत्'' इति ।

साधनिका–

(1) ब्रह्मा ऋषिः , ब्रह्मर्षिः ।

ब्रह्मा + ऋषिः इति स्थिते 'आद्गुणः' इत्यनेन गुणे प्राप्ते तं प्रबाध्य **ऋत्यकः** इति सूत्रेण ह्रस्वसमुच्चित-प्रकृतिभावे ब्रह्म ऋषिः इति रूपं सिद्धम्। ह्रस्वसमुचित-प्रकृतिभावाऽभावे ब्रह्मा + ऋषिः इत्यत्र गुणे एवं रपरत्वे ब्रह्मर्षि इति रुपं सिद्धम् ।

एवमेव सप्त ऋषीणाम्, सप्तर्षीणाम् इत्यादयः ज्ञेयाः।

---

**(93) वाक्यस्य टेः प्लुत उदातः 8 । 2 । 82।**

**इत्यधिकृत्य।**

---

(93) **पदच्छेदः** - वाक्यस्य, टेः, प्लुतः, उदात्तः, चतुष्पदमिदं सूत्रम्।

**सूत्रप्रकारः** - अधिकारसूत्रम्।

**सरलार्थः** - एतस्य अधिकारः वर्तते । इदं सूत्रं स्वयमेव पूर्णम् अस्ति। अधिकारः वर्तते अतः अग्रिमसूत्रेषु वाक्यस्य टेः प्लुतः उदात्तः इत्यस्य अनुवृत्तिः गमिष्यति ।

---

**(94) प्रत्यभिवादेऽशूद्रे 8 । 2 । 83।।**

**अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात् स चोदात्तः। अभिवादये देवदत्तोऽहम्। भो आयुष्यमानेधि देवदत्त३। स्त्रियां न ( वा. 4864 ) अभिवादये गार्ग्यहम्। भो आयुष्यमती भव गार्गि। नाम गोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते । नेह । आयुष्मानेधि । भोराजन्यविशां वेति वाच्यम् ( वा. 4865 )आयुष्मानेधि भोः। आयुष्यातेधीन्द्रवर्म३न्। आयुष्यमनेधीन्द्रपालित३।**

---

(94) पदच्छेदः - प्रत्यभिवादे, अशूद्रे द्विपदमिदं सूत्रम्।

अनुवृत्ति - वाक्यस्य, टेः, प्लुतः, उदात्तः ।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - शूद्रेतरजातीनां आशीर्वादस्य वाक्यस्य टि-संज्ञकस्य भागस्य प्लुतः भवति, एवं स उदातः अपि जायते।

विशेषार्थः - भोः अहं देवदत्तः अभिवादये। देवदत्त३ आयुष्यमान् भव! (वा. 4864) ''**स्त्रियां न**''-स्त्रीणां विषये प्लुतो न भवति । अहं गार्गि अभिवादये! भो आयुष्मती भव गार्गि। आशीर्वादरूपवाक्यान्ते यदा नाम्नः एवं गोत्रस्य प्रयोगे भवति तदा तत्र प्लुतः भवति। आयुष्यमानेधि इत्यत्रेकारस्य प्लुतो न भवति ।

**( वा.** 4864 **)** ''**भोराजन्यविशां वेति वाच्यम्**'' भो शब्दः क्षत्रिय वाचकशब्दः एवं वैश्यवाचकशब्दः वाक्यान्ते आगच्छति तदा तत्र प्लुतः विकल्पेन भवति । आयुष्मानेधि भो३ः।

साधनिका -

(1) भो आयुष्मान् भव देवदत्त३।

''आयुष्मान् भव देवदत्त३'' अत्र देवदत्तपदे टिभागस्य ''**प्रत्यभिवादेऽशूद्रे**'' इति सूत्रेण प्लुते आयुष्मान् भव देवदत्त३ इति रुपं सिद्धम्।

(2) भो आयुष्मती भव गार्गि ।

''भो आयुष्मती भव गार्गि'' अत्र ''**प्रत्यभिवादेऽशूद्रे**'' इत्यनेन प्लुते प्राप्ते ''**स्त्रियां न**'' इत्यनेन वार्तिकेन तन्निषेधे ''भो आयुष्मती भव गार्गि'' इति रुपं सिद्धम्।

(3) आयुष्मानेधि भो३ः।

''आयुष्मानेधि भो३:'' अत्र ''**भोराजन्यविशां वेति वाच्यम्**'' इत्यनेन वार्तिकेन विकल्पेन प्लुतत्वे ओकारस्य प्लुतत्वपक्षे आयुष्मानेधि भो३: इति रूपं सिद्धम्। प्लुतत्वाऽभावे आयुष्मानेधि भो: इति रूपं सिद्ध्यति ।

**(95) दूराद्धूते च 8 । 2 । 84॥**

**दूरात् सम्बोधने यद्वाक्यं तस्य टे: प्लुत: स्यात्। सक्तून् पिब देवदत्त३ ।**

(95) पदच्छेद: - दूरात्, हूते, च त्रिपदमिदं सूत्रम्।

अनुवृत्ति: - वाक्यस्य, टे:, प्लुत:, उदात्त: ।

सूत्रप्रकार: - विधिसूत्रम्।

सरलार्थ: - दूरात् सम्बोधने यद्वाक्यं तस्य टिसंज्ञकस्य भागस्य प्लुत: भवति।

विशेषार्थ: - दूरात् आवाहनार्थप्रयोगे प्रयुक्तस्य वाक्यस्य टिसंज्ञक: भाग: प्लुत: भवति स च उदात: भवति। सक्तून् पिब देवदत्त३। सम्बोध्यमानं पदं यदि वाक्यान्ते स्यात् तदैव प्लुत: भवति अन्यथा न । अत: देवदत्त आगच्छ तत्र प्लुत: न जात: कारणं यत् तत्र देवदतस्य प्रयोग: वाक्यारम्भे कृत: अस्ति ।

साधनिका -

(1) सक्तून् पिब देवदत्त३।

''सक्तून् पिब देवदत्त३'' इत्यत्र दूरात्सम्बोधेन वाक्यान्ते स्थित: अकार: टिसंज्ञक: अस्ति। अत: स: 'दूराद्धूते' च इत्यनेन सूत्रेण प्लुत: जात: । सक्तून् पिब देवदत्त३ इति रुपं सिद्धम्।

**(96) हैहेप्रयोगे हैहयो: 8 । 2 । 85।।**

**एतयो: प्रयोगे दूराद्धूते यद्वाक्यं तत्र हैहयोरेव प्लुत: स्यात्। हे३ राम। राम है ३।**

(96) पदच्छेद: हैहेप्रयोगे, हैहयो: द्विपदमिदं सूत्रम्।

समास: - हैश्च हेश्च तयोरितरेतरयोगद्वन्द्व हैहयौ तयो: प्रयोग: हैहेप्रयोगस्तस्मिन् हैहेप्रयोगे द्वन्द्वगर्भषष्ठीतत्पुरुष:।

अनुवृत्ति: - दूरात्, हूते, वाक्यस्य टे:, प्लुत: उदात:।

सूत्रप्रकार: - नियमसूत्रम्।

सरलार्थ: - दूरात् सम्बोध्यमाने वाक्ये हैशब्दस्य हेशब्दस्य च प्रयोगो भवति तदा तौ द्वौ शब्दौ प्लुतौ भवत:।

विशेषार्थ: - हैहेप्रयोगे - है हे इत्यव्यये सम्बोधनद्योतके, तयो: प्रयोगे हैहयो: प्लुत: स्यादित्यर्थ:। पूर्वसूत्रेण गुरोरनृत इत्यनेन च सिद्धे किमर्थमिदमित्याशङ्कय नियमार्थम् इति व्याचष्टे। हैहयोरेवेति नियमार्थमिति भाव:। पाहि है३ राम, पाहि हे३ रामेत्यत्र हैहयोरेव प्लुत: न तु गुरोरनृत इत्यन्यस्यापीत्येतत् हैह्योरित्यनेन लभ्यत इति यावत्। तर्हि वाक्यस्य टेरित्य विकारात् राम है३ राम हे३ इत्यत्रैव स्यात्।

साधनिका -

(1) हे३ राम ।

''हे३ राम'' इत्यत्र दूरात्सम्बोधने ''**हैहेप्रयोगे हैहयो:**'' इत्यनेन प्लुत: 'हे३ राम' इति रूपं सिद्धम्। तदनुसारमेव राम है३ इति रूपस्य सिद्धि: भवति ।

(97) गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् 8 । 2 । 86॥

दूराद्धूते यद्वाक्यं तस्य ऋद्भिन्नस्यानत्यस्यापि गुरोर्वा प्लुत: स्यात्। दे३वदत्त। देवद३त्त । देवदत्त३। गुरो: किम्? वकारात्परस्याकारस्य मा भूत्। अनृत: किम्। कृष्ण३ । एकैकग्रहणं पर्यायार्थम्। इह प्राचाम् इति योगो विभज्यते, तेन सर्व: प्लुतो विकल्प्यते ।

(97) पदच्छेदः – गुरोः, अनृतः, अनन्त्यस्य, अपि, एकैकस्य, प्राचाम्।

समासः – न ऋत् अनृत् तस्य अनृतः नञ्तत्पुरुषः। अन्ते भवोऽन्त्यः न अन्त्योऽनन्त्यस्य अनन्त्यस्य नञ्तत्पुरुषः।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – दूरात् सम्बोधने प्रयुक्तवाक्ये ऋकारोतरस्य एवम् अन्त्यभिन्नगुरुसंज्ञकस्य स्वरवर्णस्य वैकल्पिकः प्लुतः पर्यायेन भवति ।

विशेषार्थः – गुरौ इति कथम् उक्तम्। वकारोत्तर वर्तिनःअकारस्य मा भूत इति। अनृतः किम्? कृष्ण३। एकैकस्य इति कथनेन पर्यायस्य अर्थः सूचितो भवति । ''प्राचाम्'' इति योगविभागेन पृथक् सूत्रं मन्यते । अतः सर्वः प्लुतः प्राचीनवैयाकरणानां मतानुसारं विकल्पेन भवति । सूत्रेऽस्मिन् अपि शब्दः अन्त्यस्य एवम् अनन्त्यस्य अपि गुरोः प्लुतः भवति इति सूचयति । प्लुतः पर्यायेण भवति। एकस्मिन् प्रयोगे प्लुतद्वयविधानं न भवति इति भावः ।

साधनिका –

(1) देवद३त्त – देवद३त्त देवदत्तपदे ''**गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्**'' इत्यनेन विकल्पेन गुरुवर्णस्य दकारोत्तरवर्तिनोऽकारकस्य प्लुतत्वे देवद३त इति रूपं सिद्धम् । अत दकारोत्तरवर्तिनः अकारस्य ''**संयोगे गुरु**'' इत्यनेन गुरुत्वं विज्ञेयम्। पक्षे आदिदकारोत्तरवर्तिनः एकारस्य ''**दीर्घं च**'' इत्यनेन गुरुत्वं बोध्यम्। ततश्च त्रीणि रूपाणि देवद३त्त दे३वदत्त विकल्पेन टिभागस्य प्लुतत्वे देवदत्त३ इति ।

---

**(98) अप्लुतवदुपस्थिते । 6। 1। 129॥**

**उपस्थितोऽनार्ष इति शब्दः, तस्मिन् परे प्लुतोऽप्लुतवद्भवति । (अप्लुतकार्यं यणादिकं करोतीत्यर्थः) । सुश्लोकऽ इति, सुश्लोकेति। वत् किम् ? अप्लुत इत्युक्तेऽप्लुत एव विधीयते, प्लुतश्च निषिध्येत । तथा च प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात्। अग्नी३ इति ।**

---

(98) पदच्छेदः – अप्लुतवद्, उपस्थिते द्विपदमिदं सूत्रम् ।

समासः – न प्लुतः अप्लुतः (नञ्तत्पुरुषः) अप्लुतेन तुल्यं अप्लुतवत्।

अनुवृत्तिः – प्लुत ।

सूत्रप्रकारः – अतिदेशसूत्रम्।

सरलार्थः – अवैदिके इतिशब्दे परे प्लुतः अप्लुतवत् स्यादिति फलति ।

विशेषार्थः – किमिदमुपस्थितं नाम? अनार्षकरणमिति भाष्यम्। अवैदिक इतिशब्द इत्यर्थः। तथा उपस्थित पदस्य अर्थो भवति लौकिकः इति शब्दः। अर्थात् प्लुतानन्तरं लौकिकः इति शब्दः आयाति तदा प्लुतः अप्लुतवद् (अप्लुतसदृशः) ज्ञेयः। प्लुतभिन्नावस्थानुसारं सन्धिकार्यं प्रवृत्तं भवति । वत् इत्यस्य किं प्रयोजनम् ? अप्लुत इत्युक्ते अप्लुतविधानं प्रवृत्तं भवति एवं प्लुतस्य निषेधो भवति तदा प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात् अग्नी३ इति ।

साधनिका –

(1) सुश्लोकेति।

'सुश्लोक + इति' इति स्थिते 'दूराद्धूते च' इत्यनेन प्लुते सुश्लोक३ + इति इति स्थिते ''अप्लुतवदुपस्थिते'' इत्यनेन विकल्पेन अप्लुतवद्भावे ''सुश्लोक + इति'' इत्यवस्थायाम् 'आद्गुणः' इत्यनेन अकार-इकारयोः स्थाने एकार गुणैकादेशे ''सुश्लोक् + ए + ति'' इति जाते संयोगे च ''सुश्लोकेति'' इति रूपं सिद्धम्।

---

**(99) ई३ चाक्रवर्मणस्य 6। 1। 130॥**

**ई३कारः प्लुतोऽचि परेऽ प्लुतवद्वा स्यात्। चिनुहि३ इति – चिनुहीति। चिनुहि३देम् – चिनुहीदम्। उभयत्रविभाषेयम्।**

---

(99) पदच्छेदः – ईरू चाक्रवर्मणस्य द्विपदमिदं सूत्रम्।

अनुवृत्तिः – अप्लुतवत्, अचि।

सूत्रप्रकारेः – अतिदेशसूत्रम्।

सरलार्थः – ई३कारः प्लुतः स्यात् ततः परे अच् प्रत्यहारस्य वर्णाः भवन्ति तदा सः (ई३) विकल्पेन अप्लुतवद् भवति।

विशेषार्थः – प्लुतात् ई३कारात् परे स्वरवर्णाः स्युः तदा चाक्रवर्मणस्य मतानुसारं प्लुतः ईकारः अप्लुतवद् ज्ञेयः। इदं मतम् अन्ये आचार्याः न मन्यन्ते अतः विकल्पेन भवति । उभयत्रेति। इति शब्दे परतो नित्यतया प्राप्ते तदन्यत्र अप्राप्ते चारम्भादुभयत्र विभाषेयमित्यर्थः। विभाषा शब्दस्तु अव्ययमिति न भ्रमितव्यम्। नवेति विभाषायामिति भाष्यप्रयोगात्। विभाष्यते विकल्प्यते इति विभाषा।

साधनिका –

(1) चिनु हि३ इति, चिनु हीति ।

''चिनु + हि + इति'' इति स्थिति 'अकः सवर्णे दीर्घः' इति सूत्रेण दीर्घे प्राप्ते ''विभाषा पृष्टप्रतिवचने हेः ''इति सूत्रेण हि इत्यव्यस्य प्लुतत्वे, ''चिनु हि३ + इति ''इति स्थिते ''ई३ चाक्रवर्मणस्य'' इत्यनेन विकल्पेन अप्लुतवद्भावे ''अकः सवर्णे दीर्घः'' इत्यनेन सवर्णे दीर्घे ''चिनु हीति'' इति रुपं सिद्धम्।

प्लुतत्वपक्षे चिनु हिरू + इति इति स्थिते प्लुतप्रगृह्या अचि नित्यम् इत्यनेन प्रकृतिभावे चिनु हिरू इति इति रूपं सिद्धम्।

---

**(100) ईदूदेद् द्विवचनं प्रगृह्यम्। 1 । 1 । 11॥**

**ईदूदेदन्तं द्विवचनं प्रगृह्यसञ्ज्ञं स्यात्। हरी एतौ । विष्णू इमौ। गङ्गे अमू। पचेते इमौ। मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम'' इत्यत्र त्विवार्थो वशब्दो वाशब्दो वा बोध्यः ।**

---

(100)पदच्छेदः – ईदूदेत्, द्विचनं, प्रगृह्यं त्रिपदमिदं सूत्रम्।

समासः – ईच्च, ऊच्च, एच्च, ईदूदेत् समाहारद्वन्द्वः।

सूत्रप्रकारः – संज्ञासूत्रम्।

सरलार्थः – दीर्घ- ईकारान्तस्य, दीर्घ ऊकारान्तस्य एकारान्तस्य द्विवचनस्य प्रगृह्यसंज्ञा भवति ।

साधनिका –

(1) हरी एतौ ।

''हरी + एतौ'' इति स्थिते '**इको यणचि**' इत्यनेन यणादेशे प्राप्ते '**ईदूदेद् द्विवचनं प्रगृह्यम्**' इत्यनेन प्रगृह्यसंज्ञायां '**प्लुतप्रगृह्या अचि नित्यम्**' इत्यनेन सूत्रेण प्रकृतिभावे हरी एतौ इति रूपं सिद्धम्।

(2) विष्णू इमौ ।

''विष्णू + इमौ'' इति स्थिते '**इको यणचि**' इत्यनेन यणादेशे ''**प्राप्ते ईदूदेद् द्विवचनं प्रगृह्यम्**'' इत्यनेन प्रगृह्यसंज्ञायां '**प्लुतप्रगृह्या अचि नित्यम्**' इत्यनेन प्रकृतिभावे 'विष्णू इमौ' इति रूपं सिद्धम्।

(3) गङ्गे अमू ।

गङ्गे + अमू 'इति स्थिते '**एङः पदान्तादति**' इत्यनेन पूर्वरुपे प्राप्ते ''इदूदेद् द्विवचनं प्रगृह्यम्'' इत्यनेन प्रगृह्यसंज्ञायां '**प्लुतप्रगृह्या अचि नित्यम्**' इति सूत्रेण प्रकृतिभावे गङ्गे अमू इति रूपं सिद्धम्।

(4) पचेते इमौ ।

'पचेते + इमौ' इति स्थिते '**एचोऽयवायावः**' इति सूत्रेण अयादेशे प्राप्ते ''**ईदूदेद् द्विवचनं प्रगृह्यम्**'' इत्यनेन प्रगृह्यसंज्ञायां '**प्लुतप्रगृह्या अचि नित्यम्**' इत्यनेन प्रकृतिभावे 'पचेते इमौ' इति रूपं सिद्धम्।

---

**(101) अदसो मात् ।1 । 1 । 12॥**

**अस्मात्परावीदूतौ प्रगृह्यौ स्तः। अमी ईशाः। रामकृष्णावमू आसाते । मात् किम्? अमुकेऽत्र। असति माद्ग्रहणे एकारोऽप्यनुवर्तेत।**

---

(101) पदच्छेदः - अदसः, मात् द्विपदमिदं सूत्रम्।

अनुवृत्तिः - ईदूद्, प्रगृह्यम्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - अदस् शब्दस्य मकारात् परस्य ईकारस्य ऊकारस्य च प्रगृह्यसंज्ञा भवति।

विशेषार्थः - अदस् शब्दावयवमकारस्यान्ते स्थितः ईकारः एवम् ऊकारः प्रगृह्यसंज्ञकः भवति । मात् इति किम्? मात् शब्दस्य अग्रहणे एकारस्यापि अनुवृत्तिः भविष्यति। माद्ग्रहणे कृते सति ''अमुके + अत्र'' इति स्थिते प्रगृह्यसंज्ञाऽभावात् अयादेशे प्राप्ते 'एङः पदान्तादति' इत्यनेन पूर्वरुपे अमुकेऽत्र इति रुपं सिद्धयति ।

साधनिका -

(1) अमी ईशाः ।

'अमी + ईशाः' इति स्थिते 'अकः सवर्णे दीर्घः' इत्यनेन सवर्णदीर्घे प्राप्ते तं प्रबाध्य ''अदसो मात्'' इति सूत्रेण मकारोत्तरवर्तिनः ईकारस्य प्रगृहयसंज्ञायाम् '**प्लुतप्रगृह्या अचि नित्यम्**' इत्यनेन प्रकृतिभावे 'अमी ईशाः' इति रूपं सिद्धम्।

(2) रामकृष्णावमू आसाते ।

'रामकृष्णावमू+आसाते 'इति स्थिते 'इको यणचि' इत्यनेन सूत्रेण यणादेशे प्राप्ते 'अदसो मात्' इति सूत्रेण मकारोत्तरवर्तिनः ऊकारस्य प्रगृह्यसंज्ञायाम्, 'प्लुतप्रगृहया अचि नित्यम्' इत्यनेन प्रकृतिभावे 'रामकृष्णावमू आसाते' इति रूपं सिद्धम्।

---

**(102) शे 1। 1 । 13 ॥**

**अयं प्रगृह्यः स्यात्। अस्मे इन्द्राबृहस्पती ।**

---

(102) पदच्छेदः - शे एकपदमिदं सूत्रम्।

अनुवृत्तिः - प्रगृह्यम्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - शे इत्यस्य प्रगृह्यसंज्ञा भवति ।

विशेषार्थः - वेदे चतुर्थीबहुवचनस्थाने शे आदेशस्य विधानं कृतं वर्तते । तदनुसारं चतुर्थीबहुवचने प्रयुक्तस्य वैदिकस्य शे प्रत्ययस्य प्रगृह्यसंज्ञा भवति । छन्दसीत्यनुवृत्तौ ''सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्याजालः।'' (7. 1. 37.) इति विहितः शे इत्येकारान्तः आदेश प्रगृह्यः स्यादित्यर्थः।

साधनिका -

(1) अस्मे इन्द्राबृहस्पती

अस्मद् + भ्यस् इति स्थिते 'सुपां सुलुक्पूर्वसवार्णाच्छेयाडाड्याजालः' इत्यनेन भ्यस् स्थाने शे 'अस्मद्+शे' इति स्थिते श् अनुबन्धलोपे 'अस्मद्+ए' इति स्थिते '**शेषे लोपः**' इत्यनेन अद्भागस्य लोपे 'अस्मे+इन्द्रबृहस्पती' इति स्थिते

'एचोऽयवायाव:' इत्यनेन अयादशे **प्राप्ते शे** इति सूत्रेण प्रगृह्यसंज्ञायां **प्लुतप्रगृह्या अचि नित्यम्** इत्यनेन प्रकृतिभावे अस्मे इन्द्रा बृहस्पती इति रुपं सिद्धम्।

एवमेव युष्मे इमे, त्वे इति, मे इति इत्यादय: ज्ञेया: ।

---

**(103) निपात एकाजनाङ् । 1 । 1 । 14।।**

**एकोऽज्निपात आङ्वर्ज: प्रगृह्य: स्यात्। इ विस्मये। उ वितर्के। इ इन्द्र:। उ उमेश:। अनाङ् इत्युक्तेरङिदाकार: प्रगृह्य एव। आ एवं नु मन्यसे । आ एवं किल तत्। ङित्तु न प्रगृह्य:। ईषदुष्णम्। ओष्णम्। ईषदर्थे क्रियायोगे मर्यादाभिविधौ च य:। एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित्। अन्यत्र ङित् इति विवेक:।**

---

(103) पदच्छेद: - निपात: एकाज् अनाङ् त्रिपदमिदं सूत्रम्।

समास: - एकश्चासौ अच् एकाच् कर्मधारय:।

न आङ् अनाङ् नञ्तत्पुरुष: ।

अनुवृत्ति: - प्रगृह्यम्।

सूत्रप्रकार: - संज्ञासूत्रम्।

सरलार्थ: - आङ् निपातभिन्ना: अन्ये एकस्वरवर्णात्मका: निपाता: प्रगृह्यसंज्ञका: भवन्ति।

विशेषार्थ: - निपात एकाच् प्रगृह्यमित्यनुवर्तते। पुल्लिङ्गतया च विपरिणम्यते । इ विस्मये, इ इन्द्र:। उ वितर्के, उ उमेश:। सूत्रे अनाङ् उच्चारणेन अङित: अवर्णस्य प्रगृह्यसंज्ञा भवति । आ एवं नु मन्यसे, आ एवं किल तत्। ङित: अवर्णस्य प्रगृह्यसंज्ञा न भवति । ईषदुष्णम् ओष्णम्। ईषदर्थे क्रियायोगे मर्यादायाम् एवं अभिविधौ एतेषु अर्थेषु आ इति ङित्वं भवति, अन्यत्र वाक्ये एवं स्मरणे ङित्वं न भवति । यदुक्तं -

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च य: ।

एतमातं ङितं विद्यात् वाक्यस्मरणयोरङित्॥

साधनिका -

(1) इ इन्द्र: ।

इ + इन्द्र: इति स्थिते 'अक: सवर्णे दीर्घ:' इत्यनेन सवर्णे दीर्घे प्राप्ते **'निपात एकाजनाङ्'** इत्यनेन प्रगृहयसंज्ञायाम्, **'प्लुतप्रगृह्या अचि नित्यम्'** इति सूत्रेण प्रकृतिभावे 'इ इन्द्र:' इति रूपं सिद्धम्।

(2) आ एवं नु मन्यसे ।

आ + एवं नु मन्यसे इत्यवस्थायां **'वृद्धिरेचि'** इति सूत्रेण वृद्धौ प्राप्तायां **''निपात एकाजनाङ्''** इत्यनेन आकारस्य प्रगृह्यसंज्ञायां **'प्लुतप्रगृह्या अचि नित्यम्'** इति सूत्रेण प्रकृतिभावे आ एवं नु मन्यसे इति रूपं सिद्धम्।

(3) ओष्णम्।

वाक्यस्मरणाभ्यां भिन्नार्थे ईषदर्थे प्रयुक्तस्य आङ् इत्यस्य प्रगृह्यसंज्ञा न भवति, तदा आ + उष्णम् इति स्थिते ''आद्गुण:'' इत्यनेन गुणसन्धि: ओष्णम् इति रूपं सिद्धम्।

---

**(104) ओत् 1।1।15॥**

**ओदन्तो निपात: प्रगृह्य: स्यात्। अहो ईशा:।**

---

(104) पदच्छेद: - ओत् एकपदमिदं सूत्रम्।

अनुवृत्ति: - निपात:, प्रगृह्यम्।

सूत्रप्रकार: - संज्ञासूत्रम्।

सरलार्थ: - ओकारान्त-निपातस्य प्रगृह्यसंज्ञा भवति ।

विशेषार्थ: - निपात इत्यनुवर्तते। ओदिति तस्य विशेषणम्। अतस्तदन्तविधि:। प्रगृह्यमित्यनुवर्तते। पुंल्लिङ्गतया च विपरिणम्यते। तदाह ओदन्त इत्यादिना अहो ईशा इति। संज्ञाप्रकरणे चादयोऽसत्वे (1 - 4 - 57) इत्यनेन निपातसंज्ञा भवति।

साधनिका -

(1) अहो ईशा: ।

अहो + ईशा: इति स्थिते 'एचोऽयवायाव:' इत्यनेन अवादेशे प्राप्ते ''**चादयोऽ सत्वे**'' इत्यनेन निपातसंज्ञायाम् ओत्' इति सूत्रेण अहो इति ओकारान्तनिपातस्य प्रगृह्यसंज्ञायां '**प्लुतप्रगृह्या अचि नित्यम्**' इत्यनेन सूत्रेण प्रकृतिभावे अहो ईशा:' इति रूपं सिद्धम्।

---

**(106) सम्बुद्धौ शाकल्यस्येतावनार्षे 1।1।16॥ सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्यौऽवैदिक इतौ परे। विष्णो इति, विष्ण इति, विष्ण विति। 'अनार्षे' इति किम्। ब्रह्मबन्धवित्यब्रवीत्।**

---

(106) पदच्छेद: - सम्बुद्धौ, शाकल्यस्य, इतौ, अनार्षे

समास: - न आर्ष-अनार्ष: नञ्तत्पुरूष:।

अनुवृत्ति: - ओत्, प्रगृह्यम्।

सूत्रप्रकार: - संज्ञासूत्रम्।

सरलार्थ: - लौकिक इति शब्दे परे संबुद्धिनिमित्तकस्य ओकारस्य प्रगृह्यसंज्ञा विकल्पेन भवति।

विशेषार्थ: - प्रगृह्यमनुवर्तते पुल्लितया च विपरिणम्यते। ऋषिर्वेद:। तदुक्तमृषिणेत्यादौ तथा दर्शनात्। ऋषौ भव: आर्ष: न आर्षछ अनार्ष: तस्मिन् अवैदिके इति शब्दे परत इत्यर्थ:। शाकल्यग्रहणाद्विकल्प:। शाकल्यस्य मतमिद्म। अन्याचार्याणां मतानुसारं प्रगृह्यसंज्ञा न भवति।

साधनिका: -

(1) विष्णो इति, विष्ण इति, विष्णविति।

''विष्णो+इति'' इति स्थिते सम्बुद्धौ शाकल्यस्येतावनार्षे इत्यनेन विकल्पेन प्रगृह्यसंज्ञायाम्, प्रगृह्यसंज्ञापक्षे अवादेशे प्राप्ते ''प्लुतप्रगृह्या अचि नित्यम्'' इत्यनेन प्रकृतिभावे विष्णो इति इति रूपं सिद्धम्।

लोप: शाकल्यस्य इत्यनेन विकल्पेन वलोपे विष्ण इति इति रुपं सिद्धयति । प्रगृह्यसंज्ञाऽभावपक्षे अवादेशे विष्णविति इति रूपं सिद्धयति।

---

**(106) उञ: 1।1।17॥**

**उञ इतौ वा प्रगुक्तम्। उ इति, विति ।**

---

(106) पदच्छेद: - उञ: एकपदमिदं सूत्रम्।

अनुवृत्ति: - शाकल्यस्य, इतौ, प्रगृह्यम्।

सूत्रप्रकार: - संज्ञासूत्रम्।

सरलार्थ: - उञ् अनन्तरम् इति शब्द: स्यात् तदा प्रगृह्यसंज्ञा विकल्पेन भवति ।

विशेषार्थ: - ञित् उकार: निपात:, तस्य इति शब्दे परे शाकल्यमते प्रगृह्यसंज्ञा स्यादित्यर्थ:। अस्मिन् विषये अन्याचार्याणां स्वीकृति: नास्ति। (प्रगृह्यसंज्ञा) तु '**निपात एकाजनाङ**' सूत्रेण प्राप्तासीत् विकल्पस्य प्रयोगार्थं सूत्रस्य सार्थकतास्ति ।

साधनिका –

(1) उ उति – विति ।

उ + इति इति स्थिते '**इको यणचि**' इत्यनेन यणादेशे प्राप्ते 'उञः' इति सूत्रेण प्रगृह्यसंज्ञायां ''प्लुतप्रगृह्या **अचि नित्यम्**'' इत्यनेन प्रकृतिभावे उ इति इति रूपं सिद्धम्।

प्रगृह्यत्वस्य अभावपक्षे यणादेशे विति इति रूपं सिद्धं भवति ।

---

**(107) ऊँ 1 । 1 । 18॥**

**उञ इतौ दीर्घोऽनुनासिकः प्रगृह्यश्च ऊँ इत्ययमादेशो वा स्यात्। ऊँ इति, विति ।**

---

(107) पदच्छेदः – ऊँ एकपदमिदं सूत्रम्।

अनुवृत्तिः – शाकल्यस्य, इतौ, प्रगृह्यम्, उञः।

सूत्रप्रकारः – संज्ञासूत्रम् एवं विधिसूत्रम्।

सरलार्थः – उञ् इत्यस्मात् परे इति शब्दः भवति तदा उ इत्यस्य स्थाने ऊँ आदेशः विकल्पेन भवति।

विशेषार्थः – ऊँ इति दीर्घस्य अनुनासिकस्य ऊकारस्य लुप्तप्रथमाविभक्तिकस्य निर्देशः विद्यते। यदि एतयोः द्वयोः सूत्रयोः स्थाने ''उञ ऊँ'' इति एकमेव सूत्रं क्रियते चेत्, इति शब्दे उञ स्थाने ऊँ आदेशः विकल्पेन भविष्यति। ऊँ आदेशाभावं 'निपात एकाजनाङ्' सूत्रानुसारं नित्यप्रगृह्यसंज्ञा भविष्यति । तदा ऊँ इति एवं उ इति इति द्वे रुपे भविष्यतः। विति रूपस्य सिद्धिः नैव भविष्यति। तस्मात् कारणात् द्वयोः पृथक्सूत्रयोः कल्पना कृतास्ति।

साधनिका :

(1) ऊँ इति – विति ।

'उ + इति' इति स्थिते '**इको यणाचि**' इति सूत्रेण यणादेशे प्राप्ते ऊँ इति सूत्रेण उ स्थाने ऊँ आदेशः एवं प्रगृहयसंज्ञायां '**प्लुतप्रगृह्या अचि नित्यम्**' इति सूत्रेण प्रकृतिभावे ऊँ इति इति रुपं सिद्धम्।

प्रगृह्यसंज्ञाया अभावपक्षे यणादेशे विति इति रूपं सिद्धम्।

---

**(108) मय उञो वो वा । 8 । 3 । 33॥**

**मयः परस्य उञो वो वा स्यादचि । किमु उक्तम्, किम्वुक्तम्। वस्यासिद्धत्वान्नानुस्वारः।**

---

(108) पदच्छेदः – मयः, उञः, वः, वा चतुष्पदमिदं सूत्रम्।

नुवृत्तिः – अचि।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – मञ् प्रत्याहारात् परस्य उकारस्य वकारः अचि परे विकल्पेन भवति।

विशेषार्थः – किमु उक्तम्, किम्वुक्तम्। विकल्पेन भवति। वकारस्य असिद्धत्वात् अनुस्वारः न जातः मय इति पञ्चमी उञ इति षष्ठी ङमोहस्वादचि इत्यस्मात् अचीत्यनुवर्तते । किम्वुक्तमिति किमु उक्तमिति स्थिते मकारादुकारस्य उञो निपात **एकाच्** इति नित्यप्रगृह्यत्वात् प्रकृतिभावात् यणभावे प्राप्ते वत्ववचनमिदम्।

साधनिका –

(1) किमु उक्तम् – किम्वुक्तम्।

किमु + उक्तम् इति स्थिते 'इको यणचि' इत्यनेन यणादेशे प्राप्ते '**निपात एकाजनाङ्**' इत्यनेन प्रगृह्संज्ञायां प्राप्तायां तां प्रबाध्य 'मय उञो वो वा' इति सूत्रेण विकल्पेन व आदेशे 'किम् + व् + उक्तम्' वर्णसम्मेलने किम्वुक्तम् इति रूपं सिद्धम्।

वकाराऽभावपक्षे 'किमु + उक्तम्' इति स्थिते ''निपात एकाजनाङ्'' इत्यनेन प्रगृह्यसंज्ञायां '**प्लुतप्रगृहया अचि नित्यम्**' इत्यनेन प्रकृतिभावे 'किमु उक्तम्' इति रूपं सिद्धम्।

**(109) ईदूतौ च सप्तम्यर्थे 1। 1। 19॥**

**सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यं स्यात्। सोमो गौरी अधिश्रितः। मामकी तनू इति । सुपांसुलुक् ( सू. 15६।) इति सप्तम्या लुक्। अर्थग्रहणं किम्? वृतावर्थान्तरोपसक्रान्ते माभूत्। वाप्यामश्वो वाप्यश्वः।**

(109) पदच्छेदः - ईदूतौ, च, सप्तम्यर्थे त्रिपदमिदं सूत्रम्।

समासः - ईत् च ऊत् च तयोरितरेतरयोगद्वन्द्वः।

अनुवृत्तिः - प्रगृह्यम्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - सप्तम्यर्थे पर्यवसितस्य ईकारान्तरुपस्य एवं ऊकारान्तरुपस्य प्रगृहयसंज्ञा भवति।

विशेषार्थः - सोमो गौरी अधिश्रितः इत्यत्र ''**सुपां सुलुक्**'' सूत्रेण सप्तम्याः लोपः। अर्थग्रहणं किम् ? समासादिकेषु अधिसम्बन्धत्वे न स्यात्। वाप्यामश्वो वाप्यश्वः। विशेषः पञ्चवृत्तयः सन्ति (1) कृत् (2) तद्धितः (3) समासः (4) सनाघन्ताधातवः (5) एकशेषः एताभिः वृत्तिभिः शब्दानां मूलार्थस्य विस्तारः जायते । वैदिकाः पदपाठे द्विवचनान्त ई, ऊ एवं ए शब्दस्वरुपाणाम् अनन्तरम् (मामकी तनू इति) इति शब्दस्य प्रयोगं कुर्वन्ति। अतः पदपाठे एव प्रगृह्यसंज्ञायाः बोधः दृश्यते।

साधनिका -

(1) सोमोगौरी अधिश्रितः।

गौर्याम् अधिश्रितः इति विग्रहे गौरी + ङि **इत्यत्र सुपांसुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः** इत्यनेन ङिलोपे सोमोगौरी + अधिश्रितः इति स्थिते '**इको यणचि**' इत्यनेन यणादेशे प्राप्ते 'ईदूतौ च सप्तम्यर्थे' इत्यनेन प्रगृह्यसंज्ञायां '**प्लुतप्रगृह्या अचि नित्यम्**' इत्यनेन प्रकृतिभावे 'सोमोगौरी अधिश्रितः' इति रूपं सिद्धम्।

(2) मामकी तनू इति ।

मामकी तन्वाम् इति विग्रहे 'तनू + ङि' इति स्थिते ''सुपां **सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः**'' इत्यनेन ङिलोपे मामकी तनू + इति इति स्थिते 'इको यणचि' इत्यनेन यणादेशे प्राप्ते 'ईदूतौ च सप्तम्यर्थे' इत्यनेन प्रगृह्यसंज्ञायां **प्लुतप्रगृह्या अचि नित्यम्** इत्यनेन प्रकृतिभावे 'मामकी तनू' इति रूपं सिद्धम्।

**(110) अणोऽप्रगृह्यस्यानुनासिकः 8 । 4 । 57॥**

**अप्रगृह्यस्याणोऽवसानेऽनुनासिको वा स्यात्। दधिँ, दधि, अप्रगृह्यस्य किम् ? अग्नी ।**

(110) पदच्छेदः - अणः, अप्रगृह्यस्य, अनुनासिकः त्रिपदमिदं सूत्रम्।

समासः - न प्रगृह्यम् इति अप्रगृह्यम् नञ्तत्पुरुषः।

अनुवृत्तिः - वा, अवसाने ।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - अवसाने अप्रगृह्यस्य अण् स्थाने विकल्पेन अनुनासिकः भवति।

विशेषार्थः - अत्र अण् पूर्वेणैव णकारेण व्याख्यानात् ज्ञायते। ततश्च कर्तृ इत्यत्र नानुनासिकः अर्थात् प्रगृह्य भिन्ननिरनुनासिकाः अ-इ-उ वर्णाः पदान्ते स्युः तदा विकल्पेन अनुनासिकाः जायन्ते। अप्रगृह्यम् इति कथनेन प्रगृह्यस्य अनुनासिकत्वं न भवति ।

साधनिका -

(1) दधिँ - दधि।

दधि शब्दावयवः अन्तिमः इकारः पदान्ते वर्तते, अतः 'अणोऽप्रगृह्यस्यानुनासिकः' इत्यनेन विकल्पेन सानुनासिको जातः दधिँ इति रूपं सिद्धम्। पक्षे यथास्थितनिरनुनासिकः दधि इति रूपं सिद्धम्।

## स्वाध्यायः

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत।**

(1) **प्लुतप्रगृह्या अचि नित्यम् अस्मिन् सूत्रे कति पदानि सन्ति ?**

(क) 4 (ख) 3 (ग) 5 (घ) 1

(2) **प्लुतप्रगृह्याः अत्र कः समासः अस्ति ?**

(क) अव्ययीभावः (ख) द्वन्द्वः (ग) बहुव्रीही (घ) एकोऽपि

(3) **इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च इति सूत्रस्य कार्यं किम् ?**

(क) अकः दीर्घः (ख) इकः गुणः

(ग) इकः ह्रस्वसहित प्रकृतिभाव (घ) एकोऽपि न

(4) **ब्रह्म ऋषिः इति उदाहरणम् कस्मिन् सूत्रे वर्तते ?**

(क) प्रत्यभिवादेऽशूद्रे (ख) वाक्यस्य देः (ग) ऋत्यकः (घ) एकोऽपि न

(5) **वाक्यस्य टेः प्लुत उदात्तः कीदृशं सूत्रम् ?**

(क) अधिकारःसूत्रम् (ख) संज्ञासूत्रम् (ग) परिभाषासूत्रम् (घ) विधिसूत्रम्

(6) **अशूद्रविषये टेः किं भवति ?**

(क) प्लुतः (ख) ह्रस्वः (ग) दीर्घः (घ) एकोऽपि न

(7) **अनृत् अत्र कः समासः ?**

(क) बहुव्रीहिः (ख) द्वन्द्वः (ग) नञ्तत्पुरूषः (घ) उपपदतत्पुरुषः

(8) **अप्लुतवत् इत्यत्र अप्लुतशब्दे कः समासः ?**

(क) द्वन्द्वः (ख) नञ्तत्पुरूषः (ग) बहुव्रीहीः (घ) अव्ययीभावः

(9) **प्रगृह्यसंज्ञा केन सूत्रेण भवति ?**

(क) ई३ चाक्रवर्मणस्य (ख) अप्लुतवदुपस्थिते (ग) अदसो मात् (घ) एकोऽपि न

(10) **शे इति सूत्रेण किं भवति ?**

(क) प्रगृहयसंज्ञा (ख) घिसंज्ञा (ग) अप्लुतः (घ) प्लुतः

**2. एकैकवाक्येन उत्तरं लिखत ।**

(1) प्लुतप्रगृह्या अचि नित्यम् सूत्रस्य प्रकारः कः ?

(2) ऋति परेऽकः किं भवति ?

(3) दूरात्सम्बोधने यद्वाक्यं तस्य टिसंज्ञकस्य प्लुतः केन सूत्रेण भवति ?

(4) **ई३ चाक्रवर्मणस्य** सूत्रेण किं भवति?

(5) ईदूदेत् इत्यत्र कः समासः ?

(6) ओकारान्त निपातस्य का संज्ञा भवति ?

(7) ईत् च ऊत् च अत्र कः समासः ?

**3. सविस्तरम् उत्तरं लिखत।**

(1) **इकोऽसवर्णे**.... सूत्रस्य पूर्ति कृत्वा सरलार्थं पदच्छेदं समासं च लिखन्तु।

(2) प्रत्यभिवादेऽशूद्रे सूत्रस्य सरलार्थं पदच्छेदं एवं अनुवृत्तिं लिखन्तु ।

(3) **अदसो मात्** सूत्रस्य सरलार्थं सूत्रप्रकारं एवं पदच्छेदं लिखन्तु ।

(4) **ऋत्यकः** सूत्रस्य सरलार्थं सूत्रप्रकारं एव पदच्छेदं लिखन्तु।

(5) **वाक्यस्य टेः प्लुत उदात्तः** सूत्रस्य सरलार्थं एवं पदच्छेदं लिखन्तु।

**4. निम्नलिखितानि रुपाणि साधयत।**

(1) हरी एतौ

(2) वाप्यश्वः

(3) भो आयुष्मती भव गार्गि

(4) सुश्लोकेति

(5) अमी ईशाः

(6) अमुकेऽत्र

(7) इ इन्द्रः

(8) ओष्णम्

(9) मामकी तनु इति

(10) सोमो गौरी अधिश्रितः

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायताम्।**

(1) प्लुतप्रगृह्या अचि नित्यम्।

(2) प्रत्यभिवादेऽशूद्रे।

(3) ई३ चाक्रवर्मणस्य।

(4) निपात एकाजनाङ्।

(5) ईदूतौ च सप्तम्यर्थे।

**6. अविभागं योग्योत्तरेण ब विभागेन सह योजयत।**

| **अ विभाग** | **ब विभाग** |
|---|---|
| (1) ऋत्यकः | (1) अधिकारः |
| (2) वाक्यस्य टेः प्लुत उदातः | (2) विधिसूत्रम् |
| (3) हैहेप्रयोगे हैहयोः | (3) अतिदेशसूत्रम् |
| (4) अप्लुतवदुपस्थिते | (4) नियमसूत्रम् |
| (5) ईदूदेद् द्विवचनं प्रगृह्यम् | (5) संज्ञासूत्रम् |

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं, पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखत।

◆

# 7 हल्सन्धिप्रकरणम्-1

**प्रस्तावना**

**हल्सन्धिः अर्थात् व्यञ्जनवर्णानां सन्धिः। हल्परे अच्परे वा हलःस्थाने सन्धिः यदि वर्तते तदा हल्सन्धिः भवति। हल्सन्ध्यन्तर्गताः श्चुत्वं, ष्टुत्वं, जश्त्वं, अनुनासिकः, पूर्वसवर्णः, चर्त्वं, छत्वं, अनुस्वारः, परसवर्णः इत्यादयः सन्धयो वर्तन्ते। धुट्, तुक्, ङमुट् इत्यादयः आगमाः भवन्ति । हल्सन्धिप्रकरणे सिद्धान्तकौमुदीसूत्रक्रमेण** 111 **तः** 121, 122 **तः** 134, 135, **तः** 149 **सूत्रपर्यन्तं त्रयः भागाः विहिताः सन्ति।**

---

**(111)स्तोः श्चुना श्चुः 8 । 4 । 40 ॥**

**सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः। हरिश्शेते। रामश्चिनोति। सच्चित्। शार्ङ्गिञ्जय।**

---

(111)पदच्छेदः- स्तोः, श्चुना, श्चुः त्रिपदमिदं सूत्रम्।

समासः - स् च तुश्चेति समाहारद्वन्द्वः। पुस्त्वमार्षम्

सूत्रप्रकारः - विधिसूत्रम्

सरलार्थ : सकारतवर्गयोः (स्, त्, थ्, द्, ध्, न्) स्थाने शकारचवर्गाभ्यां (श्, च्, छ्, ज्, झ्, ञ्) योगे शकाचवर्गौ (श्, च्, छ्, ज्, झ्, ग्) भवतः।

विशेषार्थः - अत्र स्थान्यादेशानां समसङ्ख्यासत्वे यथासंख्यम् आदेशो भवति। ततश्च सकारस्य शकारः तवर्गस्य चवर्गः। ततोपि त्, ध्, द्, ध्, न् इति वर्णानां क्रमेण च, छ, ज, झ, ञ् इति वर्णाः आदेशरुपेण भवन्ति। श्चुना योगे इत्यत्र न यथासंख्यं नापेक्षितम्। ततश्च सकारस्य स्थाने श्चुत्वं चवर्गस्य योगे तथा तवर्गस्य स्थाने श्चुत्वं शकारस्य योगेऽपि भवति।

साधनिका -

(1) हरिश्शेते ।

हरिस् + शेते इत्यवस्थायां ''**स्तोः श्चुना श्चुः**'' इति सुत्रेण शकारस्य योगे सकारस्य स्थाने श्चुत्वेन शकारे हरिश्+ शेते वर्णसम्मेलने ''हरिश्शेते'' इति रूपं सिद्धम्।

(2) रामश्चिनोति ।

रामस् + चिनोति इत्यवस्थायां ''**स्तोः श्चुना श्चुः**'' इत्यनेन सूत्रेण चकारस्य योगे सकारस्य स्थाने श्चुत्वेन शकारे रामश् + चिनोनि वर्णसम्मेलने रामश्चिनोति इति रूपं सिद्धम्।

सत् + चित् = सच्चित्, शार्ङिन् + जय=शार्ङिञ्जयः। इति रूपाणि प्राग्वत् सिद्धयन्ति। स्थानिभूतानां वर्णानाम् आदेशाः यथासंख्यं भवन्ति ।

---

**(112) शात् 8 । 4 । 44 ॥**

**शात्परस्य तवर्गस्य चुत्वं न स्यात् । विश्नः। प्रश्नः।**

---

(112) पदच्छेदः - शात् एकपदमिदं सूत्रम्।

अनुवृत्तिः - न, तोः, श्चुः।

सूत्रप्रकारः - निषेधसूत्रम्

सरलार्थः - शकारात् परस्य तवर्गस्य स्थाने चवर्गो न भवति।

विशेषार्थः - **न पदान्तादिति** पूर्वसूत्रात् नेत्युनुवर्तते। **स्तोः श्चुना श्चुरित्यतः** चुरिति अनुवर्तते। शादिति दिग्योगे पञ्चमी। परस्येत्यध्याहार्यम्।

साधनिका :

(1) विश्नः।

विच्छ् गतौ इत्यस्मात् धातोः **'यजयाचयतविच्छप्रच्छरक्षोनङ्'** इत्यनेन नङ् विच्छ + न इति स्थिते च्छोः शूडनुनासिके च इत्यनेन च्छ स्थाने शकारे विश् + न इत्यवस्थायाम् **स्तोः श्चुना श्चुः** इत्यनेन श्चुत्वे प्राप्ते शात् इति सूत्रेण निषेधे विश्न इति स्थिते स्वादिकार्ये विश्नः इति रूपं सिद्धम्।

(2) प्रश्नः।

प्रच्छ ज्ञीप्सायाम् इति प्रच्छ धातोः नङ् प्रत्यये विश्नवत् रुपसिद्धिः ज्ञेया।

---

**(113) ष्टुना ष्टुः 8 । 4 । 41॥**

**स्तोः ष्टुना योगे ष्टुः स्यात् । रामष्षष्ठः। रामष्टीकते। पेष्टा। तट्टीका। चक्रिण्ढौकसे।**

---

(113) पदच्छेदः - ष्टुना, ष्टुः द्विपदमिदं सूत्रम्।

समासः - ष् च टुश्च ष्टुः, तेन ष्टुना समाहारद्वन्द्वः।

अनुवृत्तिः - स्तोः।

सूत्रप्रकारः- विधिसूत्रम्

सरलार्थः - सकारतवर्गयोः (स्, त्, थ्, द्, ध्, न् वर्णानां) स्थाने षकारटवर्गाभ्यां (ष्, ट्, ठ्, ड्, ढ्, ण् वर्णैः) योगे षकारटवर्गौ स्तः (ष्, ट, ठ्, ड्, ढ्, ण वर्णाः भवन्ति इति भावः)।

विशेषार्थः -

अत्रापि स्थान्यादेशानां यथासङ्ख्यम्। न तु ष्टुयोगे इत्यत्र। तदनुसारं स्-ष्, त्-ट्, थ्-ठ्, द्-ड्, ध्-ढ्, न्-ण् इति आदेशाः भवन्ति ।

साधनिकाः -

(1) रामष्षष्ठः ।

रामस् + षष्ठः इति स्थिते **'ष्टुना ष्टुः'** इति सूत्रेण ष्टुत्वेन आन्तरतम्यात् सकारस्य षकारे रामष् + षष्ठः वर्णसम्मेलने रामष्षष्ठः इति रूपं सिद्धम्।

रामस् + टीकते = रामष्टीकते ।

पेष् + ता = पेष्टा ।

तत् + टीका = तट्टीका ।

चक्रिन् + ढौकसे = चक्रिण्ढौकसे । इति रुपाणि रामष्षष्ठवत् सिद्धयन्ति। स्थानिभूतानां वर्णानाम् आदेशाः यथासंख्यं भवन्ति।

---

**(114) न पदान्तोट्टोरनाम् 8 । 4 । 42॥**

**अनाम् इति लुप्तषष्ठीकं पदम्। पदान्ताट्टवर्गात्परस्यानामः स्तोः ष्टुर्न स्यात्। षट् सन्तः। षट् ते । पदान्तात् किम्। ईट्टे। टोः किम् । सर्पिष्टमम्। अनाम्नवतिनगरीणामिति वाच्यम्। ( वा 5016 ) षण्णाम्। षण्णवतिः। षण्णगर्यः।**

---

(114) पदच्छेदः - न, पदान्तात्, टोः, अनाम् चतुष्पदमिदं सूत्रम्।

अनुवृत्तिः - स्तोः, ष्टुः।

सूत्रप्रकारः - निषेधसूत्रम्

सरलार्थः- पदान्तटवर्गात् परयोः स्थितयोः नाम् भिन्नयोः सकारतवर्गयोः स्थाने ष्टुत्वं न भवति।

विशेषार्थः - अनाम् ष्टुत्वप्रतिषेधे नाम्नः एव पर्युदासो न भवति । किन्तु नवतिनगरीशब्दावयवनकारस्यापि पर्युदासो वक्तव्यः इत्यर्थः। अर्थात् पदान्ते स्थितटवर्गात् परे सस्य एवं तवर्गस्य स्थाने क्रमेण ष् एवं टवर्गः न भवति ।

साधनिका:-

(1) षट् सन्तः ।

'षट् + सन्तः' इत्यवस्थायां **''ष्टुना ष्टुः''** इति सूत्रेण ष्टुत्वे प्राप्ते **''न पदान्ताट्टोरनाम्''** इति सूत्रेण निषेधे षट् सन्तः इति रूपं सिद्धम्। तद्वदेव षट् ते इति रूपस्य सिद्धिः भवति।

(2) षण्णाम्।

षष् + नाम् इति स्थिते ''स्वादिष्वसर्वनामस्थाने'' इति पदान्तत्वाद् षस्य जश्त्वेन डकारे, 'प्रत्यये भाषायां नित्यम्' इति तस्य णकारः। षण्णाम् अत्र टवर्गयोगात् नकारस्य ष्टुत्वम्। न पदान्तादिति निषेधस्तु न। अनाम्नवति इति पर्युदासात् षण्णवतिः। षण्णगर्यः इत्यादि रूपसिद्धिः षण्णाम् इतिवत् ज्ञेया।

---

**(115) तोः षि 8 । 4 । 43॥**

**तवर्गस्य षकारे परे न ष्टुत्वम्। सन्षष्ठः। झलां जशोऽन्ते (सू. 84) वागीशः। चिद्रूपम्।**

---

(115) पदच्छेदः - तोः, षि द्विपदमिदं सूत्रम्।

अनुवृत्तिः - न, ष्टुः ।

सूत्रप्रकारः - निषेधसूत्रम्

सरलार्थः- तवर्गात् परे यदा षकारः भवति तदा तवर्गस्य स्थाने ष्टुत्वं न भवति ।

विशेषार्थः- अत्र नकारस्य षकारयोगे ष्टुत्वं प्राप्तं निषिध्यते । अस्मादेव ज्ञापकात् ष्टुना ष्टुरित्यत्र ष्टुना योगे इत्यत्र यथासङ्ख्यन्नेति विज्ञायते ।

साधनिका : -

(1) सन्षष्ठः ।

सन् + षष्ठः इति स्थिते '**ष्टुना ष्टुः**' इत्यनेन सूत्रेण ष्टुत्वे प्राप्ते '**तोःषि**' इत्यनेन सूत्रेण ष्टुत्वस्य निषेधे, सन्षष्ठः इति रूपं सिद्धम्।

(2) वागीशः ।

'वाक् + ईशः' इति स्थिते **''झलां जशोऽन्ते''** इत्यनेन जश्त्वेन गकारे 'वाग् + ईशः' वर्णसम्मेलने वागीशः इति रूपं सिद्धम्। तदनुसारेणेव चिद्रूपम् इति रुपसिद्धिः ज्ञेया।

**झलां जशोऽन्ते** इति सूत्रस्योदाहरणरूपेण वागीशः, चिद्रूपं इति रूपद्वयं ज्ञेयम्। इदं **झलां जशोऽन्ते** सूत्रं प्रसङ्गमनुसृत्य अच्सन्धिप्रकरणे उपन्यस्तम्। तदेव पुनः इह हल्सन्धौ प्रस्तुतमनुसृत्य उपन्यस्तम्।

---

**(116) यरोऽनुनासिकेऽनुनासिको वा 8 । 4 । 45॥**

**यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्। एतन्मुरारिः - एतद्मुरारिः। स्थानप्रयत्नाभ्यामन्तरतमे स्पर्शे चरितार्थो विधिरयं रेफे न प्रवर्तते। चतुर्मुखः। प्रत्यये भाषायां नित्यम् (वा. 5017)। तन्मात्रम्। चिन्मयम्। कथं तर्हि मदोदग्राः ककुद्मन्तः इति ? यवादिगणे (ग. 250) दकारनिपातनात्।**

---

(116) पदच्छेदः- यरः, अनुनासिके, अनुनासिकः, वा चतुष्पदमिंद सूत्रम्।

अनुवृतिः- पदान्तात्।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - पदान्तस्य यर्-प्रत्याहारस्य स्थाने (हकारं विहाय) विकल्पेन अनुनासिकः भवति, परे अनुनासिकः स्यात् तदा।

विशेषार्थः- **न्पदान्ताट्टोरित्यतः** पदान्तादित्यनुवर्तते। तच्च षष्ठयन्ततया विपरिणम्यते। एतन्मुरारिति कर्मधारयः। एतन्मुरारिरित्यादौ स्थानतः प्रयत्नतश्चान्तरतमे स्पर्शे चरितार्थः लब्धप्रयोजनोऽयमनुनासिकविधिः स्थानमात्रेण आन्तर्यमादाय रेफे न प्रवृतिर्महति। वा. 5017) लौकिक प्रयोगे यर्-प्रत्याहारन्तर्गतवर्णेभ्यः परे अनुनासिकवर्णात् प्रारभ्यमाणः प्रत्ययोः भवति तदा नित्यानुनासिको भवति। एषः विकल्पविधेः अपवादः वर्तते।

साधनिका: –

(1) एतन्मुरारिः, एतद्मुरारिः ।

एतत् + मुरारिः इति स्थिते **झलां जशोऽन्ते** इति सूत्रेण जश्त्वे एतद् + मुरारिः इति स्थिते **यरोऽनुनासिकेऽनुनासिको** वा इति सूत्रेण अनुनासिके दकारस्य स्थाने नकारे (**स्थानेऽन्तरतमः** इति सूत्रनियमेन दन्त्यस्थदकारस्य स्थाने दन्त्ये नकारे) एतन् + मुरारिः वर्णसम्मेलने एतन्मुरारिः इति रूपं सिद्धम्। अनुनासिकाभावे एतद्मुरारिः इति रूपं सिद्ध्यति।

(2) चतुर्मुखः।

'चतुर् + मुखः' इति स्थिते '**यरोऽनुनासिकेऽनुनासिको वा**' इत्यनेन सूत्रेण अनुनासिको न भवति, स्थानप्रयत्नाभ्यामन्तरतमे स्पर्शे चरितार्थो विधिरयं रेफे न प्रवर्तते इति व्याख्यानात् चतुर्मुखः।

(3) तन्मात्रम्।

तत् + मात्रम् इति स्थिते, **झलां जशोऽन्ते** इत्यनेन जश्त्वेन दकारे तद् + मात्रम् इत्यवस्थायां '**यरोऽनुनासिकेऽनुनासिको वा** इत्यनेन विकल्पेन अनुनासिके प्राप्ते 'स्थानेऽन्तरतमः' इति सूत्रसहकारेण 'प्रत्यये भाषायां नित्यम्' इति वार्तिकेन नित्ये अनुनासिके नकारे 'तन् + मात्रम्' वर्णसम्मेलने 'तन्मात्रम्' इति रूपं सिद्धम्।

तदनुसारमेव चित् + मयम् चिन्मयम् इति रूपसिद्धिः ज्ञेया।

---

**(117) तोर्लि 8। 4 । 60॥**

**तवर्गस्य लकारे परे परसवर्णः स्यात्। तल्लयः। विद्वाँल्लिखति। नकारस्यानुनासिको लकारः।**

---

(117) पदच्छेदः – तोः, लि द्विपदमिदं सूत्रम्।

अनुवृत्तिः – परसवर्गः।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः– तवर्गात् परः लकारः स्यात् तदा तवर्गस्थाने परसवर्णः भवति।

विशेषार्थः – तद् + लय इति स्थिते दस्य परसवर्णः परनिमित्तभूतलकारसवर्णो भवति। स च लकार एव। अन्यस्य तत्सावर्ण्यं नास्ति, विद्वान् + लिखति इत्यत्र विद्वान् लिखति स्थिते नकारस्य स्थानिनः अनुनासिसकस्य परसवर्णो लकारो भवन् आन्तर्तम्यादनुनासिक एव लकारो भवति।

साधनिका: –

(1) तल्लयः ।

तत् + लयः इत्यवस्थायां '**झलां जशोऽन्ते**' इत्यनेन जश्त्वेन दकारे 'तद् + लयः' इति स्थिते **तोर्लि** इत्यनेन सूत्रेण दस्य परसवर्णः परनिमित्तभूतलकारसवर्णः तल्लयः इति रूपं सिद्धम्। तदनुसारमेव विद्वाँल्लिखति इति रूपं सिद्ध्यति। केवलं नकारस्य अनुनासिकत्वात् अनुनासिकलकारादेशो भवति।

---

**(118)उदः स्थास्तम्भोः पूर्वस्य 8। 4 । 61॥**

**उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात्। आदेः परस्य ( सू. 44 )। उत्थानम्। उत्तम्भनम्। अत्राघोषस्य महाप्राणस्य सस्य तादृश एव थकारः। तस्य झरो झरि ( सू.71 ) इति पाक्षिको लोपः। लोपाभावपक्षे तु थकारस्यैव श्रवणम्, न तु खरि च ( सू. 121 ) इति चर्त्वम् चर्त्वं प्रति थकारस्यासिद्धत्वात्।**

---

(118)पदच्छेदः – उदः, स्थास्तम्भोः, पूर्वस्य त्रिपदमिदं सूत्रम्।

समासः – स्था च स्तम्भ् च तयोरितरेतरद्वन्द्वः स्थास्तम्भौ, तयोः स्थास्तम्भोः।

अनुवृत्तिः – सवर्णः।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – उद् उपसर्गात् परः स्यात् तदा पूर्वसवर्णः भवति। स्था च्चातुः स्यात् अथवा स्तम्भधातुः।

विशेषार्थः- आदेः परस्य परिभाषानुसारं तयोः आदौ भवति। उत्थानम् उत्तम्भनम्। अत्र अघोषस्य महाप्राणस्य सस्य तादृशः एव थकारः जातः। तस्य झरो झरि सूत्रेण वैकल्पिक लोपः भवति। लोपस्य अभावे थकारस्य एव श्रवणं भवति न तस्य स्थाने 'खरि च' सूत्रेण जातस्य चर्त्वस्य। तस्य कारणं वर्तते यत् चर्त्वं प्रति थकारः असिद्धः वर्तते।

साधनिकाः-

(1) उत्थानम्।

उद् + स्थानम् इत्यत्र **उदः स्थास्तम्भोः पूर्वस्य** इत्यनेन आन्तरतम्यात् सकारथकारयोः दन्तस्थानजन्यत्वेन विवारश्वासघोषमहाप्राणप्रयत्नत्वेन च सादृश्यात् सकारस्य थकारे उद् + थ + थानम् इति स्थिते '**झरो झरि सवर्णे**' इत्यनेन पूर्वथकरस्य लोपे उद् + थानम् इत्यत्र 'खरि च' इति सूत्रेण चर्त्वेन दकारस्य तकारे उत्थानम् इति रूपं सिद्धम्।

(2) उत्थ्थानम्।

लोपाभावपक्षे उद् + थ् + थानम् इत्यवस्थायां पूर्वथकारस्यासिद्धत्वात् खरि च इत्यनेन चर्त्वे उत्थ्थानम् इति रूपं सिद्धम्। उत्तम्भनम् (उत् + स्तम्भनम्) उत्थानम् इति रूपवत् सिद्धयति।

---

**(119) झयो होऽन्यतरस्याम् 8। 4 । 62॥**

**झयः परस्य हस्य पूर्वसवर्णो वा स्यात्। घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य तादृशो वर्गचतुर्थ एवादेशः। वाग्घरिः, वाग्हरिः।**

---

(119) पदच्छेदः- झयः, हः, अन्यतरस्यां त्रिपदमिदं सूत्रम्।

अनुवृत्तिः- पूर्वस्य, सवर्णः।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- झयः परस्य हस्य स्थाने विकल्पेन पूर्वसवर्णः भवति।

विशेषार्थः- वाक्शब्दश्चकारान्तः कुत्वं, जश्त्वम्। वाग् हरिरिति स्थिते हकारस्य पूर्वसवर्णविधौ गकारः पूर्वनिमित्तम्, तत्सवर्णाः, क्, ख्, ग्, घ्, ङ्, पञ्च। तेषां हकारेण स्थानिना स्थानत आन्तर्यमविशिष्टम्। आभ्यन्तरप्रयत्नसाम्यं तु पञ्चानामपि हकारेण स्थानिना न विद्यतेस्पृष्टविवृतप्रयत्नभेदात्। अतः बाह्यप्रयत्नतः आन्तर्यमादाय वर्गचतुर्थः भवति।

साधनिकाः-

(1) वाग्घरिः ।

वाक् + हरिः इति स्थिते '**झलां जशोऽन्ते**' इति सूत्रेण जश्त्वेन गकारे वाग् + हरिः इति स्थिते **झयो होऽन्यतरस्याम्** इत्यनेन आन्तरतम्यात् घोषनादसंवारप्रयत्नवतो महाप्राण हकारस्य तादृशे एव घकारे पूर्वसवर्णे वाग् + घरिः वर्णसंयोगे वाग्घरिः इति रूपं सिद्धम्।

(2) वाग्हरिः।

पूर्वसवर्णाऽभावे वाक् + हरिः इत्यवस्थायां **झलां जशोऽन्ते** इत्यनेन सूत्रेण जश्त्वेन गकारे वाग् + हरिः वर्णसम्मेलने वाग्हरिः इति रूपं सिद्धम्।

---

**(120) शश्छोऽटि 8। 4 । 63॥**

**पदान्ताज्झयः परस्य शस्य छो वा स्यादटि। दस्य श्चुत्वेन जकारे कृते ।**

---

(120) पदच्छेदः- शः, छः, अटि त्रिपदमिदं सूत्रम्।

अनुवृत्तिः- झयः, अन्यतरस्याम्।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- पदान्ते विद्यमानात् झयप्रत्यहारस्थात् वर्णात् परस्य शस्य स्थाने विकल्पेन छः आदेशः भवति यदि अटि परे स्यात्।

**(121)खरि च 8। 4 । 55॥**

**खरि परे झलां चरः स्युः। इति जकारस्य चकारः। तच्छिवः, तच्शिवः। छत्वममीति वाच्यम् ( वा.5025 )। तच्छ्लोकेन तच्श्लोकेन। अमि किम् ? वाक् श्च्योतति।**

(121) पदच्छेदः - खरि, च द्विपदमिदं सूत्रम्।

अनुवृत्तिः - झलाम्, चर्।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- झल् प्रत्याहारस्थस्य वर्णस्य चर् आदेशः भवति यदि खर् प्रत्याहारस्थवर्णाः परे स्युः।

विशेषार्थः- खरि पर इत्यादिना। खरिच इत्यनेन जकारस्य चकार इति स्थानत आन्तर्यादिति भावः। ततः छत्वम्। न तु प्रागित्यपि बोध्यम् छत्वस्य श्चुत्वचर्त्वे प्रत्यसिद्धत्वात् **हलो यमामिति** सूत्रस्थभाष्यसंभतसूत्रक्रमे तु श्चुत्वेन जकारे कृते शस्य छत्वं ततो जकारस्य चर्त्वम्। न तु छत्वात् प्राक् चर्त्वम्, चर्वँ प्रति छत्वस्यासिद्धत्वात्। तच्छिव इति। स चासौ शिवश्चेति तस्य शिव इति वा विग्रहः।

| **स्थानी** | **स्थानप्रयत्नतः सादृश्यम्** | **आदेशः** |
|---|---|---|
| श् | तालु, विवृतम् | श् |
| ष् | मूर्धा, विवृतम् | ष् |
| स् | दन्तः, विवृतम् | स् |
| क्, ख्, ग्, घ् | कण्ठः, स्पृष्टम् | क् |
| च्, छ्, ज्, झ् | तालु, स्पृष्टम् | च् |
| ट्, ठ्, ड्, ढ् | मूर्धा, स्पृष्टम् | ट् |
| त्, थ्, द्, ध् | दन्तः, स्पृष्टम् | त् |
| प्, फ्, ब्, भ् | ओष्ठौ, स्पृष्टम् | प् |

साधनिका:-

(1) तच्छिवः।

तत् + शिवः इति स्थिते **झलां जशोऽन्ते** इत्यनेन सूत्रेण जशत्वेन दकारे तद् + शिवः इति स्थिते **स्तोः श्चुना श्चुः** इत्यनेन श्चुत्वेन जकारे तज् + शिवः इत्यवस्थायां **खरि च** इत्यनेन सूत्रेण चर्त्वे तच् + शिवः इति स्थिते शश्छोऽटि इत्यनेन शकारस्य छकारे 'तच् + छिवः' इति वर्णसम्मेलने तच्छिवः इति रूपं सिद्धम्। छत्वविकल्पाभावे तच्शिवः रूपं सिद्धयति।

(2) तच्छलोकेन।

तत् + श्लोकेन इत्यवस्थायां **झलां जशोऽन्ते** इत्यनेन जश्त्वेन दकारे 'तद् + श्लोकेन' इति स्थिते **स्तोः श्चुना श्चुः** इत्यनेन सूत्रेण श्चुत्वेन जकारे तज् + श्लोकेन इत्यवस्थायां '**खरि च**' इति सूत्रेण चर्त्वेन जकारस्य चकारे तच् + श्लोकेन इति स्थिते '**छत्वममीति वाच्यम्**' इत्यनेन शस्य छत्वे तच्छलोकेन इति रूपं सिद्धम्। छत्वस्याभावे तच्श्लोकेन इति रूपं जायते ।

## स्वाध्याय

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

(1) **स्तोः श्चुना श्चुः सूत्रस्य उदाहरणं लिखत ।**

(क) विष्णुस्त्राता (ख) तल्लयः (ग) वागीशः (घ) हरिश्शेते

(2) **खरि च सूत्रेण किं भवति ?**

(क) जकारस्य चकारः (ख) जकारस्य पकारः (ग) जकारस्य मकारः (घ) जकारस्य यकारः

(3) **शात् इति सूत्रेण कस्य श्चुत्वं न भवति ?**

(क) कवर्गस्य (ख) चवर्गस्य (ग) तवर्गस्य (घ) टवर्गस्य

(4) **तच्छिवः इति रूपं कस्य सूत्रस्य उदाहरणम् अस्ति ?**

(क) खरि च (ख) तोर्लि (ग) मोऽनुस्वारः (घ) ष्टुना ष्टुः

(5) **तवर्गस्य लकारे परे परसवर्गः केन सूत्रेण भवति ?**

(क) शश्छोऽटि (ख) तोर्लि (ग) खरि च (घ) तो:षि

(6) **उदः स्थास्तम्भोः पूर्वस्य सूत्रस्य उदाहरणं लिखत।**

(क) षण्णवतिः (ख) वागीशः (ग) उत्थानम् (घ) हरिः

(7) **प्रश्नः श्चुत्वनिषेधकं सूत्रं किम् ?**

(क) शात् (ख) ष्टुना ष्टुः (ग) झलां जशोऽन्ते (घ) तोः षि

(8) **झयो होऽन्यतरस्याम् इति सूत्रे कति पदानि सन्ति ?**

(क) 1 (ख) 2 (ग) 3 (घ) 4

(9) **तोः षि सूत्रस्य प्रकारं लिखत ।**

(क) विधिसूत्रम् (ख) संज्ञासूत्रम् (ग) परिभाषासूत्रम् (घ) अनिदेशसूत्रम्

(10) **ष्टुना योगे ष्टुः केन सूत्रेण भवति ?**

(क) ष्टुना ष्टुः (ख) झयो होऽन्यतरस्याम् (ग) तोः षि (घ) खरि च

**2. एकैकवाक्येन उत्तरं लिखत ।**

(1) **स्तोः श्चुना श्चुः** सूत्रेण किं भवति ?

(2) स्तोः अत्र कः समासः ?

(3) हरिश्शेते रूपस्य सिद्धिः कस्मिन् सूत्रे वर्तते ?

(4) शात्परस्य तवर्गस्य श्चुत्वं केन सूत्रेण निषिध्यते ?

(5) **न पदान्ताट्टोरनाम्** सूत्रस्य प्रकारं लिखन्तु।

(6) **उदः स्थास्तम्भोः पूर्वस्य** सूत्रेण किं भवति ?

(7) **झयो होऽन्यतस्याम्** सूत्रे कस्यानुवृत्तिः वर्तते ?

**3. सविस्तरम् उत्तरं लिखत।**

(1) **शात्** सूत्रस्य सरलार्थं, अनुवृत्तिं एवं सूत्रप्रकारं लिखन्तु।

(2) **शश्छोऽटि** सूत्रस्य सरलार्थं अनुवृत्तिं एवं सूत्रप्रकारं लिखन्तु ।

(3) **न पदान्तोट्टोरनाम्** सूत्रस्य सरलार्थं अनुवृतिं एवं सूत्रप्रकारं लिखन्तु।

**4. निम्नलिखितानि रुपाणि साधयत।**

(1) हरिश्शेते
(2) शाङ्ञ्जय
(3) रामष्षष्ठः
(4) षण्णाम्
(5) वागीशः
(6) तन्मात्रम्
(7) एतन्मुरारिः
(8) वाग्घारिः
(9) तच्छिवः
(10) तच्छ्लोकेन

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायताम्।**

(1) स्तोः श्चुना श्चुः।

(2) उदः स्थास्तम्भोः पूर्वस्य।

(3) खरि च ।

**6. अविभागं योग्योत्तरेण बविभागेन सह योजयत।**

| **अ विभाग** | **ब विभाग** |
|---|---|
| (1) स्तोः श्चुना श्चुः | (1) विश्नः |
| (2) ष्टुना ष्टुः | (2) सच्चित् |
| (3) शात् | (3) पेष्टा |
| (4) न पदान्ताट्टोरनाम् | (4) षट् सन्तः |
| (5) तोः षि | (5) सन्षष्ठः |

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं, पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखत।

◆

# 8 हल्सन्धिप्रकरणम्-2

**प्रस्तावना**

**भट्टोजिदीक्षितविरचितवैयाकरणसिद्धान्तकौमुद्यां ''मोऽनुस्वारः'' (सू.122) सूत्रादारभ्य ङमोह्रस्वादचि.... (सू.138) पर्यन्तं हल्सन्धिप्रकरणम् 2 वर्तते। प्रकरणेऽस्मिन् मान्तस्यानुस्वारः, मस्य मः, मस्य नकारः, कुक्, टुक्, धुट्, तुक्, डमुट् इत्यादयः आगमाः भवन्ति।**

---

**(122)मोऽनुस्वारः 8 । 3 । 23॥**

**मान्तस्य पदस्यानुस्वारः स्याद्धलि। अलोऽन्त्यस्य (सू.52)। हरिं वन्दे। पदस्य इति किम्? गम्यते।**

---

(122)पदच्छेदः- मः, अनुस्वारः द्विपदमिदं सूत्रम्।

अनुवृत्तिः- हलि।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- मकारान्तपदस्य अन्त्यमकारस्य स्थाने अनुस्वारो भवति हल्वर्णाः परे स्युः चेत्।

विशेषार्थः- म इति षष्ठयन्तं पदस्य विशेषणम्। तदन्तविधिः हलिसर्वेषामित्यतो हलीत्यनुवर्तते। अत्र अलोऽन्त्यस्य इति परिभाषायाः उपस्थितत्वात् मान्तस्य पदस्य यः अन्त्यः अल् मकारः तस्य स्थाने अनुस्वारो भवति।

साधनिका: -

(1) हरिं वन्दे।

'हरिम् + वन्दे' इति स्थिते 'मोऽनुस्वारः' इत्यनेन सूत्रेण मस्य अनुस्वारे हरिं वन्दे इति रूपं सिद्धम्।

(2) गम्यते।

'गम् + य + ते' इत्यत्र मस्यपदान्तत्वाभावात् न अनुस्वारः अतः गम्यते इति रूपं सिद्धम्।

---

**(123) नश्चापदान्तस्य झलि 8 । 3 । 24॥**

**नस्य मस्य चापदान्तस्य झल्यनुस्वारः। यशांसि। आक्रंस्यते। झलि किम्? मन्यते।**

---

(123) पदच्छेदः- नः, च, अपदान्तस्य, झलि चतुष्पदमिदं सूत्रम्।

समासः- पदस्य अन्तः पदान्तः (षष्ठी तत्पुरुषसमासः) न पदान्तः अपदान्तः (नञ्तत्पुरुषः)

अनुवृत्तिः- अनुस्वारः, मः

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- अपदान्तस्य नस्य एवं मस्य स्थाने अनुस्वारो भवति, झल्प्रत्याहारवर्णाः परे स्युः चेत्।

विशेषार्थः-अत्र झल्परत्वाभावे अनुस्वारविधिः न भवति। चकारान्मकारस्येत्यनुकृष्यते अनुस्वारः इति च।

साधनिका:-

(1) यशांसि।

यशस् + जस् इत्यवस्थायां ''**जश्शसोः शिः**'' इत्यनेन शिः। शित्वात् सर्वादेशे यशस् + इ इति स्थिते **नपुंसकस्य झलचः** इत्यनेन नुम् अनुबन्धलोपे न् **सान्तमहतः** इति सूत्रेण दीर्घे यशान् स् + इ इति स्थिते **नश्चापदान्तस्य झलि** इत्यनेन सूत्रेण नकारस्य अनुस्वारे यशांसि इति रूपं सिद्धम्।

(2) आक्रंस्यते।

'आ क्रम् स्यते' इति स्थिते **'नश्चापदान्तस्य झलि'** इत्यनेन सूत्रेण मकारस्य अनुस्वारे आक्रंस्यते इति रूपं सिद्धम्।

**(124)अनुस्वारस्य ययि परसवर्णः 8 । 4 । 58॥**

**स्पष्टम्। अङ्कितः। अञ्चितः। कुण्ठितः। शान्तः। गुम्फितः। कुर्वन्ति इत्यत्र णत्वे प्राप्ते तस्यासिद्धत्वादनुस्वारे परसवर्णे च कृते तस्यासिद्धत्वान्न णत्वम्।**

(124)पदच्छेदः- अनुस्वारस्य, ययि, परसवर्णः, त्रिपदमिदं सूत्रम्।

समासः- परस्य सवर्णः परसवर्णः (षष्ठीतत्पुरुषः)।

सुत्रप्रकारः- विधिसूत्रम्।

सरलार्थः - अनुस्वारस्य ययि परे परसवर्णः भवति।

विशेषार्थः- अनुवर्त्यपदान्तराभावादिह सूत्रार्थः स्पष्टोऽस्ति। परसवर्णस्य प्रवृत्तिः अपदान्तयोः न् म् इति द्वयोः प्राप्तानुस्वारस्य स्थाने भवति। कुर्वन्ति इत्यत्र जत्वे प्राप्ते तस्य असिद्धत्वात् न्-स्थाने अनुस्वारः एवं परसवर्णासिद्धत्वात् च्, न्-स्थाने ण् न भवति।

साधनिका:-

(1) अङ्कितः।

'अकि लक्षणे' इति धातोः इकारस्य इत्संज्ञा इदितो नुम् धातोः इत्यनेन नुमागमे अनुबन्धलोपे अन् + क् इत्यवस्थायां क्तप्रत्यये एवं इडागमे अन् + क् + इत इति स्थिते **'नश्चापदान्तस्य झलि'** इत्यनेन अनुस्वारे 'अंक् + इत' इत्यवस्थायां अनुस्वारस्य ययि परसवर्णः इत्यनेन परसवर्णे अङ्क + इत इत्यत्र स्वादिकार्ये अङ्कितः इति रूपं सिद्धम्।

(2) अञ्चितः।

अन्चु गतिपूजनयोः इति धातोः क्तप्रतत्यये एवं इडागमे अन् + च् + इत इति स्थिते नश्चापदान्तस्य झलि इति सूत्रेण अनुस्वारे अंच + इत इत्यवस्थायां **अनुस्वारस्य ययि परसवर्णः** इत्यनेन परसवर्णे अञ्च + इत इत्यत्र स्वादिकार्ये अञ्चितः इति रूपं सिद्धम्।

(3) कुण्ठितः।

कुठि प्रतिघाते इति धातोः इकारस्य इत्संज्ञायाम् 'इदितो नुम् धातोः' इत्यनेन नुमागमे अनुबन्धलोपे क्तप्रत्यये एवं इडागमे 'कुन् + ठ् + इत' इत्यवस्थायां **'नश्चापदान्तस्य झलि'** इत्यनेन अनुस्वारे **अनुस्वारस्य ययि परसवर्णः** इत्यनेन सूत्रेण परसवर्णे कुण्ठित इत्यत्र स्वादिकार्ये कुण्ठितः इति रुपं सिद्धम्। तदनुसारेणैव शान्तः, गुम्फितः इत्यादिप्रयोगाः सिद्धन्ति अनुस्वारस्य तत्र तत्र परसवर्णत्वेन नकारः मकारश्च भवति ।

**(125) वा पदान्तस्य 8। 4 । 59॥**

**पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात्। त्वङ्करोषि, त्वं करोषि। सय्यँन्ता, संयन्ता। सँव्वत्सरः, संवत्सरः। यंल्लोकम्, यंलोकम्। अत्रानुस्वारस्य पक्षेऽनुनासिका यवलाः।**

(125) पदच्छेदः- वा, पदान्तस्य द्विपदमिदं सूत्रम्।

अनुवृत्तिः- अनुस्वारस्य, ययि, परसवर्णः।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- पदान्तस्य अनुस्वारस्य स्थाने यय् प्रत्याहारवर्णे परे विकल्पेन परसवर्णं भवति।

साधानिका:-

(1) त्वङ्करोषि, त्वं करोषि।

त्वम् + करोषि इति स्थिते ''**मोऽनुस्वारः**'' इत्यनेन सूत्रेण मस्यानुस्वारे त्वं + करोषि इत्यवस्थायां **अनुस्वारस्य ययि परसवर्णः** इत्यनेन सूत्रेण नित्यपरसवर्णे प्राप्ते ''**वा पदान्तस्य**'' इत्यनेन अनुस्वारस्य अनुनासिके ङकारे त्वङ् + करोषि वर्णसम्मेलने त्वङ्करोषि इति रूपं सिद्धम्। परसवर्णाभावे त्वं करोषि इति।

---

**(126)मो राजि समः क्वौ 8। 3 । 25॥**

**क्विबन्ते राजतौ परे समो मस्य म एव स्यात्। सम्राट**

---

((126) पदच्छेदः- मः, राजि, समः, क्वौ चतुष्पदमिदं सूत्रम्।

अनुवृत्तिः- मः।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- क्विप्-प्रत्ययान्तः राज् धातुः तस्मिन् परे स्यात् तदा सम् उपसर्गस्य अवयवस्य मस्य म् एव भवति।

विशेषार्थः- मस्य मविधानमनुस्वारनिवृत्त्यर्थमिति भावः। म इति प्रथमान्तम्। सन्धिविच्छेदं कुर्मः चेत् मस् + राजि इत्यत्र ''ससजुषो रुः'' इत्यनेन सकारल्य स्थाने रु मरु + राजि इत्यत्र ''**हशि च**'' रः **स्थाने उ आद्‌गुणः गुणे ओ मो राजि इति।**

साधनिका:

(1) सम्राट्।

(क्विप् प्रत्ययः लुप्तः) सम् + राट् इति स्थिते ''**अलोऽन्त्यस्य**'' परिभाषासूत्रसहकारेण 'मोऽनुस्वारः' इत्यनेन अनुस्वारे प्राप्ते तं प्रबाध्य ''**मो राजि समः क्वौ**'' इति सूत्रेण म् स्थाने म् वर्मसम्मेलने सम्राट् इति रूपं सिद्धम्।

---

**(129) हे मपरे वा 8। 3 । 59॥**

**मपरे हकारे परे मस्य म एव स्याद्वा। ह्मल ह्वल चलने। किम् ह्मलयति, किं ह्मलयति। यवलपरे यवला वेति वक्तव्यम् (वा. ८५०२)**

---

(129)पदच्छेदः- हे, मपरे, वा त्रिपदमिदं सूत्रम्।

समासः- मः परो यस्मादसौ मपरः (बहुव्रीहि समासः) तस्मिन् मपरे ।

अनुवृत्तिः- मः (षष्ठी), मः (प्रथमा)

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- मपरके हकारे (ह्म) परे सति मस्य (म्) स्थाने विकल्पेन म (म्) एव भवति ।

विशेषार्थः- मोऽनुस्वारः इत्यतो म इति षष्ठ्यन्तमनुवर्तते। मो राजीत्यतः म इति प्रथमान्तमनुवर्तते। मः परो यस्मादिति विग्रहः। यवलपरे यवला... (वा.४९०२) यकारपरको हकारः (ह्य) वकारपरको हकारः (ह्व) एवं लकारपरको हकारः (ह्ल) परे स्यात् तदा म् स्थाने य् व् ल् आदेशा विकल्पेन भवति। यश्च वश्च लश्च इति यवलाः (इतरेतरयोगद्वन्द्व समासः) यवलाः परो यस्मादसाविति यवलपरः (बहुव्रीहिसमासः) तस्मिन् यवलपरे। मोऽनुस्वारः सूत्रस्य वैकल्पिकः अपवादः।

साधनिका:-

(1) किम् ह्मलयति, किं ह्मलयति।

किम् + ह्मलयति इति स्थिते **अलोऽन्त्यस्य** परिभाषासूत्रसहकारेण **मोऽनुस्वारः** इत्यनेन सूत्रेण अनुस्वारे प्राप्ते तं प्रबाध्य **हे मपरे वा** इत्यनेन सूत्रेण मपरके हकारे परे (ह्म - ह् + म) किम् इत्यस्य म्स्थाने विकल्पेन म् किम् + ह्मलयति

वर्णसम्मेलने किम् ह्मलयति इति रुपं सिद्धम्। मस्य म अभावे किं ह्मलयति इति अनुस्वारः।

**( 128 ) यथासंख्यमनुदेशः समानाम् 1। 3 । 10।**

**समसम्बन्धी विधिर्यथासंख्यं स्यात्। कियँ् हयः, किं हयः। किवँ् ह्वलयति, किं ह्वलयति। किलँ् ह्लादयति किं ह्लादयति।**

(128) पदच्छेदः- यथासंख्यम् अनुदेशः, समानाम्।

समासः- सङ्ख्याम् अनतिक्रम्य यथासङ्ख्यम्।

सुत्रप्रकारः- परिभाषासूत्रम्।

सरलार्थः- स्थान्यादेशयोः तुल्यतायां क्रमिकादेशाः भवन्ति।

विशेषार्थः- यत्र स्थानिनां तथा आदेशानां संख्या समाना भवति तत्र आदेशः क्रमेण भवति। समानसंख्यायुक्तानि उद्देश्यानि एवं विधेयाः (अनुदेशाः) स्युः तदा उद्दश्येन सह विधेयः क्रमशः (यथासंख्यम्) संबध्यते अस्याः परिभाषायाः 'यवलपरे....(वा...8902) वार्तिके प्रतिपादितस्य क्रमः यथाभवति म् + ह्यः- यँ्, ह्या, म् + ह्व, म् - वँ्, ह्व, म् + ह्ला - लँ् ह्ला इत्थं क्रमानुसारम् आदेशाः भवन्ति ।

साधनिकाः-

(1) कियँ् हयः किं ह्यः।

किम् + ह्यः इत्यवस्थायाम् **'अलोऽन्त्यस्य'** परिभाषासूत्रसहकारेण 'मोऽनुस्वारः' इत्यनेन अनुस्वारे प्राप्ते तं प्रबाध्य **'यथासंख्समानाम्'** इति परिभाषासूत्रसहकारेण यवलपरे यवला वा (वा.4902) इत्यनेन म्स्थाने अनुनासिक यँ् आदेशे कियँ् ह्यः इति रुपं सिद्धम्। विकल्पेन अनुस्वारे किं ह्यः इति रूपं सिद्धम्।

(2) किवँ् ह्वलयति, किं हवलयति ।

'किम् + ह्वलयति' इत्यवस्थायाम् **'अलोऽन्त्यस्य'** परिभाषासूत्र-सहकारेण **'मोऽनुस्वारः'** इत्यनेन अनुस्वारे प्राप्ते तं प्रबाध्य **यथासंख्यमनुदेशः समानाम्** इति परिभाषासूत्रसहकारेण यवलपरे यवला वा (वा.4902) इत्यनेन म् स्थाने अनुनासिक वँ् आदेशे किवँ् ह्लवयति इति रुपं सिद्धम्। विकल्पेन अनुस्वारे किं **ह्वलयति** इति रूपं सिद्धम्।

**(129) नपरे नः 8। 3 । 27॥**

**नपरे हकारे परे मस्य नः स्याद्वा। किन् हनुते किं हनुते।**

(129)पदच्छेदः- नपरे, नः द्विपदमिदं सूत्रम्।

समासः- नः परो यस्माद इति नपरः (बहुब्रीहि समासः) तस्मिन् नपरे।

अनुवृत्तिः- हे, वा, मः।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- नपरके हकारे (ह्नु) परे सति म् स्थाने विकल्पेन न् आदेशः भवति।

साधनिकाः-

(1) किन् ह्नुते किं ह्नुते ।

किम् + ह्नुते इत्यवस्थायां **अलोऽन्त्यस्य** इति परिभाषासूत्रसहकारेण **मोऽनुस्वारः** इत्यनेन अनुस्वारे प्राप्ते तं प्रबाध्य **नपरे नः** इति सूत्रेण नपरके हकारे परे (ह्नु) किम् इत्यस्य मस्थाने विकल्पेन न् किन् + ह्नुते वर्णसम्मेलने 'किन् ह्नुते' इति रूपं सिद्धम्। पक्षे मकारस्य अनुस्वारे किं ह्नुते इति।

**(130) ङणोः कुक्टुक्शरि ।8 ।3 ।28॥**

**ङकारणकारयोः कुक्टुकावागमौ वा स्तः शरि। कुक्टुको-रसिद्धत्वाज्जश्त्वं न। चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् ( वा. ५०२३ )। प्राङ्ख् षष्ठः, प्राङ्क्षष्ठः, प्राङ् षष्ठः। सुग्ण् ठ्षष्ठः, सुगणट् षष्ठः, सुगण् षष्ठः।**

(130)पदच्छेदः- ङणोः, कुक्टुक्, शरि त्रिपदमिदं सूत्रम्।

समासः- ड् च ण् च ङणौ, तयोः ङणोः कुक् च टुक् च तयोः समहारद्वन्द्वः।

अनुवृत्तिः- वा।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- ङकारणकारयोः परे शर्प्रत्याहारस्थाः वर्णाः स्युः तदा क्रमेण कुक्टुकौ आगमौ विकल्पेन स्याताम्।

विशेषार्थः- एतच्च आद्यन्तौ टकिताविति लभ्यम्। यथासङ्ख्यपरिभाषया ङकारस्य कुक्, णाकारस्य टुक्। उभयत्र ककार इत्, उकार उच्चारणार्थः, यदि उकारः, इत्संज्ञकः मन्यते तदा उपदेशे इत्यनेन इत्स्यात्। ङ एवं ण् वर्णयोः परे श् ष् स् वर्णाः स्युः चेत् क्रमेण ड् ण् इति द्वयोः अन्ते विकल्पेन क्, ट् वर्णौ स्तः। चयो (वा.5013) पौष्करसादेराचार्यमतानुसारं चय्वर्णानां स्थाने द्वितीयवर्णाः भवन्ति। यथा- प्राङ्क् षष्ठः इत्यत्र ककारस्य खकारः द्वितीयाक्षरो जातः।

साधनिका:- प्राङ्ख् षष्ठः, प्राङ्क्षष्ठः, प्राङ् षष्ठः।

'प्राङ् + षष्ठः' इत्यवस्थायां '**ङ्णोः कुक्टुक् शरि**' इति सूत्रेण कुक् आगमे '**आद्यन्तौ टकितौ**' इति परिभाषया अन्त्यावयवत्वेन उपस्थितिः हलन्त्यम् तस्यलोपः इति क्-लोपे उकार उच्चारणार्थः 'प्राङ्क् + षष्ठः' इति जाते **चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्** इत्यनेन वार्तिकेन क् स्थाने विकल्पेन ख् 'प्राङ्ख् + षष्ठः' वर्णसम्मेलने 'प्राङ्ख् षष्ठः' इति रूपं सिद्धम्।

चयो द्वितीयाः.... इति वार्तिकविकल्पाभावे प्राङ्क्षष्ठः इति। एवं ङ्णो....... विकल्पेन कुक्टुगागमाभावे प्राङ् षष्ठः इति।

**(131) डः सि धुट् 8 ।3 ।29॥**

**डात्परस्य सस्य धुड्वा स्यात्। षट्त्सन्तः, षट् सन्तः।**

(131) पदच्छेदः- डः, सि, धुट् त्रिपदमिदं सूत्रम्।

अनुवृत्तिः- वा

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- डात् परस्य सस्य धुडागमो भवति।

विशेषार्थः- धुट् मध्ये टकारोकारयोः इत्संज्ञत्वात् केवलं ध् एव अवशिष्टः अस्ति। डात्पस्येत्यादिना तस्मिन्निति निर्दिष्टे इति नेह भवति, उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् परत्वादिति न्यायात्।

साधनिका:-

(1) षट्त्सन्तः षट् सन्तः।

षट् + सन्तः इत्यवस्थायां **झलां जशोऽन्ते** इत्यनेन जश्त्वे षड् + सन्तः इति स्थिते **डः सि धुट्** इत्यनेन सूत्रेण धुडागमे आद्यवयवत्वेन आगमे हलन्त्यम् एवं तस्यलोपः इत्यनेन ट् लोपे उपदेशेऽजनुनासिक इत् एवं तस्य लोपः इत्यनेन उलोपे 'षड् + ध् + सन्तः' इति स्थिते **खरि च** इत्यनेन चर्त्वे 'षड् + त् + सन्तः' इति स्थिते पुनः त् इति खर् परे ज्ञात्वा **खरि च** इत्यनेन चर्त्वे षट् + त् + सन्तः वर्णसम्मेलने षट्त्सन्तः इति रुपं सिद्धम्। धुडागमाभावे षट् सन्तः इति।

**(132) नश्च 8।3।30 ॥**

**नकारान्तात्परस्य सस्य धुड् वा स्यात्। सन्त्सः, सन्सः।**

(132)पदच्छेदः- नः, च द्विपदमिदं सूत्रम्।

अनुवृत्तिः- सि, धुट्, वा

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- नकारात्परस्य सस्य धुड् आगमः विकल्पेन भवति।

विशेषार्थः- धुट् आगमः अर्थात् ध् न् पश्चाद्वर्तिनः सस्य अवयवः विकल्पेन भवति। अर्थात् ध् सकारस्य आदौ भवति। तस्मादिन्युत्तरस्येति परिभाषया सीति षष्ठी सम्पद्यते। नश्च इति सन्धिविच्छेद नस् + च इत्यत्र '**स्तोः श्चुना श्चुः**' स् - श् इति ।

साधनिकाः-

(1) सन्तसः सन्सः।

सन् + सः इति स्थिते 'नश्च' इत्यनेन धुडागमे हलन्त्यम् इति सूत्रेण टः इत्संज्ञायां तस्यलोप इत्यनेन टः लोपे 'उपदेशेऽजनुनासिक इत्' इत्यनेन उकारस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन उलोपे **इत्यनयोः** आद्यन्तवयवत्वेन सन् + ध् + सः 'इति स्थिते **खरि च** इत्यनेन चर्त्वे, सन् + त् + सः' वर्णसम्मेलने सन्त्सः इति रूपं सिद्धम्। विकल्पेन सन्सः इति।

**(133) शि तुक् 8।3।31॥**

**पदान्तस्य नस्य शे परे तुग्वा स्यात्। शश्छोऽटि ( सू. 120 ) इति छत्वविकल्पः। पक्षे झरो झरि ( सू.71 ) इति चलोपः। सञ्छम्भुः, सञ्च्छम्भुः, सञ्च्शम्भुः सञ्शम्भुः।**

**यछौ यचछा ञचशा ञशाविति रूपचतुष्टयम्।**
**रुपाणामिह तुक्छत्वचलोपानां विकल्पनात् ॥**

(133) पदच्छेदः- शि तुक् द्विपदमिदं सूत्रम्।

अनुवृत्तिः- नः, वा, पदस्य।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- शकारे परे पदान्तस्य नस्य तुग् आगमः विकल्पेन भवति।

विशेषार्थः- 'शश्छोऽटि' सूत्रेण श् स्थाने छकारः विकल्पेन भवति। पक्षे 'झरो झरि' इति सूत्रेण च (चकारस्य) लोपः भवति सन् शम्भुः इत्यत्र, तुक्, छत्वं एव चलोपः, एतेषां विकल्पेन प्रत्येक-कार्याणि भवन्ति। अतः सञ्छम्भुः, सञ्च्छम्भु, सञ्च्शम्भुः सञ्शम्भुः इति चत्वारि रुपाणि जायन्ते। तदिदं रूपचतुष्टयमुक्तक्रमं श्लोकेन संगृहणाति ञ्छ् ञ्च्छ्, ञ्च्श् एवं ञ्, श् वर्णयुक्तानि चत्वारि रूपाणि तुक, छत्वं एवं चलोपः इत्यादीनां विकल्पनाद् भवन्ति।

साधनिकाः-

(1) सञ्छम्भुः, सञ्च्छम्भु, सञ्च्शम्भुः, सञ्शम्भुः।

सन् + शम्भुः इत्यवस्थायां शि तुक् इत्यनेन सूत्रेण विकल्पेन तुगागमे हलन्त्यम् इति सूत्रेण कः इत्संज्ञायाम् '**उपदेशेऽजनुनासिक** इत् ' इत्यनेन उ इत्यस्य इत्संज्ञायां तस्यलोपः इत्यनेन क् एवं उ इत्यनयोः लोपे अन्त्यावयवत्वेन सन् + त् + शम्भुः इति स्थिते 'यथासंख्यमनुदेशः समानाम्' 'परिभाषासहकारेण '**स्तोः श्चुना श्चुः**' इत्यनेन त् स्थाने च् सन् + च् + शम्भुः इति स्थिते पुनः '**स्तोः श्चुना श्चुः**' इत्यनेन न् स्थाने ञ् सञ् + च् + शम्भुः इत्यवस्थायां शश्छोऽटि

इति सूत्रेण श् स्थाने विकल्पेन छ सञ् + च + छम्भुः इति रुपं सिद्धम्। चलोपाभावे सञ्च्छम्भुः छत्वाभावे सञ्च्शम्भुः तुकागमाभावे सञ्शम्भुः इति॥

**(134) ङमो ह्रस्वादचि ङमुण्नित्यम् 8 । 3 । 32॥**

**ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो नित्यं ङमुडागमः स्यात्। प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युतः।**

(134) पदच्छेदः- ङमः, ह्रस्वाद्, अचि, ङमुण्, नित्यम्।

अनुवृत्तिः- पदस्य।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- ह्रस्वात्परस्य ङम् (ङ्, ण्, न्) प्रत्याहारस्य ङमुड् आगमः स्यात् अचि परे।

विशेषार्थः- ह्रस्वात्परे इत्यादिना ङमुडागम इति। टकारः इत्, उकार उच्चारणार्थः संज्ञायां कृतं टित्वमानर्थक्यात्तदङ्गत्वात् संज्ञिभिः सम्बन्ध्यते। ततश्च, ङुट्, णुट्, नुट् इति त्रय आगमाः फलिताः। ह्रस्वादचि अत्र ह्रस्वात् अचि इत्यवस्थायां **'झलां जशोऽन्ते'** इत्यनेन द् **'ह्रस्वादचि'** इति ङमुण्नित्यम् अत्र ङमुट् + नित्यम् इत्यवस्थायां **'झलां जशोऽन्ते'** द - ड 'यरोऽनुनासिके...' इति-ड् स्थाने ण् ङमुण्नित्यम् इति।

साधनिकाः-

(1) प्रत्यङ्ङात्मा।

'प्रत्यङ् + आत्मा' इत्यवस्थायां **'ङमो ह्रस्वादचि ङमुण्नित्यम्'** इत्यनेन ङ् परे ङुट् आगमे **'हलन्त्यम्'** इत्यनेन टकारस्य इत्संज्ञायां **'उपदेशेऽजनुनासिक'** इत् इत्यनेन उकारस्य इत्संज्ञायां तस्यलोपः इत्यनेन ट एवं उ इत्यनयोः लोपे प्रत्यङ् + ङ् + आत्मा वर्णसम्मेलने प्रत्यङ्ङात्मा इति रूपम् सिद्धम्। तदनुसारमेव सुगण्णीशः सुगण् + ईशः णुट आगमे, सन्नच्युतः सन् + सन्नच्युतः सन् + अच्युतः नुट् आगमे इति।

**स्वाध्यायः**

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

(1) **मोऽनुस्वारः सूत्रस्य उदाहरणं लिखत।**

(क) हरिं वन्दे (ख) उत्थानम् (ग) तल्लयः (घ) एतन्मुरारि

(2) **यशांसि इति रूपं कस्य सूत्रस्य अस्ति ?**

(क) मोऽनुस्वारः (ख) शि तुक् (ग) नश्चापदान्तस्य झलि (घ) तोर्लि

(3) **हे मपरे वा इति सूत्रस्य सूत्रप्रकारं लिखत।**

(क) परिभाषासूत्रम् (ख) विधिसूत्रम् (ग) अधिकारसूत्रम् (घ) संज्ञासूत्रम्

(4) **यथासंख्यम् इत्यत्र कः समासः ?**

(क) द्वन्द्वः (ख) तत्पुरुषः (ग) अव्ययीभावः (घ) बहुव्रीहिः

(5) **शि तुक् सूत्रे कति पदानि सन्ति ?**

(क) 2 (ख) 4 (ग) 3 (घ) 9

(6) **परसवर्णः इत्यत्र कः समासः ?**

(क) द्वन्द्वः (ख) अव्ययीभावः (ग) तत्पुरुषः (घ) बहुव्रीहिः

**(7) यवलपरे यवला वेति वक्तव्यम् इति वार्तिकं कस्मिन् सूत्रेऽस्ति ?**

(क) हे मपरे वा (ख) वा पदान्तस्य (ग) नपरे नः (घ) तोर्लि

**(8) ङणो कुक्टुकशरि सूत्रेऽस्मिन् कति पदानि सन्ति ?**

(क) 2 (ख) 4 (ग) 3 (घ) 5

**(9) नः परो यस्माद् इति नपरः अत्र कः समासः ?**

(क) अव्ययीभावः (ख) बहुव्रीहिः (ग) तत्पुरुषः (घ) द्वन्द्वः

**(10) डः सि धुट् सूत्रे कस्य अनुवृत्तिः अस्ति ?**

(क) मः (ख) वा (ग) धुट् (घ) सि

**2. एकैकवाक्येन उत्तरं लिखत ।**

(1) **मोऽनुस्वारः** सूत्रेण किं भवति ?

(2) **मोऽनुस्वारः** सूत्रस्य पदच्छेदं लिखन्तु।

(3) पदस्य अन्तः पदान्तः अत्र कः समासः ?

(4) **वा पदान्तस्य** सूत्रप्रकारं लिखन्तु।

(5) मो राजि समः श्वौ सूत्रे कस्य अनुवृत्ति?

(6) हे मपरे वा सूत्रेण मस्य किं भवति ?

(7) डः सि धुट, सूत्रेण कः आगमः भवति ?

**3. सविस्तरम् उत्तरं लिखत।**

(1) **नपरे नः** सूत्रस्य सरलार्थं पदच्छेदं एवं सूत्रप्रकारं लिखन्तु।

(2) **नश्च** सूत्रस्य सरलार्थं, पदच्छेदं एवं सूत्रप्रकारं लिखन्तु।

(3) **मोऽनुस्वारः** सूत्रस्य सरलार्थं, पदच्छेदं एवं सूत्रप्रकारं लिखन्तु।

**4. निम्नलिखितानि रुपाणि साधयत।**

(1) हरिं वन्दे (2) यशांसि

(3) अङ्कितः (4) सम्राट्

(5) किम् ह्मलयति (6) किन् ह्नुते

(7) षट्त्सन्तः (8) सन्त्सः

(9) सञ्छम्भुः (10) प्रत्यङ्ङात्मा

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायमताम्।**

(1) अनुस्वारस्य ययि परसवर्णः।

(2) हे मपरे वा।

(3) ङणोः कुक्टुक शरि ।

**6. अविभागं योग्योत्तरेण बविभागेन सह योजयत।**

| अ विभाग | ब विभाग |
|---|---|
| (1) यशांसि | (1) मोऽनुस्वारः |
| (2) सम्राट् | (2) अनुस्वारस्य ययि परसवर्णः |
| (3) हरिं वन्दे | (3) नपरे नः |
| (4) किन् हनुते | (4) मो राजि समः क्वौ |
| (5) अङ्कितः | (5) नश्चापदान्तस्य झलि |

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं, पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखत।

◆

# 9 हल्सन्धिप्रकरणम् - 3

**प्रस्तावना**

**भट्टोजिदीक्षितविरचित वैयाकरणसिद्धान्तकौमुद्यां समः सुटि ( सू.१३५ ) सूत्रादारभ्य पदान्ताद्वा ( सू.१८९ ) पर्यन्तं हल्सन्धिप्रकरणम् ३ वर्तते। प्रकरणेऽस्मिन् सम् इत्यस्य मकारस्य स्थाने रुः, अनुनासिकः, अनुस्वारागमः, विसर्गस्य सकारः तुकागमः इत्यादीनि कार्याणि भवन्ति।**

---

**(135) समः सुटि 8।3।5॥**

**समो रुः स्यात् सुटि। अलोऽन्त्यस्य ( सू. 42 )**

---

(135) पदच्छेदः- समः, सुटि द्विपदमिदं सूत्रम्।

अनुवृत्तिः- रुः

सूत्रप्रकारः- विधिसूत्रम्

सरलार्थः- समः रूकारादेशः स्यात् सुटि परे । अलोऽन्त्यस्य परिभाषया अन्तिममकारस्य स्थाने भवति।

---

**(136) अत्रानुनासिकः पूर्वस्य तु वा 8।3।2॥**

**अत्र रूप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात्।**

---

(136) पदच्छेदः - अत्र अनुनासिकः, पूर्वस्य, तु वा।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- अत्र रुप्रकरणे रोः पूर्ववर्णस्य अनुनासिकः विकल्पेन भवति।

विशेषार्थः- सूत्रेऽस्मिन् निर्दिष्टं प्रकरणं (रु प्रकरणं) मतुवसो रु सम्बुद्धौ प्रसङ्ग स्थितस्य रोः ग्रहणं कृतम् अस्ति। न तु ससजुषो रुः इत्यस्य प्रसङ्गस्य रु प्रकरणम्। रुप्रकरणे अधोनिर्दिष्टानि सूत्राणि सन्ति। (1) मतुवसो रु संबुद्धो छन्दसि (8।3।1) (2) अत्रानुनासिकः पूर्वस्य तु वा (8।3।2) (3) आतोऽटि नित्यम् (8।3।3) (4) अनुनासिकात् परोऽनुस्वारः (8।3।4) (5) समः सुटि (8।3।5)) (6) पुमः खरयम्परे (8।3।6) (7) नश्छव्यप्रशान् (8।3।7) (8) उभयथर्क्षु (8।3।8) (9) दीर्घादटि समानपदे (8।3।7) (10) नृन्पे (8।3।10) (11) स्वतवान् पायौ (8।3।11) (12) कानाम्रेडिते (8।3।12)

---

**(137)अनुनासिकात्परोऽनुस्वारः 8।3।8॥**

**अनुनासिकं विहाय रोः पूर्वस्मात् परोऽनुस्वारागमः स्यात्। खरवसानयोर्विसर्जनीयः ( सू.76 )**

---

(137) पदच्छेदः - अनुनासिकात्, परः, अनुस्वारः त्रिपदमिदं सूत्रम्।

अनुवृत्तिः- रुः, पूर्वस्य।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- अनुनासिकं विहाय रोः पूर्ववर्णस्य अनुस्वारागमः भवति।

---

**(138) विसर्जनीयस्य सः 8।3।34॥**

**खरि विसर्जनीयस्य सः स्यात्। एतदपवादेन वा शरि ( सू.151 ) इति पाक्षिके विसर्गे प्राप्ते, संपुकानां सो वक्तव्यः ( वा.4812 ) सँस्स्कर्ता - संस्स्कर्ता। समो वा लोपमेके इति भाष्यम्। लोपस्यापि रुप्रकरणस्थत्वादनुस्वारानुनासिकाभ्यामेकसकारं**

**रुपद्वयम्। द्विसकारं तूक्तमेव। तत्र अनचि च (सू.48) इति सकारस्य द्वित्वपक्षे त्रिसकारमपि रूपद्वयम्, अनुस्वारविसर्गजिह्वामूलीयोपध्मानीमकारोपरि शर्षु च पाठस्योपसंख्यातत्वेनानुस्वारस्याप्यच्त्वात्। अनुनासिकवतां त्रयाणां शरः खयः (वा.5019) इति कद्वित्वे षट्। अनुस्वारवतामनुस्वारस्यापि द्वित्वे द्वादश। एषामष्टादशानां तकारस्य द्वित्वे वचनान्तरेण पुनर्द्वित्वे चैकतं द्वितं त्रितमिति चतुष्पञ्चाशत्। अणोऽनुनासिकत्वेऽष्टोत्तरं शतम्।**

(138)पदच्छेदः - विसर्जनीयस्य सः द्विपदमिदं सूत्रम्।

अनुवृत्तिः - खरि।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः- खर् प्रत्याहारस्थवर्णाः परे स्युः तदा विसर्गस्य स्थाने स् आदेशः भवति।

विशेषार्थः- अस्य अपवादस्वरुपेण 'वा शरि' सूत्रेण विकल्पेन विसर्गस्य प्राप्तिः भवति। 'संपुंकानां सो वक्तव्यः' (वा.4892) सम्, पुम् एवं कान् शब्दानां विसर्गस्य स्थाने स् भवति। संस्सकर्ता सँस्स्कर्ता। केषाञ्चन् आचार्याणां मतानुसारं सम् शब्दे मकारस्य लोपो भवति इति भाष्ये लिखितमस्ति। अनुस्वारपक्षे एकद्वित्रिसकाराणां रुपाणामनुस्वारस्य शर्षु पाठस्योपसंख्याततत्वेन शर्त्वाद् द्वित्वविकल्पे सति द्वयनुस्वाराणि त्रीणि (3) एकानुस्वाराणि त्रीणि (3) इति षट् (6)। अय षण्णामप्येषां यरः खय इति ककारस्य द्वित्वविकल्पेन सति द्विककाराणि षट् (6) एकककाराणि षट् (6) इत्यनुस्वारपक्षे द्वादश (12) इत्यर्थः। एवं च अनुनासिकपक्षे षट् (6) अनुस्वारपक्षे (12) इति अष्टादश (18) रूपाणि। एषामिति उक्तानाम् अष्टादशानां रूपाणां तकारस्य अचोरहाभ्यामिति द्वित्वविकल्पे सति प्रथमस्य तकारस्य यणोमय इति पुनर्द्वित्वे एकैकस्य द्वितं त्रितमिति सङ्कलनया एकतान्यष्टादशः (18) द्वितान्यष्टादशः (18) त्रितान्यष्टादशः इति सङ्कलनया चतुरधिकपञ्चाशद्रूपाणि (54) सम्पन्नानीत्यर्थः। अणोऽनुनासिकत्व इति। अणोऽप्रगृहयस्यानुनासिकः इति तकारादाकारस्य अनुनासिकत्वविकल्पे सति आनुनासिक्ये चतुष्पञ्चाशत् (54) तदभावे चतुष्पञ्चाशत् (54) इति सङ्कलनया अष्टाधिकं शतं (108) रूपाणि सम्पन्नानीत्थर्थः।

साधनिकाः-

(1) सँस्स्कर्ता, संस्स्कर्ता।

सम् + कर्ता इति स्थिते 'सम्परिभ्यां करोतौ भूषणे' इत्यनेन सुडागमे सम् + सुड् + कर्ता इत्यवस्थायां ड् एवं उ इत्यनयोः लोपे 'सम्+स्कर्ता' इति स्थिते 'समः सुटि' इत्यनेन समः म् स्थाने रु 'सरु+स्कर्ता' इत्यवस्थायाम् 'उपदेशेऽजनुनासिक इत्' इत्यनेन उ इत्संज्ञायां 'तस्य लोपः' इत्यनेन उ लोपे 'सर्+स्कर्ता' इति स्थिते अत्रानुनासिकः पूर्वस्य तु वा 'इत्यनेन अनुनासिके' 'सँर्+स्कर्ता' इत्यवस्थायां 'खररवसानयोर्विसर्जनीयः' इत्यनेन रेकस्थाने विसर्गे सँः+स्कर्ता इति स्थिते विसर्जनीयक्य सः इत्यनेन विसर्गस्थाने स् प्राप्ते वा शरि इत्यनेन विसर्ग स्थाने विसर्गे प्राप्ते तं प्रबाध्य 'सम्पुड्कानां सो वक्तव्यः' इति वार्तिकेन विसर्गस्थाने स् सँस्स्कर्ता इति रूपं सिद्धम्। अनुनासिकाभावे 'अनुनासिकात्परोऽ नुस्वारः' इत्यनेन अनुस्वारे संस्स्कर्ता इति।

**(139) पुमः खय्यम्परे 8। 3। 6॥**

**अम्परे खयि पुम्शब्दस्य रुः स्यात्। व्युत्पत्तिपक्षे अप्रत्यस्य (सू. 155) इति षत्वपर्युदासात् क पयोः प्राप्तौ अव्युत्पत्तिपक्षे तु षत्व प्राप्तौ संयुकानां (वा. 4892) इति सः। पुँस्कोकिलः - पुंस्कोकिलः। पुँस्पुत्रः पुंस्पुत्रः। अम्परे किम् ? पुंक्षीरम्। खयि किम् ? पुंदासः ख्यामादेशे न (वा. 1519)। पुंख्यानम्।**

(139) पदच्छेदः- पुमः, खयि, अम्परे त्रिपदमिदं सूत्रम्।

समासः- अम्परो यस्मात् सः अम्परः तस्मिन् अम्परे (बहुव्रीहिः)।

अनुवृत्तिः- रुः।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- पुम्-शब्दस्य स्थाने रु आदेशः भवति अम्परके खयि परे सति।

विशेषार्थः- अलोऽन्त्यस्य इत्यनेन पुम् इति म् स्थाने एव रु भवति। अर्थात् पुम् शब्दानन्तरं खय् वर्णाः स्युः तदा तस्य अन्तिमवर्ण (अलोऽन्त्यस्य) म् स्थाने र् आदेशः भवति। किन्तु अपेक्षितं वर्तते यत् खय् प्रत्याहारानन्तरं अम् प्रत्याहारस्य वर्णाः स्युः। व्युत्पतिपक्षे अप्रत्ययस्य (सू.155) सूत्रानुसारं षत्वस्य पर्युदासत्वात् जिह्वामूलीयउपध्मानीयौ (क 5) प्राप्तौ भविष्यतः। अव्युत्पत्तिपक्षे तु षत्वप्राप्तौ सम्पुंङ्कानाम् इति सः। एतद्दृष्टया संपुकानाम् इत्यनेन वार्तिकेन स भवति। 'ख्या'आदेशो न (वा.1519) भाष्ये चक्षिङ् ख्याम् इति पठित्वा पूर्वत्रासिद्धमित्यकाण्डे रषाभ्यामिति णत्व विध्यनन्तरं 'ख्शाम्शस्य यो वा' इति पठितमिति वक्ष्यते । एवं च यत्वस्यासिद्धतया खकारस्य अम्यरकत्वाभावात् पुमः खयि... इति रुत्वं नेत्यर्थः।

साधनिकाः-

(1) पुँस्कोकिलः पुंस्कोकिलः।

पुमान् चासौ कोकिलः इति कर्मधारयसमासे 'पुम् + कोकिलः' इत्यवस्थायां 'पुमः खप्यम्परे' इत्यनेन म् स्थाने क आदेश 'पुरु + कोकिलः' इति स्थिते 'उपदेशेऽजनुनासिक इत्' इत्यनेन उकारस्य इत्संज्ञायां तस्यलोपः इत्यनेन उकारस्य लोपे 'पुर् + कोकिलः' इति स्थिते अत्रानुनासिकः पूर्वस्य तु वा इत्यनेन अनुनासिके पुँर् + कोकिलः इति स्थितिः 'खरवसानयोर्विसर्जनीयः' इत्यनेन र् स्थाने विसर्गे पुँः + कोकिलः इति स्थिते विसर्जनीयस्य सः इत्यनेन स् प्राप्ते कुप्वो क पौ च इत्यनेन जिह्वामूलीये प्राप्ते तं प्रबाध्य सम्पुङ्कानां सो वक्तव्यः इत्यनेन स् पुँस् + कोकिलः वर्णसम्मेलने पुँस्कोकिलः इति रुपम् सिद्धम्। अनुनासिकाभावे अनुनासिकात्परो (सू. 137) अनुस्वारे पुंस्कोकिलः इति रुपं सिद्धम्।

(2) पुंख्यानम्।

पुंसः ख्यानम् इति विग्रहे षष्ठीतत्पुरुषसमासे 'पुम् + ख्यानम्' इत्यवस्थायां 'पुमः खय्यम्परे' इत्यनेन रुत्वे प्राप्ते ख्याञादेशो न इत्यनेन वार्तिकेन निषेधे 'मोऽनुस्वारः' इत्यनेन अनुस्वारे पुंख्यानम् इति रूपं सिद्धम्।

---

**(140) नश्छव्यप्रशान् । 8 । 3 । 7 ॥**

**अम्परे छवि नकारान्तस्य पदस्य रुः स्यात्, न तु प्रशान् शब्दस्य विसर्गः। सत्वम्। श्चुत्वम्। शार्ङ्गिंश्छिन्धि, शार्ङ्गिंश्छिन्धि। चक्रिंस्त्रायस्व, चक्रिंस्त्रायस्व। पदस्य किम् ? हन्ति। अम्परे किम् ? सन्त्सरुः। त्सरुः खड्गमुष्टिः। अप्रशान् किम् ? प्रशान्तनोति।**

---

(140) पदच्छेदः - नः, छवि, अप्रशान् त्रिपदमिदं सूत्रम्।

समासः- न प्रशान् इति अप्रशान् (नञ्तत्पुरुषः समासः)

अनुवृत्तिः- अम्परे, रुः, पदस्य

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः- अम्परके छवि (छ, ठ्, थ, च्, द्, त्) परे नकारान्तस्य पदस्य स्थाने रु आदेशः भवति। किन्तु प्रशान् शब्दस्य न् स्थाने रुत्वं न भवति।

साधनिकाः-

(1) शार्ङ्गिँश्छिन्धि, शार्ङ्गिँश्छिन्धि।

शार्ङ्गिंन् + छिन्धि इत्यवस्थायां नश्छव्यप्रशान् इत्यनेन न स्थाने रु शार्ङ्गिंरु + छिन्धि इति स्थिते उलोपे शार्ङ्गिँर् + छिन्धि इत्यवस्थायाम् अत्रानुनासिकः पूर्वस्य तु वा इत्यनेन विकल्पेन अनुनासिके 'शार्ङ्गिंर्+छिन्धि' इत्यवस्थायां 'खरवसानयोर्विसर्जनीयः' इत्यनेन विसर्गे शार्ङ्गिंः + छिन्धि इति स्थिते 'विसर्जनीयस्य सः' इत्यनेन विसर्गस्य स्थाने स् 'शार्ङ्गिँस्+छिन्धि' इति स्थिते 'स्तोः श्चुना श्चुः' इत्यनेन स् शार्ङ्गिंश्छिन्धि इति रूपं सिद्धम्। अनुनासिकाभावे शार्ङ्गिंश्छिन्धि।

(2) चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व।

'चक्रिन् + त्रायस्व' इत्यवस्थायां 'नश्छव्यप्रशान्' इत्यनेन न् स्थाने रु उ अनुबन्धलोपे 'चक्रिर् + त्रायस्व' इत्यवस्थायाम् 'अत्रानुनासिकः पूर्वस्य तु वा' इत्यनेन विकल्पेन अनुनासिके चर्क्रिँर् + त्रायस्व इत्यवस्थायां 'खरवसानयोर्विसर्जनीयः' इत्यनेन विसर्गे 'चक्रिँः+त्रायस्व' इति स्थिते विसर्जनीयस्य सः इत्यनेन विसर्गस्य स्थाने स् 'चक्रिँस् + त्रायस्व' इति संयोगे चर्क्रिंस्त्रायस्व इति। अनुनासिकाभावे चक्रिंस्त्रायस्व इति ।

---

1 अत्र जिह्वामूलीय, (0) उपध्मानीयः प क

---

**(141) नृन्पे 8 । 3 । 10 ॥**

**नृन् इत्यस्य रुः स्याद्वा पकारे परे।**

---

(142) पदच्छेदः- नृन्, पे द्विपदमिदं सूत्रम्

अनुवृत्तिः- रुः उभयया (वा)

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- नृन् रूपस्य पदान्ते नस्य विकल्पेन रु आदेशः भवति पकारः परे स्यात् तदा। नृन् पाहीति स्थिते नस्य रुत्वम्।

---

**(142) कुप्वोः ≍क पौ ≍च 8 । 3 । 37॥**

**कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तः। चाद्विसर्गः। येन नाप्राप्तिन्यायेन विसर्जनीयस्य सः ( सू.138 ) इत्यस्यापवादोऽयम्। न तु शर्परे विसर्जनीयः ( सू. 150 ) इत्यस्य। तेन, वासः क्षौमम् इत्यादौ विसर्ग एव। नॄँ पाहि, नॄं पाहि, नॄँ पाहि, नॄंः पाहि, नृन्पाहि।**

---

(142) पदच्छेदः- कुप्वोः, क पौ, च त्रिपदमिदं सूत्रम्।

समासः- कुश्च पुश्च कुपू, तयोः कुप्वोः (इतरेतरयोगद्वन्द्वः)

कश्च पश्च क पौ (इतरेतरयोगद्वन्द्वः)

अनुवृत्तिः- विसर्जनीयस्य।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- कवर्गे (क्, ख्, ग्, घ्, ङ्) पवर्गे (प्, क्, ब्, भ्, म्) च परे विसर्गस्य स्थाने क्रमेण जिह्वामूलीयः एवं उपध्यामानीयः भवति, चकारात् विसर्गोऽपि भवति।

साधानिका: -

(1) नॄँ पाहि, नॄं पाहि, नॄँः पाहि, नॄंः पाहि।

नृन् + पाहि इति स्थिते नृन्पे इति सूत्रेण न् स्थाने रु नृरु + पाहि इत्यवस्थायाम् उलोपे नृर् + पाहि इति स्थिते आत्रानुनासिकः पूर्वस्य तु वा इत्यनेन अनुनासिके नृर् + पाहि इति स्थिते खरवसानयार्दिसर्जनीयः इत्यनेन र् स्थाने विसर्गे नॄः + पाहि इत्यवस्थायां कुप्वोः क पौ च इत्यनेन सूत्रेण विसर्गस्य स्थाने उपध्मानीये नॄँ पाहि इति रुपं सिद्धम्। अनुनासिकाभावे अनुनासिकात् ...... (सू. 137) अनुस्वारे नॄँ पाहि इति। विसर्गपक्षे नॄँः पाहि नॄंः पाहि इति। नृन्पे सूत्रस्य अभावे नृन्पाहि।

1 अत्र दीर्घकारो बोध्यः

(2) वासः क्षौमम्।

'वासस् + क्षौमम्' इत्यवस्थायां 'ससजुषो रुः' इत्यनेन स् स्थाने रु उ अनुबन्धलोपे 'वासर् + क्षौमम्' इत्यवस्थायां खरवसानयोर्विसर्जनीयः 'इत्यनेन र् स्थाने विसर्गे' वासः + क्षौमम् इत्यवस्थायां, 'विसर्जनीयस्य सः' इत्यनेन विसर्गस्य स्थाने स् प्राप्ते कुप्वोः क पौ च 'इत्यनेन उपध्मानीये प्राप्ते' शर्परे विसर्जनीयः इत्यनेन विसर्गस्य स्थाने विसर्गः एव 'वासः क्षौमम्' इति रूपं सिद्धम्।

**(143) कानाम्रेडिते 8 । 3 । 12॥**

**कान्नकारस्य रुः स्पादाम्रेडिते परे। संपुंकानाम् ( वा. 4892 ) इति सः। यद्वा।**

(143) पदच्छेदः - कान् आम्रेडिते द्विपदमिदं सूत्रम्।

अनुवृत्तिः - रुः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः- कान् शब्दस्य स्थाने रू आदेशः भवति आम्रेडिते परे।

विशेषार्थः- आम्रेडिते इति तस्य परमाम्रेडितम् द्विरुक्तस्य परम् आम्रेडितं स्यात् इति। यद्वा इत्यर्थे संपुकानाम् इति वार्तिके कान् इति निष्फलमाह।

**(144) कस्कादिषु च 8 । 3 । 48॥**

**ᳵक ᳵपयोरपवादः। एष्विण उत्तरस्य विसर्गस्य षः स्यात्, अन्यस्य तु सः। काँस्कान् कांस्कान्। कस्कः। कौतस्कुतः। सर्पिष्कुण्डिका। धनुष्कपालम्। आकृतिगणोऽयम्।**

(144)पदच्छेदः- कस्कादिषु, च द्विपदमिदं सूत्रम्

समासः- कस्क आदिर्येषां ते कस्कादयस्तेषु कस्कादिषु (बहुव्रीहिः समासः)

अनुवृत्तिः- सः, इणः, षः।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- कष्कादिगणे इण् प्रत्याहारस्य परस्य विसर्गस्य स्थाने ष् आदेशः भवति। जिह्वामूलीयोपध्मानीययोः अपवादः।

साधनिका:-

(1) काँस्कान् कांस्कान्।

कान् इत्यवस्थायां 'नित्यवीप्सयोः' इत्यनेन द्वित्वे कान् + कान् इति स्थिते तस्य परममाम्रेडितम् इत्यनेन द्वितीय कान् आम्रेडितसंज्ञायां कानाम्रडिते इत्यनेन न् स्थाने रु आदेशे कारु + कान् इति स्थिति 'उपदेशेऽजनुनासिक इत्' इत्यनेन उकारस्य इत्संज्ञायां तस्यलोपः इत्यनेन उलोपे कार् + कान् इति स्थिते 'अत्रानुनासिकस्च पूर्वस्य तु वा' इत्यनेन अनुनासिके काँर् + कान् इत्यवस्थायां 'खरवसानयोविसर्जनीयः' इत्यनेन रेफस्य विसर्गे काँः + कान् इति स्थिते कुप्वो क पौ च इत्यनेन जिह्वामूलीये प्राप्ते तं प्रबाध्य सम्पुड्कानां सो वक्तव्यः इत्यनेन वार्तिकेन विसर्गस्य स्थाने स् काँस् + कान् वर्णसम्मेलने काँस्कान् इति रुपं सिद्धम्। अनुनासिकाभावे अनुनासिकात्परो.... इत्यनेन अनुस्वारे कांस्कान् इति।

(2) कस्कः ।

कस् + कस् इति स्थिते ससजुषो रुः इत्यनेन स् स्थाने रु करु + करु इत्यवस्थायाम् उपदेशेऽजनुनासिक इत इत्यनेन उकारस्य इत्संज्ञायां तस्यलोपः इत्यनेन उकारस्य लोपे कर् + कर् इति स्थिते खरसानयोर्विसर्जनीयः इत्यनेन रेफस्य स्थाने विसर्गे कः + रः इति स्थिते विसर्जनीयस्यसः इत्यनेन सूत्रेण स् प्राप्ते कुप्वोः क पौ च इत्यनेन सूत्रेण जिह्वामूलीय प्राप्ते तं प्रबाध्य कस्कादिषु च इत्यनेन सूत्रेण विसर्गस्य स्थाने स् आदेश कस् + कः वर्णसम्मेलने कस्कः इति रुपं सिद्धम्।

**(145) संहितायाम् 6 । 1 । 72॥**

**इत्यधिकृत्य।**

(145) पदच्छेदः - संहितायाम् एकपदमिदं सूत्रम्।

सूत्रप्रकारः- अधिकारसूत्रम्।

सरलार्थः- अनुदात्तं पदमेकवर्जम् (6. 1. 158) सूत्रपर्यन्तम् अस्य अधिकारः वर्तते। अतः तावत् सूत्रपर्यन्तं सर्वसूत्रेषु संहितायाम् इत्यस्य अनुवृत्तिः वर्तते।

**(146) छे च 6 । 1 । 73॥**

**ह्रस्वस्य छे परे तुगागमः स्यात् संहितायाम्। कुचुत्व स्यासिद्धत्वाज्जश्त्वेन दः। ततश्चर्त्वस्यासिद्धत्वात्पूर्वं श्चुत्वेन जः। तस्य चर्त्वेन चः। चुत्वस्यासिद्धत्वात् चोः कुः (सू. 378) इति कुत्वं न। स्वच्छाया। शिवच्छाया।**

(146) पदच्छेदः- छे, च द्विपदमिदं सूत्रम्।

अनुवृत्तिः- ह्रस्वस्य, तुक्, संहितायाम्।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- छकारे परे ह्रस्ववर्णस्य तुगागमः भवति संहितायां विषये।

विशेषार्थः- स्वत् + छाया इति स्थिते 'स्तोः श्चुना श्चुः' इत्यनेन श्चुत्वे एवं 'झलां जशोऽन्ते' जश्त्वे द् स्वद् + छाया तदनन्तरँ चुत्वेन जः तस्य चर्त्वेन च इति।

साधनिकाः-

(1) स्वच्छाया ।

'स्वस्य छाया' इति विग्रहे स्व+छाया इति स्थिते छे च इत्यनेन सूत्रेण तुगागमे अनुबन्धलोपे त् स्वत्+छाया इत्यवस्थायां झलां 'जशोऽन्ते' इत्यनेन जश्त्वेन द् स्वद् + छाया' 'इत्यवस्थायां' 'स्तोः श्चुना श्चुः' इत्यनेन श्चुत्वेन ज् स्वज् + छाया इति स्थिते 'खरि च' इत्यनेन चर्त्वे 'स्वच् + छाया' वर्ण सम्मेलने स्वच्छाया इति रूपं सिद्धम्।

1 **अर्धविसर्गः जिह्वामूलीयः।**

(2) शिवच्छाया ।

शिव + छाया इत्यवस्थायां 'छे च' इत्यनेन सूत्रेण तुगागमे अनुबन्धलोपे त् शिवत् + छाया इति स्थिते 'झलां जशोऽन्ते' इत्यनेन जश्त्वेन द् 'शिवद् + छाया' इति स्थिते 'स्तोः श्चुना श्चुः' इत्यनेन श्चुत्वेन ज् शिवज् + छाया इति स्थिते खरि च इत्यनेन चर्त्वे 'शिवच् + छाया' वर्णसम्मेलने शिवच्छाया इति रूपं सिद्धम्।

**(147) आङ्माडोश्च 6 । 1 । 78॥**

**एतयोश्छे परे तुक् स्यात्। पदान्ताद्वा (सू. 149) इति विकल्पापवादः। आच्छादयति। माच्छिदत्।**

(147) पदच्छेदः- आङ्माडोः, च द्विपदमिदं सूत्रम्।

समासः- आङ् व माङ् तयोरितेरतरयोगद्वन्द्वः आङ्माडौ तयोराङ्माडोः इति।

अनुवृत्तिः- छे, तुक्।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- छकारे परे आङ् (आ) एवं माङ् (मा) एतयोः द्वयोः अव्यययोः तुगागमः भवति।

विशेषार्थः- एतयोः इत्यर्थे आङ् एवं माङ् इति। ननु दीर्घादित्येव सिद्धे किमर्थमिदमित्यत आह - पदान्ताद्वेति। विकल्पापवादः इति। आच्छादयति तुकि पूर्ववत् क्रिया।

साधनिकाः-

(1) आच्छादयति।

आ + छादयति इत्यवस्थायाम् 'आङ्माडोश्च' इत्यनेन सूत्रेण तुगागमे 'हलन्त्यम्' इत्यनेन क् इत्यस्य इत्संज्ञायाम् 'उपदेशेऽ जनुनासिक इत्' इत्यनेन उ इत्यस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन लोपे अन्त्यावयवत्वेन 'आत् + छादयति' स्थिते 'झलां जशोऽन्ते' इत्यनेन जश्त्वे द् आद् + छादयति इत्यवस्थायां 'स्तोः श्चुना श्चुः' इत्यनेन श्चुत्वे जकारे आज् + छादयति इति स्थिते 'खरि च' इत्यनेन चर्त्वेन चकारे 'आच् + छादयति' इत्यवस्थायां 'चोः कु' इत्यनेन कुत्वे प्राप्ते श्चुत्वस्यासिद्धत्वात् तद्भावे संयोगे आच्छादयति इति रूपं सिद्धम्।

माच्छिदत् मा + छिदत् इति स्थिते आच्छादयति रुपवत् सिद्धिः भवति।

**(148) दीर्घात् 6 । 1 । 75॥**

**दीर्घाच्छे परे तुक् स्यात्। दीर्धास्यायं तुक् न तु छस्य 'सेनासुराच्छाया....' ( सू. 828 ) इति ज्ञापकात्। चेच्छिद्यते।**

(148)पदच्छेदः- दीर्घात् एकपदमिदं सूत्रम्।

अनुवृत्तिः- छे, तुक्।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- दीर्घवर्णात् परे छकारः स्यात् तदा तुक् आगमः दीर्घस्य अवयवः वर्तते न तु छकारस्य इत्यत्र 'सेनासुराच्छाया....' सूत्रं प्रमाणं वर्तते।

साधनिकाः-

(1) चेच्छिद्यते । (पुनः पुनः छिनत्तीति)

चे + छिद्यते इति स्थिते 'दीर्घात्' इत्यनेन सूत्रेण तुगागमे 'हलन्त्यम्' इत्यनेन सूत्रेण क् इत्यस्य इत्संज्ञायाम् 'उपदेशेऽजनुनासिक'-इत्यवस्थायां 'खरि च' इत्यनेन चर्त्वे च चेच् + छिद्यते वर्णसम्मेलने चेच्छिद्यते इति रूपं सिद्धम्।

**(149) पदान्ताद्वा 6 । 1 । 76॥**

**दीर्घात्पदान्ताच्छे परे तुग्वा स्यात्। लक्ष्मीच्छाया, लक्ष्मीछाया।**

(149) पदच्छेदः- पदान्तात्, वा द्विपदमिदं सूत्रम्।

समासः- पदस्य अन्तः इति पदान्तः (षष्ठीतत्पुरुषः)

अनुवृत्तिः- दीर्घात्, छे, तुक्

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- पदस्य अन्तिमदीर्घस्वरात् परे छकारः स्यात् तदा तुक् आगमः विकल्पेन भवति।

साधनिकाः- लक्ष्मीच्छाया लक्ष्मीछाया।

'लक्ष्मी+छाया' इति स्थिते 'पदान्ताद्वा' इत्यनेन तुगागमे 'हलन्त्यम्' इत्यनेन सूत्रेण क् इत्यस्य इत्संज्ञायाम् 'उपदेशेऽजनुनासिक इत्' इत्यनेन सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन क् एवं उ उत्यनयोः लोपे अन्त्यवयत्वेन 'लक्ष्मी + त् + छाया' इति स्थिते 'झलां जशोऽन्ते' इत्यनेन त् स्थाने द् लक्ष्मी + द् छाया इत्यवस्थायां 'स्तोः श्चुना श्चुः' इत्यनेन दस्थाने ज् लक्ष्मी + ज् + छाया इत्यत्र 'खरि च' इत्यनेन चर्त्वे लक्ष्मी + च्छाया वर्णसम्मेलने लक्ष्मीच्छाया इति रुपं सिद्धम्। तुगा+गमाभावे लक्ष्मीछाया इति रूपं सिध्यति।

**स्वाध्यायः**

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

(1) **समः सुटि सूत्रेण किं भवति ?**

(क) म् स्थाने म् (ख) म् स्थाने ल् (ग) म स्थाने रु (घ) म स्थाने न्

(2) **अनुनासिकात्परोऽनुस्वारः इति सूत्रस्य प्रकारं लिखत।**

(क) संज्ञासूत्रम् (ख) विधिसूत्रम् (ग) अधिकारसूत्रम् (घ) नियमसूत्रम्

(3) **विसर्जनीयस्य सः इति सूत्रेण कस्य अनुवृत्ति ?**

(क) खरि (ख) पदस्य (ग) वा (घ) सः

(4) **अम्परे इत्यत्र कः समासः ?**

(क) बहुव्रीहिः (ख) द्वन्द्वः (ग) अव्ययीभावः (घ) तत्पुरुषः

(5) **कान् शब्दस्य नकारस्य स्थाने रु आदेशः केन सूत्रेण भवति ?**

(क) तस्य परमाम्रेडितम् (ख) नृन्पे (ग) कानाम्रेडिते (घ) कस्कादिषु च

(6) **छे च सूत्रेण किं भवति ?**

(क) अनुस्वारः (ख) तुकागमः (ग) मकारः (घ) छकारः

(7) **डः सि धुट् सूत्रे कस्य अनुवृत्तिः अस्ति?**

(क) मः (ख) वा (ग) धुट् (घ) सि

(8) **परसवर्णः इत्यत्र कः समासः ?**

(क) द्वन्द्वः (ख) अव्ययीभावः (ग) तत्पुरुषः (घ) बहुव्रीहिः

(9) **ङणोः कुक्टुक शरि सूत्रे कति पदानि सन्ति ?**

(क) द्वि (ख) चत्वारि (ग) पञ्च (घ) त्रीणि

(10) **नः परो यस्माद् इति नपरः अत्र कः समासः ?**

(क) अव्ययीभावः (ख) बहुव्रीहिः (ग) तत्पुरुषः (घ) द्वन्द्वः

**2. एकैकवाक्येन उत्तरं लिखत ।**

(1) समः सुटि सूत्रेण किं भवति ?

(2) अनुनासिकात्परोऽनुस्वारः सूत्रे कस्य अनुवृत्तिः अस्ति ?

(3) खर परे विसर्गस्य स्थाने स् केन सूत्रेण भवति ?

(4) पुमः खय्यम्परे सूत्रेण किं भवति ?

(5) पुमः खय्यम्परे सूत्रेण अम्परे अत्र कः समासः ?

(6) नृन् इत्यस्य रुः केन सूत्रेण भवति ?

(7) छेच सूत्रेण कः आगमः भवति ?

**3. सविस्तरम् उत्तरं लिखत।**

(1) नश्छव्यप्रशान् सूत्रस्य सरलार्थं, समासं एवं अनुवृत्तिं लिखत।

(2) नृन्पे सूत्रस्य सरलार्थं पदच्छेदं समासं च लिखन्तु।

(3) कानाम्रेडिते सूत्रस्य सरलार्थं पदच्छेदं समासं च लिखत।

**4. निम्नलिखितानि रुपाणि साधयत।**

(1) सँस्कर्ता (2) नॄँ पाहि

(3) नॄः पाहि (4) वासः क्षौमम्

(5) काँस्कान् (6) कस्कः

(7) स्वच्छाया (8) आच्छादयति

(9) चेच्छिद्यते (10) लक्ष्मीच्छाया

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायामताम्।**

(1) विसर्जनीयस्य सः।

(2) पुनः खय्यम्परे।

(3) समः सुटि।

**5. अविभागं योग्योत्तरेण ब विभागेन सह योजयत।**

| **अ विभाग** | **ब विभाग** |
|---|---|
| (1) पुँस्कोकिलः | (1) नश्छव्यप्रशान् |
| (2) स्वच्छाया | (2) कस्कादिषु च |
| (3) शार्ङ्गिंश्छिन्धि | (3) कुप्वोः क पौ च |
| (4) काँस्कान् | (4) छे च |
| (5) नॄँ पाहि | (5) पुमः खय्यम्परे |

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं, पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखत।

◆

# 10 अथ विसर्गसन्धिप्रकरणाम्

**प्रस्तावना**

**पञ्चसन्धिप्रकरणे चतुर्थमिदं प्रकरणम्। विसर्गमधिकृत्य यत्र सूत्राणां विनियोगः दृश्यते स सन्धिः विसर्गसन्धिः। पाणिनीयशिक्षायां निर्दिष्टानुसारम्**

**ओभावश्च विवृत्तिश्च शषसा रेफ एव च। जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः॥**

**कारिकामिमामनुसृत्य अत्र विसर्गस्य तानि विविधानि परिवर्तनानि, तदधिकृत्य विसर्गस्य विसर्गः, सत्वं, शत्वं, षत्वं, जिह्वामूलीयः, उपध्मानीयः, विसर्गलोप इत्यादिनिमित्तं पाणिनीयव्याकरणस्य नियमा दर्शिताः।**

---

**विसर्जनीयस्य सः। ( सू. 138 )। विष्णुस्त्राता।**

**( 150 ) शर्परे विसर्जनीयः। 8 । 3 । 35॥**

**वृत्तिः- शर्परे खरि विसर्जनीयस्य विसर्जनीयः, न त्वन्यत्। कः त्सरुः। घनाघनः क्षोभणः। इह यथायथं सत्वं जिह्वामूलीयश्च न।**

---

पदच्छेदः- शर्परे, विसर्जनीयः, द्विपदं सूत्रमिदम्।

समासः- शर्परे - शर् परः यस्मात् इति तस्मिन्। बहुव्रीहिः।

अनुवृत्तिः- विसर्जनीयस्य। खरि।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- शर् प्रत्याहारः यस्मात् परः भवेत् तादृशस्य खर्-प्रत्याहारस्य वर्णः यदा विसर्गात् परे भवति तदा विसर्गस्य स्थाने विसर्ग एव भवति तस्य अन्यत् परिवर्तनं न भवति।

विशेषार्थः- यदा विसर्गानन्तरं खर्प्रत्याहारस्य (ख, फ, छ, ठ, थ, च, ट, त, क, प, श, ष, स) वर्णाः तदनन्तरं च शर्- प्रत्याहारस्य (श, ष, स) वर्णाः भवेयुः तस्याम् अवस्थायां विसर्गस्य स्थाने अन्यत् परिवर्तनं न भवति अपि तु विसर्गस्य विसर्ग एव अवतिष्ठते।

साधनिका :

कः त्सरुः - कः + त्सरुः इति स्थिते **विसर्जनीयस्य सः** इति सूत्रेण विसर्गस्य सकारे प्राप्ते, शर्परे विसर्जनीयः इत्यनेन विसर्गे जाते कः त्सरुः इति रूपं सिद्धम्।

घनाघनः क्षोभणः - घनाघनः + क्षोभणः इति स्थिते **कुप्वोः क पौ** च इति सूत्रेण जिह्वामूलीयादेशे प्राप्ते शर्परे विसर्जनीयः इत्यनेन विसर्गे जाते 'घनाघनः क्षोभणः' इति रूपं सिद्धम्।

---

**( 151 ) वा शरि। 8 । 3 । 36॥**

**वृत्तिः- शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्। हरिः शेते - हरिश्शेते। खर्परे शरि वा विसर्गलोपो वक्तव्यः।**

**राम स्थाता - रामः स्थाता। हरि स्फुरति - हरिः स्फुरति। पक्षे विसर्गे सत्वे च त्रैरुप्यम्। कुप्वो ᳵक ᳵपौ च (142)। क करोति - कः करोति। क खनति - कः खनति। क पचति - कः पचति - कः पचति। क फलति कः फलति।**

---

पदच्छेदः - वा, शरि द्विदं सूत्रमिदम्।

अनुवृत्तिः- विसर्जनीयस्य, विसर्जनीयः।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- विसर्गानन्तरं यदि शर्-प्रत्याहारस्य वर्णाः स्युः तर्हि विसर्गस्य विसर्ग एव भवति।

(वार्तिकार्थः) - विसर्गानन्तरं विद्यमानस्य खर्प्रत्याहारस्य वर्णानन्तरं यदि शर् - प्रत्याहारस्य वर्णाः भवेयुः तर्हि विसर्गस्य लोपः विकल्पेन भवति।

विशेषार्थः– सूत्रमेतत् **शर्परे विसर्जनीयः** इति पूर्वसूत्रस्य विस्तारं न्यूनीकरोति। पूर्वसूत्रेण विहितस्य नित्य विसर्गस्य विकल्पार्थमिदं सूत्रम्। अतः यदा विसर्गात्परे शर् – प्रत्याहारः भवति तदा विसर्गस्य विसर्गः विकल्पेन भवति। अत एव हरिः शेते इत्यत्र विसर्गस्य स्थाने विसर्गः, स् – कारश्चेत्येतद् द्वयमपि भवति।

(वार्तिकविशेषार्थः) वार्तिकमिदं **'वा शरि'** सूत्रेण क्रियमाणे कार्ये विशेषं सूचयति। तेन– विसर्गानन्तरं तादृशः शर्–प्रत्याहरस्थवर्णः यतः खर् – प्रत्याहारस्य वर्णः स्यात् तर्हि विसर्गस्य विकल्पेन लोपो भवति। अतः 'हरिः स्फुरति' इत्यत्र हरिशब्दस्थविसर्गानन्तरं स्फुरति इत्यस्य सकारः शर् – प्रत्याहारस्य वर्णरूपेण, ततः परं च फ–काररूपेण खर्–प्रत्याहरस्य वर्णः विद्यते अतः हरिशब्दस्थ–विसर्गस्य विकल्पेन लोपः। ततश्च वैकल्पिकं हरिः स्फुरति, हरिस्फुरति इति अन्यद्रूपं द्वयं सिद्धयति।

साधनिका:– हरिः + शेते इति स्थिते अत्र विसर्जनीयस्य सः इति सूत्रेण विसर्गस्य सकारे प्राप्ते **'वा शरि'** इति सूत्रेण विकल्पेन विसर्गस्य विसर्गे कृते हरिः शेते इति रूपं सिद्धम्। विसर्गाभावपक्षे – विसर्जनीयस्य सः इति सूत्रेण सत्वे, **स्तोः श्चुना श्चुः** इति सूत्रेण श्चुत्वे सति हरिश्शेते इति रूपं सिद्धम्।

कः + करोति इति स्थिते कुप्वो क पौ च इति सूत्रेण विसर्गस्य जिह्वामूलीये प्राप्ते **वा शरि** इति सूत्रेण विकल्पेन विसर्गस्य विसर्गे कृते कः करोति इति रूपं सिद्धम्। विसर्गाभावपक्षे – कुप्वोकपौ च इति सूत्रेण विसर्गस्य जिह्वामूलीयादेशे कृते ककरोति इति रूपं सिद्धम्। एवमेव –

कः + खनति इत्यत्रापि कखनति – कः खनति इति रूपद्वयम्।

कः + पचति इत्यत्र विसर्गस्य उपध्मानीये कृते क पचति – तथा च विसर्गस्य विसर्गे सति कः पचति। तथैव कः + फलति इत्यत्रापि विसर्गस्य उपध्मानीये कृते क फलति – तथा च विसर्गे कृते कः फलति इति रूपाणि भवन्ति।

(वार्तिकसाधनिका) –

रामः + स्थाता इत्यत्र **विसर्जनीयस्य सः** इति सूत्रेण विसर्गस्य सत्वे प्राप्ते, **'वा शरि'** इति सूत्रेण विसर्गस्य विसर्गे कृते पुनः **'खर्परे शरि वा विसर्गलोपो वक्तव्यः'** इति वार्तिकेन विसर्गस्य वैकल्पिके लोपे कृते – लोपपक्षे – राम स्थाता इति रूपं सिद्धयति। लोपाभावपक्षे – **वा शरि** इत्यनेन विसर्गे सति रामः स्थाता इति रूपं सिद्धयति। विसर्गाभावपक्षे **विसर्जनीयस्य सः** इति सूत्रेण सत्वे कृते रामस्स्थाता इति रूपं सिद्धयति।

---

**(152) सोऽपदादौ। 8 । 3 । 38॥**

**वृत्तिः– विसर्जनीयस्य सः स्यादपदाद्योः कुप्वोः परयोः। पाशकल्पककाम्येष्वेवेति वाच्यम् (वा5033)। पयस्पाशम्। यशस्कल्पम्। यशस्कम्। यशस्काम्यति। अनव्ययस्येति वाच्यम् (वा. 4901) प्रातः कल्पम्। काम्ये रोरेवेति वाच्यम् (वा.4902)। नेह – गीः काम्यति।**

---

पदच्छेदः – सः, अपदादौ द्विपदं सूत्रमिदम्।

समासः– पदस्य आदिः पदादिः (ष. त. पु.), तस्मिन् पदादौ, न पदादौ इति अपदादौ (नञ्)।

अनुवृत्तिः– विसर्जनीयस्य, कुप्वोः।

सूत्रप्रकारः– विधिसूत्रम्।

सरलार्थः– विसर्गानन्तरं यदि कवर्गस्य वा पवर्गस्य अपदादिः वर्णः भवेत् तर्हि विसर्गस्य स्थाने स् भवति।

(वार्तिकार्थः 5033) – विसर्गानन्तरं यदि पाशप् – क – कल्पप् – काम्यच् वा प्रत्ययाः स्युः तर्हि तत्रैव स्कारादेशः स्यादिति वक्तव्यम्।

(वार्तिकार्थः 4901) – पाशप् – कल्पप् – क – काम्यच् वा प्रत्ययाः अव्ययभिन्नविसर्गानन्तरं स्युः तर्हि एव विसर्गस्य स्थाने स्कारादेशः भवति इति वाच्यम्।

(वार्तिकार्थः 4902) – काम्यच् – प्रत्यये परे सति रुकारस्य स्थाने जातस्य विसर्गस्यैव स् – कारादेशः भवति इति वक्तव्यम्।

विशेषार्थः– विसर्जनीयप्रकरणे पूर्वसूत्रेण विहितं कार्यं नियमयितुमिदं सूत्रम्। इतः पूर्वं यत् कार्यं जातं तत्र पदान्तस्य

अपदान्तस्य इति निर्देशो न विहितः अतः अत्र अपदादौ इति निर्देशेन पूर्वसूत्राणां कार्यं पदान्तेष्वेवेति निर्धार्यते। अस्य सूत्रस्य प्रवृत्तिः अपदान्तेषु भविष्यति। अतः पदादिस्थाः कवर्ग-पवर्गयोः वर्णाः यत्र भविष्यन्ति तत्र पूर्वपदान्तस्थस्य विसर्जनीयस्य **कुप्वोकपौ च** इति सूत्रेण क्रमेण जिह्वामूलीयोपध्मानीयौ विधास्येते। अथवा **विसर्जनीयस्य सः** इति सूत्रेण विसर्जनीयस्य सत्वं भविष्यति। अपदान्तस्य कृतेऽयं विधिः।

(वार्तिकविशेषार्थः - 5033) - वार्तिकमिदं सूत्रस्य नियमनं करोति। तेन यदा पाशप् - कल्पप् - क - काम्यच् - प्रत्ययाः यदि विसर्गानन्तरं स्युः तर्ह्येव **सोऽपदादौ** इति सूत्रस्य प्रवृत्तिः।

**(वार्तिकविशेषार्थः** - 4901 **)** - वार्तिकमिदं पूर्वपठितवार्तिकस्य **सोऽपदादौ** इति सूत्रस्य च नियमनं करोति। अतः पूर्वप्रकृतिस्थः शब्दः अव्ययभिन्नः स्यात्तर्ह्येव सोऽपदादौ विसर्गस्य सत्वं सम्भवति। अतः प्रातः कल्पम् इत्यत्र प्रातर् इति अव्ययम् विद्यते तस्मात् प्रातः-शब्दस्थविसर्गस्य सत्वं न भवति ।

**(वार्तिकविशेषार्थः** - 4902 **)** - वार्तिकमिदं काम्यच् - प्रत्यये परे सति रोः स्थाने जातस्य विसर्गस्यैव सत्वं भवेदिति नियमनं करोति। अतः काम्यच् - प्रत्यये परे सति ततः पूर्वं मूलतो रेफस्य विसर्जनीभूतस्य सत्वम् अनेन वार्तिकेन निषिध्यते।

साधनिका-

पयः + पाशम् इति स्थिते पाशकल्पककाम्येष्विति वाच्यमिति वार्तिकस्य सहयोगेन **सोऽपदादौ** इति सूत्रेण अपदान्तस्य विसर्गस्य स्थाने सकारादेशे पयस्पाशम् इति रूपं सिद्धम्।

'यशः + कल्पम्' इति स्थिते **पाशकल्पककाम्येष्वितति वाच्यमिति** वार्तिकस्य सहयोगेने **सोऽपदादौ** इति सूत्रेण अपदान्तस्य विसर्गस्य स्थाने सकारादेशे यशस्कल्पम् इति रूपं सिद्धम्।

यशः+कम् इति स्थिते **पाशकल्पकाकाम्येष्विति वाच्यमिति** वार्तिकस्य सहयोगेन **सोऽपदादौ** इति सूत्रेण अपदान्तस्य विसर्गस्य स्थाने सकारादेशे यशस्कम् इति रूपं सिद्धम्।

यशः+काम्यति इति स्थिति **पाशकल्पककाम्येष्विति वाच्यमिति** वार्तिकस्य सहयोगेन **सोऽपदादौ** इति सूत्रेण अपदान्तस्य विसर्गस्य स्थाने सकारादेशे यशस्काम्यति इति रूपं सिद्धम्।

(वार्तिकसाधनिका)-

प्रातः+कल्पम् इति स्थिते अत्र प्रातः इत्यस्य अव्ययत्वात् **पाशकल्पककाम्येष्विति वाच्यमिति** वार्तिकस्य सहयोगेन **सोऽपदादौ** इति सूत्रेण अपदान्तस्य विसर्गस्य स्थाने सकारादेशे प्राप्ते सति **अनव्यवस्येति वाच्यमिति** वार्तिकेन निषेधे कृते सति प्रातः कल्पमिति रूपं सिद्ध्यति।

गीः + काम्यति इति स्थिते अत्र गीः इत्यत्र गिर् - शब्दस्य रेफस्य विसर्गत्वात् पाशकल्पककाम्यष्विति वाच्यमिति वार्तिकस्य सहयोगेन **सोऽपदादौ** इति सूत्रेण अपदान्तस्य विसर्गस्य स्थाने सकारादेशे प्राप्ते सति **काम्ये रोरेवेति वाच्यमिति** वार्तिकेन निषेधे कृते गीः काम्यति इति रूपं सिद्ध्यति।

---

**( 153 ) इणः षः । 8 । 3 । 39॥**

**वृत्तिः- इणः परस्य विसर्गस्य षकारः स्यात्पूर्वविषये। सर्पिष्पाशम्। सर्पिष्काम्यम्। सर्पिष्कम्। सर्पिष्काम्यति।**

---

पदच्छेदः- इणः, षः द्विपदं सूत्रमिदम्।

अनुवृत्तिः- विसर्जनीयस्य।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- पाशप् - कल्पप् - क - काम्यच् वा प्रत्ययाः अव्ययभिन्नविसर्गानन्तरं स्युः तर्हि इण् - प्रत्याहारस्थवर्णानन्तरं स्थितस्य विसर्गस्य स्थाने ष् - कारादेशः भवति।

विशेषार्थः - अस्मिन् सूत्रे विसर्गस्य ष् - कारादेशः निर्दिष्टः। तत्र पूर्वोक्तविषयः अर्थात् पूर्वपठितसूत्रेण सह तत्र विद्यमानानि वार्तिकानि योजयित्वा नियमितः अर्थः ग्राह्यः। अतः पाशकल्पादिप्रत्ययेषु परेषु अनव्ययशब्दस्थविसर्गस्यैव स च इणः परे स्थितः स्यात् तर्ह्येव ष् - कारत्वं प्राप्नोति इति ।

साधनिका -

सर्पिः+पाशम् इति स्थिते पाशकल्पककाम्येष्विति वाच्यमिति वार्तिकस्य सहयोगेन सोऽपदादौ इति सूत्रेण अपदान्तस्य विसर्गस्य स्थाने सकारादेशे प्राप्ते **'इणः षः'** इति सूत्रेण विसर्गस्य स्थाने मूर्धन्यष्- कारादेशे कृते सर्पिष्पाशम् इति रूपं सिद्ध्यति।

सर्पिः + कल्पम् इति स्थिते **पाशकल्पककाम्येष्विति वाच्यमिति** वार्तिकस्य सहयोगेन **सोऽपदादौ** इति सूत्रेण अपदान्तस्य विसर्गस्य स्थाने सकारादेशे प्राप्ते **'इणः षः'** इति सूत्रेण विसर्गस्य स्थाने मूर्धन्यष्-कारादेशे कृते सर्पिष्कल्पम् इति रुपं सिद्ध्यति।

सर्पिः+कम् इति स्थिते **पाशकल्पककाम्येष्विति वाच्यमिति** वार्तिकस्य सहयोगेन **'सोऽपदादौ'** इति सूत्रेण अपदान्तस्य विसर्गस्य स्थाने सकारादेशे प्राप्ते **'इणः षः'** इति सूत्रेण विसर्गस्य स्थाने मूर्धन्यष्-कारादेशे कृते सर्पिष्कल्पम् इति रुपं सिद्ध्यति।

सर्पिः+काम्यति इति स्थिते **पाशकल्पककाम्येष्विति वाच्यमिति** वार्तिकस्य सहयोगेन **सोऽपदादौ** इति सूत्रेण अपदान्तस्य विसर्गस्य स्थाने सकारादेशे प्राप्ते **'इणः षः'** इति सूत्रेण विसर्गस्य स्थाने मूर्धन्यष्-कारादेशे कृते सर्पिष्कल्पम् इति रुपं सिद्ध्यति।

---

**( 154 ) नमस्पुरसोर्गत्योः। 8 । 3 । 40॥**

**वृत्तिः- गतिसंज्ञकयोरनयोर्विसर्गस्य सः कुप्वोः परयोः। नमस्करोति। साक्षात्प्रभृतित्वात्कृञो योगे विभाषा गतिसंज्ञा। तदभावे - नमः करोति। पुरोऽव्ययम् ( सू.768 ) इति नित्यं गतिसंज्ञा। पुरस्करोति। अगतित्वान्नेह-पूः, पुरौ, पुरः प्रवेष्टव्याः।**

---

पदच्छेदः- नमस्पुरसोः, गत्योः द्विपदं सूत्रमिदम्।

समासः- नमस् च पुरस् त चौ नमस्पुरसौ तयोः नमस्पुरसोः (द्वन्द्वः)।

अनुवृत्तिः- विसर्जनीयस्य, सः, कुप्वोः।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- कवर्गे पवर्गे च परे गतिसंज्ञकयोः नमस् - पुरसोः विसर्गस्य स्-कारादेशः भवति।

विशेषार्थः- अस्मिन् सूत्रे साक्षात्प्रभृतीनि च इति सूत्रेण कृधातोः योगे नमस् इत्यस्य वा गतिसंज्ञा भवति अत- यदा नमस् - शब्दः गतिसंज्ञकः स्यात् तदा कुप्वोः परयोः सत्वं भवति। गतिसंज्ञाभावे सूत्रस्याप्रवृत्तिः। तद्वदेव **पुरोऽव्ययम्** इति सूत्रेण पूरस् अव्ययस्य नित्यं गतिसंज्ञा भवति। अतः तत्र नित्यं सत्वादेशः भवति। अत्र अनव्ययस्य पुरसः गतिसंज्ञा न भवति अतः तत्र सत्वमपि न भवेत्।

साधनिका -

नमः + करोति इति स्थिते **नमस्पुरसोर्गत्योः** इति सूत्रेण **साक्षात्प्रभृतीनि च** इति सूत्रेण गतिसंज्ञकस्य नमस् - शब्दस्य विसर्गस्य स्थाने स् - कारादेशे कृते सति नस्करोति इति रूपं सिद्धं भवति। अत्र साक्षात्प्रभृतीनि च इति सूत्रेण गतिसंज्ञा विकल्पेन भवति अतः गतिसंज्ञाभावपक्षे - नमः करोति इति रूपं सिद्ध्यति।

पुरस् + करोति इति स्थिते **पुरोऽव्ययम्** इति सूत्रेण पुरस् - इत्यस्य नित्यं गतिसंज्ञायाम्, **नमस्पुरसोर्गत्योः** इति सूत्रेण गतिसंज्ञकस्य पुरस् - शब्दस्य विसर्गस्य स्थाने स् - कारादेशे कृते सति पुरस्करोति इति रूपं सिद्ध्यति।

---

**(155) इदुदुपधस्य चाऽप्रत्ययस्य।। 8 । 3 । 41॥**

**वृत्तिः- इकारोकारोपधस्याऽप्रत्ययस्य विसर्गस्य षः स्यात्कुप्वोः। निष्प्रत्यूहम्। आविष्कृतम्। दुष्कृतम्। अप्रत्ययस्य किम् ? अग्निः करोति। वायुः करोति। एकादेशशास्त्रनिमित्तकस्य न षत्वम्। कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठात्। तेनेह न - मातुः कृपा। मुहुसः प्रतिषेधः ( वा. 4911 ) मुहुः कामा।**

---

पदच्छेदः - इदुदुपधस्य, च, अप्रत्ययस्य त्रिपदं सूत्रमिदम्।

समासः- इत् च उत् च इदुतौ उपधे यस्येति (बहुव्रीहिः), न प्रत्ययः अप्रत्ययः तस्य अप्रत्ययस्य (नञ्)।

अनुवृत्तिः- विसर्गस्य, कुप्वोः, षः।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- इकारः उकारो वा उपधायां स्यात् तादृशस्य प्रत्ययभिन्नस्य विसर्गस्य स्थाने मूर्धन्यष्कारादेशः भवति यदि परे कवर्ग - पवर्गयोः वर्णाः स्युः।

(वार्तिकार्थः)- मुहुस् - शब्दस्य विसर्गस्य ष् - कारादेशो न भवति।

विशेषार्थः- अस्मिन् सूत्रे विसर्गस्य मूलप्रकृतिः प्रत्ययभिन्ना, अथ च विसर्गस्य उपधायाम् इकारः उकारः वा स्यादित्यपेक्षा। आहत्य - इस् - उस् - अन्तप्रातिपदिकस्य स् - कारस्य यदा विसर्गः भवति तर्हि तस्य स्थाने कुप्वोः परयोः मूर्धन्यष् - कारादेशः स्यादित्यर्थः। अत्र प्रत्ययस्य विसर्गः यदि इकारोपधः वा उकारोपधः भवति तर्हि तस्य स्थाने अनेन सूत्रेण ष्-कारादेशो न स्यात्। तेन - हरिः करोति, गुरुः पृच्छति इत्यादिषु इद् - उद् - उपधत्वे सत्यपि विसर्गस्य मूर्धन्यष्-कारादेशो न भवति।

(वार्तिकविशेषार्थः - 4911) - वार्तिकमिदं सूत्रस्य नियमनं करोति। तेन अप्रत्ययस्य उदुपधस्य सस्य विसर्जनीयभूतस्य मूर्धन्यष्-कारादेशो न भवति।

साधनिका-

निः+प्रत्यूहम् इति स्थिते '**इदुदुपधस्य चाप्रत्ययस्य**' इति सूत्रेण इदुपधस्य प्रत्ययभिन्नस्य निर् - उपसर्गस्य विसर्गस्य मूर्धन्यष्-कारादेशे कृते सति निष्प्रत्यूहम् इति रूपं सिद्धयति।

आविः+कृतम् इति स्थिते '**इदुदुपधस्य चाप्रत्ययस्य**' इति सूत्रेण इदुपधस्य प्रत्ययभिन्नस्य आविस्- अव्ययस्य विसर्गस्य मूर्धन्यष् - कारादेशे कृते सति आविष्कृतम् इति रूपं सिद्धयति।

दुः + कृतम् इति स्थिते '**इदुदुपधस्य चाप्रत्ययस्य**' इति सूत्रेण उदुपधस्य प्रत्ययभिन्नस्य दुर् - उपसर्गस्य विसर्गस्य मूर्धन्यष् - कारादेशे कृते सति दुष्कृतम् इति रूपं सिद्धयति।

'अग्निः+करोति' इत्यत्र इकारोपधः विसर्गः सु- प्रत्यस्य अस्ति अतः अत्र विसर्गस्य ष्-कारादेशः न भवति।

वायुः+करोति इत्यत्र उकारोपधः, विसर्गः सु-प्रत्यस्य अस्ति अतः अत्र विसर्गस्य ष्-कारादेशः न भवति।

(वार्तिकसाधनिका) -

मुहुः+करोति इत्यत्र मुहुः इत्यस्य मुहुः इत्यस्य अव्ययत्वात् मुहुः इत्यत्र विसर्गस्य उकारोपधत्वे सति विसर्गस्य मूर्धन्यष् - कारादेशे प्राप्ते सति '**मुहुसः प्रतिषेधः**' इति वार्तिकेन निषेधे कृते मुहुः करोति इति रूपं सिद्धयति।

---

**(156) तिरसोऽन्यतरस्याम्। 8 । 3 । 42॥**

**वृत्तिः- तिरसो विसर्गस्य सो वा स्यात्कुप्वोः। तिरस्कर्ता - तिरः कर्ता।**

---

पदच्छेदः - तिरसः, अन्यतरस्याम् द्विपदं सूत्रमिदम्।

अनुवृत्तिः- विसर्गस्य, सः, कुप्वोः।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- तिरस् - शब्दसम्बद्धस्य विसर्गस्य सकारः विकल्पेन भवति, कवर्गे पवर्गे च परे।

विशेषार्थः- विशेषव्यवस्थार्थं सूत्रमिदम्। अतः केवलं तिरस् - शब्दस्य कृते अयं नियमः यत् कुप्वोः परयोः तत्सम्बन्धिनः विसर्गस्य स्-कारादेशः विकल्पेन भवति इति।

साधनिका -

तिरः+कर्ता इत्यत्र तिरस् - सम्बन्धिनः विसर्गस्य स्थाने **तिरसोऽन्यतरस्याम्** इति सूत्रेण विकल्पेन सत्वे कृते तिरस्कर्ता इति रूपं सिद्ध्यति। विकल्पे सत्वाभावपक्षे - तिरः कर्ता इति रूपं सिद्धम्।

---

**(157) द्विस्त्रिश्चतुरिति कृत्वोऽर्थे। 8 । 3 । 43॥**

**वृत्तिः- कृत्वोऽर्थे वर्तमानामेषां विसर्गस्य षकारो वा स्यात्कुप्वोः। द्विष्करोति - द्विः करोति इत्यादि। कृत्वोऽर्थे किम् ? चतुष्कपालः।**

---

पदच्छेदः - द्विः - त्रिः - चतुः, इति, कृत्वोऽर्थे त्रिपदं सूत्रमिदम्।

समासः - द्विश्च त्रिश्च चतुश्च इति तेषां समाहारः द्विस्त्रिश्चतुः (समाहार द्वन्द्वः)

अनुवृत्तिः- विसर्जनीयस्य, षः, कुप्वोः, अन्यतरस्याम्।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः- कृत्वसुच् - प्रत्ययार्थवाचकात् द्विः - त्रिः - चतुरिति शब्दसम्बन्धिनः विसर्गात्परे यदि कवर्ग- पवर्गयोः वर्णाः स्युः तर्हि विसर्गस्य स्थाने विकल्पेन ष् - कारादेशः भवति।

विशेषार्थः- अस्मिन् सूत्रे प्रोक्तः कृत्वोऽर्थः कृत्वसुच्-प्रत्ययं निर्दिशति। कृत्वसुच् प्रत्ययः अभ्यावृत्तिं - पौनःपुन्यार्थं दर्शयितुं संख्यावाचकशब्दानन्तरं स्वार्थे क्रियते। तद्युक्तः द्विः, त्रिः, चतुः इति शब्दसम्बद्धः विसर्गः विकल्पेन ष - त्त्वं प्राप्नोति कुप्वोः परयोः इति ज्ञेयम्। कृत्वोऽर्थे किम् ? इत्यत्र अस्य सूत्रस्य प्रवृत्तेः मर्यादानिर्देशः दृश्यते यदि द्वि-त्रि-चतुर्-शब्दाः कृत्वोऽर्थे न स्युः तर्हि तत्र अस्य सूत्रस्य प्रवृत्तिः न भवति। यथा - चतुष्कपालः इत्यत्र चतुर्षु कपालेषु संस्कृतः पुरोडाशः चतुष्कपालः इत्यत्र चतुः शब्दः कृत्वोऽर्थे नास्त्यतः तत्र **इदुदुपधस्य चाप्रत्ययस्य** इति सूत्रेण नित्यमेव षत्वमिति ग्राह्यम्।

साधनिका-

द्विः+इति स्थिते द्विस्त्रिश्चतुरिति कृत्वोऽर्थे इति सूत्रेण विकल्पेन विसर्गस्य ष् - कारादेशे द्विष्करोति इति रूपं सिद्धम्। षत्वाभावे - द्विः करोति इति रूपं सिद्धम्।

---

**(158) इसुसोः सामर्थ्ये। 8 । 3 । 44॥**

**वृत्तिः- इसुसोः विसर्गस्य षः स्याद्वा कुप्वोः। सर्पिष्करोति - सर्पिः करोति। धनुष्करोति - धनुः करोति। सामर्थ्यमिह व्यपेक्षा। सामर्थ्ये किम् ? - तिष्ठतु सर्पिः, पिब त्वमुदकम्**

इत्यत्र सर्पिः इत्यस्य अन्वयः तिष्ठतु इत्यनेन सह विद्यते न पुनः पिब इत्यनेन सह। अतः सामर्थ्याभावात् विसर्गस्य मूर्धन्यष् कारादेशो न भवति।

साधनिका -

सर्पिः + करोति इति स्थिते इस् - सम्बन्धिनः विसर्गस्य स्थाने इसुसोः सामर्थ्ये इति सूत्रेण विकल्पेन ष् - कारे कृते सर्पिष्करोति इति रुपं सिद्ध्यति। षत्वाभावपक्षे - सर्पिः करोति इति रूपं सिद्ध्यति। धनुः + करोति इति स्थिते उस्-सम्बन्धिनः विसर्गस्य स्थाने **इसुसोः सामर्थ्ये** इति सूत्रेण विकल्पेन ष् - कारे कृते धनुष्करोति इति रूपं सिद्ध्यति। षत्वाभावपक्षे-धनुः करोति इति रूपं सिद्ध्यति।

---

**(159) नित्यं समोसेऽनुत्तरपदस्थस्य। 8 । 3 । 45॥**

**वृत्तिः- इसुसोर्विसर्गस्यानुत्तरपदस्थस्य नित्यं षः स्यात्कुप्वोः परयोः। सर्पिष्कुण्डिका। अनुत्तरपदस्थस्य इति किम्? परमसर्पिःकुण्डिका। कस्कादिषु सर्पिष्कुण्डिका शब्दोऽसमासे व्यपेक्षाविरहेऽपि षत्वार्थो, व्यपेक्षायां नित्यार्थश्च।**

पदच्छेदः- नित्यं, समासे, अनुत्तरपदस्थस्य त्रिपदं सूत्रमिदम्।

समासः - उत्तरं च तत् पदम् उत्तरपदम् (कर्मधारयः), तत्र तिष्ठतीति उत्तरपदस्थम् (उपपदसमासः), न उत्तरपदस्थमिति अनुत्तरपदस्थं तस्य (नञ्)

अनुवृत्तिः- इसुसोः, विसर्जयनीयस्य, कुप्वोः, षः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - उत्तरपदरहितस्य इस्-उस्-सम्बन्धिनः विसर्गस्य स्थाने समासे नित्यं ष्-कारादेशः भवति कवर्ग-पवर्गयोः परयोः।

विशेषार्थः- इसुसोः सामर्थ्ये इति सूत्रेण विधीयमानस्य ष्-त्वविकल्पस्य नियमनार्थमिदं सूत्रम्।

समासः - पदयोः परस्परान्वितिर्भवेत्तदानीमेव भवति अतः सामर्थ्यं तत्र स्वतः सिद्ध्यति। किन्तु इदुदुपधस्य **चाप्रत्ययस्येति** सूत्रेण इस् इति प्रत्ययावयवः अस्त्यतः नित्यं ष् - त्वं न सम्भवति। अतः नित्यष् - त्वविधानार्थं सूत्रमिदम्।

अत्र अनुत्तरपदस्थस्य इति प्रवृत्तिसंकोचेन इस्-उस्-अन्तं पदम् उत्तरपदरूपेण स्यात्तर्हि तत्र समासे सत्यपि विसर्गस्य ष्-त्वं न भवति। अतः परमसर्पिःकुण्डिका इत्यत्र सर्पिः इति उत्तरपदरूपेण विद्यते तस्मात् तत्र विसर्गस्य ष्-कारादेशः न भविष्यति।

साधनिका -

सर्पिः+कुण्डिका इति स्थिते इस्-सम्बन्धिनः विसर्गस्य स्थाने '**इसुसोः सामर्थ्ये**' इति सूत्रेण विकल्पेन ष्-कारादेशे प्राप्ते **नित्यं समासे अनुत्तरपदस्थस्य** इति सूत्रेण अनुत्तरपदस्थत्वात् समासत्वाच्च नित्यं षत्वे कृते सर्पिष्कुण्डिका इति रूपं सिद्ध्यति।

---

**(160) अतः कृ-कमि्-कंस-कुम्भ-पात्र-कुशा-कर्णीष्वनव्ययस्य।। 8 । 3 । 46॥**

**वृत्तिः - अकारादुत्तरस्याऽनव्ययस्य विसर्गस्य समासे नित्यं सकारादेशः स्यात्करोत्यादिषु परेषु, न तूत्तरदपस्थस्य। अयस्कारः। अयस्कामः। अयस्कंसः। अयस्कुम्भः। अयस्पात्रम्। अयस्सहिता कुशा-अयस्कुशा। अयस्कर्णी। अतः किम्? गीः कारः। अनव्यस्य किम्? स्वः कामः। समासे किम्? यशः करोति। अनुत्तरपदस्थस्य किम्? परमयशः कारः।**

---

पदच्छेदः - अतः, कृ-कमि-कंस-कुम्भ-पात्र-कुशा-कर्णीषु, अनव्यस्य त्रिपदं सूत्रमिदम्।

समासः - कृश्च च कमिश्च च कंसश्च च कुम्भश्च पात्रं च कुशा च कर्णी च, तेषु (द्वन्द्वः), न अव्ययस्येति अनव्ययस्य (नञ्तत्पुरुषः समासाः)

अनुवृत्तिः - विसर्जनीयस्य, नित्यं, समासे, अनुत्तरपदस्थस्य।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः- ह्रस्व-अकारानन्तरं यदि अव्ययभिन्नस्य शब्दस्य विसर्गस्य समासे नित्यं सकारादेशः भवति यदि तस्मात् विसर्गात् परे कृ-कमि-कंस-कुम्भ-पात्र-कुशा-कर्णीति शब्दाः स्युः।

विशेषार्थः- सूत्रमिदं विसर्गस्य स् - कारं करोति। अत्र विसर्गात्पूर्वम् अ-कारः अपेक्षितः, विसर्गवान् शब्दः अव्यभिन्नः भवेत्, सः शब्दः उत्तरपदरूपेण न स्यात्, विसर्गानन्तरं च कृ-कमि-कंस-कुम्भ-पात्र-कुशा-कर्णीति शब्दाः स्युः एतावती व्यवस्था स्यात्तर्ह्येव विसर्गस्य स् - कारादेशः भवति। अतः यदि उपरिनिर्दिष्टेषु किमपि परिमाणं न भवेत्तर्हि तत्र विसर्गस्य स् - कारादेशः न भवति । यथा-

अतः किम्? गीः कारः अत्र विसर्गात्पूर्वम् अकारः नास्ति।

अनव्यस्य किम्? स्वः कामः अत्र विसर्गवान् शब्दः अव्यम् अस्ति।

समासे किम् ? यशः करोति अत्र समासः नास्ति।

अनुत्तरपदस्थस्य किम्? परमयशः कारः अत्र यशः शब्दः परमशब्दस्य उत्तरपरूपेण वर्तते।

साधनिका -

अयः करोतीति अयस्कारः इति लौकिकविग्रहे, अयः+कारः इति स्थिते **अतः कृ-कमि-कंस-कुम्भ-पात्र-कुशा-कर्णीब्वअनव्ययस्य** इति सूत्रेण ह्रस्व-अकारात्परस्य समासस्थ-अनव्यस्य विसर्गस्य स्थानने नित्यं स् - कारादेशे कृते सति अयस्कारः इति रूपं सिद्ध्यति।

अयः कामयते इति अयस्कामः इति लौकिकविग्रहे, 'अयः + कामः' इति स्थिते' **अतः कृ-कमि-कंस-कुम्भ-पात्र-कुशा-कर्णीब्वअनव्यस्य** इति सूत्रेण ह्रस्व-अकारात्परस्य समासस्थ-अनव्यस्य विसर्गस्य स्थानने नित्यं स् - कारादेशे कृते सति अयस्कारः इति रूपं सिद्ध्यति।

अयसः कंसः अयस्कंसः इति लौकिकविग्रहे, अयः + कामः इति स्थिते **अतः कृ-कमि-कंस-कुम्भ-पात्र-कुशा-कर्णीब्वअनव्यस्य** इति सूत्रेण ह्रस्व-अकारात्परस्य समासस्थ-अनव्यस्य विसर्गस्य स्थानने नित्यं स् - कारादेशे कृते सति अयस्कारः इति रूपं सिद्ध्यति।

'अयसः पात्रम्' अयस्पात्रम् इति लौकिकविग्रहे, 'अयः + कामः' इति स्थिते **अतः कृ-कमि-कंस-कुम्भ-पात्र-कुशा-कर्णीब्वअनव्यस्य** इति सूत्रेण ह्रस्व-अकारात्परस्य समासस्थ-अनव्यस्य विसर्गस्य स्थानने नित्यं स् - कारादेशे कृते सति अयस्कारः इति रूपं सिद्ध्यति।

अयस्सहिता कुशा अयस्कुशा इति लौकिकविग्रहे, अयः+कामः इति स्थिते **अतः कृ-कमि-कंस-कुम्भ-पात्र-कुशा-कर्णीब्वअनव्यस्य** इति सूत्रेण ह्रस्व-अकारात्परस्य समासस्थ-अनव्यस्य विसर्गस्य स्थानने नित्यं स्-कारादेशे कृते सति अयस्कारः इति रूपं सिद्ध्यति।

अयसः कुम्भः अयस्कुम्भः इति लौकिकविग्रहे, अयः + कामः इति स्थिते **अतः कृ-कमि-कंस-कुम्भ-पात्र-कुशा-कर्णीब्वअनव्ययस्य** इति सूत्रेण ह्रस्व-अकारात्परस्य समासस्थ-अनव्यस्य विसर्गस्य स्थानने नित्यं स् - कारादेशे कृते सति अयस्कारः इति रूपं सिद्ध्यति।

अयसः कर्णी अयस्कर्णी इति लौकिकविग्रहे, अयः+कामः इति स्थिते **अतः कृ-कमि-कंस-कुम्भ-पात्र-कुशा-कर्णीब्वअनव्यस्य** इति सूत्रेण ह्रस्व-अकारात्परस्य समासस्थ-अनव्यस्य विसर्गस्य स्थानने नित्यं स्-कारादेशे कृते सति अयस्कारः इति रूपं सिद्ध्यति।

---

**(161) अधिशिरसी पदे । 8 । 3 । 53॥**

**वृत्तिः- एतयोर्विसर्गस्य सादेशः स्यात्पदशब्दे परे। अधस्पदम्। शिरस्पदम्। समास इत्येव। अधः पदम्। शिरः पदम्। शिरः पदम्। अनुत्तरपदस्थस्येत्येव। परमशिरः पदम्। कस्कादिषु च। भास्करः। ॥ इति विसर्गसन्धिप्रकरणम्॥**

पदच्छेदः - अधशिरसी, पदे द्विपदं सूत्रमिदम्।

समासः - अधः च शिरश्च अधशिरसी (द्वन्द्वः)

अनुवृत्तिः - विसर्जनीयस्य, सः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - अधस् - शिरस् - शब्दसम्बन्धिनः विर्सस्य स्थाने सकारादेशः भवति पदशब्दे परे।

समासे एव।

विशेषार्थः - पूर्वसूत्रैः अनुवर्तमानम् अनुत्तरपदस्थस्य इति पदम् अत्रापि युज्यते। अतः परमशिरःपदम् इत्यत्र शिरः शब्दः उत्तरपदत्वेन विद्यते इत्यतः अत्र विसर्गस्य स् - कारादेशः न भवति।

साधनिका -

अधः + पदम् इति स्थिते **अधशिरसी पदे** इति सूत्रेण समासस्थविसर्गस्य स्थाने सकारादेशे कृते सति शिरस्पदम् इति रूपं सिद्ध्यति।

**स्वाध्यायः**

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

(1) **सोऽपदादौ इति सूत्रेणेदं रूपं न सिद्ध्यति-**

(क) यशस्कल्पम् (ख) यशस्कम् (ग) यशस्काम्यति (घ) गीः काम्यति

(2) **सर्पिष्कम् इति रूपे विसर्गस्य ष्-कारः केन सूत्रेण भवति ?**

(क) इणः षः (ख) सोऽपदादौ (ग) वा शरि (घ) नमस्पुरसोर्गत्योः

(3) **कृत्वोऽर्थे किं रूपं नास्ति ?**

(क) द्विष्करोति (ख) चतुष्कपालः (ग) त्रिष्करोति (घ) चतुष्करोति

(4) **इदुदुपधस्य चाप्रत्ययस्य इति सूत्रेण किं रूपं न सिद्ध्यति?**

(क) स्-कारादेशः (ख) ष्-कारादेशः (ग) श्-कारादेशः (घ) विसर्गलोपः

**2. एकैकवाक्येन उत्तरं लिखत ।**

(1) **शर्परे विसर्जनीयः** इति सूत्रेण किं क्रियते ?

(2) अपदाद्योः कुप्वोः परयोः विसर्गस्य स्थाने किं परिवर्तनं भवति?

(3) परमसर्पिः कुण्डिका इत्यत्र विसर्गस्य ष्-कारादेशः किमर्थं न भवति ?

(4) '**इणः षः**' इति सूत्रं किं करोति ?

(5) पदशब्दे परे सति किं सूत्रं प्रवर्तते ?

**3. सविस्तरम् उत्तरं लिखत ।**

(1) विसर्गसन्धौ विधीयमानानि विसर्गस्य परिवर्तनानि निरूपयत।

(2) विसर्गस्य स्थाने षत्वविधायकानि सूत्राणि निर्दिशत।

**4. निम्नलिखितानि रूपाणि साधयत।**

| | |
|---|---|
| (1) हरि:शेते | (2) पयस्पाशम् |
| (3) हरि: स्फुरति | (4) अयस्काम: |
| (5) शिरस्पदम् | |

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायन्ताम्।**

(1) इदुदुपधस्य ...............

(2) अत: कृकमि ...............

(3) द्विस्त्रिश्चतु ...............

(4) नित्यं समासे ...............

**4. अविभागं बविभागेन सह योजयत।**

| **अ** | **ब** |
|---|---|
| (1) नमस्करोति | (अ) अधश्शिरसी पदे |
| (2) धनुष्करोति | (ब) नमस्पुसोर्गत्यो: |
| (3) अधस्पदम् | (क) इसुसो: सामर्थ्ये |
| (4) क: त्सरु: | (ड) विसर्जनीयस्य स: |
| (5) विष्णुस्त्राता | (ई) शर्परे विसर्जनीय: |

**छत्रप्रवृत्ति:**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं, पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखत।

◆

| 11 | # अथ स्वादिसन्धिप्रकरणम् |
|---|---|

**प्रस्तावना**

**सु-आदिः यस्य सः स्वादिः तदधिकृत्य क्रियमाणः सन्धिः स्वादिसन्धिः। श्रीमता भट्टोजिदीक्षितेन अस्मिन् प्रकरणे स्वादि प्रत्ययस्थानां स् - काराणां स्थाने जायमानानां विविधपरिवर्तनानां निरूपणं कृतमस्ति तत्र रुत्वं, यत्वं, लोपादीनि निरूपितानि। सुप्रत्यये विहिते सति विधीयमानानि पदकार्याणि चास्मिन् प्रकरणे निरूपितानि।**

**स्वौजसमौडिति सु प्रत्यये शिवस् अर्च्यः इति स्थिते।**

**(162) ससजुषो रुः। 8 । 2 । 66॥**

**वृत्तिः- पदान्तस्य सस्य सजुष्शब्दस्य च रुः स्यात्। जश्त्वापवादः।**

पदच्छेदः - ससजुषोः, रुः, द्विपदं सूत्रमिदम्।

समासः - सश्च सजूश्चेति ससजुषौ तयोः (द्वन्द्वः)।

अनुवृत्तिः - पदस्य।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - पदस्यान्ते स्थितस्य स्-कारस्य सजूष्-शब्दस्य च स्थाने रुकारादेशः भवति।

विशेषार्थः - अत्र झलां जशोऽन्ते इति सूत्रेण जश्त्वप्राप्तिः आसीत्। किन्तु अपवादः सर्वतो बलीयान् इति न्यायेन यत्रैतत् सूत्रं प्रवृत्तिं करिष्यति तत्र जश्त्वं न भविष्यति।

साधनिका - 'शिवस् + अर्च्यः' इत्यत्र पदान्तस्य स्-कारस्य स्थाने रुकारादेशः अतः शिवरु+अर्च्यः इति जाते।

**(163) अतो रोरप्लुतादप्लुते । 6 । 1 । 113॥**

**वृत्तिः - अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति। भो भगो अघो इति प्राप्तस्य यत्वस्यापवादः। उत्वं प्रति रुत्वस्यासिद्धत्वं तु न भवति, रुत्वमनूद्योत्वविधेः सामर्थ्यात्।**

पदच्छेदः - अतः, रोः, अप्लुतात्, अप्लुते चतुष्पदमिदं सूत्रम्।

समासः - न प्लुतः अप्लुतः तस्मात् अप्लुतात् (नञ्), न प्लुतः अप्लुतः तस्मिन् अप्लुते (नञ्)

अनुवृत्तिः - उः, अति।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - प्लुतभिन्नात् ह्रस्व-अकारात् परस्य रु-कारस्य उ-कारादेशः भवति यदि रोः परं प्लुतभिन्नः ह्रस्व-अकारः स्यात्।

विशेषार्थः - इदं सूत्रं 'भोभगोऽघोऽपूर्वस्य योऽशि' इति सूत्रस्य अपवादसूत्रम् अतः यत्र उत्वं भवेत् तत्र यत्वं न भविष्यति। यद्यपि अत्र 'ससजुषो रुः' इत्यनेन कृतं रुत्वम् अस्य सूत्रस्य अपेक्षायाम् असिद्धं भवति किन्तु रुत्वविधिसामर्थ्यात् तस्य सिद्धत्वमस्ति। अन्यथा समग्रशास्त्रे रुत्वस्य असिद्धत्वात् अन्यस्य पदान्त - रुकारस्य स्थाने विधेः असम्भवात्।

साधनिका - शिव + रु + अर्च्यः इत्यत्र वकारस्थः अप्लुत-अकारः अस्ति तदनन्तरं रुकारः ततश्च अर्च्यः, इत्यत्र अकारः पुनः अप्लुत-अकारः विद्यते अतः द्वयोः अप्लुतह्रस्व-अकारयोः मध्यस्थस्य रु-कारस्य स्थाने उकारादेशः भवति। शिव + उ + अर्च्यः इति जाते।

**164) प्रथमयोः पूर्वसवर्णः । 6 । 1 । 102॥**

**वृत्तिः- अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात्। इति प्राप्ते।**

पदच्छेदः - प्रथमयोः, पूर्वसवर्णः द्विपदं सूत्रमिदम्।

समासः - प्रथमा च प्रथमा (द्वितीया) च प्रथमे तयोः - प्रथमयोः (एकशेषद्वन्द्वः), पूर्वस्य सवर्णः- पूर्वसवर्णः (ष. त. पुरुषः)

अनुवृत्तिः - पूर्वपरयोः एकः, अकः, अचि।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - अक्-प्रत्याहारस्य वर्णानन्तरं यदि प्रथमा - द्वितीयासम्बन्धी अच् - स्वरः भवति तर्हि तयोः द्वयोः स्थाने पूर्वसवर्णदीर्घ एकादेशः भवति।

विशेषार्थः- सूत्रमेतत् एकः पूर्वपरयोः इति अधिकारसूत्रम् अनुवर्तते अतः अनेन क्रियमाणः विधिः पूर्वस्य परस्य च स्थाने एकादेशरूपेण भविष्यति इत्थं पूर्वे विद्यमानः अक्-अनन्तरं विद्यमानः प्रथमा-द्वितीयाविभक्तिसम्बद्धः अच् इति द्ववौ मिलित्वा पूर्वस्मिन् विद्यमानस्य अकः दीर्घं रूपं धारयतः यथा - अत्र शिव+उ इत्यत्र वकारस्थितः अकारः अक् - प्रत्याहारस्य विद्यते ततश्च उकारः प्रथमाविभक्तेः अच् विद्यते अतः अत्र द्वयोः स्थाने पूर्वसवर्णदीर्घ एकादेशः प्राप्यते यदि सम्भवति चेत् अकार - उकारयोः स्थाने पूर्ववर्तिनः अकारस्य दीर्घं रूपम् अर्थात् आकारः भवेत् तेन च शिवा इति रूपापत्तिः प्राप्ता भवति।

साधनिका - शिव + उ इत्यत्र अनेन सूत्रेण पूर्वसवर्णदीर्घ - एकादेशे प्राप्ते।

---

**(165) नादिचि। । 6 । 1 । 104॥**

**वृत्तिः - अवर्णादिचि परे पूर्वसवर्णदीर्घो न। आद्गुणः - एङः पदान्तादति। शिवोऽर्च्यः। अतः इति तपरः किम्? देवा अत्र । अतः इति तपरः किम् । श्व आगन्ता । अप्लुतात्किम् ? एहि सुश्रोत३ अत्र स्नाहि। प्लुतस्यासिद्धत्वादतः परोऽयम्। अप्लुतात् इति विशेषणे तु तत्सामर्थ्यान्नासिद्धत्वम्। तपरकरणस्य तु न सामर्थ्यम्, दीर्घनिवृत्त्या चरितार्थत्वात्। अप्लुते इति किम्? तिष्ठतु पयः अ३ग्निदत्त गुरोरनृत (सू. 90) इति प्लुतः।**

---

पदच्छेदः - न, आत्, इचि त्रिपदं सूत्रमिदम्।

अनुवृत्तिः - पूर्वसवर्णः।

सूत्रप्रकारः - विधिसूत्रम् (निषेधः)।

सरलार्थः - अवर्णात् इच् - प्रत्याहारस्य वर्णाः भवेयुः तर्हि पूर्वसवर्णदीर्घ एकादेशः न भवति।

विशेषार्थः- सूत्रमेतत् पूर्वसूत्रेण क्रियमाणस्य विधेः विस्तारं संकोचयति तेन च प्राप्तं पूर्वसवर्णदीर्घैकादेशं निषेधयति।

अतोरोरप्लुतादप्लुते इत्यस्मिन् सूत्रे -

अतः इति तपरग्रहणं किमर्थमिति यदि रो- पूर्वं ह्रस्व अकारः न भवेत् तर्हि रु-कारस्य उत्वं न भवति यथा - देवास् + अत्र अस्मिन् उदाहरणे 'ससजुषो रुः' इति सूत्रेण रुत्वे कृते देवाः+रु इति जाते अत्र रोः पूर्वम् ह्रत्व-अकारः नास्ति अतः तस्य उत्वं न भवति 'भो-भगो-अधो-अपूर्वस्य योऽशि' इति सूत्रेण रोः यत्वं भवति लोपे च कृते देवा अत्र इति रूपं सिद्धयति।

तस्मिन्नेव सूत्रे अति इति तपरग्रहणं किमर्थमिति चेत् - यदि रोः अनन्तरं ह्रस्व-अकारः न स्यात् तर्हि अपि रोः उत्वम् अनेन सूत्रेण न भवति । यथा - श्वस् + आगन्ता इत्यत्र श्वस् इत्यत्र 'ससजुषो रुः' इति सूत्रेण रुत्वे सति श्व रु + सति श्व रु + आगन्ता इति जाते रोः अनन्तरं ह्रस्व-अकाराभावात् उत्वस्य प्राप्तिर्न भवति अपि तु यत्वं, लोपश्चेति कृत्वा श्व आगन्ता इति रूपं सिद्धयति।

तत्रैव अप्लुतात् इति सूत्रितं किमर्थमिति चेत् - रुत्वात् पूर्वः ह्रस्व-अकारः प्लुतभिन्नः अपेक्षितः यदि प्लुतः अकारः स्यात्तर्हि सूत्रस्यास्य प्रवृत्तिः न भवति यथा - एहि सुश्रोत अत्र स्नाहि। अस्मिन् उदाहरणे सुत्रोतम् + स् इत्यत्र सम्बुद्धौ विभक्तिलोपानन्तरं अस् इति टिभागस्य 'दूराद्धूते च' इति सूत्रेण प्लुतत्वे कृते सुत्रोतस् इति सस्य रुत्वे रेफे कृते सुश्रोत + र् इति जाते अत्र अकारस्य प्लुतत्वात् रोः उत्वाभावे सति यत्वे लोपे च कृते सुस्त्रोत इति सिद्धयति। तस्मिन्नेव सूत्रे अप्लुते अर्थात् रोः अनन्तरमपि प्लुतभिन्नः ह्रस्व- अकारः भवेत् इति अपेक्षा अस्ति। अतः तिष्ठतु पय अग्निदत्त इत्यत्र पयस् + अग्निदत्त अत्र पयस्- शब्दस्य सस्य रुत्वे रेफे च कृते अनेन सूत्रेण उत्वं न भवति यतो हि परे प्लुतः अकारः विद्यते अतः यत्वे लोपे च कृते पय इति रूपं सिद्धयति।

साधनिका – शिव + उ इत्यत्र प्रथमयोः पूर्वसवर्णः इत्यनेन प्राप्तस्य पूर्वसवर्णदीर्घैकादेशस्य इच् – उकारः परे अस्ति अतः निषेधः भवति। अतः शिव + उ + अर्च्यः इत्यत्र अकार – उकारयोः आद्गुणः इति सूत्रे गुणैकादेशे शिवो + अर्च्यः इति जाते एङः पदान्तादति इति सूत्रेण ओकार – अकारयोः पूर्वरूपैकादेशे कृते शिवोऽर्च्यः इति रूपं सिद्धयति।

**(166) हशि च। 6।1। 114॥**

**वृत्तिः – अप्लुतादतः परस्य रोरुः स्याद्धशि। शिवो वन्द्यः। रोरित्युकारानुबन्धग्रहणान्नेह – । प्रातरत्र। भ्रातर्गच्छ। देवास् इह इति स्थिते रुत्वम्।**

पदच्छेदः – हशि, च द्विपदं सूत्रमिदम्।

अनुवृत्तिः – अतः, रोः, अप्लुतात्, उत्।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – प्लुतभिन्न-ह्रस्व-अकारानन्तरं यदि रुः तदनन्तरं च हश् – प्रत्याहारः स्यात्तर्हि रोः उत्वं भवति।

विशेषार्थः– सूत्रमिदं अतोरोरप्लुतादप्लुते इति सूत्रस्यानुवर्तते। अत्र रोः इति उकारसहितस्य रेफस्य ग्रहणात् यत्र स्वाभाविकः रेफः भवति तत्र 'अतो रोरप्लुतादप्लुते' इति सूत्रेण उत्वं न क्रियते यथा – प्रातर् अत्र इत्यत्र प्रातर् इति अव्यये र्-कारः रु-इत्यस्य परिवर्तनरुपेण नास्ति अपि तु मूलतः रेफः विद्यते अतः तत्र अस्य सूत्रस्य प्रवृत्तिः न भवति। तेन च प्रातरत्र इति वर्णसम्मेलनमात्रं सम्भवति।

इत्थमेव भ्रातर् + गच्छ इत्यत्रापि रुत्वस्य रेफस्याभावात् हशि च इति सूत्रेण उत्वं न भवति, वर्णसम्मेलनेन भ्रातर्गच्छ इति सम्भवति।

साधनिका – शिवस् + वन्द्यः इति स्थिते ससजुषो रुः इति सूत्रेण पदान्तस्य सस्य रुत्वे, शिव रु + वन्द्यः इति जाते हशि परे सति रुकारस्य हशि च इति सूत्रेण उत्वे शिव + उ + वन्द्यः इति जाते, प्रथमयोः पूर्वसवर्ण इति सूत्रेण प्राप्तस्य पूर्वसवर्णदीर्घैकादेशस्य नादिचि इति सूत्रेण निषेधे कृते आद्गुणः इति सूत्रेण अकार – उकारयोः गुणैकादेशे शिवो वन्द्यः इति रूपं सिद्ध्यति।

**(167) भो - भगो - अघो - अपूर्वस्य योऽशि। 8।3। 17॥**

**वृत्तिः – एतत्पूर्वस्य रोर्यादेशः स्यादशि परे। असन्धिः सौत्रः। लोपः शाकल्यस्य । देवा इह – देवायिह। अशि किम् ? देवास्सन्ति। यद्यपीदं यत्वस्यासिद्धत्वाद्विसर्गो लभ्यते। तथापि विसर्गस्य स्थानिवद्भावेन रुत्वाद्यत्वं स्यात्। न ह्यमल्विधिः। रोरिति समुदायरूपाश्रयणात्। भोस् भगोस् अघोस् इति सकारान्ता निपाताः। तेषां रोर्यत्वे कृते।**

पदच्छेदः – भो-भगो-अघो-अपूर्वस्य, यः, अशि त्रिपदं सूत्रमिदम्।

समासः – भोश्च भगोश्च अघोश्च अश्च इति भो-भगो-अघो-आः एते पूर्वे यस्मात् स भो-भगो-अघो-अपूर्वः तस्य (द्वन्द्वगर्भः बहुव्रीहिः)

अनुवृत्तिः – रोः।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – भो-भगो-अघो-अकारः इत्येतेषाम् अनन्तरं रुः तदनु च अश्-प्रत्याहारस्य वर्णः स्यात् तर्हि रोः स्थाने य्-कारादेशः भवति।

विशेषार्थः – अस्मिन् सूत्रे सन्ध्यभावः प्रवर्तते स च सौत्रः। भोस्, भगोस्, अघोस् इति सकारान्ताः निपाताः सन्ति। अत्र ओकारानन्तरं स्थितः स् – कार एव रुत्वं प्राप्नोति तस्यैव यत्वमिति शेषः। सूत्रमिदम् असिद्ध-त्रिपाद्यां विद्यते अतः तेन कृतं यत्वमपि असिद्धं स्यात् अतः तस्य स्थाने विसर्गः प्राप्तः भवति। किन्तु एवं कृतेऽपि स्थानिवद्भावेन पुनः रुत्वात् यत्वं प्राप्यते यतः अत्र सूत्रेषु रु इत्यस्य स्थाने आदेशः भवति न खलु रेफस्य स्थाने अतः रु-इति समुदायस्य आश्रयणं भवति न तु केवलस्य रेफरूपस्य वर्णस्य अतः एषः अल्विधिः नास्ति तेन च स्थानिवदादेशोऽनल्विधौ इत्यत्र निर्दिष्टस्य अल्विधेः अभावात् रोः यत्वं सम्भवति। इत्थं रुत्वविधिसामर्थ्यात् असिद्धे सत्यपि सूत्रे तेन कृतायाः प्रवृत्तेः असिद्धत्वं नास्ति।

सूत्रे अशि इति पदं किमर्थमिति चेत् – रोः अनन्तरम् अश् – प्रत्याहारस्य वर्णाः अपेक्षिताः यदि न स्युः तर्हि अस्य सूत्रस्य प्रवृत्तिः न भवति यथा –

देवास् + सन्ति इत्यत्र अवर्णानन्तरस्थितस्य पदान्तस्य सस्य ससजुषो रुः इत्यनेन रुत्वे कृते देवा रु + सन्ति इति जाते अत्र रोः अनन्तरं स्थितः सन्ति, इत्यस्य सकारः अश् – भिन्नः वर्णः अस्ति, अतः सूत्रस्यास्य प्रवृत्तिर्न भवति। देवास्सन्ति इति रूपं विसर्गे सत्वे कृते सिद्ध्यति।

साधनिका – देवास् इह इत्यत्र ससजुषो रुः इति सूत्रेण सस्य रुत्वे कृते देवा रु + इह इति जाते भो–भगो–अघो–अपूर्वस्य योऽशि इति सूत्रेण रुकारस्य यत्वे कृते देवाय् + इह इति जाते, लोपः शाकल्यस्य इति सूत्रेण अवर्णपूर्वकस्य पदान्तस्य यकारस्य विकल्पेन लोपे कृते 'देवा इह' इति रुपं सिद्ध्यति। लोपाभावपक्षे – देवायिह इति रुपं सिद्ध्यति।

**(168) व्योर्लघुप्रयत्नतरः शाकटायनस्य।8।3। 18॥**

**वृत्तिः – पदान्तयोर्वकारयकारयोर्लघूच्चारणौ वयौ वा स्तोऽशि परे । यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं जायते स लघूच्चारणः।**

पदच्छेदः– व्योः, लघुप्रयत्नतरः, शाकटायनस्य त्रिपदं सूत्रमिदनम्।

समासः– व् च य् च व्यौ तयोः (द्वन्द्वः)। लघुः प्रयत्नो यस्योच्चारणे स लघुप्रयत्नः अतिशयितः लघुप्रयत्नः लघुप्रयत्नतरः (बहुव्रीहिः)।

अनुवृत्तिः– अशि, पदस्य।

सूत्रप्रकारः– विधिसूत्रम्।

सरलार्थः – पदान्तयोः व् – कार / य् – कारयोः अशि परे विकल्पेन क्रमशः लघुप्रयत्नतरः व्–कारः / य्–कारः आदेशः भवति।

विशेषार्थः – लघुप्रयत्नः अर्थात् यदा उच्चारणे जिह्वायाः अग्रभागस्य, अग्रसमीपवर्तिभागस्य, मध्यभागस्य, मूलभागस्य वा उच्चारणसमये यदा शिथिलता भवति तदा तत् उच्चारणं लघूच्चारणमिति कथ्यते तादृशप्रयत्नवान् वर्णः लघुप्रयत्न इति अत्रापि तरप् – प्रत्ययग्रहणेन अतिशयतायाः निर्देशः बोद्धव्यः। अत्र शाकटायनस्य मतानुसारं सूत्रप्रवृत्तिः अतः विकल्पेनास्य सूत्रस्य प्रवर्तना॥

**(169) ओतो गार्ग्यस्य। 8।3। 19॥**

**वृत्तिः– ओकारात्परस्य पदान्तस्याऽलघुप्रयत्नस्य यकारस्य नित्यं लोपः स्यात्। गार्ग्यग्रहणं पूजार्थम्। भो अच्युत। लघुप्रयत्नपक्षे – भोयच्युत। पदान्तस्य किम् ? तोयम्।**

पदच्छेदः – ओतः, गार्ग्यस्य द्विवपदं सूत्रमिदम्।

अनुवृत्तिः – व्योः, लोपः, अशि।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – ओकारानन्तरं विद्यमानस्य पदान्तस्य य्–कारस्य व्–कारस्य अशि परे नित्यं लोपः भवति इति गार्ग्यस्य मतम्।

विशेषार्थः– पूर्वसूत्रे शाकटायनस्य मतं निर्दिश्य अधुना अन्येषाम् आचार्याणां मतानुसारं प्रवृत्तिः निर्दिश्यते। सूत्रं गार्ग्य–ग्रहणं विकल्पदर्शनाय न अपि तु सम्मानं दर्शयितुम् अतः अत्र सूत्रप्रवृत्तिः नित्यत्वेन भवति।

अत्र पदान्तस्य इति किमर्थमिति चेत् – अपदान्ते अस्य सूत्रस्य प्रवृत्तिः मा भूत्। यथा – तोयम् इत्यत्र ओकारात्परः य्–कारः पदान्तः नास्ति, अतः अस्य सूत्रस्य प्रवृत्तिः, न भवति।

साधनिका –

'भोस् + अच्युत' इति स्थिते 'ससजुषो रु' इति सूत्रेण पदान्तस्य सस्य रुत्वे भो रु + अच्युत इति जाते भो – भगो–अघो–अपूर्वस्य योऽशि इति सूत्रेण रु–कारस्य यत्वे भो य् + अच्युत इति जाते व्योर्लघुप्रयत्नतरः शाकटायनस्य इति सूत्रेण विकल्पेन पदान्तस्य य् – कारस्य लघुप्रयत्न उच्चारणादेशे भोयच्युत इति रुपं जातम्। पक्षे अलघुप्रयत्नपक्ष–भो य् + अच्युत इति जाते लोपः शाकल्यस्य इति सूत्रेण विकल्पेन य् – लोपे प्राप्ते तं प्रबाध्य 'ओतो गार्ग्यस्य' इति सूत्रेण ओकारात्परस्य अलघुप्रयत्नस्य पदान्तस्य य् – कारस्य नित्यं लोपे 'भो अच्युत' इति रूपम् सिद्ध्यति।

**(170) उञि च पदे । 8।3। 21॥**

**वृत्तिः- अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोप उञि परे। स उ एकाग्निः। पदे किम् ? तन्त्रयुतम्। वेञः सम्प्रसारणे रूपम्। यदि तु प्रतिपदोक्तः निपात उ ञिति ग्रहीष्यते तर्ह्युत्तरार्थं पद ग्रहणम्।**

पदच्छेदः - उञि, च, पदे त्रिपदं सूत्रमिदम्।

अनुवृत्तिः - अपूर्वस्य, पदस्य, लोपः, व्योः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - अवर्णानन्तरं विद्यमानयोः पदान्तयोः य् - कार /व्-कारयोः उञि परे लोपः भवति।

विशेषार्थः - उञ् इति अव्ययम्। तत्र ञ् - कारस्य इत्संज्ञालोपौ। अत्र य्-कार / व् - कारयोः पूर्वम् अकारः परे च उञ् इति अव्यम् आवश्यकम्। सूत्रे पदे इति ग्रहणं किमर्थमिति चेत् य्-कार /व्-कारौ पदान्तस्थौ अपेक्षितौ अपदान्ते अस्य सूत्रस्य प्रवृत्तिर्न भवति। यथा - तन्त्रयुतम् इत्यत्र वेञ् धातोः प्रत्यये कृते सति उतम् इति रूपं भवति। अतः तन्त्रे + उतम् इत्यत्र एचोऽयवायावः इति सूत्रेण अयादेशे कृते तन्त्रय् + उत्तम् इति जाते उकारस्य अपदान्तत्वात् पूर्ववर्तिनः य्-कारस्य अनेन सूत्रेण लोपो न भवति, वर्ण-सम्मेलने सति 'तन्त्रयुतम्' इति रूपं सिद्ध्यति।

साधनिका - 'सस् उ एकाग्निः' इति स्थिते 'ससजुषो रुः' इति सूत्रेण पदान्तस्य सस्य रुत्वे अनुबन्धलोपे सर् + उ एकाग्निः' इति जाते 'भो-भगो-अघो-अपूर्वस्य योऽशि' इति रेफस्य यत्वे 'कृते सय् + उ एकाग्निः' इति जाते 'उञि च पदे' इति सूत्रेण उञि परे सति पदान्तस्य यस्य लोपे 'स उ एकाग्निः' इति रूपं सिद्ध्यति।

**(171) हलि सर्वेषाम्।8।3। 22॥**

**वृत्तिः- भोभगोअघोअपूर्वस्य लघ्वलघूच्चारणस्य यकारस्य लोपः स्याद्धलि सर्वेषां मतेन। भो देवाः। भो लक्ष्मि। भो विद्वद्वृन्द। भगो नमस्ते। अघो याहि। देवा नम्याः। देवा यान्ति। हलि किम् ? देवायिह - देवा इह।**

पदच्छेदः - हलि, सर्वेषाम् द्विपदं सूत्रमिदम्।

अनुवृत्तिः - भो-भगो-अघो-अपूर्वस्य, लोपः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - भो-भगो-अघो-अपूर्वस्य लघूच्चारणवतः अलघूच्चारणवतः य् - कारस्य हलि परे लोपः भवति सर्वेषाम् आचार्याणां मतेन।

विशेषार्थः - अनेन सूत्रेण क्रियमाणे कार्ये, सर्वेषाम् आचार्याणां सम्मतिः अस्ति, इत्युक्ते शाकटायनस्यापि अभिमतं कार्यमिदमित्यर्थः। अतः भो-भगो-अघो-सम्बन्धिनः ओकारानन्तरं लघूच्चारणवतः य्-कारस्य लोपः हलि परे अनेन सूत्रेण भवति। अलघूच्चारणवतः य्-कारस्य लोपः 'ओतो गार्ग्यस्य' इति सूत्रेण भवति। अवर्णानन्तरं स्थितस्य पदान्तस्य लघ्वलघुप्रयत्नस्य उच्चारणवतः य्-कारस्य लोपः अनेन सूत्रेण भवति।

साधनिका - 'भोस् + देवाः' इति स्थिते 'ससजुषो रुः' इति सूत्रेण पदान्तस्य सस्य रुत्वे अनुबंधलोपे भोर् + देवाः इति जाते 'भो-भगो-अघो अपूर्वस्य योऽशि' इति सूत्रेण रेफस्य यत्वे कृते 'भोय् + देवाः' इति जाते 'हलि सर्वेषाम्' इति सूत्रेण यकारलोपे कृते 'भो देवाः' इति रूपं सिद्ध्यति।

एवमेव 'भो लक्ष्मि'। भो विद्वद्वृन्द। इति रूपे सिद्ध्यतः।

'भगोस् + नमस्ते' इत्यत्र 'ससजुषो रुः' इति सूत्रेण पदान्तस्य सस्य रुत्वे अनुबन्धे लोपे भगोर् + नमस्ते इति जाते भो-भगो-अघो-अपूर्वस्य योऽशि 'इति सूत्रेण रेफस्य यत्वे कृते' भगोय् + देवाः इति जाते 'हलि सर्वेषाम्' इति सूत्रेण यकारलोपे कृते 'भगो नमस्ते' इति रूपं सिद्ध्यति।

'भगोस् + याहि' इति स्थिते ''सजुषो रुः' इति सूत्रेण पदान्तस्य सस्य रुत्वे अनुबन्धेलोपे भगोर् + नमस्ते इति जाते 'भो-भगो-अघो-अपूर्वस्य योऽशि' इति सूत्रेण रेफस्य यत्वे कृते भगोय् + देवाः इति जाते हलि सर्वेषाम् इति सूत्रेण यकारलोपे कृते भगो नमस्ते इति रूपं सिद्ध्यति।

देवास् + नम्याः ससजुषो रुः इति सूत्रेण पदान्तस्य सस्य रुत्वे अनुबन्धे 'देवास् + नम्याः' इति जाते भो-भगो-अघो-अपूर्वस्य योऽशि इति सूत्रेण रेफस्य यत्वे कृते देवास् + नम्याः इति जाते हलि सर्वेषाम् इति सूत्रेण यकारलोपे कृते देवास + नम्याः इति रूपं सिद्ध्यति।

देवास् + यान्ति 'ससजुषो रुः' इति सूत्रेण पदान्तस्य सस्य रुत्वे अनुबन्धे देवार् + यान्त्रिः इति जाते भो-भगो-अघो-अपूर्वस्य योऽशि इति सूत्रेण रेफस्य यत्वे कृते देवाय् + यान्तिः इति जाते 'हलि सर्वेषाम्' इति सूत्रेण यकारलोपे कृते देवा + यान्ति इति रूपं सिद्ध्यति।

---

**(172) रोऽसुपि। 8।2। 69॥**

**वृत्तिः- अह्नो रेफादेशः स्यात्, न तु सुपि। रोः अपवादः। अहरहः। अहर्गणः। असुपि किम् ? अत्र अहन् (सू.४४४) इति रुत्वम्। रुपरात्रिरथन्तरेषु रुत्वं वाच्यम् (वा. 4748) अहोरूपम्। गतमहो रात्रिरेषा। एकदेशविकृतमनन्यत्वादहोरात्रः। अहोरथन्तरम्। अहरादीनां वा रेफः (वा.4851)॥ विसर्गापवादः। अहर्पतिः। गीर्पतिः। धूर्पतिः। पक्षे विसर्गोपध्मानीयौ।**

---

पदच्छेदः - रः, असुपि द्विपदं सूत्रमिदम्।

समासः - न सुप् इति असुप् तस्मिन् (नञ्)। असुपि

अनुवृत्तिः - अहन्।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - अहन्-शब्दस्य अन्त्यभागस्य स्थाने रेफादेशः भवति यदि सुप्-प्रत्ययाः परे न स्युः।

(वार्तिकार्थः-4748) - रूप-रात्रि-रथन्तरशब्दाः परे स्युः तर्हि अहन्-शब्दस्य रुत्वादेशः भवति।

(वार्तिकार्थः-4851) - अहर्-आदिभ्यः शब्देभ्यः अनन्तरं यदि पति-आदयः शब्दाः स्युः तर्हि विकल्पेन रेफादेशः भवति।

विशेषार्थः - अस्मिन् सूत्रे अहन्-शब्दस्य स्थाने रेफादेशः निर्दिष्टः तत्र अलोऽन्त्यस्य सूत्रेण अन्त्यस्य इत्यर्थग्रहणम् करणीयम्। अतः न्-कारस्य स्थाने रेफादेशः भवति।

सूत्रे 'असुपि' इति किमर्थम्-सुपि परे सति अस्य सूत्रस्य प्रवृत्तिः न भवति यथा - अहोभ्याम् इत्यत्र अहन् + भ्याम् इति स्थिते सुप् परे अस्ति अतः सूत्रमेतत् प्रवृत्तं न भवति किन्तु अहन् इति सूत्रेण न्-कारस्य रुत्वे 'हशि च' इति सूत्रेण उत्वे, गुणैकादेशे च कृते अहोभ्याम् इति रुपं सिद्ध्यति। (रुत्वविधानात् उत्वलाभः रेफादेशे सति उत्वं न भवति।)

(वार्तिकविशेषार्थः -4748) - वार्तिकमिदं सूत्रे निर्दिष्टस्य असुपि इत्यस्य अपवादं दर्शयति अतः अहन्-शब्दानन्तरं रूप-रात्रि-रथन्तरशब्दाः भवन्ति अर्थात् तत्र सुप्-भिन्नशब्दाः भवन्ति तथापि तत्र न्-कारस्य रेफः न अपि तु रुत्वं भवति।

(वार्तिकविशेषार्थः - 4851) - अस्मिन् वार्तिके अहरादीनाम् इत्युल्लिखितत्वात् अहन्-शब्दस्य न्-कारस्य स्थाने अहन् इति सूत्रेण रुत्वं भवति अनन्तरं सूत्रस्यास्य प्रवृत्तिः भवति। वार्तिकमिदं विसर्गस्य बाधं करोति। वार्तिकमिदं विकल्पेन प्रवर्तते अतः यदा रेफादेशः न भवति तदा विसर्गः तदनु च जिह्वामूलीयोपध्मानीयौ भवतः।

साधनिका -

(1) अहन् + अहन् इति स्थिते रोऽसुपि इति सूत्रेण उभयत्रापि न्-कारस्य स्थाने रेफादेशे अहर् + अहर् इति जाते द्वितीयस्य रेफस्य ''खरवसानयोर्विसर्जनीयः'' इति सूत्रेण विसर्गे वर्णसम्मेलने अहरहः इति रूपं सिद्ध्यति।

(2) 'अहन् + गणः' इति स्थिते 'रोऽसुपि' इति सूत्रेण अहन्-शब्दस्य न्-कारस्य स्थाने रेफादेशे जलतुम्बिकान्यायेन रेफस्योर्ध्वगमने 'अहर्गणः' इति रूपं सिद्ध्यति।

(वार्तिकसाधनिका-4848)

(1) अहन् + रूपम् इति स्थिते रोऽसुपि इति सूत्रेण न्-कारस्य रेफादेशे प्राप्ते तं प्रबाध्य ''रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्'' इति वार्तिकेन न्-कारस्य रुत्वे अह रु + रूपम् इति जाते हशि च इति सूत्रेण उत्वे, अह उ + रूपम् इति जाते आदगुणः इति सूत्रेण गुणैकादेशे कृते अहोरूपम् इति सिद्ध्यति।

(2) अहन् + रात्रिः 'इति स्थिते' 'रोऽसुपि' इति सूत्रेण न्-कारस्य रेफादेशे प्राप्ते तं प्रबाध्य रूपरात्रिरथन्तरेषु रुत्वं वाच्यम् इति वार्तिकेन न्-कारस्य रुत्वे 'अह रु + रूपम्' इति जाते 'हशि च' इति सूत्रेण उत्वे, अह उ + रूपम् इति जाते आदगुणः इति सूत्रेण गुणैकादेशे कृते अहोरूपम् इति रूपं सिद्ध्यति।

(3) 'अहन् + रथन्तरम्' इति 'स्थिते रोऽसुपि' इति सूत्रेण न्-कारस्य रेफादेशे प्राप्ते तं प्रबाध्य ''रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्'' इति वार्तिकेन न्-कारस्य रुत्वे 'अह रु + रूपम्' इति जाते 'हशि च' इति सूत्रेण उत्वे, 'अह + उ + रूपम् इति जाते '(आद्गुणः)' इति सूत्रेण गुणैकादेशे कृते अहोरूपम् इति रूपं सिद्ध्यति।

(वार्तिकसाधनिका-4851)

अहन् + पतिः इति स्थिते अहन् इति सूत्रेण न्-कारस्य रुत्वे 'अह रू + पतिः' इति जाते ''अहरादीनां पत्यादिषु वा रेफः'' इति वार्तिकेन विसर्गस्य विकल्पेन बाधं कृत्वा रेफे 'अहर् + पतिः' जलतुम्बिकान्यायेन रेफस्य ऊर्ध्वगमने अहर्पतिः इति रूपं सिद्ध्यति। रेफाभावपक्षे कुप्वो ᳲक ᳲ पौ च इति सूत्रेण उपध्मानीये कृते अह ᳲ पतिः इति रूपं सिद्ध्यति। चाद्विसर्गे कृते अहः पतिः रूपं सिद्ध्यति।

गीर् + पतिः इति स्थिते प्राप्तं विसर्गं बाधित्वा 'अहारदीनां पत्यादिषु वा रेफः' इति वार्तिकेन विकल्पेन रेफे कृते 'गीर्पतिः' इति रुपं सिद्ध्यति। रेफाभावपक्षे - कुप्वो ᳲ क ᳲ पौ च इति सूत्रेण उपध्मानीये कृते गी ᳲ पतिः इति रूपं सिद्ध्यति। चाद्विसर्गे कृते गीः पतिः इति रूपं सिद्ध्यति।

धूर् + पतिः इति स्थिते प्राप्तं विसर्गं बाधित्वा 'अहरादीनां पत्यादिषु वा रेफः' इति वार्तिकेन विकल्पेन रेफे कृते धूर्पतिः इति रूपं सिद्ध्यति। रेफाभावपक्षे - कुप्वो ᳲ क ᳲ पौ च इति सूत्रेण उपध्मानीये कृते धू ᳲ पतिः इति रूपं सिद्ध्यति। चाद्विसर्गे कृते धूःपतिः इति रूपं सिद्ध्यति।

---

**(१७३) रो रि।8।3।14॥**

**वृत्तिः- रेफस्य रेफे परे लोपः स्यात्।**

---

पदच्छेदः - रः, रि द्विपदं सूत्रमिदम्।

अनुवृत्तिः - लोपः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - र् - कारात् परे रेफः भवेत् तर्हि पूर्वस्य रेफस्य लोपः भवति।

विशेषार्थः - स्पष्टं सूत्रमिदम्।

साधनिका - अग्रिमसूत्रमनुवर्तते।

---

**(174) ढ्रलोपे पूर्वस्य दीर्घोऽणः। 8।3।111॥**

**वृत्तिः - ढरेफौ लोपयतीति तथा। तस्मिन्वर्णेऽर्थाद् ढकारे रेफात्मके परे पूर्वस्याणो दीर्घः स्यात्। पुना रमते। हरी रम्यः। शम्भू राजतते। अणः किम् ? तृढः। वृढः । तृहू हिंसायाम्। वृहू उद्यमने। पूर्वग्रहणमनुत्तरपदेऽपि । पूर्वमात्रस्यैव दीर्घार्थम्। लीढः। मनस् रथः इत्यत्र रुत्वे कृते हशि च इत्युत्वे रो रि इति रेफलोपे च प्राप्ते।**

---

पदच्छेदः- ढ्रलोपे, पूर्वस्य, दीर्घः, अणः चतुष्पदं सूत्रमिदम्।

समासः - ढ् च रेफश्च ढ्रौ तौ लोपयति इति ढ्रलोपः तस्मिन्। ( द्वन्द्वगर्भ - उपपदसमासः)

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - ढ्-कारस्य रेफस्य वा लोपस्य निमित्तरूपौ ढ्-कारः रेफः वा परे स्याताम् तर्हि ततः पूर्वस्थितस्य अण्-प्रत्याहारस्य वर्णस्य दीर्घः भवति।

विशेषार्थः - ढ्-कारादनन्तरं ढ्-कारः भवेत् तर्हि 'ढो ढे लोपः' इति सूत्रं पूर्वस्य ढकारस्य लोपं करोति। तद्वदेव रेफादनन्तरं रेफः भवेत्तर्हि 'रो रि' सूत्रं पूर्वस्य रेफस्य लोपं करोति। अस्यां स्थितौ परिवर्तिनौ ढ-रेफौ स्वतः पूर्ववर्तिनोः ढ-रेफयोः लोपस्य निमित्तभूतौ भवतः। अतः अस्याम् अवस्थायां पूर्वत्र यदि अण्-प्रत्याहारस्य वर्णः (अ, इ, उ) भवेत्तर्हि तस्य दीर्घः (आ, ई, ऊ) भवति।

साधनिका -

यथा-पुनर् + रमते इति स्थिते 'रो रि' इति सूत्रेण पूर्वस्य रेफस्य लोपे 'पुन + रमते' इति जाते 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रेण रेफलोपस्य निमित्ते रेफे परे सति पूर्वस्य नकारस्थस्य अकारस्य दीर्घे कृते 'पुना रमते' इति रूपं सिद्ध्यति।

'हरिस् + रम्यः' इति स्थिते ससजुषो रुः इति सूत्रेण पदान्तस्य सस्य रुत्वे हरि रु-र् + रम्यः इति जाते रो रि इति सूत्रेण पूर्वस्य रेफस्य लोपे हरि + रम्यः इति जाते ढ्रलोपे पूर्वस्य दीर्घोऽणः इति सूत्रेण रेफलोपस्य निमित्ते रेफे परे सति पूर्वस्य रेफस्थस्य इकारस्य दीर्घे कृते हरी रम्यः इति रूप सिद्ध्यति।

शम्भुस् + राजते इति स्थिते ससजुषो रुः इति सूत्रेण पदान्तस्य सस्य रुत्वे शम्भु र् + राजते इति जाते रो रि इति सूत्रेण पूर्वस्य रेफस्य लोपे 'शम्भुर् + राजते' इति जाते 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रेण रेफलोपस्य निमित्ते रेफे परे सति पूर्वस्य भकारस्थस्य उकारस्य दीर्घे कृते 'शम्भू राजते' इति रूपं सिद्ध्यति।

---

**(174) विप्रतिषेधे परं कार्यम्। 1। 4। 2॥**

**वृत्तिः - तुल्यबलविरोधे परं कार्यं स्यात्। इति रेफलोपे प्राप्ते । पूर्वत्रासिद्धम् इति रो रि इत्यस्यासिद्धत्वादुत्वमेव। मनोरथः।**

---

पदच्छेदः - विप्रतिषेधे, पर कार्यम् त्रिपदं सूत्रमिदम्।

सूत्रप्रकारः - परिभाषासूत्रम्।

सरलार्थः- यदा द्वयोः विभिन्नयोः स्थानयोः चरितार्थयोः सूत्रयोः एकत्र प्रवृत्तिः प्राप्ता भवति तदा तत्र तुल्यबलविरोधः इत्युच्यते। अस्याम् अवस्थायां परेण सूत्रेण निर्दिश्यमानं कार्यं भवेत्।

विशेषार्थः- इदं परिभाषासूत्रम् अस्ति। अनियममे नियमकारिणी परिभाषा इति न्यायेन 'मनस् + रथः' इत्यत्र रुत्वे कृते हशि च (6-1-114) इति सूत्रेण उत्वे, रो रि (8-3-14) इति सूत्रेण रेफस्य लोपे सममेव प्राप्ते निर्णयं दर्शयितुमियं परिभाषा प्रवर्तते। इमामनुसृत्य परस्य सूत्रस्य प्रवृत्तिः भवेदिति निश्चीयते तर्हि परत्वात् रो रि इति सूत्रेण रेफलोपः प्राप्यते। किन्तु पूर्वत्रासिद्धम् इति सूत्रेण त्रिपाद्याः कार्यस्य असिद्धत्वात् सिद्धे असिद्धस्याप्रवृत्तिः इति निश्चित्य हशि चेत्युत्वमेव भवति।

साधनिका -

मनस् + रथः इति स्थिते ससजुषो रुः इति सूत्रेण पदान्तस्य सस्य रुत्वे मन -र् + रथः इति जाते अत्र हशि च इति सूत्रेण उत्वे, रो रि इति सूत्रेण रेफस्य लोपे सममेव प्राप्ते 'विप्रतिषेधे परं कार्यम्' इति परिभाषासूत्रानुसारं परत्वात् रेफलोपे प्राप्ते 'पूर्वत्रासिद्धम्' इति सूत्रेण 'रो रि' इत्यस्य असिद्धत्वात् 'हशि च' इति सूत्रेण उत्वे कृते 'मन उ + रथः' इति जाते आद्गुणः इति सूत्रेण गुणे कृते मनोरथः इति रूपं सिद्ध्यति।

**(176) एतत्तदोः सुलोपोऽकोरनञ्समासे हलि। 6। 1। 132॥**

**वृत्तिः - अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्धलि न तु नञ्समासे। एष विष्णुः। स शम्भुः। अकोः किम्? एषको रुद्रः। अनञ्समासे किम्? असश्शिवः। हलि किम् ? एषोऽत्र।**

पदच्छेदः - एतत्तदोः, सु (लुप्तषष्ठीकं पदं), लोपः, अकोः, अनञ्समासे, हलि पञ्चपदं सूत्रमिदम्।

समासः - एतच्च तच्च एतत्तदौ तयोः एतत्तदोः (द्वन्द्वः), सोर्लोपः (तत्पुरुषः), न नञ्समासः अनञ्समासः तस्मिन् अनञ्समासे (नञ्), अविद्यमानः ककारो ययोः तौ अकौ तयोः अकोः (बहुव्रीहिः),

सूत्रप्रकारः - विधिसूत्रम्

सरलार्थः - ककाररहितयोः, नञ् - समासरहितयोः च एतद्-तद्-शब्दयोः प्रथमैकवचनसम्बद्धस्य सु-प्रत्ययस्य लोपः भवति हलि (व्यंजने) परे सति।

विशेषार्थः - सूत्रमिदं स्वस्मिन् पूर्णमर्थं निर्दिशति। अत्र एतद्-तद्-शब्दयोः प्रथमैकवचनसम्बन्धिः सु-प्रत्यस्य लोपविषये विशिष्टस्थितिनिर्देशः विद्यते। एतद्-तद्-शब्दौ कीदृशौ तर्हि ककाररहितौ, नञ्समासरहितौ स्याताम्, ततः परे च व्यंजनं स्यात् तदानीं सुलोपः भवति। सूत्रे निर्दिष्टं सु इति पृथक् लुप्तषष्ठीकं पदम् अस्ति अतः तस्य एतद्-तद्-शब्दाभ्यां सह अन्वयः भवति।

सूत्रे अकोः इति पदं किमर्थं प्रयुक्तमिति चेत् यदि कप्रत्ययसहितौ एतद्-तद्-शब्दौ भवतः तर्हि तत्र सूत्रमिदं प्रवृत्तं न भवति। यथा - एषकस् + रुद्रः' इत्यत्र ककारसहितत्वात् सस्य लोपाभावे पदान्तस्य सस्य रुत्वे, 'हशि च' इत्यनेन उत्वे, आद्गुणः इत्यनेन गुणे कृते एषको रुद्रः इति रूपं सिद्ध्यति।

सूत्रे अनञ्समासे इति निर्दिष्टमतः यदि नञ्समासेन समस्तः एतद् वा तद् शब्दः भवेत् तर्हि तत्र प्रथमैकवचनस्य सु-प्रत्यस्य लोपः न भवति। यथा - 'असस् + शिवः' इत्यत्र तद् - शब्दस्य नञ्समासेन समस्तत्वात् सस्य लोपाभावे पदान्तस्य सस्य विसर्गे, पुनः सत्वे,' श्चुत्वे च कृते असश्शिवः इति रूपं सिद्ध्यति।

सूत्रे हलि इति पदं किमर्थमिति चेत् यदि स्वरः स्यात्तर्हि सूत्रमिदं प्रवृत्तिं न करोति। यथा- 'एषस् + अत्र' इत्यत्र एतत् - शब्दसम्बद्धात् प्रथमैकवचनस्य सकारात् परे अकारः विद्यते अतः सूत्रस्य प्रवृत्तिः न भवति ततश्च रुत्वे, उत्वे, गुणे, पूर्वरुपे च कृते एषोऽत्र इति रूपं सिद्ध्यति।

साधनिका -

(1) एषस् + विष्णुः इति स्थिते 'एतत्तदोः सुलोपोऽकोरनञ्समासे' हलि इति सूत्रेण अककार- अनञ्समासस्य एतद्-शब्दस्य हलि परे सति प्रथमैकवचनस्य सु-प्रत्ययस्य लोपे कृते एष विष्णुः इति रूपं सिद्ध्यति।

(2) 'सस् + शम्भुः' इति स्थिते 'एतत्तदोः सुलोपोऽकोरनञ्समासे' हलि इति सूत्रेण अककार - अनञ्समासस्य तद्-शब्दस्य हलि परे सति प्रथमैकवचनस्य सु-प्रत्ययस्य लोपे कृते स विष्णुः रूपं सिद्ध्यति।

**(177) सोऽचि लोपे चेत् पादपूरणम्। 6। 1। 134॥**

**वृत्तिः- सस् इत्येतस्य सोर्लोपः स्यादचि, पादश्चेल्लोपे सत्येव पूर्येत। सेमामविड्ढिप्रभृत्तिंम् य ईशिषे। इह ऋक्पाद एव गृह्यते इति वामनः। अविशेषाच्छ्लोकपादोऽपि इत्यपरे। सैष दाशरथी रामः। लोपे चेत् इति किम् ? स इत्क्षेति। स एवमुक्त्वा। सत्येव इत्यवधारणं तु स्यच्छन्दसि बहुलमिति ( सू. 35 26 ) पूर्वसूत्राद् बहुलग्रहणानुवृत्त्या लभ्यते। तेनेह न - सोऽहमाजन्मशुद्धानाम्।**

पदच्छेदः - सः, अचि, लोपे, चेत्, पादपूरणम् पञ्चपदं सूत्रमिदम्।

समासः - पादस्य पूरणम् पादपूरणम् (तत्पुरुषः)।

अनुवृत्तिः - सुलोपः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - तद् - सम्बन्धिप्रथमैकवचननस्य सु-प्रत्ययस्य अचि परे लोपः भवति यदि लोपे कृते सत्येव पादपूर्तिः भवति तर्हि।

विशेषार्थः - सूत्रार्थः स्वतः स्पष्टः अस्ति। अत्र छन्दःशास्त्रेण सह सूत्रसम्बन्धः निर्दिष्टः। अनेन व्याकरणस्य पदसाधनतन्त्रेण सह वाक्यसाधनतन्त्रत्वमपि सिद्ध्यति।

सूत्रे सूत्रितं यत् लोपे चेत् इति किमर्थम् तर्हि - यदि पादपूर्तिः अन्येन मार्गेण कर्तुं शक्यते तर्हि सूत्रमेतत् प्रवृत्तं न भवति। यथा - सस् इत् क्षेति सुधित ओकसि स्वे इत्यत्र त्रिष्टुप् - छन्दः विद्यते अनेन सूत्रेण यदि सुलोपं कुर्मः तर्हि गुणे कृते छन्दोभंगः भवति अतः सस्य रुत्वे, यत्वे, यलोपे च कृते सन्ध्यभाववशात् पादपूर्तिः सम्भवति।

साधनिका -

(1) 'सस् इमामविड्ढि प्रभृत्तिंम्' य ईशिषे 'इत्यत्र जगतीच्छन्दः तत्र च द्वादशाक्षराणि अपेक्षन्ते। अत्र सस् + इमामविड्ढिप्रभृतिम् इत्यत्र तद्-सम्बन्धिसकारस्य लोपे कृते सत्येव पादपूर्तिः शक्यते, अतः 'सोऽचि लोपे चेत् (पादपूरणम्) इति सूत्रेण अचि परे सति तद्-शब्दस्य प्रथमैकवचनस्य सु-प्रत्ययस्य स्-कारस्य लोपे कृते आद्गुणः इत्यनेन गुणैकादेशे सति सेमामविड्ढि - इति सिद्ध्यति।

(2) 'सस् एष दाशरथी' रामः इत्यत्र अनुष्टुप् छन्दः, साधयितुं अष्टाक्षराणि अपेक्षन्ते तदर्थं च तद् - शब्दस्य प्रथमैकवचनस्य सु-प्रत्ययस्य लोपः आवश्यकः अतः 'सोऽचि लोपे चेत् पादपूरणम्' इति सूत्रेण अचि परे सति तद्-शब्दस्य प्रथमैकवचनस्य सु-प्रत्ययस्य स्-कारस्य लोपे, अकार-एकारयोः 'वृद्धिरेचि' इत्यनेन वृद्धिरेकादेशे कृति वर्णसम्मेलने 'सैष दाशरथी' - इति सिद्ध्यति।

**स्वाध्यायः**

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत।**

(1) **अप्लुतादतः परस्य रोः अप्लुते अति परे किं भवति ?**

(क) यत्वम् (ख) रेफः (ग) उत्वम् (घ) लोपः

(2) **शाकटायनग्रहणं किमर्थम् ?**

(क) विकल्पार्थम् (ख) पूजार्थम् (ग) नियमार्थम् (घ) विरोधार्थम्

(3) **हलि सर्वेषाम् इत्यत्र सर्वेषाम् इत्यनेन के निर्दिष्टाः ?**

(क) आचार्याः (ख) देवाः (ग) वर्णाः (घ) प्रत्ययाः

(4) **भगो नमस्ते इत्यत्र मूलनिपातः कः ?**

(क) भगोय् (ख) भगोस् (ग) भगोर् (घ) भगस्

**(5) रूपरात्रिरथन्तरेषु रुत्वं वाच्यम् इति वार्तिकेन सिद्धति --**

(क) अहरहः (ख) अहर्गणः (ग) अहोरात्रः (घ) अहर्पतिः

**2. एकैकवाक्येन उत्तरं लिखत ।**

(1) नादिचि सूत्रेण किं निषिध्यते ?

(2) 'शिवो वन्द्यः' इत्यत्र स्-कारस्य उत्वं किं सूत्रं विदधाति ?

(3) 'ओतो गार्ग्यस्य' इति सूत्रे गार्ग्यग्रहणं किमर्थम् ?

(4) अघो इत्यत्र मूलनिपातः कः ?

(5) स उ एकाग्निः इति उदाहरणे उ- कारस्य परिचयः कः ?

**3. सविस्तरम् उत्तरं लिखत ।**

(1) स्वादिसन्धौ विधीयमानानि सु-प्रत्यस्य परिवर्तनानि निरूपयत।

(2) य्-लोपविधायकानि सूत्राणि सविशदं विविच्यन्ताम्।

**4. निम्नलिखितानि रूपाणि साधयत।**

(1) शिवोऽर्च्यः (2) देवा इह

(3) भो अच्युतः (4) अहर्गणः

(5) मनोरथः

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायन्ताम्।**

(1) प्रथमयोः ...............

(2) व्योर्लघु ...............

(3) एतत्तदोः ...............

(4) सोऽचि लोपे ...............

**6. अ विभागं ब विभागेन सह योजयत।**

| अ | ब |
|---|---|
| (1) रुत्वम् | (अ) विप्रतिषेधः |
| (2) अह्नः रेफः | (ब) ससजुषो रुः |
| (3) गीर्पतिः | (क) रो रि |
| (4) रेफलोपः | (ड) अहरादीनां पत्यादिषु वा रेफः |
| (5) तुल्यबलविरोधः | (ई) रोऽसुपि |

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं, पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखत।

◆

# 12 अथ अकारान्त - अजन्तपुँल्लिङ्गप्रकरणम्

**प्रस्तावना**

इतः परं प्रातिपदिकानां वाक्याङ्गत्वेन साधनं कथं भवतीति निरूपणमारभ्यते। तत्र सर्वप्रथमं तावत् अकारान्त-आकारान्त-पुँल्लिङ्गशब्दानां सप्तविभक्तिषु रूपाणि कथं सिद्ध्यन्ति इति सिद्धान्तकौमुदीक्रममनुसृत्यात्र निरूपितम्। अस्मिन् प्रकरणे प्रसङ्गानुरूपं सर्वनामशब्दानां परिगणनं तेष्वकारान्तानां साधनिकायां भिन्नत्वं यत्र तत्र निरूपितम्।

**(178) अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ।1।2। 45॥**

**वृत्तिः - धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्।**

पदच्छेदः - अर्थवत्, अधातुः, अप्रत्ययः, प्रातिपदिकम् चतुष्पदं सूत्रमिदम्।

समासः - अर्थः अस्य अस्ति इति अर्थवत् (बहुव्रीहिः), न धातुः अधातुः (नञ्), न प्रत्ययः अप्रत्ययः (नञ्)।

अनुवृत्तिः - स्वस्मिन् पूर्णं सूत्रमिदम्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - तादृशानि अर्थवन्ति शब्दस्वरूपाणि यानि धातोः भिन्नानि, प्रत्ययभिन्नानि, प्रत्ययान्तं विहाय अन्यानि स्युः तेषां प्रातिपदिकसंज्ञा भवति।

विशेषार्थः - अनेन सूत्रेण प्रातिपदिकसंज्ञा विधीयते । संज्ञा इत्युक्ते नामकरणं तर्हि कस्य नामकरणं प्रातिपदिक इति चेत् - अर्थवतः शब्दस्वरूपस्य नाम प्रातिपदिकम् इति। तत्र अर्थवत्सु केषाञ्चन् समावेशः अत्र न भवति ते धातवः, प्रत्ययाः, प्रत्ययान्तशब्दाः इति त्रयः। एते अर्थवन्तः सन्तः अपि प्रातिपदिकसंज्ञकाः न भवन्ति अनेन सूत्रेण अत्र सूत्रे निरूपितम्। इमानि विहाय अन्यानि शब्दस्वरुपाणि प्रातिपदिकसंज्ञकानि भवन्ति।

**(179) कृत्तद्धितसमासाश्च। 1।2। 46॥**

**वृत्तिः - कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञा स्युः। पूर्वसूत्रेणैव सिद्धे समासग्रहणं नियमार्थं यत्र सङ्घाते पूर्वो भागः पदं तस्य चेद् भवति तर्हि समासस्यैव। तेन वाक्यस्य न।**

पदच्छेदः - कृत्तद्धितसमासाः, च द्विपदं सूत्रमिदम्।

समासः - कृच्च तद्धितश्च समासश्चेति कृत्तद्धितसमासाः (द्वन्द्वः)।

अनुवृत्तिः - प्रातिपदिकम्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - कृत्प्रत्ययान्ताः, तद्धितप्रत्ययान्ताः, समासाः च शब्दाः प्रातिपदिकसंज्ञकाः भवन्ति।

विशेषार्थः - पूर्वसूत्रेण निषिद्धेषु प्रत्ययान्तानाम् अत्र परिगणनं प्रातिपदिकसंज्ञकत्वेन विधीयते । अतः कृत्-प्रत्ययान्तशब्दाः, तद्धितप्रत्ययान्तशब्दाः प्रातिपदिकसंज्ञकाः भवन्ति।

साधनिका - यथा रम् धातोः घञ् - कृत्प्रत्ययः विधीयते तेन च राम-शब्दनिष्पतिः भवति तस्य प्रातिपदिकसंज्ञां कर्तुं सूत्रमिदं प्रवृत्तं भवति।

दक्षस्य अपत्यं पुमान् दाक्षि - अत्र इञ्-प्रत्ययः क्रियते, तेन निष्पन्नः शब्दः तद्धितप्रत्ययान्तः भवति तस्य प्रातिपदिकसंज्ञां विधातुं सूत्रमिदं प्रयुज्यते।

राज्ञः पुरुषः - राजपुरुषः इत्यत्र राजन् + पुरुष सु इत्यनयोः समासः तेन च नूतनशब्दनिर्मितिः राजपुरुष इति तस्य प्रातिपदिकसंज्ञा विधातुं सूत्रमिदं प्रवर्तते।

**(180) प्रत्ययः। 3।3। 1॥**

**वृत्तिः - आ पञ्चमपरिसमाप्तेरधि-कारोऽयम्।**

पदच्छेदः - 'प्रत्ययः' एकपदं सूत्रमिदम्।

अनुवृत्तिः - स्वस्मिन् पूर्णं सूत्रमिदम्।

सूत्रप्रकारः - संज्ञा-अधिकारसूत्रम्।

सरलार्थः - इदम् अधिकारसूत्रम् अस्य अधिकारः पञ्चममाध्यायसमाप्तिपर्यन्तं विद्यते।

विशेषार्थः - इतः परं प्रत्ययः इति शब्दः एतत्सूत्रानन्तरम् अनुवर्तते। अस्य सूत्रस्य प्रभावः पञ्चमाध्यायस्य समाप्तिं यावत् विस्तरति । अतः तावत्पर्यन्तं सूत्राणाम् अर्थघटनावसरे प्रत्ययः इति अर्थः अनुवृत्तिरूपेण संयुक्तः भविष्यति। सूत्रमिदं संज्ञारूपमपि विद्यते अतः प्रत्यायति इति प्रत्ययः वा प्रत्याय्यते इति प्रत्ययः। यथा - सुप्, तिङ्, कृत्, तद्धित इत्यादयः प्रत्ययाः सन्ति।

**(181) परश्च। 3।1। 2॥**

**वृत्तिः - अयमपि तथा।**

पदच्छेदः - परः, च द्विपदं सूत्रमिदम्।

अनुवृत्तिः - प्रत्ययः।

सूत्रप्रकारः - परिभाषा - अधिकारसूत्रम्।

सरलार्थः - विधीयमानः प्रत्ययः परे भवति । इदमपि अधिकारसूत्रम् अस्ति, अस्य प्रवृत्तिः अपि पञ्चमाध्यायसमाप्तिपर्यन्तं प्रवर्तते।

विशेषार्थः - अस्य सूत्रस्य अर्थनिर्माणावसरे पूर्वसूत्रस्य अर्थः समाविष्टः भवति। अतः विधीयमानः प्रत्ययः प्रकृतेः परः भवति। सूत्रमिदं बोधयति यत् विधीयमानः प्रत्ययः कुत्र भवति ? प्रकृतेः अग्रे, मध्ये वा पृष्ठे तर्हि सूत्रमिदं बोधयति यत् प्रकृतेः परे प्रत्ययः विधातव्यः इति। यथा - राम (प्रकृतिः) + सु (प्रत्ययः) । अस्य सूत्रस्य प्रवृत्तिः अपि पञ्चमाध्यायस्य समाप्तिं यावत् विस्तरति अतः प्रत्ययः भवति तर्हि प्रकृतेः परः भवति इति।

**(182) ङ्याप्प्रातिपदिकात् । 4।1। 1॥**

**वृत्तिः - ङ्यन्तादाबन्तात्प्रातिपदिकात् च इत्यापञ्चमपरिसमाप्तेरधिकारः। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्। ( परि. 72 ) इत्येवसिद्धे ङ्याब्ग्रहणं ङ्याबन्तात्तद्धितोत्पत्तिर्यथा स्यात् ङ्याब्भ्यां प्राङ्माभूदित्येवमर्थम्।**

पदच्छेदः - ङ्यापप्रातिपदिकात् एकपदं सूत्रमिदम्।

समासः - ङी च आप् च प्रातिपदिकं चेति ङ्याप्प्रातिपदिकम् तस्मात् ङ्याप्प्रातिपदिकात् (द्वन्द्वः)।

अनुवृत्तिः - प्रत्ययः, परश्च।

सूत्रप्रकारः - अधिकारसूत्रम्।

सरलार्थः - इदम् अधिकारसूत्रम्। अस्य अधिकारः अपि पञ्चमाध्यायसमाप्तिं यावत् प्रवर्तते। अतः पञ्चमाध्यायसमाप्तिपर्यन्तं ङी-प्रत्ययान्तशब्देभ्यः, आप्प्रत्ययान्तशब्देभ्यः, प्रातिपदिकेभ्यः, परे प्रत्यया स्युः इत्यर्थः।

विशेषार्थः - सूत्रमिदं चतुर्थाध्यायस्य आरम्भे पाणिनिना सूत्रितम्। तृतीयाध्याये धातोः परे विधीयमानान् प्रत्ययान् निर्दिश्य शब्दरूपेभ्यः परे विधीयमानान् प्रत्ययान् दर्शयितुम् अनेन सूत्रेण प्रकमते। अतः ते शब्दाः कीदृशाः स्युः वा इदानीं विधीयमानाः प्रत्ययाः कीदृशेभ्यः शब्देभ्यः परे भविष्यन्ति तर्हि -

ङी-प्रत्ययान्ताः अर्थात् - ङीप्, ङीष्, ङीन् इत्येतादृशाः प्रत्ययाः यत्र भवन्ति तादृशाः शब्दाः,

आप् - प्रत्ययान्तशब्दाः अर्थात् - टाप्, डाप्, चाप् इत्येतादृशाः प्रत्ययाः यत्र भवन्ति तादृशाः शब्दाः, प्रातिपदिकशब्दाः - अर्थवन्तः, कृदन्ताः, तद्धितान्ताः, समासान्ताः, शब्दाः।

**(183) स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् । 4।1। 2॥**

**वृत्तिः - ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः। सुङस्योरुकारेकारौ जशटङपाश्चेतः।**

पदच्छेदः - स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् एकपदं सूत्रमिदम्।

समासः - सु च औ च जस् च अम् च औट् च शस् च टा च् भ्याम् च भिस् च ङे च भ्याम् च भ्यस् च ङसि च भ्याम् च भ्यस् च ङस् च ओस् च आम् च ङि च ओस् च सुप् च इति स्वौजसमौट्छ-ष्ठाभ्याम्भिस्ङेभ्याम्भ्यस्ङसि-भ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (द्वन्द्वः)।

अनुवृत्तिः - ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - सु- आदयः प्रत्ययाः ङ्यन्त - आबन्त - प्रातिपदिकेभ्यः परे भवन्ति।

विशेषार्थः - सूत्रमिदं प्रातिपदिकेभ्यः परे के प्रत्ययाः भवन्ति इति निर्दिशति। इमे प्रत्ययाः सुप् इति प्रत्याहाररूपेणापि बोध्यन्ते। रामादि-प्रकृतिभ्यः परे इमे विंशंतिः प्रत्ययाः भवन्ति।

साधनिका - राम + स्वादयः एकविंशतिः प्रत्ययाः।

---

**(184) विभक्तिश्च। 1। 4। 104॥**

**वृत्तिः - सुप्तिङौ विभक्तिसंज्ञौ स्तः। तत्र सु औ जस् इत्यादीनां त्रिकाणां प्रथमादयः सप्तम्यन्ताः प्राचां संज्ञाः ताभिरिहापि व्यवहारः।**

---

पदच्छेदः - विभक्तिः, च द्विपदं सूत्रमिदम्।

अनृवृत्तिः - सुप्, तिङ्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरालार्थः- सुप् - प्रत्याहारद्वारा प्रत्याहृताः एकविंशतिः प्रत्ययाः, तिङ् - धातोः परे विधीयमानाः अष्टादशप्रत्ययाः विभक्तिः इति संज्ञया व्यवह्रीयन्ते।

विशेषार्थः- अनेन सूत्रेण प्रातिपदिकेभ्यः, धातोः च परे विधीयमानानां प्रत्ययानां विभक्तिः इति नामकरणं विधीयते। अतः सुप् - औ - जस् इत्यादीनि सप्त त्रिकाणि भवन्ति तानि प्रथमा, द्वितीया... एवं सप्तमीपर्यन्तं सप्त-विभक्तयः इति नाम्ना वृद्धव्यवहारेण प्रसिद्धानि।

---

**(185) सुपः। 3। 4। 103॥**

**वृत्तिः- सुपस्त्रीणि त्रीणि वचनान्येकश एकवचन-द्विवचन-बहुवचनसंज्ञानि स्युः।**

---

पदच्छेदः - सुपः एकपदं सूत्रमिदम्।

अनुवृत्तिः - त्रीणि, त्रीणि, एकवचन-द्विवचन-बहुवचनसंज्ञानि, एकशः।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - सुप् - प्रत्याहारस्य त्रीणि त्रीणि वचनानि क्रमशः एकवचन-द्विवचन-बहुवचनसंज्ञया अभिहितानि भवन्ति।

विशेषार्थः- अनेन सूत्रेण एकविंशति - प्रत्ययानां सप्तविभक्तिषु विद्यमानानां त्रिकाणां प्रत्येकस्य प्रत्ययस्य क्रमशः संज्ञा विधीयते सा च एकवचन-द्विवचन-बहुवचनमिति। सप्तविभक्तीनां प्रत्येकस्य त्रिकस्य प्रथमः प्रत्ययः एकवचनसंज्ञया संज्ञितः, द्वितीयः प्रत्ययः द्विवचनसंज्ञया संज्ञितः, तृतीयः प्रत्ययः बहुवचनसंज्ञया संज्ञितः भवति।

एकवचनप्रत्ययाः यथा - सु, अम्, टा, ङे, ङसि, ङस्, ङि।

द्विवचनप्रत्ययाः यथा - औ, औट्, भ्याम्, भ्याम्, भ्याम्, ओस्, ओस्

बहुवचनप्रत्ययाः यथा - जस्, शस्, भिस्, भ्यस्, भ्यस्, आम्, सुप्

---

**(186) द्वयेकयोर्द्विवचनैकवचने। 1। 4। 22॥**

**वृत्तिः - द्वित्वैकत्वयोरेते स्तः।**

---

पदच्छेदः - द्व्येकयोः, द्विवचनैकवचने द्विपदं सूत्रमिदम्।

समासः - द्वौ च एकश्च द्व्यैकौ तयोः (द्वन्द्वः), द्विवचनं च एकवचनं च द्विवचनैकवचने (द्वन्द्वः)।

अनुवृत्तिः- स्वस्मिन् संपूर्णं सूत्रमिदम्।

सूत्रप्रकारः - संज्ञासूत्रम्

सरलार्थः - द्वित्वविवक्षायां द्विवचनसंज्ञावान् प्रत्ययः भवति, एकवचनविवक्षायाम् एकवचनसंज्ञावान् प्रत्ययः भवति।

विशेषार्थः- सूत्रमेतत् व्याकरणतन्त्रस्य प्रवृत्तेः पूर्वं वक्तुः स्वातन्त्र्यं निर्दिशति। किं वक्ता यद् विवदिषति तत् एकस्य विषये द्वयोः विषये वा निर्धारणं वक्तुः तस्य निर्धारणं भवेत् तदनुसारं प्रत्ययस्य प्रवृत्तिः। यदि वक्तुः इच्छा द्वि संख्याविशिष्टं पदार्थं बोधयितुम् अस्ति, तर्हि द्विवचनसंज्ञकः प्रत्ययः प्रकृतेः अनन्तरं प्रयुज्यते। यदि वक्तुः इच्छा एक संख्याविशिष्टं पदार्थं बोधयितुम् अस्ति तर्हि एकवचनसंज्ञकः प्रत्ययः प्रकृतेः अनन्तरं प्रयुज्यते।

साधनिका - राम + औ (द्वित्वविवक्षायाम्), राम + सु (एकत्वविवक्षायाम्)।

---

**(187) बहुषु बहुवचनम् ।1।4।21॥**

**वृत्तिः - बहुत्वे एतस्यात्। रुत्वविसर्गौ। रामः।**

---

पदच्छेदः - बहुषु, बहुवचनम् द्विपदं सूत्रमिदम्।

अनुवृत्तिः - स्वस्मिन् संपूर्णं सूत्रमिदम्।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः- बहुत्वविषये विवक्षायाम् बहुवचनसंज्ञकः प्रत्ययः प्रकृतेः परे भवति।

विशेषार्थः- उपरि निर्दिष्टसूत्रानुसारमेव इदं सूत्रमपि प्रवर्तते। यदि वक्तुः इच्छा एकत्वं वा द्वित्वं विहाय ततः अधिकं संख्याविशिष्टं पदार्थं बोधयितुम् अस्ति तर्हि बहुवचनसंज्ञकः प्रत्ययः भवति। अत्र द्वित्वाधिकेन ततः परार्धपर्यन्तं संख्यागणना समाह्रियते।

साधनिका - अकारान्त - पुंल्लिङ्गस्य रामशब्दस्य ''अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'', इति अव्युत्पत्तिपक्षे ''कृत्तद्धितसमासाश्चेति'' व्युत्पत्तिपक्षे द्वाभ्यां सूत्राभ्यां प्रातिपदिकसंज्ञायां कृतायां, ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च इति सूत्रत्रय्याः सहकारेण स्वौजसमौट्छष्टाभ्या-म्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् इति सूत्रेण विभक्तिश्च इति सूत्रेण विभक्तिसंज्ञितेषु एकविंशतिप्रत्येषु रामशब्दात्परेषु कृतेषु राम + स्वादिप्रत्ययाः इति जाते, केवलं प्रातिपदिकार्थप्रकटनविवक्षावशात् प्रातिपदिकार्थलि-ङ्गपरिमाणवचनमात्रे प्रथमा इति सूत्रेण प्रथमा विभक्तेः प्रवर्तने सति राम + सु औ जस् (प्रथमाविभक्तिप्रत्ययाः) इति जाते, एकत्वविवक्षायाम् द्वयेकयोर्द्विवचनैकवचने इति सूत्रेण एकवचननस्य प्रत्यये कृते राम + सु इति जाते उपदेशेऽजनुनासिक इत् इति सूत्रेण प्रत्ययस्य उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण लोपे कृते राम + स् इति जाते, ससजुषो रुः इति सूत्रेण पदान्तस्य सस्य रुत्वे राम+रु इति जाते अनुबन्धलोपे राम+र् इति जाते खरवसनायोर्विसर्जनीयः इति सूत्रेण रेफस्य विसर्गे रामः इति रूपं सिद्ध्यति।

---

**(188) सरूपाणामेकशेष एकविभक्तौ ।1।2।64॥**

**वृत्तिः - एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते। प्रथमयोः पूर्वसवर्णः। (सू.१६४) नादिचि (सू.164) वृद्धिरेचि (सू.72)। रामौ।**

---

पदच्छेदः - सरूपाणाम्, एकशेषः, एकविभक्तौ त्रिपदं सूत्रमिदम्।

समासः - समानं रूपं येषां तानि सरूपाणि तेषां सरूपाणाम् (बहुव्रीहिः), एकश्चासौ शेषश्चेति एकशेषः (कर्मधारयः), एकाचासौ विभक्तिश्च एकविभक्तिः तस्याम् एकविभक्तौ (कर्मधारयः)।

अनुवृत्तिः - स्वस्मिन् संपूर्ण सूत्रमिदम्।

सूत्रप्रकारः - नियमसूत्रम्।

सरलार्थः - एकस्यां विभक्तौ येषां समानं रूपं दृश्यते तादृशेषु एकं रूपमेव तिष्ठति।

विशेषार्थः- सूत्रेऽस्मिन् द्वित्व-बहुत्वयोः विषये निर्देशः कृतः। यदा द्वित्वविवक्षा भवति तदा - राम राम + औ इति समानशब्दस्य रूपद्वयं समुपतिष्ठते, तद्वदेव यदा बहुत्वविवक्षा भवति तदा - राम राम राम राम + जस् इति बहूनि रूपाणि समुपतिष्ठन्ते तेन अव्यवस्था उद्भवति अतः तस्याम् अवस्थायां सूत्रमिदं निर्दिशति यत् समानायां विभक्तौ यदा एकाधिकानि रूपाणि दृश्यन्ते तर्हि तेषां प्रतिनिधिरूपम् एकमेव शब्दरूपं तत्र स्थापनीयम् इति।

साधनिका - प्रातिपदिकात् रामशब्दात् प्रथमाद्विवचनविवक्षायां द्वयेकयोर्द्विवचनैकवचने इति सूत्रसहकारेण स्वौजसमौट् - इत्यादिना सूत्रेण औ-प्रत्यये कृते, राम+औ इति जाते वृद्धिरेचि इति सूत्रेण अकार - औकारयोः वृद्धिरेकादेशे प्राप्ते, तं प्रबाध्य प्रथमयोः पूर्वसवर्णः इति सूत्रेण पूर्वसवर्णदीर्घे एकादेशे प्राप्ते, नादिचि सूत्रेण तन्निषेधे कृते, पुनः वृद्धिरेचि इति सूत्रेण वृद्ध्येकादेशे कृते रामौ इति रूपं सिद्ध्यति।

---

**(189) चुटू। 1। 3। 7॥**

**वृत्तिः - प्रत्ययाद्यौ चुटू इतौ स्तः। इति जस्येत्संज्ञायाम्।**

---

पदच्छेदः - चुटू एकपदं सूत्रमिदम्।

समासः - चुश्च टुश्च इति चुटू (द्वन्द्वः)।

अनुवृत्तिः - प्रत्ययस्य, आदिः, इत्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - प्रत्ययस्य आदौ विद्यमानयोः चवर्ग - टवर्गयोः इत्संज्ञा भवति।

विशेषार्थः - सूत्रमिदं प्रत्ययस्य आदौ विद्यमानस्य वर्णस्य इत्संज्ञां विदधाति।

साधनिका - प्रातिपदिकात् रामशब्दात् प्रथमाबहुवचनविवक्षायां बहुषु बहुवचनम् इति सूत्रसहकारेण स्वौजसमौट् - इत्यादिना सूत्रेण जस् प्रत्यये कृते, राम + जस् इति जाते, जस् - प्रत्ययस्य आदौ स्थितस्य जकारस्य चवर्गपठितत्वात् 'चुटू' इति सूत्रेण इत्संज्ञायाम्, तस्य लोपे, च कृते राम + अस् इति जाते -

---

**(190) न विभक्तौ तुस्माः । 1। 3। 4॥**

**वृत्तिः - विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः। इति सकारस्य नेत्त्वम्।**

---

पदच्छेदः - न, विभक्तौ, तुस्माः त्रिपदं सूत्रमिदम्।

समासः - तुश्च स् - च मश्चेति तुस्माः (द्वन्द्वः)।

अनुवृत्तिः - उपदेशे, हलन्त्यम्, इत्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - विभक्तिसंज्ञकेषु प्रत्ययेषु विद्यमानानां तवर्ग - सकार - मकाराणाम् इत्संज्ञा न भवति।

विशेषार्थः - विभक्तिश्च इति सूत्रेण सुप् - प्रत्ययानां तिङ्-प्रत्ययानां च विभक्तिसंज्ञा विहिता। तत्र विद्यमानेषु प्रत्ययेषु इत्संज्ञाविधायकेन सूत्रेण अन्त्यवर्णानाम् आदिवर्णानां च इत्संज्ञाकरणं भवति तेन च इत्संज्ञकस्य लोपः प्राप्यते। अत्र सूत्रमिदं नियमनं करोति यथा - विभक्तौ आदौ वा अन्ते विद्यमानाः तवर्गस्य वर्णाः - त्, थ्, द्, ध्, न्, एवं स्-कार, म्-कारणाम् इत्संज्ञा न भवति इति। अनेन जस् - प्रत्ययस्य अन्त्य - स् - कारस्य लोपः निवार्यते।

साधनिका - (पूर्वतः अनुवर्तते .....) राम + अस् इति जाते उपदेशस्यान्ते विद्यमानस्य स् - कारस्य हलन्त्यम् इत्यनेन इत्संज्ञायां लोपे च प्राप्ते 'न विभक्तौ तुस्माः' इति सूत्रेण इत्संज्ञानिषेधे कृते -

---

(191 **) अतो गुणे । 6। 1। 97॥**

**वृत्तिः- अपदान्तादकाराद् गुणे परतः पररूपमेकादेशः स्यात्। इति प्राप्ते। परत्वात्पूर्वसवर्णदीर्घः। अतो गुणे इति हि पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरान् ( प.60 ) इति न्यायेन अकः सवर्णे दीर्घः ( सू. 85 ) इत्यस्यैवापवादः न तु प्रथमयोः - ( सू. 164 ) इत्यस्यापि। रामाः।**

---

पदच्छेदः - अतः, गुणे द्विपदं सूत्रमिदम्।

अनुवृत्तिः - अपदान्तात्, पररूपम्।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - अपदान्तात् ह्रस्व - अकारात् गुणसंज्ञके वर्णे परे सति पररूप - एकादेशः भवति।

विशेषार्थः - सूत्रमिदं पररूपैकादेशविधि-र्निर्दिशति। तेन अतः - ह्रस्व-अकारात् गुणसंज्ञके वर्णे (अ, ए, ओ) परे सति परे विद्यमानः यः गुणसंज्ञकः वर्णः तादृशः द्वयोः स्थाने एकादेशरूपः वर्णः भवति। अतः अ + अ - अ, अ + ए - ए, अ + ओ - ओ इत्थमेकादेशरूपं निष्पद्यते।

राम + अस् इत्यत्र सममेव 'अतो गुणे' इत्यनेन पररूप - एकादेशे, 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घैकादेशे च प्राप्ते विप्रतिषेधे परं कार्यमि-ति परिभाषया परत्वात् पूर्वसवर्णदीर्घैकादेशः भवति। अत्र प्राप्तस्य सवर्णदीर्घस्य अतो गुणे इत्यनेन अपवादः भवति किन्तु पुरस्तादपवादाः अनन्तरान्विधीन् बाधन्ते नोत्तरान् इति परिभाषया सिद्धति यत् अतो गुणे ततः परस्थितस्य 'अकः सवर्णे दीर्घः' इति सूत्रस्य अपवादत्वेन बाधं कर्तुम् अर्हति किन्तु ततः अपि परसूत्ररूपेण विद्यमानस्य प्रथमयोः पूर्वसवर्णः इति सूत्रस्य अपवादं कर्तुं नार्हति।

साधनिका - (पूर्वतः अनुवर्तते.....) राम + अस् इत्यवस्थायां प्रथमयोः पूर्वसवर्णः इति सूत्रेण पूर्वसवर्णदीर्घ एकादेशे कृते समासे इति जाते सस्य रुत्वे विसर्गे च कृते रामाः इति रूपं सिद्धयति।

---

**(192) एकवचनं सम्बुद्धिः । 2। 3। 49॥**

**वृत्तिः - सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात्।**

---

पदच्छेदः - एकवचनं सम्बुद्धिः द्विपदं सूत्रमिदम्।

अनुवृत्तिः - प्रथमा, सम्बोधने।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - यदा सम्बोधनस्य प्रसंगः उपस्थितः भवति तदा प्रथमायाः एकवचनस्य प्रत्ययः समबुद्धिः इति संज्ञां प्राप्नोति।

विशेषार्थः - अत्र सम्बोधने च इति सूत्रेण सम्बोधने विवक्षिते प्रथमायाः प्रवर्तनं विहितमेवास्ति। तत्र प्रथमैकवचनस्य प्रत्ययस्य सम्बुद्धिसंज्ञा तस्याः फलं च या या संज्ञा सा सा फलवती इति न्यायेन अनुवर्तते।

साधनिका - हे राम + सु इत्यत्र सम्बोधनत्वात् सु प्रत्ययस्य सम्बुद्धिसंज्ञा भवति।

---

**(193) एङ्ह्रस्वात्सम्बुद्धेः। 6। 1। 69॥**

**वृत्तिः- एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्हल्लुप्यते सम्बुद्धेश्चेत्। सम्बुद्धस्याक्षिप्तस्याङ्गस्यैङ्ह्रस्वाभ्यां विशेषणान्नेह- हे कतरत्कुलेति। हे राम । हे रामौ । हे रामाः । एङ्ग्रहणं किम् ? हे हरे, हे विष्णो । अत्र हि परत्वान्नित्यत्वाच्च सम्बुद्धिगुणे कृते ह्रस्वात्परं नास्ति।**

---

पदच्छेदः - एङ्ह्रस्वात्, सम्बुद्धेः द्विपदं सूत्रमिदम्।

समासः - एङ्च ह्रस्वश्च एङ्ह्स्वम् तस्मात् एङ्ह्रस्वात् (द्वन्द्वः)।

अनुवृत्तिः - हल्, लोपः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - एङन्तात्, ह्रस्वान्ताच्च अङ्गात्परस्य सम्बुद्धिसंज्ञकस्य हलः लोपः भवति।

विशेषार्थः - एङ् (ए, ओ) - अन्ते यस्य तादृशम् अङ्गम् अर्थात् एकारान्तम् ओकारान्तं वा अङ्गम् । तद्वत् ह्रस्वः वर्णः अन्ते यस्य तादृशम् अङ्गम् अर्थात् अ, इ, उ, ऋ, लृ-कारान्तम् अङ्गम्। एतस्मात् परं यदि सम्बुद्धिसंज्ञकः व्यञ्जनवर्णः भवेत् तर्हि तस्य लोपः भवति। अस्मिन् सूत्रे एङ् ग्रहणं किमर्थं कृतमिति चेत् यदि केवलं ह्रस्वान्तस्य ग्रहणं विधीयते तर्हि

हरि-भानु-आदयः ह्रस्वान्तशब्दानां सम्बोधनप्रसङ्गे ह्रस्वस्य गुणः इति सूत्रेण प्रवृत्तिरूपेण परसूत्रत्वात्, नित्यकार्यत्वात् च प्रथमं गुणः भवति अनन्तरम् अस्य सूत्रस्य प्रवृत्तिः प्राप्यते अस्याम् अवस्थायां गुणकार्यत्वात् हरि - हरे, भानु - भानो इति भवति अतः ह्रस्वान्तम् अङ्गं न प्राप्यते। अतः सूत्रे एङ् ग्रहणेन कृतेऽपि गुणे परस्थितस्य सम्बुद्धिसंज्ञकस्य हलः लोपः सम्भाव्यते।

साधनिका - प्रातिपादिकात् रामशब्दात् सम्बोधने च इति सूत्रेण सम्बोधनावस्थायां प्रथमाविभक्तौ विहितायाम् तत्र एकत्वविवक्षायां द्वयेकयोर्द्विवचनैकवचने इति सूत्रसहकारेण स्वौजसमौट् - इत्यादिना सूत्रेण सु प्रत्यते कृते राम + सु इति जाते अनुबन्धलोपे 'राम + स्' इति जाते सम्बोधनैकवचनत्वात् सु-प्रत्ययस्य सम्बुद्धिसंज्ञायाम् एङ्ह्रस्वात्सम्बुद्धद्धेः इति सूत्रेण सु प्रत्यये कृते राम + सु इति जाते अनुबन्धलोपे राम + स् इति जाते सम्बोधनैकवचनत्वात् सु - प्रत्ययस्य सम्बुद्धिसंज्ञायाम् एङ्ह्रस्वात्सम्बुद्धेः इति सूत्रेण ह्रस्वान्तादङ्गात् परत्वात् सम्बुद्धिसंज्ञकस्य हलः लोपे हे राम इति रूपं सिद्ध्यति।

**(194) अमि पूर्वः। 6। 1। 107॥**

**वृत्तिः - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्। रामम् । रामौ।**

पदच्छेदः - अमि, पूर्वः द्विपदं सूत्रमिदम्।

अनुवृत्तिः - अकः, अचि, पूर्वपरयोः, एकः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - अक् - प्रत्याहारस्य वर्णानन्तरं यदि अम्-प्रत्ययसम्बद्धः अच् भवेत्तर्हि पूर्वपरयोः स्थाने पूर्वरूपमेकादेशः भवति।

विशेषार्थः -सूत्रमिदम् 'अकः सवर्णे दीर्घः,' अतो गुणे, प्रथमयोः पूर्वसवर्णः इति त्रयाणां सूत्राणां बाधं कृत्वा प्रवृत्तं भवति।

साधनिका - प्रातिपदिकात् रामशब्दात् कर्मविवक्षायां 'कर्मणि द्वितीया' इति सूत्रेण द्वितीयाविभक्तौ विहितायाम् तत्र एकत्वविवक्षायां द्वयेकयोर्द्विवचनैकवचने इति सूत्रसहकारेण स्वौजसमौट् - इत्यादिना सूत्रेण अम् प्रत्यये कृते राम + अम् इति जाते 'अकः सवर्णे दीर्घः,' अतो गुणे, 'प्रथमयोः पूर्वसवर्णः' इति सूत्रत्रयं बाधित्वा 'अमि पूर्वः' इति सूत्रेण पूर्वरूपैकादेशे 'रामम्'इति रूपं सिद्ध्यति।

रामौ - प्रातिपदिकात् रामशब्दात् द्वितीयाद्विवचनविवक्षायां द्वयेकयोर्द्विवचनैकवचने इति सूत्रसहकारेण स्वौजमौट्-इत्यादिना सूत्रेण औट् प्रत्यये कृते ट्-कारस्य अनुबन्धलोपे 'राम + औ' इति जाते वृद्धिरेचि इति सूत्रेण अकार-औकारयोः वृद्धिरेकादेशे प्राप्ते, तं प्रबाध्य प्रथमयोः पूर्वसवर्णः इति सूत्रेण पूर्वसवर्णदीर्घे एकादेशे प्राप्ते, नादिचि सूत्रेण तन्निषेधे कृते, पुनः वृद्धिरेचि इति सूत्रेण वृद्धिरेकादेशे कृते रामौ इति रूपं सिद्ध्यति।

**(195) लशक्वतद्धिते । 1। 3। 8॥**

**वृत्तिः - तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः। इति शसः शस्येत्संज्ञा।**

पदच्छेदः - लशकु, अतद्धिते द्विपदं सूत्रमिदम्।

समासः - लश्च शश्च कुश्चेति लशकु (द्वन्द्वः), न तद्धिते इति अतद्धिते (नञ्)।

अनुवृत्तिः - प्रत्ययस्य, आदिः, इत्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - प्रत्ययस्य आदौ स्थिताः ल्-कारः, श्-कारः, क-वर्गस्यवर्णाः च इत्संज्ञकाः भवन्ति। किन्तु यदि प्रत्ययः तद्धितस्य भवेत्तर्हि तत्रैतेषां वर्णानाम् इत्संज्ञा न भवति।

विशेषार्थः - सूत्रस्यास्य प्रवृत्तिः केवलं प्रत्ययेष्वेव भवति। प्रत्ययस्य आदौ - प्रथमवर्णरूपेण विद्यमानानामेव लशकवर्गीयवर्णाः इतः भवन्ति। अन्ते विद्यमानानां तु हलन्त्यमित्यनेनैव इत्संज्ञा विधीयते। सूत्रेणानेन विधीयमाना इत्संज्ञा तद्धिताः इत्यधिकारे पठितेषु प्रत्ययेषु न प्रवर्तते।

साधनिका-

**(196) तस्माच्छसो नः पुंसि। 6। 1। 103॥**

**वृत्तिः - कृतपूर्वसवर्णदीर्घात्परः यः शसः सकारस्तस्य नः स्यात् पुंसि।**

पदच्छेदः - तस्मात्, शसः, नः, पुंसि चतुष्पदं सूत्रमिदम्।

अनुवृत्तिः - स्वस्मिन् संपूर्णं सूत्रमिदम्।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - यस्य शस् प्रत्यस्य पूर्वसवर्णदीर्घैकादेशः कृतः अस्ति तादृशस्य शस् - प्रत्ययसम्बन्धिनः स्- कारस्य स्थाने न्-कारादेशः भवति पुँल्लिङ्गे।

विशेषार्थः - सूत्रमिदं यत्र पूर्वसवर्णदीर्घैकादेशः भवति तदनन्तरमेव द्वितीयाबहुवचनस्य शस् - प्रत्ययविषये प्रवर्तते। सूत्रमिदं पुँल्लिङ्गे प्रवृत्तं भवति अतः स्त्री-नपुंसकयोः कार्यं न करिष्यति।

साधनिका - प्रातिपदिकात् रामशब्दात् द्वितीयाबहुवचनविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रसहकारेण स्वौजसमौट् - इत्यादिना सूत्रेण शस् प्रत्यये कृते 'राम + शस्' इति जाते, शस् - प्रत्ययस्य आदौ स्थितस्य शकारस्य लशक्वतद्धिते इति सूत्रेण इत्संज्ञायाम्, तस्य लोपे च कृते राम + अस् इति जाते प्रथमयोः पूर्वसवर्णः इति सूत्रेण पूर्वसवर्णदीर्घ एकादेशे कृते समास् इति जाते सस्य स्थाने तस्माच्छसो नः पुंसि इति सूत्रेण न् - कारादेशे रामान् इति जाते -

**(197) अट्कुप्वाङ्नुम्व्यवायेऽपि। 8। 4। 2॥**

**वृत्तिः - अट्-कवर्ग-पवर्ग-आङ्-नुम् एतैर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे। पदव्यवायेऽपि ( सू.1057 ) इति निषेधं बाधितुमाङ् ग्रहणम्। नुम्ग्रहणमनुस्वारोपलक्षणार्थम्। तच्चाकर्तुं शक्यम्, अयोगवाहानामट्सूपदेशस्योक्तत्वात्। इति णत्वे प्राप्ते।**

पदच्छेदः - अट्कुप्वाङ्नुम्व्यवाये, अपि द्विपदं सूत्रमिदम्।

समासः - अट् च कुश्च पुश्च आङ् च नुम् च अट्कुप्वाङ्नुमः (द्वन्द्वः), तैः व्यवायः तस्मिन् (तत्पुरुषः)।

अनुवृत्तिः - रषाभ्यां नः, णः, समानपदे।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - रेफ-ष्-काराभ्यां अनन्तरं अट्-प्रत्याहारस्य वर्णाः, कवर्ग-पवर्गयोः वर्णाः, आङ्-निपातः, नुम्-आगमः इत्येतैः सर्वैः यथाशक्यं मिलित्वा अपि व्यवधानं सृज्यते तथापि तदनन्तरं यदि न्-कारः भवति तर्हि तस्य ण्-कारादेशः भवति समानपदे।

विशेषार्थः - सूत्रमिदं समानपदे एव प्रवृत्तिं करोति अतः निमित्तरूपौ रेफ-ष-कारौ तथा च स्थानी न्-कारः उभावपि एकस्मिन्नेव पदे अपेक्षितौ अन्यथा अस्य सूत्रस्य प्रवृत्तिः न भविष्यति। अट्-प्रत्याहारे अकारग्रहणेनैव आकारस्यापि समावेशः स्वतः सिद्ध्यति तथापि आङ्-ग्रहणं पदव्यवायेऽपि इत्यनेन प्राप्तः णत्वनिषेधः आङ्-व्यवधाने सत्यपि न निषिध्येत। इत्थं सूत्रमिदं पदव्यवायेऽपि इति सूत्रस्य बाधकं भवति।

**(198) पदान्तस्य। 8। 4। 37॥**

**वृत्तिः - पदान्तस्य नस्य णत्वं न स्यात्। रामान्।**

पदच्छेदः - पदान्तस्य एकपदं सूत्रमिदम्।

समासः - पदस्य अन्तः, पदान्तः तस्य (तत्पुरुषः)।

अनुवृत्तिः - नः, णः, न।

सूत्रप्रकारः - विधि (निषेध) सूत्रम्।

सरलार्थः - पदान्तस्य न्-कारस्य ण्-कारः न भवति।

विशेषार्थः - सूत्रमिदं अट्कुप्वाङ्नुम्व्यवायेऽपि इति सूत्रस्य नियमनं करोति। अतः रेफ-ष्-काररूपे निमित्ते सत्यपि

साधनिका – रामान् इत्यत्र 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण णत्वे प्राप्ते, किन्तु पदान्तस्य इति सूत्रेण प्राप्तस्य णत्वस्य निषेधे कृते रामान् इति रूपं सिद्ध्यति।

**(199) यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्। 6।4। 13॥**

**वृत्तिः – यः प्रत्ययो यस्मात् क्रियते तदादि शब्दस्वरूपं तस्मिन् परेऽङ्गसंज्ञं स्यात्। भवामि भविष्यामि इत्यादौ विकरणविशिष्टस्याङ्गसंज्ञार्थं तदादिग्रहणम्। विधिः इति किम् ? स्त्री इयती। प्रत्यये किम् ? प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वा मा भूत्।**

पदच्छेदः – यस्मात्, प्रत्ययविधिः, तदादि, प्रत्यये, अङ्गम् पञ्चपदं सूत्रमिदम्।

समासः – प्रत्यस्य विधिः प्रत्ययविधिः (तत्पुरुषः), तत् (प्रकृतिरूपम्) आदिः यस्य तत् तदादि (बहुव्रीहिः)।

अनुवृत्तिः – स्वस्मिन् संपूर्णं सूत्रमिदम्।

सूत्रप्रकारः – संज्ञासूत्रम्।

सरलार्थः – यम् उद्दिश्य प्रत्ययः क्रियते तदा ततः पूर्वं विद्यमानं शब्दस्वरुपं प्रत्यये परे सति अङ्ग इति संज्ञां प्राप्नोति।

विशेषार्थः – सूत्रे तदादि इति ग्रहणं कृतं तेन न केवला प्रकृतिः अपि तु प्रत्ययात् पूर्वं विकरण–प्रत्ययसहिता प्रकृतिरपि गृह्यते। यथा – भवामि इत्यत्र मि – प्रत्यये परे सति भव इत्यस्य अङ्गसंज्ञा भवति तेन अतो दीर्घो यञि इति सूत्रेण दीर्घः भवति। भविष्यामि इत्यत्र मि–प्रत्यये परे भविष्य इत्यस्य अङ्गसंज्ञा भवति तेन अतो दीर्घो यञि इति सूत्रेण दीर्घः भवति।

**(200) अङ्गस्य। 6।4। 1॥**

**वृत्तिः – इत्यधिकृत्य।**

पदच्छेदः – अङ्गस्य एकपदं सूत्रमिदम्।

अनुवृत्तिः – स्वस्मिन् संपूर्णं सूत्रमिदम्।

सूत्रप्रकारः – अधिकारसूत्रम्।

सरलार्थः – इतः परम् अङ्गस्य अधिकारः प्रवर्तते।

विशेषार्थः – अस्य सूत्रस्य अधिकारः सप्तमाध्यायान्तं यावत् विद्यते। अतः तावत्पर्यन्तं पठितानि सूत्राणि अङ्गाधिकारीयसूत्राणीति कथ्यन्ते। तेषु सूत्रेषु अङ्गस्य इति पदम् अनुवर्तते। तत्र विधीयमानं कार्यमपि अङ्गम् अधिकृत्य विधीयते।

**(201) टाङसिङसामिनात्स्याः । 7।1। 12॥**

**वृत्तिः – अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः। णत्वम्। रामेण।**

पदच्छेदः – टाङसिङसाम्, इनात्स्याः द्विपदं सूत्रमिदम्।

समासः – टा च ङसि च ङस् च इति तेषा टाङसिङसाम् (द्वन्द्वः), इनश्च आत् च स्य च इति ते इनात्स्याः (द्वन्द्वः)।

अनुवृत्तिः – अतः, अङ्गस्य।

सूत्रप्रकारः –विधिसूत्रम्।

सरलार्थः – ह्रस्व–अकारान्तात् अङ्गात् परेषाम् टा, ङसि, ङस् इत्येतेषां प्रत्ययानां स्थाने क्रमात् इन, आत्, स्य इत्यादेशाः भवन्ति।

विशेषार्थः – अनेन सूत्रेण क्रियमाणाः आदेशाः 'यथासंख्यमनुदेशः' समानाम् इति सूत्रमनुसृत्य क्रमशः – टा – इन, ङसि – आत्, ङस् – स्य इत्थं भविष्यन्ति।

साधनिका – प्रातिपदिकात् रामशब्दात् (कर्तृकरणयोस्तृतीया इति सूत्रेण) तृतीयैकवचनविवक्षायां द्वयेकयोर्द्विवचनैकवचने इति सूत्रसहकारेण ''स्वौजसमौट्'' –– इत्यादिना सूत्रेण टा प्रत्यये कृते 'राम + टा' इति जाते, टा – प्रत्ययस्य आदौ स्थितस्य ट्– कारस्य चुटू इति सूत्रेण इत्संज्ञायाम् तस्य लोपे च कृते राम + आ इति जाते ''यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्'' इति सूत्रेण टा–प्रत्यये परे सति राम इत्यस्य अङ्गसंज्ञायाम्, ''टाङसिङसामिनात्स्याः'' इति सूत्रेण राम इत्यकारान्तादङ्गात्परस्यटा

इत्यस्य स्थाने इन आदेशे, 'राम + इन' इति जाते 'आद्गुणः' इति सूत्रेण अकार + इकारयोः गुणैकादेशे एकारे रामेन इति जाते ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति सूत्रेण नकारस्य णत्वे रामेण इति रूपं सिद्ध्यति।

**(202) सुपि च । 7। 3। 102॥**

**वृत्तिः - यञादौ सुपि परे अतोऽङ्गस्य दीर्घः स्यात्। रामाभ्याम्।**

पदच्छेदः - सुपि, च द्विपदं सूत्रमिदम्।

अनुवृत्तिः - अतः, अङ्गस्य, दीर्घः, यञि।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - ह्रस्व-अकारान्तात् अङ्गात् यदि यञादि सुप् - प्रत्ययः भवेत्तर्हि तस्य अङ्गस्य दीर्घः भवति।

विशेषार्थः - सुप् - प्रत्ययेषु भ्याम्, भिस्, भ्यस् प्रत्ययाः यञादि सुप् - प्रत्ययाः सन्ति तेषु परेषु सत्सु पूर्वं विद्यमानस्य ह्रस्व-अकारान्तस्य अङ्गस्य ह्रस्व-अकारस्य दीर्घः भवति।

साधनिका - प्रातिपदिकात् रामशब्दात् कर्तृकरणयोस्तृतीया इति सूत्रेण तृतीयाद्विवचनविवक्षायां ''द्वयेकयोर्द्विवचनैकवचने'' इति सूत्रसहकारेण ''स्वौजसमौट्'' - इत्यादिना सूत्रेण भ्याम् प्रत्यये कृते राम + भ्याम् इति जाते, ''यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्'' इति सूत्रेण भ्याम्-प्रत्यये परे सति राम इत्यस्य अङ्गसंज्ञायाम्, यञादौ सुपि परे सति अकारान्तस्य अङ्गस्य सुपि च इति सूत्रेण दीर्घे रामाभ्याम् इति रूपं सिद्ध्यति।

**(203) अतो भिस ऐस्। 7। 1। 9॥**

**वृत्तिः - अकारान्तादङ्गाद्भिस ऐस् स्यात्। अनेकाल्त्वात्सर्वादेशः। रामैः।**

पदच्छेदः - अतः, भिसः, ऐस् त्रिपदं सूत्रमिदम्।

अनुवृत्तिः - अङ्गस्य।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - ह्रस्व-अकारान्तात् अङ्गात् परस्य भिस् - प्रत्ययस्य स्थाने ऐस् - आदेशः भवति।

विशेषार्थः - ऐस्-आदेशः अनेकवर्णयुक्तः अस्ति अतः अनेकाल्शित्सर्वस्य इति परिभाषासूत्रमनुवर्त्य समग्रस्य भिस् - प्रत्ययस्य स्थाने आदेशः भवति।

साधनिका - प्रातिपदिकात् रामशब्दात् ''कर्तृकरणयोस्तृतीया इति'' सूत्रेण तृतीयाबहुवचनविवक्षायां ''बहुषु बहुवचनम्'' इति सूत्रसहकारेण ''स्वौजसमौट्''-इत्यादिना सूत्रेण भिस् प्रत्यये कृते राम + भिस् इति जाते, ''यस्मात्प्रत्ययविधि-स्तदादिप्रत्ययेऽङ्गम्'' इति सूत्रेण भिस् - प्रत्यये परे सति राम इत्यस्य अङ्गसंज्ञायाम्, ''अतो भिस ऐस्'' इति सूत्रेण ह्रस्व-अकारान्तादङ्गात् परस्य भिस् - प्रत्यस्य स्थाने ऐस् आदेशे राम + ऐस् इति जाते ''वृद्धिरेचि'' इति सूत्रेण अकार + ऐकारयोः वृद्धिरेकादेशे ऐकारे रामैस् इति जाते स् - कारस्य रुत्वे विसर्गे च कृते रामैः इति रूपं सिद्ध्यति।

यद्यप्यत्र यञादि - सुप् परे विद्यते अतः सुपि च इति सूत्रेण दीर्घः प्राप्तः भवति किन्तु ''वार्णादाङ्गं बलीयः'' इति परिभाषामनुसृत्य ततः पूर्वमेव भिसः स्थाने ऐस् आदेशः भवति नष्टे च निमित्ते दीर्घविधायकसूत्रस्य प्रवृत्तिरपि न भवति।

**(204) ङेर्यः। 7। 1। 13॥**

**वृत्तिः - अतोऽङ्गात्परस्य ङे इत्यस्य यादेशः स्यात्। रामाय। इह स्थानिवद्भावेन यादेशस्य सुप्त्वात् सुपि च ( सू.202 ) इति दीर्घः। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ( प. 86 ) इति परिभाषा तु नेह प्रवर्तते। कष्टाय क्रमणे ( सू.2670. ) इत्यादिनिर्देशात् तस्या अनित्यत्वाज्ज्ञापनात्। रामाभ्याम्।**

पदच्छेदः - ङेः, यः द्विपदं सूत्रमिदम्।

अनुवृत्तिः - अतः, अङ्गस्य।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - ह्रस्व-अकारान्तात् अङ्गात् परस्य ङे - प्रत्ययस्य स्थाने य-आदेशः भवति।

विशेषार्थः - अनेन सूत्रेण विधीयमानः आदेशः अनेकाल्त्वात् सर्वस्य स्थानिनः स्थाने भवति। पुनश्च आदेशरूपः यकारः स्थानिवद्भावेन सुप्त्वमाप्य प्रत्ययफलं ददाति। अत्र शङ्का भवति यत् - यदि स्थानिवद्भावेन यञादिः सुप् परे विद्यते इति मत्वा ह्रस्वस्य दीर्घः विधीयते, तर्हि यकार- विधायकं निमित्तं नष्टं भवति तेन च दीर्घनिमित्तमपि नष्टं भवति। यतो हि ''निमित्तापाये नैमित्तिकस्यापि अपायः'' अतः दीर्घः न विधेय इति कारणं सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य अर्थात् निमत्तमाश्रित्य विधीयमानं कार्यं निमित्तस्यैव घातकं न भवेत् इति। तर्हि अत्रैषा परिभाषा नानुसरणीया कारणं पाणिनिना स्वयं कष्टाय क्रमणे इति सूत्रे कष्टाय इति रूपं विधातुं दीर्घः कृतः। न च तेन यकारस्य हानिः अतः सन्निपातलक्षण - परिभाषायाः अनित्यत्वं मत्वा अत्र दीर्घविधिः कर्तव्यः नात्र शङ्कावकाशः।

साधनिका - प्रातिपदिकात् रामशब्दात् चतुर्थी सम्प्रदाने इति सूत्रेण चतुर्थ्येकत्वविवक्षायां ''द्व्येकयोर्द्विवचनैकवचने'' इति सूत्रसहकारेण ''स्वौजसमौट्'' - इत्यादिना सूत्रेण ङे प्रत्यये कृते राम + ङे इति जाते, लशक्वतद्धिते इति सूत्रेण प्रत्ययादेः ङ्- प्रत्यये परे सति राम इत्यस्य अङ्गसंज्ञायाम्, ङेर्यः इति सूत्रेण ह्रस्व-अकारान्तादङ्गात् परस्य ङे इत्यस्य यकारादेशे राम + य इति जाते 'स्थानिवदादेशोऽनल्विधौ' इत्यनेन स्थानिवद्भावेन आदेशस्य यकारस्य सुप्त्वं मत्वा ''सुपि च'' इति सूत्रेण यञादौ सुपि परे हरस्व- अकारान्तस्य अङ्गस्य दीर्घः रामा + य वर्णसम्मेलने रामाय इति रूपं सिद्ध्यति। रामाभ्याम् पूर्ववत्।

---

**(204) बहुवचने झल्येत्। 7।3। 103॥**

**वृत्तिः - झलादौ बहुवचने सुपि परे अतोऽङ्गस्यैकारः स्यात्। रामेभ्यः । बहुवचनं किम् ? रामः। रामस्य। झलि किम् ? रामाणाम् । सुपि किम् ? पचध्वम्। जश्त्वम्।**

---

पदच्छेदः - बहुवचने, झलि, एत् त्रिपदं सूत्रमिदम्।

अनुवृत्तिः - अतः, अङ्गस्य, सुपि।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - ह्रस्व-अकारान्तात् अङ्गात् यदि बहुवचनस्य झलादिः सुप्-प्रत्ययः परे भवति तर्हि अदन्तस्य अङ्गस्य एकारादेशः भवति।

विशेषार्थः - सूत्रे बहुवचने इति पदं किमर्थं प्रयुक्तमिति चेत् यदि झलादि-प्रत्ययः बहुवचनस्य न भविष्यति तर्हि सूत्रस्यास्य प्रवृत्तिः न भवति यथा - 'राम+सु' इत्यत्र झलादिः प्रत्ययः अस्ति, किन्तु सः प्रथमैकवचनस्यास्ति अतः तत्र एत्वं न भवति। झलि इति पदं सूत्रे निर्दिष्टम् अस्ति तेन बहुवचनस्य प्रत्ययः झलादिः न भवेत्तर्हि तत्र सूत्रमिदं प्रवृत्तं न भवति। यथा रामाणाम् इत्यत्र बहुवचनस्य प्रत्ययः अस्ति किन्तु आम् प्रत्ययः झलादिः नास्ति अतः तत्रापि एत्वं न विधीयते। इत्थं सूत्रस्य प्रत्येकं परिमाणम् अनिवार्यम् अस्ति।

साधनिका - प्रातिपादिकात् रामशब्दात् चतुर्थी सम्प्रदाने इति सूत्रेण चतुर्थीबहुवचनविवक्षायां बहुषु बहुवचनम् इति सूत्रसहकारण स्वौजसमौट् - इत्यादिना सूत्रेण भ्यस् प्रत्यये कृते राम + भ्यस् इति जाते, यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम् इति सूत्रेण भ्यस् - प्रत्यये परे सति राम इत्यस्य अङ्गसंज्ञायाम्, झलादौ बहुवचने परे रामशब्दस्यान्त्यस्य अकारस्य एकारादेशे वर्णसम्मेलने रामेभ्यस् इति जाते रुत्वे विसर्गे च कृते रामेभ्यः इति रूपं सिद्ध्यति।

---

**(206) वाऽवसाने । 8।4। 56॥**

**वृत्तिः - अवसाने झलां चरो वा स्युः । रामात् - रामाद् । द्वित्वे रूपचतुष्टयम्। रामाभ्याम्। रामेभ्यः। रामस्य। सस्य द्वित्वपक्षे खरि च ( सू.121 ) इति चर्त्वेऽप्यान्तरतम्यात्स एव। न तु तकारः, अल्पप्राणतया प्रयत्नभेदात्। अत एव सः सि - ( सू.2642 ) इति तादेश आरभ्यते।**

---

पदच्छेदः - वा, अवसाने द्विपदं सूत्रमिदम्।

अनुवृत्तिः - झलाम्, चर्।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - यत्र वर्णानाम् अभावः स्यात् तत्र स्थितानां झल् - प्रत्याहारस्य वर्णानां स्थाने चर् - प्रत्याहारस्य वर्णाः विकल्पेन आदेशरूपेण भवन्ति।

विशेषार्थः - झल् - वर्गाणां प्रथम-द्वितीय-तृतीय-चतुर्थवर्णाः श्-ष्-स्-ह्-काराः च। तेषां स्थाने चर् - वर्गाणां प्रथमवर्णाः, श्-ष्-स्-काराः आदेशरूपेण भवन्ति। यदि अवसानः - वर्णानाम् अभावः परे स्यात् अर्थात् सः झल् अन्तिमशब्दरूपेण स्यात्।

साधनिका - रामात् - प्रातिपदिकात् रामशब्दात् ''अपादाने पञ्चमी'' इति सूत्रेण पञ्चम्येकत्वविवक्षायां ''द्व्येकयोर्द्विवचनैकवचने'' इति सूत्रसहकारेण ''स्वौजसमौट्'' - इत्यादिना सूत्रेण ङसि प्रत्यये कृते राम + ङसि इति जाते, ''लशक्वतद्धिते'' इति सूत्रेण प्रत्यवस्यादि ङ्-कारस्य इत्संज्ञायां, ''उपदेशेऽजनुनासिक इत्'' इत्यनेन उपदेशस्य अनुनासिक - इकारस्य इत्संज्ञायाम् उभयोः इत्संज्ञकयोः लोपे च कृते राम + अस् इति जाते ''यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्'' इति सूत्रेण ङसि - प्रत्यये परे सति राम इत्यस्य अङ्गसंज्ञायाम्, ''टाङसिङसामिनात्स्याः'' इति सूत्रेण ङसि-प्रत्ययस्य स्थाने आत् आदेशे राम + आत् इति जाते सवर्णदीर्घे कृते रामात् इति जाते ''झलां जशोऽन्ते'' इत्यनेन जश्त्वे कृते रामाद् इति जाते ''वाऽवसाने'' इति सूत्रेण अवसानत्वात् विकल्पेन चर्त्वे कृते रामात् इति रूपं सिद्ध्यति। विकल्पे चर्त्वाभावपक्षे रामाद् इति रूपं सिद्ध्यति। ''अनचि च'' इति सूत्रेण त्/द् - कारयोः वा द्वित्वे कृते सति रामात्त्/द्द् इति रूपे सिद्ध्यतः। इत्थं रूपचतुष्टयं भवति। रामाभ्याम्। रामेभ्यः। इति रूपे पूर्ववत्।

रामस्य - प्रातिपदिकात् रामशब्दात् षष्ठी शेषे इति सूत्रेण षष्ठ्येकत्वविवक्षायां ''द्व्येकयोर्द्विवचनैकवचने'' इति सूत्रसहकारेण ''स्वौजसमौट्'' - इत्यादिना सूत्रेण ङस् प्रत्यये कृते राम+ङस् इति जाते, ''लशक्वतद्धिते'' इति सूत्रेण प्रत्ययादेः ङ्-कारस्य इत्संज्ञायां, लोपे च कृते राम + अस् इति जाते ''यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्'' इति सूत्रेण ङस् - प्रत्यये परे सति राम इत्यस्य अङ्गसंज्ञायाम्, ''टाङसिङसामिनात्स्याः'' इति सूत्रेण ङस् - प्रत्ययस्य स्थाने स्य आदेशे राम + स्य इति रूपं सिद्ध्यति। ''अनचि च'' इत्यनेन वा सस्य द्वित्वपक्षे पूर्वस्-कारस्य खरि च इत्ययेन चर्त्वे कृतेऽपि स्-कारादेश एव भवति न तु त् - कारः आन्तरतम्यात्।

**(207) ओसि च। 7 । 3 । 104 ॥**

**वृत्तिः - ओसि परे अतोऽङ्गस्यैकारः स्यात्। रामयोः।**

पदच्छेदः - ओसि, च द्विपदं सूत्रमिदम्।

अनुवृत्तिः - अतः, अङ्गस्य, एत्।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - ओस् - प्रत्यये परे सति ह्रस्व-अकारान्तस्य अङ्गस्य एकारः भवति।

विशेषार्थः - सूत्रमिदं षष्ठी-सप्तमीद्विवचनस्य ओस् - प्रत्यये परे सति पूर्वस्य अकारान्त-अङ्गस्य एत्वं करोति तदन्तविधिना अन्त्यस्य ह्रस्व-अकारस्य स्थाने आदेशः भविष्यति।

साधनिका - प्रातिपदिकात् रामशब्दात् ''षष्ठी शेषे'' इति सूत्रेण षष्ठीद्वित्वविवक्षायां ''द्व्येकयोर्द्विवचनैकवचने'' इति सूत्रसहकारेण ''स्वौजसमौट्'' - इत्यादिना सूत्रेण ओस् प्रत्यये कृते राम + ओस् इति जाते, ''यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्'' इति सूत्रेण ओस् - प्रत्यये परे सति राम इत्यस्य अङ्गसंज्ञायाम्, ''ओसि च'' इति सूत्रेण ओस्-परकत्वात् ह्रस्व-अकारान्तस्य अङ्गस्य एत्वे रामे + ओस् इति जाते ''एचोऽयवायावः'' इति सूत्रेण एकारस्य अयादेशे कृते रामय् + ओस् वर्णसम्मेलने, रुत्वे विसर्गे च कृते रामयोः इति रूपं सिद्ध्यति।

**(208) ह्रस्वनद्यापो नुट्। 7 । 1 । 54 ॥**

**वृत्तिः ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।**

पदच्छेदः - ह्रस्वनद्यापः, नुट् द्विपदं सूत्रमिदम्।

समासः - ह्रस्वश्च नदी च आप् चेति हरस्वनद्यापः (द्वन्द्वः)।

अनुवृत्तिः - आमि।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - ह्रस्वान्तात्, नद्यन्तात्, आबान्तात् अङ्गात् परस्य आम् प्रत्ययस्य नुट् - आगमः भवति।

विशेषार्थः - अनेन सूत्रेण विधीयमानः नुट् - आगमः टित्त्वात् आद्यन्तौ टकितौ इति सूत्रानुसारम् आद्यवयवरुपेण विधीयते । नद्यन्तेन नित्यस्त्रीलिङ्गानाम् ईकारान्त-ऊकारान्तशब्दानां बोधः भवति आबन्तेन स्त्रीप्रत्ययप्रकरणे विहितानां टाप्, डाप्, चाप् - प्रत्ययानां बोधः भवति।

**(209) नामि । 6 ।4 । 3 ॥**

**वृत्तिः - नामि परेऽजन्ताङ्गस्य दीर्घः स्यात्। रामाणाम्। सुपि च ( सू.२०२ ) इति दीर्घो यद्यपि परस्तथापीह न प्रवर्तते, सन्निपातपरिभाषाविरोधात्। नामि इत्यनेन त्वारम्भसामर्थ्यात्परिभाषा बाध्यते। रामे। रामयोः। सुप्येत्वे कृते।**

पदच्छेदः - नामि एकपदं सूत्रमिदम्।

अनुवृत्तिः - दीर्घः, अच्, अङ्गस्य।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - नाम्-इति प्रत्ययरूपे परे सति पूर्वस्य अजन्तस्य अङ्गस्य दीर्घः भवति।

विशेषार्थः - अत्र नामि इति ग्रहणेन नुट् - आगमसहितस्य आम्-प्रत्ययस्य बोधः करणीयः। अनेन च नुटः अवयवत्वं बोध्यते। इत्थमपि ज्ञायते यत् यदा नुट्-सहितः आम्प्रत्ययः परे भविष्यति तदानीमेव पूर्वस्य अचः दीर्घो भविष्यति इति।

साधनिका - प्रातिपदिकात् रामशब्दात् 'षष्ठी शेषे' इति सूत्रेण षष्ठीबहुत्वविवक्षायां ''बहुषु बहुवचनम्'' इति सूत्रसहकारेण ''स्वौजसमौट्'' - इत्यादिना सूत्रेण आम् प्रत्यये कृते 'राम + आम्' इति जाते, ''यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्'' इति सूत्रेण 'आम् - प्रत्यये' परे सति राम इत्यस्य अङ्गसंज्ञायाम्, ''ह्रस्वनद्यापो'' नुट् इति सूत्रेण ह्रस्वान्तादङ्गात् परस्य आम्-प्रत्ययस्य नुट्-आगमे अनुबन्धलोपे राम + न् आम् इति जाते, ''नामि'' इति सूत्रेण नुट्-सहिते आम्प्रत्यये परे सति ह्रस्वान्तस्य अङ्गस्य दीर्घे आकारे कृते रामा + नाम् इति जाते 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण न्-कारस्य णत्वे वर्णसम्मेलने 'रामाणाम्' इति रूपं सिद्ध्यति।

रामे - प्रातिपदिकात् रामशब्दात् ''सप्तम्यधिकरणे च'' इति सूत्रेण सप्तम्येकत्वविवक्षायां ''द्व्येकयोर्द्विवचनैकवचने'' इति सूत्रसहकारेण स्वौजसमौट्-इत्यादिना सूत्रेण ङि प्रत्यये कृते राम + ङि' इति जाते, लशक्वतद्धिते इति सूत्रेण प्रत्ययादेः ङ्-कारस्य इत्संज्ञायां लोपे च कृते राम + इति जाते, अकार - इकारयोः गुणैकादेशे एकारे कृते वर्णसम्मेलने रामे इति रूपं सिद्ध्यति।

**(210) अपदान्तस्य मूर्धन्यः। 8।3। 55॥**

**वृत्तिः - आपादपरिसमाप्तेरधिकारोऽयम्।**

पदच्छेदः - अपदान्तस्य, मूर्धन्यः द्विपदं सूत्रमिदम्।

समासः - पदस्य अन्तः पदान्तः (तत्पुरुषः), न पदान्तः अपदान्तः तस्य अपदान्तस्य (नञ्)।

अनुवृत्तिः - स्वस्मिन् संपूर्णं सूत्रमिदम्।

सूत्रप्रकारः - अधिकारसूत्रम्।

सरलार्थः - इदम् अधिकारसूत्रम् अष्टमाध्यायस्य तृतीये पादे पठितस्य अनुवृत्तिः पादसमाप्तिपर्यन्तं भवति।

विशेषार्थः - सूत्रमिदं मूर्धन्याधिकारं विदधाति। स च अधिकारः अष्टमाध्यायस्य तृतीयपादपरिसमाप्तिपर्यन्तं विद्यते। अतः इतः परं यावन्ति सूत्राणि प्रवर्तन्ते तत्र अपदान्तस्य मूर्धन्यः इति संयोज्य सूत्रार्थो विधास्यते।

**(211) इण्कोः। 8।3। 57 ॥**

**वृत्तिः - इत्यधिकृत्य।**

पदच्छेदः - इण्कोः एकपदं सूत्रमिदम्।

समासः - इण् च कुश्चेति तयोः इण्कोः (द्वन्द्वः)।

अनुवृत्तिः - स्वस्मिन् संपूर्ण सूत्रमिदम्।

सूत्रप्रकारः - अधिकारसूत्रम्।

सरलार्थः - इदम् अधिकारसूत्रम् अष्टमाध्यायस्य तृतीये पादे अपदान्तस्य मूर्धन्यः इति सूत्रानन्तरं पठितं तस्य अनुवृत्तिः तत्पश्चाद्वर्तिसूत्रेषु भवति। इण् - प्रत्याहारस्य कवर्गस्य च वर्णेषु परेषु सत्सु इति अर्थः अनुगामिषु सूत्रेषु अनुवर्तते।

विशेषार्थः - अस्मिन् सूत्रे अपदान्तस्य मूर्धन्यः इति अधिकारसूत्रस्य अर्थः स्वयमेव अनुसृतः भवति अतः अपदान्तस्य स् - कारस्य स्थाने मूर्धन्यः ष्-कारः भवति यदि इण्-स्वराः, ह्-अन्तःस्थाःवर्णाः, क-वर्गस्य वर्णाः परे स्युः तर्हि इत्यर्थः परवर्तिषु सूत्रेषु अनुवर्तिष्यते।

**(212) आदेशप्रत्यययोः। 8 ।3 । 59॥**

**वृत्तिः - सहेः साडः सः ( सू.335 ) इति सूत्रात् सः इति षष्ठ्यन्तं पदमनुवर्तते। इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्। विवृताघोषस्य सस्य तादृश एव षः। रामेषु। इण्कोः किम् ? रामस्य। आदेशप्रत्यययोः किम् ? सुपीः। सुपिसौ। सुपिसः। अपदान्तस्य किम् ? हरिस्तत्र। एवं कृष्णमुकुन्दादयः।**

पदच्छेदः - आदेशप्रत्यययोः एकपदं सूत्रमिदम्।

समासः - आदेशश्च प्रत्ययश्च तौ तयोः आदेशप्रत्यययोः (द्वन्द्वः)।

अनुवृत्तिः - सः, अपदान्तस्य, मूर्धन्यः, इण्कोः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - इण्-प्रत्याहारस्य वर्णेभ्यः, क-वर्गीयवर्णेभ्यः वा परस्य आदेशस्य प्रत्ययावयवरूपस्य वा अपदान्तस्य स्-कारस्य मूर्धन्यादेशः भवति।

विशेषार्थः - स्-कारस्य मूर्धन्यादेशः तादृश - प्रयत्नवान् ष्-काररूपः भवति। सूत्रे इण्कोः इति किमर्थमिति चेत् प्रत्यायावयवः स्कारः स्यात् किन्तु ततः पूर्वम् इण्-कोः वर्णाः न स्युः तर्हि मूर्धन्यादेशः न भवति। यथाः रामस्य इत्यत्र स्-कारः प्रत्ययावयवः अस्ति किन्तु ततः पूर्वम् इण्-कवर्गौ न स्तः अतः तत्र षत्वं न सम्भवति। आदेशप्रत्यययोः इति सूत्रे किमर्थं निर्दिष्टमिति चेत् यदि स्-कारः आदेशस्य, प्रत्ययस्य वा न भवेत्तर्हि सूत्रस्य प्रवृत्तिः न सम्भवति। यथा- सुपीः इत्यत्र स्-कारः प्रत्ययस्य न अपि तु सुपिस् - शब्दस्य विद्यते अतः तत्र ष-त्वं न भवति।

साधनिका - रामेषु - प्रातिपदिकात् रामशब्दात् 'सप्तम्यधिकरणे च' इति सूत्रेण सप्तमीबहुत्वविवक्षायां ''बहुषु बहुवचनम्'' इति सूत्रसहकारेण ''स्वौजसमौट्-इत्यादिना'' सूत्रेण सुप् प्रत्यये कृते, अनुबन्धलोपे राम + सु इति जाते, ''यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्'' इति सूत्रेण सुप्-प्रत्यये परे सति राम इत्यस्य अङ्गसंज्ञायाम्, ''बहुवचने झल्येत्'' इति सूत्रेण झलादौ बहुवचने परे सति अकारस्य एत्वे कृते रामे + सु इति जाते अपदान्तस्य मूर्धन्यः, इण्कोः इति सूत्रयोः सहकारेण इणः परस्य प्रत्ययावयवस्य अपदान्तस्य सस्य मूर्धन्यादेशे रामेषु इति रूपं सिद्ध्यति।

**(213) सर्वादीनि सर्वनामानि। 1 ।1 । 17॥**

**वृत्तिः - सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः। तदन्तस्यापीयं संज्ञा। द्वन्द्वे च ( सू.224 ) इति ज्ञापकात्। तेन परमसर्वत्र इति त्रल्, परमभवकान् इत्यत्राकच् सिद्धयति।**

पदच्छेदः - सर्वादीनि, सर्वनामानि द्विपदं सूत्रमिदम्।

समासः - सर्वः आदिः येषां तानि सर्वादीनि (बहुव्रीहिः)।

अनुवृत्तिः - स्वस्मिन् संपूर्णं सूत्रमिदम्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - सर्वादिगणपठितानां शब्दानां शब्दरूपाणां सर्वनामसंज्ञा भवति।

विशेषार्थः - समासे सर्वादयः यत्र शब्दान्ते भवन्ति तत्रापि सामासिकशब्दानां सर्वनामसंज्ञा भवति। तेन परमसर्व इति शब्दे अन्ते सर्वशब्दस्य पाठात् तस्य सर्वनामसंज्ञा भवति त्रल् प्रत्ययान्तरूपं सिद्धयति। परमभवत् शब्दे अकच् प्रत्ययसंयोजनेन परमभवकान् इति रूपं प्राप्यते। सूत्रमिदं अभिधानवाचकानां शब्दानां सर्वनामसंज्ञां न करोति अत्र साक्षादुच्चरितानां शब्दानामेव सर्वनामसंज्ञां करोति अतः कस्यचित् नाम्नः यदि सर्वनामगणीयेन शब्देन साम्यं भवति तर्हि तस्य सर्वनामसंज्ञा न भवति। यथा - सर्वाय, विश्वाय।

साधनिका - सर्वः । सर्वौ इति रूपे रामवत्।

**(214) जसः शी । 7। 1 । 17 ॥**

**वृत्तिः - अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात्। अनेकाल्त्वात्सर्वादेशः । न च अर्वणस्तृ- (सू. 364) इत्यादाविव नानुबन्धकृतमनेकाल्त्वम् (प.६) इति वाच्यम्, सर्वादेशत्वात्प्रागित्संज्ञाया एवाभावत्। सर्वे।**

पदच्छेदः - जसः, शी द्विपदं सूत्रमिदम्।

अनुवृत्तिः - अतः, सर्वनाम्नः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - ह्रस्व - अकारान्त - सर्वनामसंज्ञकात् शब्दात् परस्य जस्-प्रत्ययस्य स्थाने शी-आदेशः भवति।

विशेषार्थः - अनेन सूत्रेण क्रियमाणः शी आदेशः अनेकाल्-त्वात् सर्वस्य स्थानिनः स्थाने भवति।

अत्र 'नानुबन्धकृतमनेकाल्त्वम्' इति परिभाषया अनुबन्धैः सह कृतः आदेशः यदि अनुबन्धलोपानन्तरं एकाल्त्वमाप्नोति तर्हि सः 'अनेकाल् आदेशः' इति न कथ्यते एतादृशी शङ्का न विधेया यतो हि आदेशात्पूर्वम् इत्संज्ञायाः प्रवृत्तिर्न भवति।

साधनिका - प्रातिपदिकस्य अकारान्तपुँल्लिङ्ग - सर्वशब्दस्य सर्वादीनि सर्वनामानि इति सूत्रेण सर्वनाम संज्ञायाम्, प्रथमा-बहुवचनविवक्षायाम् बहुवचनसंज्ञके जस्-प्रत्यये सर्व + जस् इति जाते अनुबन्धलोपे सर्व + अस् इति जाते 'जसः शी' इति सूत्रेण ह्रस्व-अकारान्तसर्वनामशब्दात् परस्य जसः स्थाने शी आदेशे सर्व + शी इति जाते अनुबन्धलोपे सर्व + ई इति जाते आद्गुणः इति सूत्रेण अकार + ईकारयोः गुणैकादेशे एकारे वर्णसम्मेलने सर्वे इति रूपं सिद्ध्यति।

**(215) सर्वनाम्नः स्मै। 7। 1 । 14 ॥**

**वृत्तिः - अतस्सर्वनाम्नो ङे इत्यस्य स्मै स्यात्। सर्वस्मै।**

पदच्छेदः - सर्वनाम्नः, स्मै द्विपदं सूत्रमिदम्।

अनुवृत्तिः - अतः, ङेः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - ह्रस्व-अकारान्तात् सर्वनामसंज्ञकात् शब्दात् परस्य ङे-प्रत्ययस्य स्थाने स्मै आदेशः भवति।

विशेषार्थः - अनेन सूत्रेण क्रियमाणः आदेशः अपि अनेकाल्त्वात् समग्रस्य स्थानिनः स्थाने भवति। सूत्रमिदं ङेर्यः इति सूत्रस्य बाधकम् अस्ति।

साधनिका - प्रातिपदिकस्य अकारान्तपुँल्लिङ्ग - सर्वशब्दस्य ''सर्वादीनि सर्वनामानि'' इति सूत्रेण सर्वनाम संज्ञायाम्, चतुर्थ्येकत्वविवक्षायाम् एकवनचस्य ङे प्रत्यये कृते सर्व + ङे इति जाते अनुबन्धलोपे सर्व + ए इति जाते ङेर्यः इति सूत्रेण प्राप्तं यत्वं प्रबाध्य 'सर्वनाम्नः स्मै' इति सूत्रेण ङे-प्रत्ययस्य स्थाने स्मै आदेशे कृते वर्णसम्मेलने सर्वस्मै इति रूपं सिद्धयति।

**(216) ङसिङ्योः स्मात्स्मिनौ। 7। 1 । 14 ॥**

**वृत्तिः - अतस्सर्वनाम्न एतयोरेतौ स्तः। सर्वस्मात्।**

पदच्छेदः - ङसिङ्योः, स्मात्स्मिनौ द्विपदं सूत्रमिदम्।

समासः - ङसि च ङि च तौ ङसिङ्यौ तयोः ङसिङ्योः (द्वन्द्वः), स्मात् च स्मिन् च तौ स्मात्स्मिनौ (द्वन्द्वः)।

अनुवृत्तिः - अतः, सर्वनाम्नः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - ह्रस्व-अकारान्तात् सर्वनामसंज्ञकात् परयोः ङसिङ्योः प्रत्ययोः स्थाने क्रमशः स्मात्-स्मिनौ आदेशौ स्तः।

विशेषार्थः - ''यथासंख्यमनुदेशः समानाम्'' इति परिभाषासूत्रमनुसृत्य क्रमेण ङसि इत्यस्य स्थाने स्मात् आदेशः तथैव ङि इत्यस्य स्थाने स्मिन् आदेशः भवति। अनेकाल्त्वात् समग्रस्य स्थानिनः स्थाने भवति। सूत्रमेतत् ''टाङसिङसामिनात्स्याः'' इति सूत्रापववादः।

साधनिका - प्रातिपदिकस्य अकारान्तपुँल्लिङ्ग - सर्वशब्दस्य सर्वादीनि सर्वनामानि' इति सूत्रेण सर्वनाम संज्ञायाम्, पञ्चम्येकत्वविवक्षायाम् एकवचनस्य ङसि प्रत्यये कृते सर्व + ङसि इति जाते अनुबन्धलोपे सर्व + अस् इति जाते, ''टाङसिङसामिनात्स्याः'' इति सूत्रेण ङसि-प्रत्ययस्य स्थाने आत् आदेशे प्राप्ते तं प्रबाध्य ''ङसिङ्योः'' 'स्मात्स्मिनौ' इति सूत्रेण स्मात् आदेशे कृते वर्णसम्मेलने सर्वस्मात् इति रूपं सिद्धयति।

**(217) आमि सर्वनाम्नः सुट् । 7। 1 । 52 ॥**

**वृत्तिः - अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात् । एत्वषत्वे। सर्वेषाम्। सर्वस्मिन्। शेषं रामवत्। एवं विश्वादयोऽप्यदन्ताः। सर्वादयश्च पञ्चत्रिंशत्। सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ( ग.सू.1 )। स्वमज्ञातिधनाख्यायाम् ( ग.सू. 2 ) अन्तरं बहिर्योगोपसंव्यानयोः ( ग.सू. 3 ) त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् इति।**

**तत्र उभशब्दो द्वित्वविशिष्टस्य वाचकः। अत एव नित्यं द्विवचनान्तः। तस्येह पाठस्तु ''उभकौ'' इत्यकजर्थः। न च कप्रत्ययेनेष्टसिद्धिः। द्विवचनपरत्वाभावेन उभयतः, उभयत्र इत्यादाविवायच्प्रसङ्गात्। तदुक्तम् - उभयोऽन्यत्र ( वा.232 )। अन्यत्र द्विवचनपरत्वाभावे। उभयशब्दस्य द्विवचनं नास्तीति कैयटः। अस्तीति हरदत्तः। तस्माज्जस्ययजादेशस्य स्थानिवद्भावेन तयप्प्रयत्यान्ततया 'प्रथमचरम' ( सू. 226 ) इति विकल्पे प्राप्ते विभक्तिनिरपेक्षत्वेनान्तरंगत्वान्नित्यैव संज्ञा भवति । उभये । डतरडतमौ प्रत्ययौ। प्रत्ययग्रहणे तदन्ता ग्राह्याः ( प.24 ) यद्यपि - संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ( प.28 )। सुप्तिङन्तं ( सू.29 ) इति ज्ञापकात्। तथापीह तदन्तग्रहणम्। केवलयोः संज्ञायाः प्रयोजनाभावत्। अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावाद् द्विबहुविषये निर्धारणे वर्तेते । तत्रान्यतमशब्दस्य गणे पाठाभावान्न संज्ञा। त्व, ''त्व'' इति द्वावप्यदन्तावन्यपर्यायौ, एक उदात्तोऽपरोऽनुदात्त इत्येके। एकस्तान्तः इत्यपरे। नेम इत्यर्धे। समः सर्वपर्यायः। तुल्यपर्यायस्तु नेह गृह्यते, यथासंख्यमनुदेशः समानाम् ( सू.128 ) इति ज्ञापकात्। अन्तरं बहिर्योग ( ग.सू.3 ) इति गणसूत्रे अपुरीति वक्तव्यम् ( वा.240 ) अन्तरायां पुरि।**

पदच्छेदः - आमि, सर्वनाम्नः, सुट् त्रिपदं सूत्रमिदम्।

अनुवृत्तिः - आत्।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - अवर्णान्तात् सर्वनाम्नः अङ्गात् परे विहितस्य आम्-प्रत्ययस्य सुट् - आगमः भवति।

विशेषार्थः - अत्र सुट् टित्त्वात् आद्यवयवः भवति। सुडागमः नुडागमं बाधते। ससुट्कस्य आमः (साम) कारणात् झलि परे सति एत्वं, कृते च एत्वे सस्य मूर्धन्यत्वं सिद्ध्यति। अत्र सर्वनामसंज्ञां विधाय यानि रूपाणि विशिष्टतया सिद्ध्यन्ति तानि निर्दिष्टानि अन्यानि रूपाणि रामशब्दवत् सिद्ध्यन्ति। सर्वादिगणे पठितानाम् ह्रस्व-अकारान्तशब्दानां सिद्धिः सर्वशब्दानुगुणं भवति। सर्वादिगणे पञ्चत्रिंशत् शब्दाः सन्ति। तेषां परिगणनं गणपाठे विहितम्।

उभशब्दः नित्यं द्विवचनान्तः विद्यते। उभयशब्दः नित्यं द्विवचनरहितः। द्वौ अपि द्विसंज्ञावाचकौ।

डतर-डतमौ प्रत्ययौ। क्रमशः - द्वयोः एकस्य निर्धारणार्थकः, बहुषु एकस्य निर्धारणार्थकः । एतत्प्रत्ययान्तशब्दानामपि सर्वनामसंज्ञकत्वं स्वतः सिद्धयति। प्रत्ययोः सर्वनामगणे पठितत्वात्।

अन्यतर इति पुनः द्वयोः एकस्य निर्धारणार्थकः।

त्वत् - त्व इति द्वौ अपि अन्यशब्दस्य पर्यायौ। अत्र केचन कथयन्ति द्वयोः एकः उदात्तः अस्ति, अपरः अनुदात्तः। किन्तु केषाञ्चन मतमस्ति यत् अत्रैकः त्-कारान्तः इति।

नेम - शब्दस्य अर्थः अर्धम् इति भवति।

सम - इति शब्दः सर्वशब्दस्य पर्यायवाचकः।

साधनिका - प्रातिपदिकस्य अकारान्तपुँल्लिङ्ग - सर्वशब्दस्य 'सर्वादीनि सर्वनामानि' इति सूत्रेण सर्वनाम संज्ञायाम्, षष्ठीबहुत्वविवक्षायां बहुवनचस्य आम् प्रत्यये कृते सर्व + आम् इति जाते, ''नामि'' इति सूत्रेण प्राप्तं नुडागमं बाधित्वा 'आमि सर्वनाम्न सुट्' इति सूत्रेण सुडागमे अनुबन्धलोपे टित्त्वादाद्यवयवत्वे 'सर्व + स् आम- साम् सर्व + साम् इति' जाते, बहुवचने झल्येत् इत्यनेन बहुवचनस्य झलि परे सति पूर्वस्य अकारस्येत्वे सर्वे + साम् इति जाते, आदेशप्रत्ययोः इत्यनेन इणः परस्यापदान्तस्य प्रत्ययावयवस्य सस्य षत्वे वर्णसम्मेलने सर्वेषाम् इति रूपं सिद्धयति।

**(218) पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । 1 । 1 । 34॥**

**वृत्तिः - एतेषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात्सर्वत्र या प्राप्ता सा जसि वा स्यात्। पूर्वे - पूर्वाः। स्वाभिधेयापेक्षाविधिनियमो व्यवस्था । व्यवस्थायां किम् ? दक्षिणा गाथकाः। कुशला इत्यर्थः । असंज्ञायां किम्? उत्तराः कुरवः।**

पदच्छेदः - पूर्वपरावरदक्षिणोत्तरापराधराणि, व्यवस्थायाम्, असंज्ञायाम् त्रिपदं सूत्रमिदम्।

समासः - पूर्वश्च परश्च अवरश्च दक्षिणश्च उत्तरश्च अपरश्च तानि पूर्वपरावरदक्षिणोत्तरापराधराणि (द्वन्द्वः), न संज्ञायाम् इति असंज्ञायाम् (नञ्)।

अनुवृत्तिः - सर्वनामानि, विभाषा, जसि।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - सर्वनामसंज्ञकानां पूर्वादीनां व्यवस्थायाम्, असंज्ञायां च जस् - प्रत्यये परे विकल्पेन सर्वनामसंज्ञा भवति।

विशेषार्थः - पूर्वादिशब्दानां सर्वनामसंज्ञा सप्तस्वपि विभक्तिषु नित्यत्वेन भवति सूत्रमिदं प्रथमैकवचने विकल्पं निर्दिशति । तत्र अवस्थाद्वयं प्रथमं तावत् - व्यवस्थायाम् अर्थात् यदा पूर्वादिशब्दानां दिशाकालादिवाचकः अर्थः अवधिं सूचयितुम् अपेक्षितः भवेत्तदा सा व्यवस्था इति कथ्यते। द्वितीयं तावत् - असंज्ञा - कस्यचित् अभिधानं न स्यादिति। व्यवस्थायां इति किमर्थं चेत् - दक्षिणाः गाथकाः इत्यत्र दक्षिण - शब्दः कुशलत्वबोधकः अस्ति न तु दिग्वाचकः। अतः तत्र शब्दस्यास्य सर्वनामसंज्ञायाः अभावः दृश्यते। असंज्ञायाम् इति किमर्थं चेत् - उत्तराः कुरवः । अत्र उत्तरशब्दः उत्तरकुरुदेशस्य स्थानबोधकः संज्ञावाचकः अतः अत्रापि सर्वनामसंज्ञायाः अभावः। तेन च जसि विकल्पाभावः।

साधनिका - प्रातिपदिकस्य अकारान्तपुँल्लिङ्गपूर्वशब्दस्य 'सर्वादीनि सर्वनामानि' इति सूत्रेण सर्वनाम संज्ञायाम्, प्रथमा-बहुवचनविवक्षायां बहुवचनसंज्ञके जस्-प्रत्यये 'पूर्व + जस्' इति जाते अनुबन्धलोपे पूर्व + अस् इति जाते अत्र जसि परे सति पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् इति सूत्रेण विकल्पेन सर्वनामसंज्ञायाम्, सर्वनामसंज्ञायां सत्यां जसः शी इति सूत्रेण ह्रस्व- अकारान्तसर्वनामशब्दात् परस्य जस- स्थाने शी आदेशे पूर्व + शी इति जाते अनुबन्धलोपे पूर्व + ई इति जाते 'आद्गुणः' इति सूत्रेण अकार + ईकारयोः गुणैकादेशे एकारे वर्मसम्मेलने पूर्वे इति रूपं सिद्धयति । सर्वनामसंज्ञाभावपक्षे - रामवत् पूर्वाः इति रूपं सिद्धयति।

**(219) स्वमज्ञातिधनाख्यायाम् । 1 । 1 । 34॥**

**वृत्तिः - ज्ञातिधनान्यवाचिनः स्वशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात् । स्वे - स्वाः । आत्मीया इत्यर्थः। आत्मान इति वा । ज्ञातिधनवाचिनस्तु स्वाः। ज्ञातयोऽर्था वा।**

पदच्छेदः - स्वम्, अज्ञातिधनाख्यायाम् द्विपदं सूत्रमिदम्।

समासः - ज्ञातिश्च धनञ्च ज्ञातिधने तयोः आख्या ज्ञातिधनाख्या तस्याम् ज्ञातिधनाख्यायाम् (द्वन्द्वगर्भबहुव्रीहिः), न ज्ञातिधनाख्यायाम् अज्ञातिधनाख्याम् (नञ्)।

अनुवृत्तिः - सर्वनामानि, विभाषा, जसि।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - ज्ञाति - अर्थं, धन- अर्थं च विहाय अन्यार्थवाचकस्य स्वशब्दस्य सर्वनामसंज्ञा जसि परे विकल्पेन भवति।

विशेषार्थः - स्व-शब्दस्य अत्र ज्ञाति, धन, आत्मीय - इति त्रयः अर्थाः निर्दिष्टाः। तेषु प्रथमयोः द्वयोः अर्थयोः सर्वनामसंज्ञैव न भवति। आत्मीयः वा आत्मीयेष्वर्थेषु स्व-शब्दस्य सर्वनामसंज्ञा भवति तत्रैषः विकल्पः जसि परे सति ज्ञेयः।

साधनिका - प्रातिपदिकस्य अकारान्तपुँल्लिङ्ग - स्वशब्दस्य ''सर्वादीनि सर्वनामानि'' इति सूत्रेण सर्वनाम संज्ञायाम्, प्रथमा - बहुवचनविवक्षायाम् बहुवचनसंज्ञके जस्-प्रत्यये स्व + जस् इति जाते अनुबन्धलोपे स्व + अस् इति जाते अत्र जसि परे सति ''स्वमज्ञातिधानाख्यायाम्'' इति सूत्रेण विकल्पेन सर्वनामसंज्ञायाम्, सर्वनामसंज्ञायां सत्यां ''जसः शी'' इति सूत्रेण हरस्व - अकारान्तसर्वनामशब्दात् परस्य जसः स्थाने शी आदेशे स्व + शी इति जाते अनुबन्धलोपे स्व + ई ति जाते आद्गुणः इति सूत्रेण अकार + ईकारयोः गुणैकादेशे एकारे वर्णसम्मेलने स्वे इति रूपं सिद्धयति। सर्वनामसंज्ञाभावपक्षे - रामवत् स्वाः इति रूपं सिद्धयति।

**(220) अन्तरं बहिर्योगोपसंव्यानयोः ।1 ।1 ।36॥**

**वृत्तिः - बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात्। अन्तरे - अन्तरा वा गृहाः। बाह्या इत्यर्थः ।अन्तरे - अन्तरा वा शाटकाः ।परिधानीया इत्यर्थः।**

पदच्छेदः - अन्तरम्, बहिर्योगोपसंव्यानयोः द्विपदं सूत्रमिदम्।

समासः - बहिः इत्यनेन योगः यस्य सः बहिर्योगः (बहुव्रीहिः) उपसंवीयते इति उपसंव्यानम् (उपपदम्), बहिर्योगश्च उपसंव्यानञ्च इति बहिर्योपसंव्याने तयोः बहिर्योगोपसंव्यानयोः (द्वन्द्वः)।

अनुवृत्तिः - सर्वनामानि, विभाषा, जसि।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - बहिर्योगः - बाह्यत्वम्, उपसंव्यानम् - परिधानीयम् इत्येतयोः अर्थयोः प्रयुक्तस्य अन्तर-शब्दस्य जसि परे वा सर्वनामसंज्ञा भवति।

विशेषार्थः - अन्तर - शब्दस्य बहवः अर्थाः भवन्ति तत्र अमरकोशः -

अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये।

छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरान्तमनि च ॥ तेष्वर्थेषु परिधानवाचकः तथा च बहिरवसरः इति द्वयोरर्थयोर्वाचकस्य अन्तरशब्दरस्य प्रथमाबहुत्ववाचके प्रत्यये परे सति सर्वनामसंज्ञा विकल्पेन भवति।

साधनिका - प्रातिपदिकस्य अकारान्तपुँल्लिङ्ग-अन्तरशब्दस्य सर्वादीनि सर्वनामानि इति सूत्रेण सर्वनाम संज्ञायाम्, प्रथमा-बहुवचनविवक्षायाम् बहुवचनसंज्ञके जस्-प्रत्यये 'अन्तर + जस्' इति जाते अनुबन्धलोपे अन्तर + अस् इति जाते अत्र जसि परे सति ''अन्तरं बहिर्योगोपसंव्यानयोः'' इति सूत्रेण विकल्पेन सर्वनामसंज्ञायाम्, सर्वनामसंज्ञायां सत्यां ''जसः शी'' इति सूत्रेण ह्रस्व- अकारान्तसर्वनामशब्दात् परस्य जसः स्थाने शी आदेशे अन्तर + शी इति जाते अनुबन्धलोपे अन्तर + ई इति जाते ''आद्गुणः'' इति सूत्रेण अकार + ईकारयोः गुणैकादेशे एकारे वर्णसम्मेलने अन्तरे इति रूपं सिद्ध्यति। सर्वनामसंज्ञाभावपक्षे - रामवत् अन्तराः इति रूपं सिद्ध्यति।

**(221) पूर्वादिभ्यो नवभ्यो वा। 7 ।1 ।16॥**

**वृत्तिः - एभ्यो नवभ्यो ''ङसिङ्योः स्मात्स्मिनौ'' वा स्तः। पूर्वस्मात् - पूर्वात्। पूर्वस्मिन् - पूर्वे ।एवं परादीनामपि। शेषं सर्ववत्। एकशब्दस्य सङ्ख्यायां नित्यैकवचनान्तः।**

पदच्छेदः - पूर्वादिभ्यः नवभ्यः वा त्रिपदं सूत्रमिदम्।

समासः - पूर्वः आदिः येषां ते पूर्वादयः तेभ्यः (बहुव्रीहिः)।

अनुवृत्तिः - ङसिङ्योः, स्मात्स्मिनौ।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - पूर्वादि - नवशब्देभ्यः परयोः पञ्चम्येकवचन-सप्तम्येकवचनस्य प्रत्ययोः स्थाने सर्वनामसंज्ञावशाज्जायमानौ स्मात् - स्मिन्- इत्यादेशौ विकल्पेन भवतः।

विशेषार्थः - सूत्रमिदं पूर्व-पर-अवर-दक्षिण-उत्तर-अपर-अधर-स्व-अन्तर इति नवशब्दानां विषये सर्वनामसंज्ञावशात् क्रिमाणयोः आदेशयोः विकल्पं सूचयति। सूत्रमिदं ङसिङ्योः स्मात्स्मिनौ इति सूत्रस्य अपवादः।

साधनिका - प्रातिपदिकस्य अकारान्तपुँल्लिङ्ग-पूर्वशब्दस्य ''सर्वादीनि सर्वनामानि'' इति सूत्रेण सर्वनाम संज्ञायाम्, पञ्चम्येकत्वविवक्षायाम् एकवचनस्य ङसि प्रत्यये कृते पूर्व + ङसि इति जाते अनुबनअधलोपे पूर्व + अस् इति जाते, ''टाङसिङसामिनात्स्याः'' इति सूत्रेण ङसि-प्रत्ययस्य स्थाने आत् आदेशे प्राप्ते तं प्रबाध्य ''ङसिङ्योः स्मात्स्मिनौ'' इति सूत्रेण नित्यं स्मात् आदेशे प्राप्ते तं प्रबाध्य ''पूर्वादिभ्यो नवभ्यो वा'' इति सूत्रेण विकल्पेन स्मात् आदेशे कृते तत्पक्षे वर्णसम्मेलने पूर्वस्मात् इति रूपं सिद्ध्यति। स्मात्-अभावपक्षे रामवत्-पूर्वात् इति रूपं सिद्ध्यति।

प्रातिपदिकस्य अकारान्तपुँल्लिङ्ग - पूर्वशब्दस्य ''सर्वादीनि सर्वनामानि'' इति सूत्रेण सर्वनाम संज्ञायाम्, सप्तम्येकत्वविवक्षायाम् एकवचनस्य ङि प्रत्यये कृते पूर्व + ङि इति जाते अनुबन्धलोपे पूर्व + इ इति जाते, ''ङसिङ्योः स्मात्स्मिनौ'' इति सूत्रेण नित्यं स्मिन् आदेशे प्राप्ते तं प्रबाध्य पूर्वादिभ्यो नवभ्यो वा इति सूत्रेण विकल्पेन स्मिन् आदेशे कृते तत्पक्षे वर्णसम्मेलने पूर्वस्मिन् इति रूपं सिद्ध्यति ।स्मिन् - अभावपक्षे रामवत् - पूर्वे इति रूपं सिद्ध्यति।

**(222) न बहुव्रीहौ । 1 ।1 । 29 ॥**

**वृत्तिः-बहुव्रीहौ चिकीर्षिते सर्वनामसंज्ञा न स्यात्। त्वकं पिता यस्य स त्वत्कपितृकः। अहकं पिता यस्य स मत्कपितृकः। इह समासात्प्रागेव प्रक्रियावाक्ये सर्वनामसंज्ञा निषिध्यते। अन्यथा लौकिकविग्रहवाक्य इव तत्राप्यकच्प्रवर्तेत। स च समासेऽपि श्रूयेत । अतिक्रान्तो भवकन्तम् अतिभवकान् इतिवत् । भाष्यकारस्तु त्वकत्पितृकः मकत्पितृक इति रूपे इष्टापत्तिं कृत्वैतत्सूत्रं प्रत्याचख्यौ । यथोत्तरं मुनीनां प्रामाण्यम्। संज्ञोपसर्जनीभूतास्तु न सर्वादयः (वा.225) । महासंज्ञाकरणेन तदनुगुणानामेव गणे सन्निवेशात्। अतः संज्ञाकार्यमन्तर्गणकार्यं च तेषां न भवति । सर्वो नाम कश्चित्तस्मै सर्वाय देहि । अतिक्रान्तः सर्वमतिसर्वस्तस्मै अतिसर्वाय देहि। अतिकतरं कुलम्। अतितत्।**

पदच्छेदः - न, बहुव्रीहौ द्विपदं सूत्रमिदम्।

अनुवृत्तिः - सर्वादीनि सर्वनामानि।

सूत्रप्रकारः - विधि (निषेध) सूत्रम्।

सरलार्थः - बहुव्रीहिसमासे कर्तुम् इष्टे सति समासे प्रयुक्तानां सर्वनामगणे पठितानां शब्दानां सर्वनामसंज्ञा न भवति।

विशेषार्थः- सूत्रमिदं वाक्यनिर्माणावसरे शब्दसाधनप्रक्रियां सूचयति। अस्मिन्नवसरे यदि सामासिकशब्दनिर्माणे बहुव्रीहिसमासः अर्थात् प्रयुज्यमानयोः शब्दयोः / प्रयुज्यमानानां शब्दानां गौणत्वं भवति तदानीं तत्र सर्वनामगणीयशब्दस्यापि समावेशः अस्ति तर्हि तस्य सर्वनामसंज्ञा न भवति । यतो हि सः शब्दः तत्र प्रयुक्तशब्दस्यार्थं विहाय अन्यार्थं प्रकटयति। अत्र समासात् पूर्वमेव यदा प्रक्रियायाः आरम्भः क्रियते तदानीमेव सर्वनामसंज्ञायाः निषेधो विधीयते । अन्यथा लौकिकविग्रहे सर्वनाम्नः लाभः प्राप्येत तथा न भवेत् एतदर्थं चिकीर्षिते इति पदं प्रयुक्तम्। अर्थात् विवक्षा समये एव बहुव्रीहिसमासयुक्तं शब्दमत्र प्रयोक्ष्यामि इति निर्णयः कृतः तर्हि तत्र सर्वनामसंज्ञा न विधेया इति । संज्ञानिमित्तं प्रक्रियाकार्यं च न भवति। यथा अतिक्रान्तो भवकन्तम् इति अतिभवकान्।

**(223) तृतीयासमासे । 1 ।1 । 30 ॥**

**वृत्तिः सर्वनामता न स्यात् । मासपूर्वाय । तृतीयासमासार्थवाक्येऽपि न । मासेन पूर्वाय।**

पदच्छेदः - तृतीयासमासे एकपदं सूत्रमिदम्।

समासः - तृतीयया समासः तस्मिन् (त.पु.)।

अनुवृत्तिः - न, सर्वादीनि सर्वनामानि।

सूत्रप्रकारः - संज्ञा (निषेध) सूत्रम्।

सरलार्थः - तृतीयासमासे सर्वनामसंज्ञा न भवति।

विशेषार्थः - सर्वनामसंज्ञायाः निवारकं सूत्रमिदम्। यदि तृतीयातत्पुरुषसमासः भवति तर्हि तत्र प्रयुक्तस्य सर्वनामगणस्य शब्दस्य सर्वनामसंज्ञा न भवति । इत्यथमेव ज्ञापकं सूचयति यत् तृतीयातत्पुरुषसमासः भवति तर्हि तत्र प्रयुक्तस्य सर्वनामगणस्य शब्दस्य सर्वनामसंज्ञा न भवति । इत्थमेव ज्ञापकं सूचयति यत् तृतीयासमासवाचके वाक्येऽपि सर्वनामसंज्ञा न भवति इति । यथा - तृतीयासमासः - मासपूर्वाय। तृतीयासमासार्थवाक्यम् - मासेन पूर्वाय। अत्र उभयत्रापि सर्वनामसंज्ञानिषेधः।

**(224) द्वन्द्वे च । 1 ।1 । 31 ॥**

**वृत्तिः - द्वन्द्वे उक्तसंज्ञा न । वर्णाश्रमेतराणाम्। समुदायस्यैवायं निषेधः, न त्ववयवानाम्। न चैवं तदन्तविधिना सुट्प्रसङ्गः, सर्वनाम्नो विहितस्यामः सुडिति व्याख्यानत्वात्।**

पदच्छेदः - द्वन्द्वे, च द्विपदं सूत्रमिदम्।

अनुवृत्तिः - न, सर्वादीनि सर्वनामानि।

सूत्रप्रकारः - संज्ञा (निषेध) सूत्रम्।

सरलार्थः - द्वन्द्वसमासे प्रयुक्तानां सर्वनामगणस्थशब्दानां सर्वनामसंज्ञा न भवति।

विशेषार्थः - द्वन्द्वसमासे यदि सर्वनामगणपठितः शब्दः प्रयज्यते तर्हि तस्य सर्वनामसंज्ञा अनेन सूत्रेण निवार्यते। यथा

– वर्णाश्रमेतराणाम् इत्यत्र वर्णाश्च आश्रमाश्च इतरे च इति विग्रहे कृते अत्र इतरशब्दः सर्वनामगणीयः अतः तस्य सर्वनामसंज्ञा स्वाभाविकी आसीत् किन्तु अत्र तस्याः निषेधः भवति । समग्रस्य समुदायस्यैव सर्वनामसंज्ञायाः निषेधः भवति अतः तदन्तविधावपि सैव नियमः तेन षष्ठीबहुवचनस्य विधाने आमि सर्वनाम्नः सुट् इति सूत्रेण सुट्-प्राप्तिः न भवति। यतो हि अत्र आम् प्रत्ययः केवलं सर्वनामसंज्ञकं इतरशब्दमनुलक्ष्य विहितः नास्ति अपि तु समग्रं वर्णाश्रमेतरशब्दम् अनुलक्ष्य विहितः अस्ति।

**(224) विभाषा जसि । 1। 1 । 32 ॥**

**वृत्तिः – जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वन्द्वे उक्ता संज्ञा वा स्यात्। वर्णाश्रमेतरे – वर्णाश्रमेतराः। शीभावं प्रत्येव विभाषेत्युक्तम्, अतो नाकच्, किं तु कप्रत्यय एव। वर्णाश्रमेतरकाः।**

पदच्छेदः – विभाषा, जसि द्विपदं सूत्रमिदम्।

अनुवृत्तिः – द्वन्द्वे, सर्वादीनि सर्वनामानि ।

सूत्रप्रकारः – संज्ञा (निषेध) सूत्रम्।

सरलार्थः – द्वन्द्वसमासे सर्वनामगणपठितशब्देषु यदि जस्-प्रत्ययस्य आधारेण कार्यं विधेयमस्ति तर्हि तत्र विकल्पेन सर्वनामसंज्ञा भवति।

विशेषार्थः – सूत्रमिदं ''द्वन्द्वे च'' सूत्रस्य विस्तारं नियमयति। तेन सर्वनामसंज्ञायाः नित्यबाधस्य स्थाने विकल्पेन प्रवृत्तिः भवति। अतः वर्णाश्रमेतरे – वर्णाश्रमेतराः इति रूपद्वयं भविष्यति। संज्ञैषा केवलं शीभावं प्रत्येव विद्यते अतः अकच् – प्रत्ययः न भवति, अपि तु क – प्रत्यय एव भवति।

**(226) प्रथमचरमतयाल्पार्धकतिपयनेमाश्च। 1। 1 । 33 ॥**

**वृत्तिः – एते जसः कार्यं प्रयुक्तसंज्ञा वा स्युः। प्रथमे – प्रथमाः। शेषं रामवत्। तयः प्रत्ययस्ततस्तदन्ता ग्राह्याः। द्वितये, द्वितयाः। शेषं रामवत्। नेमे – नेमाः । शेषं सर्ववत्। विभाषाप्रकरणे तीयस्य ङित्सूपसङ्ख्यानम् (वा.२४२)। द्वितीयस्मै, द्वितीयाय इत्यादि। एवं तृतीयः। अर्थवद्ग्रहणान्नेह – पटुजातीयाय। निर्जरः।**

पदच्छेदः – प्रथमचरमतयाल्पार्धकतिपयनेमाः, च द्विपदं सूत्रमिदम्।

समासः – प्रथमश्च चरमश्च तयश्च अल्पश्च अर्धश्च कतिपश्च नेमश्च इति प्रथमचरमतयाल्पार्धकतिपयनेमाः (द्वन्द्वः)।

अनुवृत्तिः – विभाषा, जसि, सर्वनामानि।

सूत्रप्रकारः – संज्ञासूत्रम्।

सरलार्थः – यदा जस् – प्रत्ययः परे भवति तदा प्रथमादिशब्दानां विकल्पेन सर्वनामसंज्ञा भवति।

विशेषार्थः – प्रथम – चरमशब्दौ, तयप्रत्ययान्तशब्दाः, अल्प-अर्ध-कतिपय-नेम इत्येतेषां शब्दानां जसि परे विकल्पेन सर्वनामसंज्ञा भवति । अत्र प्रथमादिषण्णां शब्दानां जस् – प्रत्यये परे एव सर्वनामसंज्ञा भवति अतः तत्र रूपद्वयं यथा – प्रथमे – प्रथमाः। अन्यत्र रामवद् रूपाणि भविष्यन्ति । नेमशब्दस्य सर्वादिगणे पाठात् तस्य जसि परे रूपद्वयम्। नेमे – नेमाः शेषं सर्ववत्।

**(227) जराया जरसन्यतस्याम् । 7। 1 । 151 ॥**

**वृत्तिः – जराशब्दस्य जरस् वा स्यादजादौ विभक्तौ। पदाङ्गाधिकारे तस्य च तदन्तस्य च (प.30)। अनेकाल्त्वात्सवर्गादेशे प्राप्ते निर्दिश्यमानस्यादेशा भवन्ति (प.१३)। एकदेशविकृतस्यानन्यत्वात् जरशब्दस्य जरस् । निर्जरसौ। निर्जरसः। इनादीन्बाधित्वा परत्वाज्जरस्। निर्जरसा। निर्जरसे। निर्जरसः। पक्षे हलादौ च रामवत्। वृत्तिकृता तु पूर्वविप्रतिषेधेनेनातोः कृतयोः सन्निपातपरिभाषाया अनित्यत्वमाश्रित्य जरसि कृते निर्जरसिन निर्जरसाद् इति रूपे, न तु निर्जरसा निर्जरसः इति केचित् इत्युक्तम्। तथा भिसि निर्जरसैः इति रूपान्तरमुक्तम्। तदनुसारिभिश्च षष्ठ्येकवचने निर्जरस्य इत्येव रूपमिति स्वीकृतम्। एतच्च भाष्यविरुद्धम्।**

पदच्छेदः – जरायाः, जरस्, अन्यतरस्याम् त्रिपदं सूत्रमिदम्।

अनुवृत्तिः – विभक्तौ, अचि।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - अजादि-विभक्तिप्रत्ययेषु परेषु सत्सु जरा-शब्दस्य जरस् - आदेशः विकल्पेन भवति।

विशेषार्थः - निर्जर-शब्दस्य रूपसाधनप्रसङगे निर्जरः इति प्रथमैकवचनस्य रूपं सिद्धम्। किन्तु अजादिषु विभक्ति - प्रत्ययेषु परेषु सूत्रमिदं जरा-शब्दस्य स्थाने जरस् - आदेशं सूचयति। किन्तु अत्र जराशब्दः नास्ति अपि तु निर्जरशब्दः अस्ति अतः प्रश्नो भवति यत् किमत्रैतत् सूत्रं प्रवृत्तं भवति खलु ? तत्र पदाङ्गाधिकारे तस्य च तदन्तस्य च (प.30) परिभाषेयं सूचयति यत् - यदत्र पदकार्यं वा अङ्गकार्यं विधेयं तत्र तस्य निर्दिष्टरूपस्य तथा च सः यस्यान्ते भवेत् तत्रापि तदधिकृत्य कार्यं भवति इति अतः अत्र भवतु नाम जरा-शब्दः न स्यात् किन्तु निर्जरशब्दस्य अन्ते तु जराशब्दः अस्ति अतः अत्र समुद्दिश्य निर्दिष्टं कार्यं कर्तुं शक्यते इति।

---

**(228) पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु। 1 ।1 । 63 ॥**

**वृत्तिः - पाद-दन्त-नासिका-मास- हृदय-निशा - असृज्-यूष-दोष-यकृत्-शकृत्-उदक- आस्य एषां पदादय आदेशाः स्युः शसादौ वा। यत्तु आसनशब्दस्यासन्नादेशः इति काशिकायामुक्तं तत्प्रामादिकम्। पादः। पादौ। पादाः। पादम्। पादौ पदः - पादान्। पदा - पादेनेत्यादि।**

---

पदच्छेदः - पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासन्, शस्प्रभृतिषु द्विपदं सूत्रमिदम्।

समासः - पद् च दत् च नस् च मास् च हृत् च निश् च असन् च यूषन् च दोषन् च यकन् च शकन् च उदन् च शासन् इति एषां समाहारः पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासन् (द्वन्द्वः)।

अनुवृत्तिः - अन्यतरस्याम्।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - पादादि - शब्दानां स्थाने शस् - आदिषु विभक्तिप्रत्ययेषु परेषु पदादयः आदेशाः विकल्पेन भवन्ति।

विशेषार्थः - सूत्रमिदं पादादिशब्दानां स्थाने शसादिषु विभक्तिप्रत्ययेषु परेषु द्विधा रूपं निर्दिशति। तच्च अकारान्तानुसारं रामवत् तथा च हलन्तमिव । अत्र प्रथमैकवचनादारभ्य द्वितीयाद्विवचनं यातव् एकमेव रूपं भवति किन्तु द्वितीयाबहुवचनादारभ्य सप्तमीबहुवचनपर्यन्तं रूपद्वयमिति स्थिति। यथासंख्यमनुदेशः समानामिति क्रमशः स्थानिनः स्थाने आदेशाः भवन्ति यथा -

पाद - पद्, दन्त - दत्, नासिका - नस्, मास - मास्, हृदय - हृत्, निशा - निश्, असृज् - असन्, यूष - यूषन्, दोष - दोषन्, यकृत् - यकन्, शकृत् - शकन्, उदक - उदन्, आस्य - आसन् इति।

साधनिका - पादः, पादौ, पादाः, प्रथमा, पादम्, पादौ पादान् / पदः (इतः आरभ्य रूपद्वयम्।)

पादान्/पदः - प्रातिपदिकात् अकारान्तपुँल्लिङ्ग - पादशब्दात् द्वितायबहुवचने शस् - प्रत्यये कृते पाद + शस् इति जाते अनुबन्धलोपे पाद + अस् इति जाते पद्दन्नोमास् - इत्यादिना सूत्रेण शस् - विभक्तौ परतः पादशब्दस्य स्थाने विकल्पेन पद् आदेशे पद् + अस् इसि जाते वर्णसम्मेलने रुत्वविसर्गे पदः इति रूपं सिद्धयति। पक्षे पद-आदेशाभावे रामवत् रूपाणि भवन्ति ।

पादेन/पदा, पादाभ्याम्/पद्भ्याम्, पादैः/पद्भिः तृतीया

पादात्/पदा, पादाभ्याम्/पद्भ्याम्, पादैः/पद्भिः पञ्चमी

पादास्य/पदः, पादयोः/पदोः, पादानाम्/पदाम् षष्ठी

पादे/पदि, पादयोः/पदोः, पादेषु/पत्सु सप्तमी

हे पाद हे पादौ हे पादाः सम्बोधनम् (सम्बोधनस्य प्रथमा विभक्तिः अतः तत्रैकमेव रूपम्)

---

**(229) सुडनपुंसकस्य । 1 ।1 । 43 ॥**

**वृत्तिः - सुडिति प्रत्याहारः । स्वादिपञ्चवचनानि सर्वनामस्थानसञ्ज्ञानि स्युरक्लीबस्य।**

---

पदच्छेदः - सुट्, अनपुंसकस्य द्विपदं सूत्रमिदम्।

अनुवृत्तिः - सर्वनामस्थानम्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - सुट्-प्रत्याहारः। तेषां स्वादिप्रत्ययानां सर्वनामस्थानसंज्ञा भवति। किन्तु नपुंसकलिङ्गे अस्याः संज्ञायाः प्रवृत्तिः न भवति।

विशेषार्थः- स्वादिप्रत्ययनिर्मितः सुट्-प्रत्याहारः। अस्मिन् प्रत्याहारे पञ्च-प्रत्ययाः समाहृता भवन्ति। सु, औ, जस्, अम्, औट् इति। ते प्रत्ययाः यदा पुँ-स्त्रीलिङ्गशब्दाभ्यां परतः स्युः तदा तेषां सर्वनामस्थानसंज्ञा भवति। न तु नपुँसके।

**(230) स्वादिष्वसर्वनामस्थाने । 1 ।4 । 17 ॥**

**वृत्तिः - कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसञ्ज्ञं स्यात्।**

पदच्छेदः - स्वादिषु, असर्वनामस्थाने द्विपदं सूत्रमिदम्।

समासः - सुः आदिर्येषाम् इति स्वादयः तेषु (बहुव्रीहिः), न सर्वनामस्थानम् इति असर्वनामस्थानम् तस्मिन् (नञ्)।

अनुवृत्तिः - पदम्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - असर्वनामस्थानसंज्ञकाः स्वादयः कप्प्रत्ययावधि-प्रत्ययाः यदा परे भवेयुः तदा ततः पूर्वस्य समुदायस्य पदसंज्ञा भवति।

विशेषार्थः - अस्मिन् सूत्रे पदसंज्ञाविधानं विहितम्। तस्य प्रवृत्तिः स्वौजसमौडि-ति (4।2।1) सूत्रमध्यादारभ्य भवति सा च उर प्रभृतिभ्यः कप् (5।4।150) इति सूत्रं यावत् यावन्तः प्रत्ययाः विधीयन्ते तत्र भवति। अत्र स्वादिषु असर्वनामस्थानेषु इति कथिततत्वात् आरम्भात् पञ्च प्रत्ययान् विहाय अन्ये स्वादयः ततश्च ये अन्ये प्रत्ययाः कप्प्रत्ययावधिः तेषु परेषु सत्सु पूर्वस्य पदसंज्ञा भवति इति।

**(231) यचि भम्। 1 ।4 । 18 ॥**

**वृत्तिः - यकारादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसञ्ज्ञं स्यात्।**

पदच्छेदः - यचि, भम् द्विपदं सूत्रमिदम्।

समासः - य् च अच् च इति यच् तस्मिन् (द्वन्द्वः)।

अनुवृत्तिः - स्वादिषु, असर्वनामस्थाने।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - स्वादिषु विहितान् सर्वनामस्थानसंज्ञकान् प्रत्ययान्विहाय, स्वादितः आरभ्य कप्रत्ययं यातव् ये प्रत्ययाः य-कारादयः, ये च अजादयः तेषु परेषु पूर्वस्य भ-संज्ञा भवति।

विशेषार्थः - सूत्रमिदं पदसंज्ञायाः अपवादः। अतः यत्र स्वादितः आरभ्य कप्प्रत्ययं यावत् यकारादयः, अजादयः प्रत्ययाः स्युः तत्र पदसंज्ञाया बाधं कृत्वा अनेन भसंज्ञा विधीयते।

**सूत्रम् (232) आकडारादेकासंज्ञा । 1 ।4 । 1 ॥**

**वृत्तिः - इत ऊर्ध्वं कडाराः कर्मधारये इत्यत्र प्रागेकस्यैकैव सञ्ज्ञा ज्ञेया।? ''या परा अनवकाशा च।'' तेन शसादावचि भसञ्ज्ञैव, न पदत्वम्। अतो जश्त्वं न । दतः । दता। जश्त्वम् - दद्भ्यामित्यादि। मासः। मासा। भ्यामि रुत्वे यत्वे च यलोपः । माभ्याम्। माभिरित्यादि।**

पदच्छेदः - आ, कडारात्, एका, संज्ञा चतुष्पदं सूत्रमिदम्।

अनुवृत्तिः - स्वस्मिन् संपूर्णं सूत्रमिदम्।

सूत्रप्रकारः - संज्ञा (नियम) सूत्रम्।

सरलार्थः - अस्मात् सूत्रादारभ्य कडाराः कर्मधारये सूत्रं यावत् एकस्य एकैव संज्ञा भवति। तत्र या संज्ञा परा तथा च अनवकाशा भवति सा बलवती गण्यते।

विशेषार्थः - अस्मिन् संज्ञाविधायके प्रकरणे एकत्र द्वित्राः सममेव प्राप्ताः भवन्ति अतः तत्र नियमनं विधातुं सूत्रमिदं

प्रवृत्तम्। अनेन यत्र एकस्याः संज्ञायाः प्रवृत्तिः भवति तत्र अपरायाः न। तदित्थम् – प्रथमं या संज्ञा अल्पक्षेत्रम् आवृणोति तस्याः प्रवृत्तिः यदि परसूत्रेण विधीयते तर्हि ततोऽपि वरम्। ततः परम् तदपेक्षया अधिकं विस्तारवती स्यात् तस्याः कृते अवसरः । सामान्यापेक्षया विशेषसूत्रस्य विधानं करणीयमिति निर्णयः। अनेन शस् – आदिषु अजादिप्रत्ययेषु परेषु पदसंज्ञा न भवति तेन च झलां जशोऽन्ते इत्यनेन जश्त्वं न भवति।

इत्थं स्वादिप्रत्ययानां त्रिधा विभागः दृश्यते यथा –

सर्वनामस्थानसंज्ञकाः प्रत्ययाः – सु, औ, जस् , अम्, औट्।

पदसंज्ञकाः प्रत्ययाः – भ्याम्, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस्, सुप्।

भसंज्ञकः प्रत्ययाः – शस्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि ओस्।

साधनिका – प्रातिपदिकात् अकारान्तपुँल्लिङ्गात् दन्तशब्दात् द्वितीयाबहुवचने शस् – प्रत्यये दन्त + शस् इति जाते अनुबन्धलोपे दन्त + अस् इति जाते ''पद्दन्नोमास्'' – इत्यादिना सूत्रेण शस् – विभक्तौ परतः दन्तशब्दस्य स्थाने विकल्पेन दत् आदेशे कृते दत् + अस् इति जाते, ''आकडारादेका संज्ञा'' इति सूत्रसहकारेण ''स्वादिष्वसर्वनामस्थाने'' इति सूत्रेण प्राप्तां पदसंज्ञां प्रबाध्य ''यचि भम्'' इति सूत्रेण भसंज्ञायाम्, वर्णसम्मेलने रुत्वविसर्गे दतः इति रूपं सिद्ध्यति। पक्षे दत्– आदेशाभावे – रामवत् दन्तान् इति रूपं सिद्ध्यति।

इत्थमेव मास – मास् इत्यत्र मासान् / मासः, मासेन/मासा,

मासाभ्याम्/माभ्याम् – प्रातिपदिकात् अकारान्तपुँल्लिङ्गात् मासशब्दात् तृतीयाद्विवचने भ्याम् प्रत्यये कृते मास + भ्याम् इति जाते ''पद्दन्नोमास्'' – इत्यादिनासूत्रेण मासशब्दस्य स्थाने विकल्पेन मास् आदेशे कृते मास् + भ्याम् इति जाते ''स्वादिष्वसर्वनामस्थाने'' इति सूत्रेण सर्वनामस्थानभिन्ने स्वादिप्रत्यये परे सति पूर्वस्य पदसंज्ञायाम् मास् + भ्याम् इति जाते पदत्वात् ''ससजुषो रुः'' इत्यनेन पदान्तस्य सस्य रुत्वे, ''भोभगोअघोअपूर्वस्य योऽशि'' इति सूत्रेण रोः यादेशे ''हलि सर्वेषामिति'' यलोपे च कृते माभ्यामिति रूपं सिद्ध्यति। पक्षे रामवत् मासाभ्याम् इति रूपसिद्धिः भवति। तद्वदेव माभिः इत्यादिरूपाणि।

---

**(233) भस्य । 6 । 4 । 129 ॥**

**वृत्तिः – इत्यधिकृत्य।**

---

पदच्छेदः – भस्य एकपदं सूत्रमिदम्।

अनुवृत्तिः – स्वस्मिन् संपूर्णं सूत्रमिदम्।

सूत्रपुकारः – अधिकारसूत्रम्।

सरलार्थः – अधिकारसूत्रमिदम्। इतः परं भसंज्ञायाः अधिकारः प्रवर्तते। अतः अनुगामिषु सूत्रेषु भस्य इति अर्थः संयुक्तो भवति।

विशेषार्थः – सूत्रमिदम् अधिकारं सूचयति। इतः आरभ्य अध्यायसमाप्तिपर्यन्तम् अस्य सूत्रस्य अनुवृत्तिः भवति।

साधनिका –

---

**(234) अल्लोपोऽनः। 6 । 4 । 134॥**

**वृत्तिः – अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपः स्यात्।**

---

पदच्छेदः – अल्लोपः, अनः द्विपदं सूत्रमिदम्।

समासः – अतः लोपः अल्लोपः (त.पु.)

अनुवृत्तिः – भस्य, अङ्गस्य।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – सर्वनामस्थानसंज्ञकं विहाय यादि – अजादिर्वा स्वादिप्रत्ययः यस्मात् परे भवति तादृशस्य अङ्गावयवस्य अन्–इत्यस्य अकारस्य लोपः भवति।

विशेषार्थः – यदा भसंज्ञाविधायकः स्वादिप्रत्ययः परे भवेत् तदा पूर्वस्य अन् – अन्तस्य अङ्गस्य उपान्त्यस्य अकारस्य लोपः भवति।

**(235) रषाभ्यां नो णः समानपदे । 8। 4। 1॥**

**वृत्तिः – एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात्। यूष्णः । यूष्णा। पूर्वस्मादपि विधौ स्थानिवद्भावः इति पक्षे तु अड्व्यवाये इत्येवात्र णत्वम्। पूर्वत्रासिद्धे न स्थानिवत् ( वा.433 ) इति त्विह नास्ति। तस्य दोषः संयोगादिलोपलत्वणत्वेषु ( वा.440 ) इति निषेधात्।**

पदच्छेदः – रषाभ्यां, नः, णः, समानपदे चतुष्पदं सूत्रमिदम्।

समासः – रश्च षश्च रषौ ताभ्याम् (द्वन्द्वः), समानं च तत् पदं समानपदं तस्मिन् (कर्मधारयः)।

अनुवृत्तिः – स्वस्मिन् संपूर्णं सूत्रमिदम्।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – एकस्मिन् पदे विद्यमानाभ्यां रेफ – षकाराभ्यां अव्यवहितपरस्य न-कारस्य ण-कारादेशः भवति।

विशेषार्थः – सूत्रमिदं न-कारस्य ण-त्वं विदधाति। तत्र समानपदे निमित्तरूपौ रेफः, ष-कारः वा अपेक्षितौ। अत्र रषाभ्याम् इति पञ्चम्यन्तं पदम्। अतः ''तस्मादित्युत्तरस्य'' इति परिभाषा सूत्र मनुसृत्य विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य भवेदतः रषाभ्याम् अव्यवहितपरे स्थितस्य न-कारस्य ण-कारादेशः भवति इत्यर्थः।

साधनिका – यूष्णः – प्रातिपदिकात् यूषशब्दात् द्वितीयाबहवनचने शस्-प्रत्यये कृते यूष + शस् इति जाते अनुबन्धलोपे यूष + अस् इति जाते ''पद्दन्नोमास्'' – इत्यादिना सूत्रेण शस् – प्रत्यये परे सति विकल्पेन यूष इत्यस्य स्थाने यूषन् आदेशे यूषन् + अस् इति जाते यचि भम् इति सूत्रेण अजादिप्रत्यये परे सति पूर्वस्य भसंज्ञा, भत्वात् ''अल्लोपोऽनः'' इति सूत्रेण न-कारपूर्ववर्तिनः अकारस्य लोपे यूषन् + अस् इति जाते ''रषाभ्यां नो णः समानपदे'' इति सूत्रेण ष-कारात् अव्यवहितपदस्य न-कारस्य णत्वे वर्णसम्मेलने सस्य रुत्वविसर्गे यूष्णः इति रूपं सिद्ध्यति। तद्वदेव यूष्णा इत्यत्रापि।

**(236) नलोपः प्रातिपदिकान्तस्य । 8। 2। 7॥**

**वृत्तिः – नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे । प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्। नलोपस्यासिद्धत्वाद्दीर्घत्वम् एत्वमैस्त्वं च न । यूषभ्याम्। यूषभिः। यूषभ्यः। इत्यादि।**

पदच्छेदः – न (लुप्तषष्ठीकं पदम्), लोपः, प्रातिपदिक (लुप्तषष्ठीकं पदम्), अन्तस्य चतुष्पदं सूत्रमिदम्।

अनुवृत्तिः – पदस्य।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – प्रातिपदिकसंज्ञकस्य पदस्य अन्ते स्थितस्य न्-कारस्य लोपः भवति।

विशेषार्थः – न्-लोपस्य असिद्धत्वात् दीर्घत्वम् (सुपि च), ऐस्त्वम् (अतो भिस ऐस्), एत्वं (बहुवचने झल्येत्) च न भवन्ति।

साधनिका – यूषभ्याम् – प्रातिपदिकात् यूषशब्दात् तृतीयाद्विवचने भ्याम् – प्रत्यये कृते यूष + भ्याम् इति स्थिते पद्दन्नोमास् – इत्यादिना सूत्रेण विकल्पेन यूष इत्यस्य स्थाने यूषन् आदेशे कृते यूषन् + भ्याम् इति जाते स्वादिष्वसर्वनामस्थाने इति सूत्रेण सर्वनामस्थानभिन्ने स्वादिप्रत्यये परतः पूर्वस्य पदसंज्ञायाम्, पदत्वात् नलोपः प्रातिपदिकान्तस्य इति सूत्रेण पदान्तस्य न्-कारस्य लोपे यूष+भ्याम् इति जाते अत्र नलोपस्य असिद्धत्वात् सुपि च इत्यनेन दीर्घादेशः न भवति वर्णसम्मेलने यूषभ्याम् इति रूपं सिद्ध्यति। तद्वदेव यूषभिः इत्यत्र ऐस्त्व्, एत्वं च न भविष्यतः।

**( २३७ ) विभाषा ङिश्योः । 6 । 4 । 136 ॥**

**वृत्तिः – अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः परयोः। यूष्णि – यूषणि। पक्षे रामवत् । ''पद्दन्नोः'' इति सूत्रे प्रभृतिग्रहणं प्रकारार्थम्। तथा च औङः श्यामपि दोषन्नादेशः । अत एव भाष्ये ककुद्दोषणी इत्युदाहृतः। तेन पदङ्घ्रिश्चरणोऽस्त्रियाम् स्वान्तं हृन्मानसं मनः इत्यादि च सङ्गच्छते। आसन्यं प्राणमूचुः इति च। आस्ये भवः आसन्यः। दोष्-शब्दस्य नपुंसकत्वमत एव भाष्यात्। तेन दक्षिणं दोर्निशाचरः इति सङ्गच्छते। भुजबाहू प्रवेष्टो दोः इति साहचर्यात्पुंस्त्वमपि । दोषं तस्य तथाविधस्य भजतः इति। द्वयोरह्नोर्भवो द्व्यह्नः।**

पदच्छेदः – विभाषा, ङिश्योः द्विपदं सूत्रमिदम्।

समासः – ङिच शि च तयोः ङिश्योः (द्वन्द्वः)।

अनुवृत्तिः – अल्लोपः, अनः, अङ्गस्य, भस्य।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – ङि-शी-प्रत्यययोः परयोः अङ्गावयवस्य अनः अकारस्य लोपः विकल्पेन भवति सर्वनामस्थानभिन्ने यजादि-स्वादिप्रत्यये परे सति ।

विशेषार्थः – सूत्रमिदं अल्लोपोऽनः इति सूत्रस्य नित्यं लोपं विकल्पयति। अतः तेन प्राप्तस्य अनः अकारस्य नित्यलोपस्य अत्र विकल्पेन प्रवृत्तिः भवेदिति नियमनं विधीयते । केवलं सप्तम्येकवचने, स्त्रीलिङ्गे आदेशस्य औ इत्यस्य शी-प्रत्यये परे सति।

साधनिका – यूष्णि – यूषणि – प्रातिपदिकात् यूषशब्दात् सप्तम्येकवचने ङि प्रत्यये अनुबन्धलोपे यूष + इ इति जाते पद्दन्नोमास् इत्यादिना सूत्रेण यूष इत्यस्य स्थाने विकल्पेन यूषन् आदेशे यूषन् + ई इति जाते अल्लोपोऽनः इति सूत्रेण भसंज्ञकस्य उपान्त्यस्य अनः – अकारस्य नित्यलोपे प्राप्ते विभाषा ङिश्योः इति सूत्रेम विकल्पेन अकारलोपे कृते, लोपपक्षे – यूष्न् + इ इति जाते रषाभ्यां नो नः समानपदे इति सूत्रेण नः णत्वे वर्णसम्मेलने यूष्णि इति रूपं सिद्ध्यति। लोपाभावपक्षे – यूषन् + इ इत्यत्र अट्कुप्वाङ्नुम्व्यवायेऽपि इति सूत्रेण न-कारस्य णत्वे कृते यूषणि इति रूपं सिद्ध्यति। यूषन् आदेशाभावपक्षे रामवत् यूषे इति रूपं सिद्ध्यति।

---

**(238) सङ्ख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ । 6 । 3 । 110 ॥**

**वृत्तिः – सङ्ख्यादिपूर्वस्याह्नस्याहन्नादेशो वा स्यात् ङौ । द्वयह्नि (द्वयह्ने) विगतमहर्व्यह्नः। व्यह्नि – व्यहनि – व्यह्ने। अह्नः सायः सायाह्नः। सायाह्नि – सायाहनि – सायाह्ने । इत्यदन्ताः । विश्वपाः।**

---

पदच्छेदः – सङ्ख्याविसायपूर्वस्य, अह्नस्य, अहन्, अन्यतरस्यां ङौ पञ्चपदं सूत्रमिदम्।

समासः – संख्या च विश्च सायश्च संख्याविसायाः ते पूर्वे यस्मात् संख्याविसायपूर्वः तस्य (बहुव्रीहिः)।

अनुवृत्तिः – स्वस्मिन् संपूर्णं सूत्रमिदम्।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – संख्या, वि, सायशब्दपूर्वकस्य अह्न शब्दस्य स्थाने विकल्पेन अहन् आदेशः भवति ङि-प्रत्यये परे सति।

साधनिका – प्रातिपदिकात् द्व्यह्नशब्दात् सप्तम्येकवचने ङि-प्रत्यये अनुबन्धलोपे द्व्यह्न + इ इति जाते संख्याविसायपूर्व-इत्यादिना सूत्रेण संख्यापूर्वस्य अह्नशब्दस्य स्थाने अहन्- आदेशे द्व्यहन् + इ इति जाते ''विभाषा ङिश्योः'' इति सूत्रेण ङौ परे पूर्वस्य अनः अकारस्य विकल्पेन लोपे द्व्यह्न् + इ इति जाते वर्ण सम्मेलने द्व्यह्नि इति रूपं सिद्धयति। पक्षे – द्व्यहनि इति रूपं सिद्ध्यति। अहन् – आदेशाभावपक्षे द्व्यह्न + इ इति जाते गुणैकादेशे वर्णसम्मेलने द्व्यह्ने इति रूपं सिद्धयति । एवमेव – व्यह्नि, व्यहनि, व्यह्ने । सायाह्नि, सायाहनि, सायाह्ने । इति रूपाणि सिद्धयन्ति।

विश्वपाः – प्रातिपदिकात् आकारान्तपुँल्लिङ्गात् विश्वपाशब्दात् प्रथमैकवचने सु-प्रत्यये अनुबन्धलोपे विश्वपा + स् इति जाते सस्य रुत्वविसर्गे विश्वपाः इति रूपं सिद्धयति।

---

**(239) दीर्घाज्जसि च । 6 । 1 । 104 ॥**

**वृत्तिः – दीर्घाज्जसि इचि च परे पूर्वसवर्णदीर्घो न स्यात् । वृद्धिः । विश्वपौ । सवर्णदीर्घः – विश्वपाः। यद्यपीह औङि नादिचि इत्येव सिद्धम् । जसि तु सत्यपि पूर्वसवर्णदीर्घे क्षतिर्नास्ति, तथापि गौर्यौ गौर्यः इत्याद्यर्थं सूत्रमिहापि न्याय्यत्वादुपन्यस्तम्।**

---

पदच्छेदः दीर्घात्, जसि, च त्रिपदं सूत्रमिदम्।

अनुवृत्तिः – पूर्वसवर्णः, न, इचि।

सूत्रप्रकारः - विधि(निषेध) सूत्रम्।

सरलार्थः - दीर्घात् जस् प्रत्यये इच् - प्रत्याहारस्य वर्णे च परे पूर्वसवर्णदीर्घैकादेशो न भवति।

विशेषार्थः - दीर्घस्वरात् जस् - प्रत्यये तथा च इच् (इ, उ, ऋ, लृ, ए, ओ, ऐ,औ) परे विद्यमाने सति प्रथमयोः पूर्वसवर्णः इति सूत्रेण विधीयमानः पूर्वसवर्णदीर्घैकादेशः न भवति। सूत्रमिदं नादिचि सूत्रार्थम् अनुवर्तते।

साधनिका - विश्वपौ - प्रातिपदिकात् आकारान्तपुँल्लिङ्गात् विश्वपाशब्दात् प्रथमाद्विवचने औ - प्रत्यये कृते विश्वपा + औ इति जाते ''प्रथमयोः पूर्वसवर्णः'' इति सूत्रेण पूर्वसवर्णदीर्घ एकादेशे प्राप्ते ''दीर्घाज्जसि च'' इति सूत्रेण इचि परे सति निषेधे कृते ''वृद्धिरेचि'' इत्यनेन वृद्ध्येकादेशे कृते विश्वपौ इति रूपं सिद्ध्यति।

विश्वपाः - प्रातिपदिकात् आकारान्तपुँल्लिङ्गात् विश्वपाशब्दात् प्रथमाबहुवचने जस् - प्रत्यये कृते अनुबन्धलोपे विश्वपा + अस् इति जाते ''प्रथमयोः पूर्वसवर्णः'' इति सूत्रेण पूर्वसवर्णदीर्घे एकादेशे कृते वर्णसम्मेलने सस्य रुत्वविसर्गे विश्वपाः इति रूपं सिद्ध्यति।

---

**(240) आतो धातोः ।6 ।1 ।140 ॥**

**वृत्तिः - आकारान्यो यो धातुस्तदन्तस्य भस्याङगस्य लोपः स्यात् । अलोऽन्त्यस्य । विश्वपः। विश्वपा । विश्वपाभ्यामित्यादि । एवं शङ्खध्मादयः। धातोः किम् ? हाहान् । टा सवर्णदीर्घः। हाहा ङे वृद्धिः। हाहै। ङसिङसोर्दीर्घः। हाहाः। ओसि वृद्धिः । हाहौः । ङौ आद्गुणः। हाहे । शेषं विश्वपावत् । आतः इति योगविभागादधातोरप्याकारलोपः क्वचित्। क्त्वः । श्नः। इत्यादन्ताः ।**

---

पदच्छेदः - आतः, धातोः द्विपदं सूत्रमिदम्।

अनुवृत्तिः - लोपः, भस्य, अङ्गस्य।

सूत्रप्रकारः - विधिसूत्रम् ।

सरलार्थः - आकारान्तधातोः भसंज्ञकस्य अङ्गस्य लोपः भवति।

विशेषार्थः - सूत्रे भस्य एवम् अङ्गस्य इति द्वयोः अधिकारः प्रवर्तते तत्र अलोऽन्त्यस्य इति निर्देशेन कृतः आदेशः अन्त्यस्य भवति। तदनुगुणं भस्याङ्गस्य अन्त्यवर्णस्य लोपः भवति इत्यर्थः।

साधनिका - प्रातिपदिकात् आकारान्तपुँल्लङ्गात् विश्वपाशब्दात् द्वितीयाबहुवचने शस् - प्रत्यये कृते अनुबन्धलोपे विश्वपा + अस् इति जाते यचि भम् इति सूत्रेण अजादिप्रत्यये परे सति पूर्वस्य भसंज्ञायाम्, भत्वात् आतो धातोः सूत्रेण आकारान्तधात्वङ्गस्यान्त्स्य लोपे विश्वप् + अस् इति जाते वर्णसम्मेलने सस्य रुत्वविसर्गे विश्वपः इति रूपं सिद्ध्यति।

**स्वाध्यायः**

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

(1) अर्थवदधातुरप्रत्ययः .............

(क) सावर्ण्यम् (ख) प्रातिपदिकम् (ग) सर्वनामस्थानम् (घ) बहुवचनम्

(2) रामम् इत्यत्र भवति -

(क) पूर्वरूपम् (ख) वृद्धिः (ग) सवर्णदीर्घः (घ) गुणः

(3) सुपि च इति सूत्रेण भवति -

(क) वृद्धिः (ख) दीर्घः (ग) गुणः (घ) सुप् - प्रत्ययाः

(4) टा - इत्यत्र ट-कारस्य इत्संज्ञा अनेन विधीयते -

(क) लशक्वतद्धिते (ख) सडपुंसकस्य (ग) चुटू (घ) डंति च

(5) आदेशप्रत्ययो: इत्यत्र अनुवर्तते -

(क) भस्य (ख) इण्को: (ग) नश्च (घ) अतो गुणे

**2. एकैकवाक्येन उत्तरं लिखत ।**

(1) तद्धितान्तानां प्रातिपदिकसंज्ञा केन सूत्रेण विधीयते ?

(2) रामौ इत्यत्र राम + राम इत्यवस्थायाम् एकशेष: केन सूत्रेण क्रियते ?

(3) ङसि - प्रत्ययस्य ङ्-कारस्य इत्संज्ञा केन सूत्रेण भवति ?

(4) पूर्वस्मात् - पूर्वात् इत्यत्र विकल्प: कथं भवति ?

(5) द्वन्द्वे का संज्ञा न भवति ?

(6) एकवचनसंज्ञाविधायकं सूत्रं किम् ?

**3. सविस्तरम् उत्तरं लिखत ।**

(1) अङ्गसंज्ञायां विधीयमानानि कार्याणि सविस्तरं निर्दिश्यन्ताम्।

(2) एकसंज्ञाधिकारे विधीयमानानि विभक्तिकार्याणि प्रदर्श्यन्ताम्।

**4. निम्नलिखितानि रूपाणि साधयत।**

(1) रामान् (2) रामेषु

(3) सर्वेषाम् (4) निर्जरसौ

(5) यूष्ण: (6) विश्वप:

(7) पूर्वे - पूर्वा:

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायन्ताम्।**

(1) स्वौजसमौट् ...............

(2) यस्मात् प्रत्ययविधि: ...............

(3) पूर्वपरावर ...............

(4) पद्दन्नोमास् ...............

**6. अ विभागं ब विभागेन सह योजयत।**

| अ विभाग | ब विभाग |
|---|---|
| (1) सर्वादीनि सर्वनामानि | (अ) इत्संज्ञा |
| (2) सुडनपुंसकस्य | (ब) भसंज्ञा |
| (3) यचि भम् | (क) पदसंज्ञा |
| (4) लशक्तद्धिते | (ड) सर्वनामस्थानसंज्ञा |
| (5) स्वादिष्वसर्वनामस्थाने | (ई) सर्वनामसंज्ञा |

**छात्रप्रवृत्ति:**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं, पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखित।

◆

| 13 | # अथ इकारान्त-अजन्तपुँल्लिङ्गप्रकरणम् |
|---|---|

**प्रस्तावना**

**अस्मिन् प्रकरणे ह्रस्व-दीर्घणाम् - इकारान्तपुँल्लिङ्गशब्दानां साधनं विधातुं श्रीद्धभट्टोजिदीक्षितनिरूपितक्रमेण सिद्धान्तकौमुदीमनुसृत्य अत्र सूत्रमाध्यमेन निर्दिष्टम् ।**

हरिः। प्रथमयोः पूर्वसवर्णः । हरी।

साधनिका - हरिः - प्रातिपदिकात् ह्रस्वइकारान्तपुँल्लिङ्गहरिशब्दात् प्रथमैकवचने सु-प्रत्यये अनुबन्धलोपे हरि + स् इति जाते सस्य रुत्वविसर्गे हरिः इति रूपं सिद्धयति।

हरी - प्रातिपदिकात् ह्रस्वइकारान्तपुँल्लिङ्गहरिशब्दात् प्रथमाद्विवचने औ - प्रत्यये हरि + औ इति जाते ''प्रथमयोः पूर्वसवर्णः'' इति सूत्रेण पूर्वसवर्णदीर्घैकादेशे कृते इकार + औकारयोः स्थाने ईकारे वर्णसम्मेलने हरी इति रूपं सिद्धम्।

**(241) जसि च। 7। 3। । 109॥**

**वृत्तिः - ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे । हरयः।**

पदच्छेदः - जसि, च द्विपदं सूत्रमिदम्।

अनुवृत्तिः - ह्रस्वस्य, गुणः, अङ्गस्य।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - जस् - प्रत्यये परे सति ह्रस्वान्तस्य अङ्गस्य गुणः भवति।

विशेषार्थः - षष्ठ्या निर्दिष्टे आदेशे तदन्तविधिः भवति अतः अत्रापि हरस्वान्तस्य अङ्गस्य अन्तिमवर्णस्य जस् - प्रत्यये परे सति गुणः भवति।

साधनिका - हरयः - प्रातिपदिकात् ह्रस्वइकारान्तपुँल्लिङ्गहरिशब्दात् प्रथमाबहुवचने जस् - प्रत्यये अनुबन्धलोपे हरि + अस् इति जाते जसि पर ह्रस्वान्ताङ्गस्य इकारस्य गुणे ए-कारे हरे + अस् इति जाते, एचोऽयवायावः इति सूत्रेण अयादेशे हर् अय् + अस् इति जाते वर्णसम्मेलने सस्य रुत्वविसर्गे हरयः इति रूपं सिद्धयति।

**(242) ह्रस्वस्य गुणः। 7। 3। । 108 ॥**

**वृत्तिः - ह्रस्वस्य गुणः स्यात्सम्बुद्धौ। एङ्ह्रस्वात् - (सू.193) इति सम्बुद्धिलोपः। हे हरे। हरिम्। हरी। हरीन्।**

पदच्छेदः - ह्रस्वस्य, गुणः द्विपदं सूत्रमिदम्।

अनुवृत्तिः - सम्बुद्धौ।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - सम्बुद्धिसंज्ञके प्रत्यये परे सति ह्रस्वान्तस्य अङ्गस्य गुणः भवति।

विशेषार्थः - ''एकवचनं सम्बुद्धिः'' इति सूत्रानुसारं सम्बुद्धिसंज्ञके सु-प्रत्यये परे सति हरस्वान्तस्याङ्गस्य अन्त्यस्य गुणो भवति।

साधनिका - हे हरे - प्रातिपदिकात् ह्रस्वइकारान्तपुँल्लिङ्गहरिशब्दात् प्रथमैकवचने सु-प्रत्यये अनुबन्धलोपे हे हरि + स् इति जाते एकवचनं सम्बुद्धिः इति सूत्रेण सु-प्रत्ययस्य सम्बुद्धिसंज्ञायां हरस्वस्व गुणः इति सूत्रेण सम्बुद्धिसंज्ञके प्रत्यये परे सति ह्रस्वान्ताङ्गस्य गुणे इकारस्य एकारे हे हरे + स् इति जाते एङ्ह्रस्वात् सम्बुद्धेः इति सूत्रेण एङन्तादङ्गात् परस्य सम्बुद्धेः हलः स् - कारस्य लोपे हे हरे इति रूपं सिद्धयति।

**(243) शेषो घ्यसखि। 1। 4। 7 ॥**

**वृत्तिः - अनदीसंज्ञौ ह्रस्वौ याविदुतौ तदन्तं सखिवर्जं घिसंज्ञं स्यात्। शेषः किम् ? मत्यै। एकसंज्ञाधिकारात्सिद्धे शेषग्रहणं स्पष्टार्थम्। ह्रस्वौ किम् ? वातप्रम्ये । यू किम् ? मात्रे ।**

पदच्छेदः - शेषः, घि, असखि त्रिपदं सूत्रमिदम्।

समासः - न सखि इति असखि (नञ्)।

अनुवृत्तिः- यू, ह्रस्वः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - येषां नदीसंज्ञा न भवति तादृशाः सखि - शब्दं विहाय अन्ये ह्रस्व-इकारान्त-उकारान्ताः शब्दाः घिसंज्ञकाः भवन्ति।

विशेषार्थः - इतः पूर्वं नदीसंज्ञाविधानम् अभवत् तत्र येषां समावेशः नास्ति तादृशाः अर्थात् ह्रस्व- इकारान्त - उकारान्ताः शब्दाः घिसंज्ञकाः भवन्ति। तत्रेदमवधेयम् - (1) ह्रस्व-इकारान्त - उकारान्त - पुँल्लिङ्गशब्दानां नदीसंज्ञा न भवति अतः घिसंज्ञा भविष्यति। (2) स्त्रीलिङ्गशब्देषु ङित्-विभक्तिषु विकल्पेन नदीसंज्ञा भवति अतः तत्र नदीसंज्ञाभावे घिसंज्ञा ह्रस्वइकारान्ते सत्यपि न भवति इति सूत्रकारनिर्देशः।

सूत्रे शेष इति किमर्थमिति चेत् यत्र नदीसंज्ञा भवति तत्र घिसंज्ञा न भवति यतो हि एकसंज्ञाधिकारः प्रवर्तते। अतः मत्यै इत्यत्र घिसंज्ञा न भविष्यति। यद्यपि अत्र एकसंज्ञाधिकारादेव नदीसंज्ञा यत्र भवति तत्र घिसंज्ञायाः निषेधः सिद्धः आसीत् तथापि शेष-ग्रहणं विषयमेतं स्पष्टीकर्तुं कृतम्। सूत्रे ह्रस्वौ इति ग्रहणं किमर्थमिति चेत् - दीर्घ-ईकारान्तपुँल्लिङ्गशब्दानां नदीसंज्ञाभावेऽपि घिसंज्ञा मा भूत् इति हेतोः ह्रस्वग्रहणं विहितं तेन - वातप्रमी - शब्दस्य नदीसंज्ञाभावेऽपि घिसंज्ञा न भवति ।

**(244) आङो नाऽस्त्रियाम्। 7। 3। । 120 ॥**

**वृत्तिः - घेः परस्याङो ना स्यादस्त्रियाम्। आङिति टासंज्ञा प्राचाम्। हरिणा। अस्त्रियां किम् ? मत्या।**

पदच्छेदः - आङः, ना, अस्त्रियाम् त्रिपदं सूत्रमिदम्।

समासः - न स्त्रियाम् इति अस्त्रियाम् (नञ्)।

अनुवृत्तिः - घेः ।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - घिसंज्ञकात् परस्य आङ् (टा) इत्यस्य स्थाने ना आदेशः भवति स्त्रीलिङ्गं विहाय।

विशेषार्थः - आङ्-शब्दं टा- प्रत्ययस्य कृते प्राचीनवैयाकरणाः प्रायुञ्जत। अतः आङ् - शब्देन तृतीयैकवचनस्य टा-प्रत्ययस्य बोधः कर्तव्यः। अनेन पाणिनिः पूर्वाचार्यान् प्रति सम्मानं प्रकटितवान्। सूत्रे अस्त्रियाम् इति किमर्थं चेत् - सूत्रस्यास्य प्रवृत्तिः - स्त्रीत्वनिमित्तं न भवति तेन - मत्या इत्यत्र मति - शब्दस्य. घिसंज्ञायां सत्यामपि टा-प्रत्ययस्य स्थाने ना-आदेशः न भवति।

साधनिका - हरिणा - प्रातिपदिकात् ह्रस्वइकारान्तपुँल्लिङ्गहरिशब्दात् तृतीयैकवचने टा-प्रत्यये कृते अनुबन्धलोपे हरि + आ इति जाते, ''आकडारादेका संज्ञा'' इति सूत्रसहकारेण ''शेषो घ्यसखि'' इति सूत्रेण हरिशब्दस्य घिसंज्ञायाम्, घिसंज्ञकात् परस्य टा-प्रत्ययस्य स्थाने ना आदेशे हरि + ना इति जाते ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति सूत्रेण नस्य णत्वे वर्णसम्मेलने हरिणा इति रूपं सिद्ध्यति।

**(245) घेर्ङिति । 7। 3। । 111 ॥**

**वृत्तिः - घिसंज्ञकस्य ङिति सुपि गुणः स्यात्। हरये। घेः किम् ? हरिभ्याम्। सुपि किम् ? पट्वी । घेर्ङिति इति गुणे कृते।**

पदच्छेदः - घेः, ङिति द्विपदं सूत्रमिदम्।

अनुवृत्तिः - सुपि, गुणः ।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - ङित्-सुप् - प्रत्यये परे सति घिसंज्ञकस्य गुणः भवति।

विशेषार्थः - सूत्रे घेः इति किमर्थमिति चेत् - घिसंज्ञकं विहाय अन्यत्र सूत्रस्य प्रवृत्तिः न भवति तेन सखि - शब्दस्य घिसंज्ञा नास्ति अतः तत्र ङित् - प्रत्यये परे सत्यपि गुणो न भवति । सूत्रे ङिति इति पदस्य किं प्रयोजनमिति प्रश्ने सति - अङित् - प्रत्ययेषु परेषु घिसंज्ञकस्यापि गुणो न भवति । यथा - हरिभ्याम् इत्यत्र भ्याम् - प्रत्ययः ङित् नास्ति अतः तत्र हरिशब्दस्य घिसंज्ञायां सत्यामपि गुणो न भवति । सूत्रार्थे सुपि च इति सूत्रात् सुपि इति पदम् अनुवर्तते अतः स्वादिङित्प्रत्यये परे सत्येव घिसंज्ञकस्य गुणः सम्भवति। यथा - पट्वी इत्यत्र पटु - शब्दात् स्त्रीत्वविवक्षायाम् ङीष् (वोतो गुणवचनात् इति सूत्रेण) प्रत्यये कृते अनुबन्धलोपे पटु + ई इत्यत्र ङित् - प्रत्ययः परे विद्यते तथापि सः स्वादि-विभक्तिप्रत्ययः नास्ति अतः उकारस्य गुणो न भवति।

साधनिका - हरये - प्रातिपदिकात् ह्रस्वइकारान्तपुँल्लिङ्गहरिशब्दात् चतुर्थ्येकवचने ङे-प्रत्यये कृते अनुबनअधलोरपे हरि + ए इति जाते, ''शेषो घ्यसखि'' इति सूत्रेण हरि - शब्दस्य घिसंज्ञायां ङित् - प्रत्यये परे सति घेर्ङिति इति सूत्रेण इकारस्य गुणे एकारे हरे + ए इति जाते ''एचोऽयवायावः'' इति सूत्रेण अयादेशे हर् अय् + ए इति जाते वर्णसम्मेलने हरये इति रूपं सिद्ध्यति।

---

**(246) ङसिङसोश्च। 6 ।1 । 110 ॥**

**वृत्तिः एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात्। हरेः। हर्योः। हरीणाम्।**

---

पदच्छेदः - ङसिङसोः, च द्विपदं सूत्रमिदम्।

समासः - ङसि च ङस् च इति ङसिङसौ तयोः ङसिङसोः (द्वन्द्वः)।

अनुवृत्तिः - एङः अति, पूर्वरूपम्।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - एङ्-प्रत्याहारवर्णात् ङसि - ङस् - प्रत्ययसम्बद्धः ह्रस्व-अकारः भवति तर्हि द्वयोः स्थाने पूर्वरूपमेकादेशः भवति।

विशेषार्थः - पञ्चमी - षष्ठ्येकवचनस्य ङसिङसोः प्रत्ययोः प्रवर्तने कृते अनुबन्धलोपेन अस् इति प्रत्ययांशः शिष्यते अतः ह्रस्व-अकारः परे प्राप्यते तस्मात् पूर्वं घिसंज्ञकस्य घेर्ङिति इत्यनेन गुणे कृते ए - कारः, ओ-कारो वा प्राप्तः भवति अस्याम् अवस्थायां सूत्रमिदं पूर्वरूपमेकादेशं निर्दिशति तेन ए/ओ + अवर्णौ मिलित्वा पूर्वरूपेण ए / ओकररूपौ भवतः।

साधनिका - हरेः - प्रातिपदिकात् ह्रस्वइकारान्तपुँल्लिङ्गहरिशब्दात् पञ्चम्येकवचने ङसि - प्रत्यये कृते अनुबन्धलोपे हरि + अस् इति जाते, ''शेषो घ्यसखि'' इति सूत्रेण हरि - शब्दस्य घिसंज्ञायां ङित् - प्रत्यये परे सति ''घेर्ङिति'' इति सुत्रेण इकारस्य गुणे एकारे हरे + अस् इति जाते ङसिङसोश्च इति सूत्रेण एकार + अकारयोः स्थाने पूर्वरूपमेकादेशेन एकारादेशे वर्णसम्मेलने सस्य रुत्वविसर्गे हरेः इति रूपं सिद्ध्यति।

हर्योः - प्रातिपदिकात् ह्रस्वइकारान्तपुँल्लिङ्गहरिशब्दात् षष्ठीद्विवचने ओस् - प्रत्यये कृते हरि + ओस् इति जाते ''इको यणचि'' इति सूत्रेण यणि कृते हर्य् + ओस् इति जाते वर्णसम्मेलने सस्य रुत्वविसर्गे हर्योः इति रूपं सिद्ध्यति।

हरीणाम् - प्रातिपदिकात् ह्रस्वइकारान्तपुँल्लिङ्गहरिशब्दात् षष्ठीबहुवचने आम् - प्रत्यये कृते हरि + आम् इति जाते ''ह्रस्वनद्यापो नुट्'' इति सूत्रेण ह्रस्वान्तात् परस्य आमः नुडागमे अनुबन्धलोपे टित्त्वादादि - अवयवे हरि + नाम् इति जाते ''नामि'' इति सूत्रेण नामि परे सति दीर्घे हरी + नाम् इति जाते ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति सूत्रेण नस्य णत्वे हरीणाम् इति रूपं सिद्ध्यति।

**(247) अच्च घेः । 7। 3। 119॥**

**वृत्तिः- इदुद्भ्यामुत्तरस्य ङेरौस्याद् घेरन्तादेशश्चाकारः । वृद्धिः। हरौ । हर्योः। हरिषु । एवं श्रीपत्यग्निरविकव्यादयः।**

पदच्छेदः - अत्, च, घेः त्रिपदं सूत्रमिदम्।

अनुवृत्तिः - इदुद्भ्याम्, औत्।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - ह्रस्व-इकार-उकाराभ्यां परस्य ङि-प्रत्ययस्य स्थाने औकारादेशः भवति, पूर्वस्य घिसंज्ञकस्य स्थाने अकारादेशः भवति।

विशेषार्थः - सूत्रमिदं स्थानद्वये प्रवृत्तिं करोति पूर्वम् इकारान्तं - उकारान्तं मत्त्वा ततः परस्य औकारादेशरूपं ततः पूर्वस्य घिसंज्ञकस्य इकारस्य स्थाने अकारादेशरूपं कार्यम्। अत्र घेर्ङिति इति सूत्रेण गुणे कृतेऽपि सूत्रे घेःर्ङिति इति सूत्रेण गुणे कृतेऽपि सूत्रे घेः इति पठितत्वात् अस्य सूत्रस्य प्रवृत्तिः भवति अतः गुणरूपं कार्यं विफलं भविष्यति अतः अकृतव्यूहाः पाणिनीयाः इति परिभाषामनुसृत्य अत्र गुणमकृत्वा अच्च घेः इत्यस्यैव प्रवर्तनमित्याशयः।

साधनिका - हरौ - प्रातिपदिकात् ह्रस्वइकारान्तपुँल्लिङ्गहरिशब्दात् सप्तम्येकवचने ङि-प्रत्यये कृते अनुबन्धलोपे हरि + इ इति जाते ''शेषो घ्यसखि'' इति सूत्रेण हरिशब्दस्य घिसंज्ञायाम् ''घेर्ङिति'' इति सूत्रेण प्राप्तं गुणं प्रबाध्य ''अच्च घेः'' इति सूत्रेण ङि - प्रत्ययस्य स्थाने औकारादेशे, घिसंज्ञकस्य अन्त्यवर्णस्य इकारस्य स्थाने अकारादेशे हर + औ इति जाते ''वृद्धिरेचि'' इति सूत्रेण अकार + औकारयोः स्थाने वृद्धिरेकादेशे औकारे कृते वर्णसम्मेलने हरौ इति रूपं सिद्ध्यति।

हरिशब्द इव श्रीपति, अग्नि, रवि-कवि-आदिशब्दाः अपि सद्ध्यन्ति।

**(248) अनङ् सौ। 7। 1। 93॥**

**वृत्तिः - सख्युरङ्गस्यानङादेशः स्यादसम्बुद्धौ सौ परे। ङिच्च इत्यन्तादेशः।**

पदच्छेदः - अनङ् सौ द्विपदं सूत्रमिदम्।

अनुवृत्तिः - सख्युः, असम्बुद्धौ, अङ्गस्य।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - सम्बुद्धिभिन्नः प्रथमैकवचनस्य सु-प्रत्ययः परे भवेत् किन्तु तस्य सम्बुद्धिसंज्ञा अनपेक्षिता। अर्थात् अस्य सूत्रस्य प्रवृत्तिः सम्बोधने न भवति।

**(249) अलोऽन्त्यात्पूर्व उपधा। 1 ।1 । 64 ॥**

**वृत्तिः - अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात्।**

पदच्छेदः - अलः, अन्त्यात्, पूर्वः, उपधा चतुष्पदं सूत्रमिदम्।

अनुवृत्तिः - स्वस्मिन् पूर्णं सूत्रमिदम्।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - अन्तिमात् वर्णात् पूर्ववर्तिनः वर्णस्य उपधा इति संज्ञा भवति।

विशेषार्थः - सूत्रमिदं सार्वत्रिकम्। सर्वत्र ईदृशस्य सूत्रस्य अर्थः प्रवर्तते किन्तु तस्य फलं दर्शयितुं विधिसूत्रस्य प्रवृत्तिः निमित्तं वा न भवति अतः उल्लेखः न भवति। कस्यापि शब्दस्य उपान्त्यः वर्णः उपधा इति अभिधानवान् भवति।

**(250) सर्वनामस्थाने चाऽसम्बुद्धौ। 6 ।4 । 8॥**

**वृत्तिः - नान्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे।**

पदच्छेदः - सर्वनामस्थाने, च, असम्बुद्धौ त्रिपदं सूत्रमिदम्।

समासः - न सम्बुद्धिः इति असम्बुद्धिः तस्याम् असम्बुद्धौ (नञ्)।

अनुवृत्तिः - अङ्गस्य, नः, उपधायाः, दीर्घः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - सम्बुद्धिभिन्ने सर्वनामस्थाने प्रत्यये परे नकारान्तशब्दस्य अङ्गस्य उपधायाः दीर्घः भवति।

विशेषार्थः- सूत्रमिदं सर्वनामस्थानसंज्ञके प्रत्यये परे सति प्रवृत्तं भवति। सर्वनामस्थानसंज्ञकाश्च- सु, औ, जस्, अम्, औट्- प्रत्ययाः सन्ति। अत्र सु- प्रत्ययस्य अपि समावेशत्वात् तत्र सम्बुद्धिसंज्ञकस्य मा भूत् इति हेतोः असम्बुद्धौ इति पदम्।

**(251) अपृक्त एकाल् प्रत्ययः । 1 ।1 । 41॥**

**वृत्तिः - एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात्।**

पदच्छेदः - अपृक्तः, एकाल्, प्रत्ययः त्रिपदं सूत्रमिदम्।

समासः - एकश्चासौ अल् च इति एकाल् (कर्मधारयः)।

अनुवृत्तिः - स्वस्मिन् पूर्णं सूत्रमिदम्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - यः प्रत्ययः एकवर्णवान् भवति तस्य अपृक्त इति संज्ञा भवति।

विशेषार्थः - अल् अर्थात् वर्णः स्वरः व्यञ्जनं वा। वर्णः यदि प्रत्ययरूपेण स्यात् तत्रापि एक एव भवेत् तर्हि तस्य अपृक्तसंज्ञा भवति यथा - सु - स्, टा - आ, ङे - ए - इत्यादिः।

**(252) हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् । 6 ।1 । 68॥**

**वृत्तिः - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सु ति सि इत्येतदपृक्तं हल् लुप्यते। हल्ङ्याब्भ्यः किम् ? ग्रामणीः । दीर्घात् किम् ? निष्कौशाम्बिः। अतिखट्वः। सुतिसु इति किम् ? अभैत्सीत्। तिपा सहचरितस्य सिपो ग्रहणात्सिचो ग्रहणं नास्ति । अपृक्तम् इति किम् ? बिभर्ति। हल् किम् ? बिभेद । प्रथमहल् किम् ? राजा । नलोपादिर्न स्यात्, संयोगान्तलोपस्यासिद्धत्वात्। सखा। हे सखे।**

पदच्छेद :- हल्ङ्याब्भ्यः, दीर्घात्, सुतिसि, अपृक्तम्, हल् पञ्चपदं सूत्रमिदम्।

समासः - हल् च ङी च आप् च तेभ्यः हल्ङ्याब्भ्यः (द्वन्द्वः), सु च ति च सि च इति सुतिसि (द्वन्द्वः)।

अनुवृत्तिः - लोपः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - हलन्तात् दीर्घ-ङ्यन्तात्, आबन्तात् परे विद्यमानस्य सु-ति-सि-सम्बद्धस्य अपृक्तहलः लोपः भवति।

विशेषार्थः - अनेन सूत्रेण अपृक्तहलः लोपः निर्दिश्यते। ङी-इति ग्रहणेन ङीप्, ङीष्, ङीन्-सर्वेषां ग्रहणं भवति, आप्- ग्रहणेन चाप्, टाप्, डाप् - इति सर्वेषां ग्रहणं भवति। सु- स्वादिप्रत्ययेषु प्रथमः प्रत्ययः, ति, सि - इत्येतौ तिङ्प्रत्ययौ ति-प्रत्ययः - प्रथमपुरुषैकवचनस्य, सि-मध्यमपुरुषैकवचनस्य प्रत्ययः तेषां उकार- इकारौ लुप्तौ भवतः तेन अवशिष्टानां उकार- इकारौ लुप्तौ भवतः तेन अवशिष्टानां स्-त्-स्वर्णानाम् अपृक्तसंज्ञा भवति तेषां लोपविधानाय सूत्रमिदम्।

सूत्रे हल्ङ्याब्भ्य: इति किमर्थमिति चेत् – तद्विना सूत्रस्य प्रवृत्तिः न भवति। अतः ग्रामीणः इत्येषः शब्दः हलन्तः, ङ्यन्तः, आबन्तः वा नास्ति अतः अत्र सूत्रप्रवृत्तिः न भवति। सूत्रे दीर्घात् इति किमर्थमिति चेत् – ङ्यन्तः आबन्तः वा शब्दः लोपप्रसङ्गे उपस्थिते सति दीर्घः भवतु अन्यथा सूत्रं कार्यं न विदधाति यथा – निष्कौशाम्बिः इति शब्दे कौशाम्बी-शब्दः मूलतः ङ्यन्तः किन्तु समासत्वात् ह्रस्वः, एवमेव अतिखट्वः इत्यत्र खट्वाशब्दः आबन्तः किन्तु समासत्वात् ह्रस्वः अतः अनयोः स्थानयोः सूत्रप्रवृत्तिः न भवतु तदर्थं दीर्घग्रहणं कृतम्। सूत्रे अपृक्तग्रहणेन सु-ति-सिसम्बद्धस्य हलः अर्थात् स-त-सां लोपः स्वरे विद्यमानेऽपि मा भूत् इत्येतदर्थं सूत्रे सुतिसि इति ग्रहणम्। तेन बिभर्ति इत्यादौ हलः परस्य ति इत्यस्य त – कारस्य लोपः न भवति। सूत्रे प्रथमस्य हल्-इत्यस्य ग्रहणं किमर्थं कृतमिति चेत् – राजा – सदृशानां पदानां सिद्ध्यर्थं तत्र न-कारलोपं विधातुं ''नलोपः प्रातिपदिकान्तस्य'' सूत्रं संयोगान्तलोपस्य असिद्धत्वात् प्रवृत्तं न भवेत्।

साधनिका – प्रातिपदिकात् ह्रस्व-इकारान्तपुँल्लिङ्गात् सखिशब्दात् प्रथमैकवचने सु-प्रत्यये कृते अनुबन्धलोपे सखि + स् इति जाते अनङ् सौ इति सूत्रेण सम्बुद्धिभिन्ने सु-प्रत्यये परे पूर्वस्य अङ्गस्य अनङ्-आदेशे अनुबन्धलोपे ङित्त्वादन्त्यस्य इकारस्य स्थाने आदेशे सख् अन् + स् इति जाते ''अलोऽन्त्यात् पूर्व उपधा'' इति सूत्रेण नकारात्पूर्वस्य अकारस्य उपधासंज्ञायाम्, ''सुडनपुंसकस्य'' इति सूत्रेण सु-प्रत्ययस्य सर्वनामस्थानसंज्ञायाम्, ''सर्वनामस्थाने चासम्बुद्धौ'' इति सूत्रेण सम्बुद्धिभिन्ने सर्वनामस्थानसंज्ञके प्रत्यये परे सति पूर्वस्य नान्तस्य उपधायाः अकारस्य दीर्घे आकारे कृते सखान् + स् इति जाते ''अपृक्त एकाल् प्रत्ययः'' इति सूत्रेण स् – कारस्य अपृक्तसंज्ञायाम्, ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इति सूत्रेण हलन्तात् परस्य अपृक्तस्य सु-प्रत्ययसम्बद्धस्य स्-कारस्य लोपे सखान् इति जाते ''नलोपः प्रातिपदिकान्तस्य'' इति सूत्रेण प्रातिपदिकान्तस्य न-कारस्य लोपे कृते सखा इति रूपं सिद्ध्यति।

**(253) सख्युरसम्बुद्धौ । 7। 1। । 92॥**

**वृत्तिः – सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात्।**

पदच्छेदः – सख्युः, असम्बुद्धौ द्विपदं सूत्रमिदम्।

समासः – न सम्बुद्धिः असम्बुद्धिः तस्याम् असम्बुद्धौ (नञ्)।

अनुवृत्तिः – अङ्गस्य, सर्वनामस्थाने, णित्।

सूत्रप्रकारः – अतिदेशसूत्रम्।

सरलार्थः – अङ्गसंज्ञकात् सखिशब्दात् परेषां सम्बुद्धिवर्जं सर्वनामस्थानसंज्ञकानां प्रत्ययानां णिद्वद्भावः भवति।

विशेषार्थः – इदम् अतिदेशसूत्रम्। अतः सर्वनामस्थानसंज्ञकानां (सु, औ, जस्, अम्, औट्) प्रत्ययानां णिद्वद्भावः भवति अतः णित् – प्रत्यये परे यत् कार्यं भवति तत् अत्रापि भविष्यति।

**(254) अचो ञ्णिति। 7। 2 । 114॥**

**वृत्तिः – ञिति णिति च परेऽजन्ताङ्गस्य वृद्धिः स्यात्। सखायौ। सखायः। सखायम्। सखायौ। घिसंज्ञाभावान्न तत्कार्यम् – सख्या । सख्ये।**

पदच्छेदः – अचः, ञ्णिति द्विपदं सूत्रमिदम्।

समासः – ञित् च णित् च तस्मिन् ञ्णिति (द्वन्द्वः)।

अनुवृत्तिः – अङ्गस्य, वृद्धिः ।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – ञित् – प्रत्यये, णित् – प्रत्यये वा परे यत्र अन्ते अच् – स्वरः भवति तादृशस्य अङ्गस्य वृद्धिः भवति।

विशेषार्थः – सूत्रे तदन्तविधिः प्रवर्तते अतः वृद्धिः अन्त्यस्य भवति इति ज्ञेयम्।

साधनिका – प्रातिपदिकात् ह्रस्व- इकारान्तपुँल्लिङ्गात् सखिशब्दात् प्रथमाद्विवचने औ प्रत्यये कृते सखि + औ इति

जाते ''सुडनपुंसकस्य'' इति सूत्रेण औ - प्रत्ययस्य सर्वनामस्थानसंज्ञायाम्, ''सख्युरसम्बुद्धौ'' इति सूत्रेण सखिशब्दात् परत्वात् सर्वनामस्थानसंज्ञकप्रत्ययस्य औकारस्य णिद्वद्भावे णित्त्वात् ''अचो ञ्णिति'' इति सूत्रेण णित् - प्रत्यये परे अजन्ताङ्गस्य वृद्धौ इकारस्य स्थाने ऐकारे कृते सखै + औ इति जाते ''एचोऽयवायाव:'' इति सूत्रेण ऐकारस्य स्थाने आय्-आदेशे सख् आय् + औ इति जाते वर्णसम्मेलने सखायौ इति रूपं सिद्धयति।

इत्थमेव औट्प्रत्ययान्तं यावत् णिद्वद्भावेन वृद्धौ, आयादेशे च रूपाणि सखाय:, सखायम्, सखायौ।

सखीन् - प्रातिपदिकात् ह्रस्व-इकारान्तपुँल्लिङ्गात् सखिशब्दात् द्वितीयाबहुवचने शस्प्रत्यये अनुबन्धलोपे सखि + अस् इति जाते ''प्रथमयो: पूर्वसवर्ण:'' इति सूत्रेण पूर्वसवर्णदीर्घैकादेशे कृते सखीस् इति जाते ''तस्माच्छसो न: पुंसि'' इति सूत्रेण स् - कारस्य न् - कारादेशे सखीन् इति रूपं सिद्धयति।

सख्या - प्रातिपदिकात् ह्रस्व-इकारान्तपुँल्लिङ्गात् सखिशब्दात् तृतीयैकवचने टा-प्रत्यये अनुबन्धलोपे सखि + आ इति जाते यणि कृते वर्णसम्मेलने सख्या इति रूपं सिद्ध्यति। अत्रेदमवधेयं यत् शेषो घ्यसखि इति सूत्रेणात्र सखिशब्दत्वात् घिसंज्ञा न भवति, अत: तदनुलक्ष्य कार्याणि न सम्भवन्ति । इत्थमेव सख्ये इत्यपि।

---

**(255) ख्यत्यात्परस्य। 6। 1। 112॥**

**वृत्ति: - खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उत्स्यात्। सख्यु:।**

---

पदच्छेद: - ख्यत्यात्, परस्य द्विपदं सूत्रमिदम्।

समास: - ख्यञ्च त्यञ्च ख्यत्यम् तस्मात् (द्वन्द्व:)।

अनुवृत्ति: - अति, ङसिङसो:, उत्।

सूत्रप्रकार: - विधिसूत्रम्।

सरलार्थ: - यत्र यणादेश: कृत: तादृशाभ्यां खि-ति-शब्दाभ्यां, खी-ती-शब्दाभ्यां च परयो: ङसिङसो: ह्रस्व-अकारस्य स्थाने उ-कारादेश: भवति।

विशेषार्थ: - सूत्रे सूत्रकृता ख्य एवं त्य इति निर्देशेन खि/खी + अ, ति/ती + अ मूलस्य यण्-सन्ध्यन्तं रूपं दर्शितम् अत: कृतयणादेशाभ्याम् इति अर्थ: प्राप्यते। उकारादेश: ख्यत्यात्परस्य कृते विद्यते अत: आदे: परस्य इति परिभाषासूत्रानुसारं निर्दिष्टयो: ङसिङसो: आदे: अ - कारस्य स्थाने भवति।

साधनिका - सख्यु: - प्रातिपदिकात् ह्रस्व-इकारान्तपुँल्लिङ्गात् सखिशब्दात् पञ्चम्येकवचने ङसि-प्रत्यये अनुबन्धलोपे सखि + अस् इति जाते ''इको यणचि'' इति सूत्रेण यणि सख्य् + अस् इति जाते ''ख्यत्यात्परस्य'' इति सूत्रेण कृतयणादेशात् खि-शब्दात्परस्य ङसि-प्रत्ययस्य अ-कारस्य उ-कारादेशे सख्य् + उस् इति जाते वर्णसम्मेलने रुत्वविसर्गे सख्यु: इति रूपं सिद्ध्यति।

---

**(256) औत्। 7। 3। । 118॥**

**वृत्ति:- इदुद्भ्यां परस्य ङेरौत्स्यात्। उकारानुवृत्तिरुत्तरार्था। सख्यौ। शेषं हरिवत्। सोभन: सखा सुसखा । सुसखायौ। सुखाय:। अनङ्णिद्वद्भावयोराङ्गत्वात्तदन्तेऽपि प्रवृत्ति:। समुदायस्य सखिरूपत्वाभावात् असखि (सू.234) इति निषेधाप्रवृत्तेर्घिसंज्ञा । सुसखिना। सुसखये। ङसिङसोर्गुणे कृते कृतयणादेशत्वाभावात् ख्यत्यात् (सू.255) इत्युत्वं न । सुसखे:। सुसखावित्यादि। एवमतिशयित: सखा अतिसखा। परम: सखा यस्य इति विग्रहे परमसखा परमसखायौ इत्यादि। गौणत्वेऽप्यनङ्णित्त्वे प्रवर्तेते। सखीमतिक्रान्तोऽतिसखि:। लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्न टच्। हरिवत् । इहानङ्णित्त्वे न भवत:, गोस्त्रियो: (सू.646) इति ह्रस्वत्वेन सखिशब्दस्य लाक्षणिकत्वात्। 'लक्षणप्रतिपदोक्तयो:' प्रतिपदोक्तस्यैव ग्रहणात् (प.114)।**

---

पदच्छेदः - औत् एकपदं सूत्रमिदम्।

अनुवृत्तिः - इदुद्भ्याम्।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - ह्रस्व-इकार-उकारभ्यां परस्य ङि-प्रत्ययस्य स्थाने औ-कारादेशः भवति।

विशेषार्थः - अस्मिन् सूत्रे पूर्वसूत्रात् इदुद्भ्याम् इत्यस्मात् इत् - उत् इति अनुवृत्तिः स्वीकृता तत्र उत्-इत्यस्य अनुवृत्तिः अग्रे ''अच्च घेः'' सूत्रे भवेत्तदर्थम् अस्ति। अन्यानि रूपाणि हरिवद् भवन्ति। अस्मिन् शब्दसाधने प्रयुक्तौ अनङ् -णिद्वद्भावौ आङ्गत्वात् यत्र सख्यन्त-शब्दानां साधनं तत्रापि प्रवर्तेते। यथा - सुसखा, सुसखायौ इतिवत्। समासत्वात् समुदायस्य सखिरूपत्वाभावात् ''शेषो घ्यसखि'' इति सूत्रेण घिसंज्ञायाः निषेधः सामासिकेषु सख्यन्तशब्देषु न भवति अतः सुसखिना । सुसखये इत्यादिरूपाणि हरिवत् भवन्ति।

साधनिका - प्रातिपदिकात् ह्रस्व-इकारान्तपुँल्लिङ्गात् सखिशब्दात् सप्तम्येकवचने ङि-प्रत्यये अनुबन्धलोपे सखि + इ इति जाते औत् इति सूत्रेण ङि-प्रत्ययस्य स्थाने औ - आदेशे सखि + औ इति जाते इकारस्य यणादेशे यकारे वर्णसम्मेलने सख्यौ इति रूपं सिद्ध्यति।

---

**(257) पतिः समास एव । 1 ।4 । 8॥**

**वृत्तिः - पतिशब्दः समास एव घिसंज्ञः स्यात्। पत्या। पत्ये। पत्युः। पत्युः। पतीनाम् । पत्यौ। शेषं हरिवत् । समासे तु भूपतये । कतिशब्दो नित्यं बहुवचनान्तः।**

---

पदच्छेदः - पतिः, समासे, एव त्रिपदं सूत्रमिदम्।

अनुवृत्तिः - घि।

सूत्रप्रकारः - संज्ञा (नियम) सूत्रम्।

सरलार्थः - पति-शब्दस्य समासे एव घिसंज्ञा भवति।

विशेषार्थः - सूत्रमिदं नियमनं कृत्वा समस्यमानस्य पतिशब्दस्य घिसंज्ञाविधानं करोति तद्वदेव समासरहितस्य पति-शब्दस्य घिसंज्ञानिषेधं करोति।

साधनिका - प्रातिपदिकात् ह्रस्व - इकारान्त - पुँल्लिङ्गात् पतिशब्दात् तृतीयैकवचने टा-प्रत्यये कृते अनुबन्धलोपे पति + आ इति जाते ''शेषो घ्यसखि'' इति सूत्रेण घिसंज्ञायां प्राप्तायां ''पतिः समास एव'' इति सूत्रेण समासरहितत्वात् घिसंज्ञानिषेधे घिसंज्ञाभावात् तन्निमित्तकार्याप्राप्तौ यणि कृते पत्या इति रूपं सिद्ध्यति। तद्वदेव पत्ये। पत्युः (यणि, ख्यत्यात्परस्य - इति उत्वे) । पत्यौ (सखिवत्)। शेषं हरिवत्। भूपति-शब्दस्तु हरिवत्।

---

**(258) बहुगणवतुडति संख्या। 1 ।1 । 23॥**

**वृत्तिः - एते संख्यासंज्ञाः स्युः।**

---

पदच्छेदः - बहुगणवतुडति, संख्या द्विपदं सूत्रमिदम्।

समासः - बहु च गणश्च वतुश्च डति च तेषां समाहारः बहुगणवतुडति (द्वन्द्वः)।

अनुवृत्तिः - स्वस्मिन् पूर्णं सूत्रमिदम्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः- बहु-गण-वतु-डति इत्येतेषां संख्या संज्ञा भवति।

विशेषार्थः - बहु-गण-शब्दौ, वतु-डति-प्रत्ययौ च इत्येतेषां संख्यासंज्ञा भवति। अतः वतु-प्रत्ययान्तानां, डति-प्रत्ययान्तानां च संख्यासंज्ञा भवति इत्यर्थो ज्ञेयः।

**(259) डति च। 1 ।1 । 25॥**

**वृत्ति : - डत्यन्ता सङ्ख्या षट्संज्ञा स्यात्।**

पदच्छेदः - डति, च द्विपदं सूत्रमिदम्।

अनुवृत्तिः - षट्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - डति-प्रत्ययान्ताः संख्यासंज्ञकाः षट्-संज्ञकाः भवन्ति।

विशेषार्थः - स्पष्टः अर्थः।

**(260) प्रत्ययस्य लुक्श्लुलुपः । 1 ।1 । 61॥**

**वृत्तिः लुक्श्लुलुप् - शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात्।**

पदच्छेदः - प्रत्ययस्य, लुक्श्लुलुपः द्विपदं सूत्रमिदम्।

समासः - लुक् च श्लु च लुप् च इति लुक्श्लुलुपः (द्वन्द्वः)।

अनुवृत्तिः - अदर्शनम्।

सूत्रप्रकारः - संज्ञासूत्रम्।

सरलार्थः - प्रत्ययस्य अदर्शनं यदा लुक् - श्लु - लुप् इति शब्दैः क्रियते तदा तेषां तच्छब्दसंज्ञा भवति।

विशेषार्थः - प्रत्ययनिमित्तेयं संज्ञा। यदा प्रत्ययमनुलक्ष्य अदर्शनविधाने लुक् - श्लु - लुप् - शब्दानां प्रयोगः क्रियते तदा सा संज्ञा भवति। यथा लुक् - शब्देन कृतं प्रत्ययस्य अदर्शनं लुक् - संज्ञकं भवति, श्लु - शब्देन कृतं प्रत्ययस्य अदर्शनं श्लु-संज्ञकं भवति, लुप् - शब्देन कृतं प्रत्ययस्य अदर्शनं लुप् - संज्ञकं भवति। अर्थात् कार्येणैव संज्ञाया बोधो विधेयः।

**(261) षड्भ्यो लुक् । 7 ।1 । 22॥**

**वृत्तिः - षड्भ्यः परयोर्जश्शसोर्लुक् स्यात्।**

पदच्छेदः - षड्भ्यः, लुक् द्विपदं सूत्रमिदम्।

अनुवृत्तिः - जश्शसोः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - षट्-संज्ञकेभ्यः शब्देभ्यः परयोः जस्-शस्-प्रत्यययोः लुक् भवति।

विशेषार्थः- सूत्रार्थः स्पष्टः।

**(262) प्रत्ययलोपे प्रत्ययलक्षणम् । 1 ।1 । 62॥**

**वृत्ति - प्रत्यये लुप्तेऽपि तदाश्रितं कार्यं स्यात्। इति जसि च ( सू.२४१ ) इति गुणे प्राप्ते।**

पदच्छेदः - प्रत्ययलोपे, प्रत्ययलक्षणम् द्विपदं सूत्रमिदम्।

समासः - प्रत्ययस्य लोपः प्रत्ययलोपः तस्मिन् प्रत्ययलोपे (त.पु.), प्रत्ययः लक्षणम् यस्य तत् प्रत्ययलक्षणम् (बहुव्रीहिः)।

अनुवृत्तिः - स्वस्मिन् पूर्णं सूत्रमिदम्।

सूत्रप्रकारः - संज्ञा (नियम) सूत्रम्।

सरलार्थः - प्रत्यस्य लोपे कृतेऽपि तदाश्रितं कार्यं भवति।

विशेषार्थः -सूत्रमिदं स्थानिवद्भावसदृशं कार्यं निर्दिशति। अतः प्रत्ययस्य लोपे सत्यपि प्रत्ययः परे विद्यमानः अस्ति इति मत्वा पूर्वे तन्निमितं कर्यं कर्तुं शक्यते इत्यर्थः।

**(263) न लुमताङ्गस्य । 1 ।1 । 63॥**

**वृत्तिः - लुक् श्लु लुप् एते लुमन्तः। लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात्। कति। कति। कतिभिः। कतिभ्यः। कतिभ्यः। कतीनाम् । कतिषु । अस्मद्युष्मद्षट्संज्ञकास्त्रिषु सरूपाः। त्रिशब्दो नित्यं बहुवचनान्तः। त्रयः। त्रीन्। त्रिभिः। त्रिभ्यः। त्रिभ्यः।**

पदच्छेदः - न, लुमता, अङ्गस्य त्रिपदं सूत्रमिदम्।

समासः - लु इत्येकदेशोऽस्यास्तीति लुमान् (बहुव्रीहिः)।

अनुवृत्तिः - प्रत्ययलोपे, प्रत्ययलक्षणम्।

सूत्रप्रकारः - विधि (निषेध) सूत्रम्।

सरलार्थः - लुक् - श्लु - लुप् - शब्दाः लुमन्तः । तैः अदर्शनकार्ये विहिते सति तन्निमित्तमङ्गकार्यं न भवति।

विशेषार्थः- लुक् - श्लु - लुप् इत्यत्र सर्वेषु लु-शब्दः सर्वेषु विद्यते अतः ते लुमन्तः इति कथ्यन्ते। लुमता-शब्देन कृतम् अदर्शनकार्यं लोपकार्यात् विशिष्यते। अतः नियमो विधीयते अनेन सूत्रेण यत्-लुमता शब्देन यदा अदर्शनकार्यं विधीयते तदा प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रेण यथा निर्दिष्टं तथा लुप्तं प्रत्ययं विद्यमानं मत्त्वा विधीयमानं कार्यं न भवति इत्यर्थः।

अस्मद् - युष्मद् - षट्संज्ञकाः शब्दाः त्रिषु लिङ्गेषु समानरूपाः भवन्ति। त्रिशब्दः नित्यं बहुवचनान्तः।

साधनिका - कति - ह्रस्व-इकारान्तपुँल्लिङ्गात् नित्यं बहुवचनान्तात् कतिशब्दात् प्रथमाबहुवचने जस्- प्रत्यये अनुबन्धलोपे कति + अस् इति जाते "बहुगणवतुडति संख्या" इति सूत्रेण डत्यन्तस्य कतिशब्दस्य संख्यासंज्ञायां संख्यासंज्ञकत्वात् "जसि च" इति सूत्रेण षट्-संज्ञायां "प्रत्ययस्य लुक्श्लुलुपः" इति सूत्रसहकारेण "षड्भ्यो लुक्" इति सूत्रेण षट्-संज्ञकात् कतिशब्दात् परस्य जसः लुकि कति इति जाते अस्याम् अवस्थायां "प्रत्ययलोपे प्रत्ययलक्षणम्" इति सूत्रसहकारेण लुप्तं जस् - प्रत्ययं परे विद्यमानं मत्त्वा "जसि च" इति सूत्रेण प्राप्तस्य गुणस्य "न लुमताङ्गस्य" इति नियमेन प्रत्ययलक्षणनिषेधत्वात निषेधे कृते रूपं सिद्ध्यते एवमेव शसि परे रूपं सिद्ध्यति। अन्यानि रूपाण्यपि हरिशब्दस्यबहुवचनवत् ज्ञेयानि।

त्रयः - ह्रस्व-इकारान्तपुँल्लिङ्गात् नित्यं बहुवचनान्तात् त्रिशब्दात् प्रथमाबहुवचने जस् - प्रत्यये अनुबन्धलोपे त्रि + अस् इति जाते जसि च इति सूत्रेण गुणे त्रे + अस् इति जाते अयादेशे वर्णसम्मेलने सस्य रुत्वविसर्गे त्रयः इति रूपं सिद्ध्यति।

**(264) त्रेस्त्रयः । 7। 1। 53॥**

**वृत्तिः - त्रिशब्दस्य त्रयादेशः स्यादामि। त्रयाणाम्। परमत्रयाणाम्। गौणत्वे तु नेति केचित्। प्रियत्रीणाम्। वस्तुतस्तु प्रियत्रयाणाम्। त्रिषु । द्विशब्दो । नित्यं द्विवचनान्तः।**

पदच्छेदः - त्रेः, त्रयः द्विपदं सूत्रमिदम्।

अनुवृत्तिः - आम् ।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - आम् - प्रत्यये परे सति त्रि-शब्दस्य स्थाने त्रय - आदेशः भवति।

विशेषार्थः- अनेकाल्त्वात् समग्रस्य स्थानिनः स्थाने आदेशः।

साधनिका - ह्रस्व-इकारान्तपुल्लिङ्गात् नित्यं बहुवचनान्तात् त्रिशब्दात् षष्ठीबहुवचने आम् - प्रत्यये कृते त्रि + आम् इति जाते "त्रेस्त्रयः" इति सूत्रेण आमि परे सति त्रि इत्यस्य स्थाने त्रय आदेशे त्रय + आम् इति जाते "ह्रस्वनद्यापो" नुट्

इति सूत्रेण आमः नुडागमे अनुबन्धलोपे टित्त्वादाद्यवयवे त्रय + नाम् इति जाते ''नामि'' इति सूत्रेण दीर्घे त्रया + नाम् इति जाते ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति सूत्रेण नरस्य णत्वे त्रयाणाम् इति रूपं सिद्धयति।

**(265) त्यदादीनामः । 7।2। 102॥**

**वृत्तिः - एषामकारोऽन्तादेशः स्याद्विभक्तौ। द्विपर्यन्तानामेवेष्टिः ( वा. 4468 ) । द्वौ । द्वौ। द्वाभ्याम्। द्वाभ्याम्। द्वयोः । द्वयोः । द्विपर्यन्तानाम् इति किम् ? भवान्। भवन्तौ । भवन्तः । संज्ञायामुपसर्जनत्वे च नात्वम्। सर्वाद्यन्तर्गणकार्यत्वात्। द्विर्नाम कश्चित्। द्विः। द्वी । द्वयः। द्वावतिक्रान्तोऽतिद्विः। हरिवत्। प्राधान्ये तु परमद्वावित्यादि। औडुलोमिः। औडुलोमी। बहुवचने तु उडुलोमाः। लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः ( वा.2460 )। बाह्वादीञोऽपवादः। औडुलोमिम्। औडुलोमी। उडुलोमान्। इति इदन्ताः। वातप्रमीः ( उ.441 ) इत्युणादिसूत्रेण माङ्ईप्रत्ययः, स च कित्। वातं प्रमिमीते इति वातप्रमीः। दीर्घाज्जसि च ( सू. 239 ) वातप्रम्यौ । वातप्रम्यः। हे वातप्रमीः अमि पूर्वः ( सू.194 ) - वातप्रमीम्। वातप्रम्यौ । वातप्रमीन्। वातप्रम्या। वातप्रमीभ्याम्। वातप्रम्ये। वातप्रमीभ्याम्। वातप्रम्यः। वातप्रमीभ्याम्। वातप्रम्यः। वातप्रम्योः। वातप्रम्याम्। दीर्घत्वान्न नुट्। ङौ तु सवर्णदीर्घः। वातप्रमी। वातप्रम्योः । वातप्रमीषु एवं ययीपप्यादयः। यान्त्यनेनेति ययीर्मार्गः। पाति लोकमिति पपीः सूर्यः । यापोः किद् द्वे च ( उ.439 ) इति ईप्रत्ययः। क्विबन्तवातप्रमीशब्दस्य त्वमि शसि ङौ च विशेषः - वातप्रम्यम्, वातप्रम्यः, वातप्रम्यि। एरनेकाचः - ( सू. 272 ) इति वक्ष्यमाणो यण। प्रधीवत् । बहव्यः श्रेयस्यो यस्य सः बहुश्रेयसी। दीर्घङ्यन्तत्वात् हल्ङ्याप् - ( सू.152 ) इति सुलोपः।**

पदच्छेदः - त्यदादीनाम् , अः द्विपदं सूत्रमिदम्।

समासः - त्यद् आदिर्येषाम् इति त्यदादयः तेषां त्यदादीनाम् (बहुव्रीहिः)।

अनुवृत्तिः - विभक्तौ।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - विभक्तिप्रत्यये परे त्यदादीनां शब्दानां स्थाने अ-कारः अन्तादेशः भवति।

वार्तिकार्थः (4468) - त्यदादीनां शब्दानां परिगणनं द्विशब्दपर्यन्तं कर्तव्यम्।

वार्तिकार्थः (2560) - लोमन् - शब्दान्तात् अपत्यार्थे बहुवचने विवक्षिते अ-प्रत्ययः भवति । ''बाह्वादिभ्यश्च'' इति सूत्रेण प्राप्तस्य इञः अपवादः।

विशेषार्थः - सर्वादिगणे त्यदादि-शब्दाः परिगणिताः सन्ति तेषु त्यद् - शब्दात् आरभ्य किम् - पर्यन्तं शब्दाः सन्ति। (त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम्)। एषां विभक्तिप्रत्यये परे सति अकाररूप अन्तादेशः भवति अर्थात् एषां शब्दानाम् अन्त्यवर्णस्य स्थाने अकारादेशः भवति।

वार्तिकविशेषार्थः (4468) - वार्तिकमिदं त्यदादिशब्देषु समावेष्टव्यानां शब्दानां परिगणनं नियमयति। तदनुसारं त्यद् - शब्दादारभ्य द्विशब्दपर्यन्तमेव शब्दाः अत्र त्यदादिगणे परिगणनीयाः इत्यर्थः।

वार्तिकविशेषार्थः (2560) - वार्तिकमिंद तद्धितस्य इञ् - प्रत्ययस्य अपवादः अस्ति। अतः यदा समासान्तस्य लोमन् - शब्दस्य अपत्यार्थे बहुवनचं वक्तुम् इच्छा स्यात् तदा तद्धित - प्रत्यये कर्तव्ये इञ् - प्रत्ययस्य निषेधं कृत्वा वार्तिकमिदं अ- प्रत्ययं करोति।

साधनिका - द्वौ - प्रातिपदिकात् ह्रस्व-इकारान्त - पुल्लिङ्गात् नित्यद्विवचनान्तात् द्विशब्दात् प्रथमाद्विवचने औ प्रत्यये कृते द्वि + औ इति जाते द्विपर्यन्तानामेवेष्टिः इति वार्तिकसहकारेण ''त्यदादीनामः'' इति सूत्रेण द्विशब्दस्यान्त्यस्य इकारस्य स्थाने अकारान्तादेशे द्व + औ इति जाते ''प्रथमयोः पूर्वसवर्णः'' इत्यनेन पूर्वसवर्णदीर्घैकादेशे प्राप्ते ''नादिचि'' इत्यनेन निषेधे कृते ''वृद्धिरेचि'' इति सूत्रेण वृद्ध्येकादेशे कृते वर्णसम्मेलने द्वौ इति रूपं सिद्ध्यति।

द्वाभ्याम् - प्रातिपदिकात् ह्रस्व-इकारान्त - पुल्लिङ्गात् नित्यद्विवचनान्तात् द्विशब्दात् तृतीयाद्विवचने भ्याम् प्रत्यये द्वि + भ्याम् इति जाते द्विपर्यन्तानामेवेष्टिः इति वार्तिकसहकारेण ''त्यदादीनामः'' इति सूत्रेण द्विशब्दस्य अकारान्तादेशे द्व + भ्याम् इति जाते ''सुपि च'' इति सूत्रेण दीर्घे द्वाभ्याम् इति रूपं सिद्ध्यति।

द्वयोः – प्रातिपदिकात् ह्रस्व- इकारान्त – पुँल्लङ्गात् नित्यद्विवचनान्तात् द्विशब्दात् षष्ठीद्विवचने ओस् – प्रत्यये द्वि + ओस् इति जाते द्विपर्यन्तानामेवेष्टिः इति वार्तिकसहकारेण ''त्यदादीनामः'' इति सूत्रेण द्विशब्दस्य अकारान्तादेशे द्व + ओस् इति जाते (शेषं रामवत्)।

उडुलोमाः – उडुलोम्नः अपत्यानि पुमांसः इति – लौककिविग्रहे ''बाह्वादिभ्यश्च'' इति सूत्रेण इञ् – प्रत्यये प्राप्ते तं प्रबाध्य लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः इति वार्तिकेन अ – प्रत्यये कृते टिलोपे उडुलोम इति शब्दः भवति। ततः प्रातिपदिकात् अस्मात् अकारान्त – पुँल्लिङ्गात् उडुलोम-शब्दात् प्रथमाबहुवचने जस् – प्रत्यये कृते (रामवत् रूपसिद्धिः) । अत्रेदमवधेयम् अस्य शब्दस्य प्रथमैकवचनं द्विवचनं च औडुलोमिः, औडुलोमी इति भवतः यतो हि तत्र तद्धितप्रत्ययत्वात् इकारान्तः शब्दः, किन्तु अत्र तद्धितप्रत्ययत्वात् बहुवचने अकारान्तः शब्दः।

---

**सूत्रम् (266) यू स्त्र्याख्यौ नदी । 1।4। 3॥**

**वृत्तिः – ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः। प्रथमलिङ्गग्रहणं च ( वा. 1036 )। पूर्वं स्त्र्याख्यस्योपसर्जनत्वेऽपि इदानीं नदीत्वं वक्तव्यमित्यर्थः।**

---

पदच्छेदः – यू, स्त्र्याख्यौ, नदी त्रिपदं सूत्रमिदम्।

समासः – ईश्च ऊश्च यू (द्वन्द्वः), स्त्रियम् आचक्षाते इति स्त्र्याख्यौ (उपपदम्)।

अनुवृत्तिः – स्वस्मिन् पूर्णं सूत्रमिदम्।

सूत्रप्रकारः – संज्ञासूत्रम्।

सरलार्थः – नित्यस्त्रीलिङ्गयोः दीर्घ-ईकारान्त-ऊकारान्तयोः नदीसंज्ञा भवति।

वार्तिकार्थः (१०३६) – पूर्वं स्त्रीलिङ्गत्वं स्यात् किन्तु प्रयोजनवशात् इदानी लिङ्गपरिवर्तनेन गौणं जातं तत्रापि मौलिकं स्त्रीत्वं मत्वा नदीसंज्ञा विधेया इत्यर्थः।

विशेषार्थः – सूत्रेऽस्मिन् नित्यस्त्रीलिङ्गग्रहणेन अनियतलिङ्गानां शब्दानां नदीसंज्ञा न भवति।

वार्तिकविशेषार्थः (1036) – वार्तिकमिदं सूत्रार्थं विस्तारयति । तत्र पठितस्य नित्यस्त्रीलिङ्ग इत्यस्मिन् पदे परिवर्तनं कृत्वा मूलतः स्त्रीलिङ्ग-शब्दः अनन्तरम् उपसर्जनीभूतः सन्नपि मूलं स्त्रीलिङ्गंशब्दः अपि नदीसंज्ञकः भवति इत्यर्थः।

साधनिका – (अत्र बह्व्यः श्रेयस्यो यस्य सः इति विग्रहे बहुव्रीहिसमासत्वात् निष्पन्नः बहुश्रेयसीशब्दः पुंस्त्वमाप्नोति। किन्त्वत्र मूलतः श्रेयसीशब्दः स्त्रीलिङ्गः स च इदानीं गौणत्वं भजते।)

बहुश्रेयसी – प्रातिपदिकात् दीर्घ-ईकारान्तपुँल्लिङ्गात् बहुश्रेयसीशब्दात् प्रथमैकवचने सुप्रत्यये कृते अनुबन्धलोपे बहुश्रेयसी + स् इति जाते प्रथमलिङ्गग्रहणं च इति वार्तिकसहकारेण यूस्त्र्याख्यौ नदी इति सूत्रेण बहुश्रेयसी – शब्दस्य नदीसंज्ञायाम्, ''अपृक्त एकाल् प्रत्ययः'' इति सूत्रेण स् – कारस्य अपृक्तसंज्ञायाम् ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इति सूत्रेण नदीसंज्ञकात् परस्य अपृक्तस्य स्-कारस्य लोपे बहुश्रेयसी इति रूपं सिद्ध्यति।

---

**(267) अम्बार्थनद्योर्ह्रस्वः । 7।3। 107॥**

**वृत्तिः – अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात् सम्बुद्धौ। हे बहुश्रेयसि । शसि बहुश्रेयसीन्।**

---

पदच्छेदः – अम्बार्थनद्योः , ह्रस्वः द्विपदं सूत्रमिदम्।

समासः – अम्बा अर्थो यस्य सः अम्बार्थः (बहुव्रीहिः), अम्बार्थश्च नदी च अम्बार्थनद्यौ, तयोः अम्बार्थनद्योः (द्वन्द्वः)

अनुवृत्तिः – अङ्गस्य, सम्बुद्धौ।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – सम्बुद्धिसंज्ञके प्रत्यये परे अम्बार्थानां नद्यन्तानां च शब्दानां ह्रस्वः भवति।

विशेषार्थः – अम्बार्थशब्दाः– अम्बा, अल्ला, अक्का इत्येते । नद्यन्ताश्च दीर्घ–इकारान्त – ऊकारान्ताः तेषाम् अङ्गानां ह्रस्वः भवति यदि सम्बुद्धिसंज्ञकः प्रत्ययः परे भवति चेत्। अत्र ह्रस्वग्रहणसामर्थ्यात् गुणादिनिषेधः।

साधनिका – हे बहुश्रेयसि – प्रातिपदिकात् दीर्घ ईकारान्तपुँल्लिङ्गात् बहुश्रेयसीशब्दात् प्रथमैकवचने सुप्रत्यये कृते अनुबन्धलोपे बहुश्रेयसी + स् इति जाते एकवचनं सम्बुद्धिः इति सूत्रेण सु–प्रत्ययस्य सम्बुद्धिसंज्ञायाम्, सम्बुद्धिसंज्ञके परे सति ''अम्बार्थनद्योर्ह्रस्वः'' इति सूत्रेण नद्यन्तस्य ह्रस्वे हे बहुश्रेयसि + स् इति जाते ''एङ्ह्रस्वात् सम्बुद्धेः'' इति सूत्रेण ह्रस्वात् परस्य सम्बुद्धेः सस्य लोपे हे बहुश्रेयसि इति रूपं सिद्ध्यति।

**(268) आण्नद्याः। 7। 3। 112॥**

**वृत्तिः – नद्यन्तात्परेषां ङितामाडागमः स्यात्।**

पदच्छेदः – आट्, नद्याः द्विपदं सूत्रमिदम्।

अनुवृत्तिः – अङ्गस्य, ङिति।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – नदीसंज्ञकात् परे विहितानां ङित् – प्रत्ययानाम् आट्– आगमः भवति।

विशेषार्थः – अङ्गस्य – अधिकारः प्रवर्तते अतः नदीसंज्ञकात् अङ्गात् परे यदि ङित् – विभक्तिप्रत्ययाः स्युः तर्हि तेषाम् आट् – आगमः भवति। स च टित्त्वात् आद्यवयवरूपः भविष्यति।

**(269) आटश्च । 6 । 1 । 90॥**

**वृत्तिः – आटोऽचि परे वृद्धिरेकादेशः स्यात्। बहुश्रेयस्यै। बहुश्रेयस्याः। बहुश्रेयस्याः। नद्यन्तात्परत्वान्नुट्। बहुश्रेयसीनाम्।**

पदच्छेदः – आटः, च द्विपदं सूत्रमिदम्।

अनुवृत्तिः – अचि, पूर्वपरयोः, वृद्धिः।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – आट् – आगमात् स्वरे परे द्वयोः स्थाने वृद्धिरेकादेशः भवति।

विशेषार्थः – इदं प्रत्ययस्य अन्तरङ्गकार्यम् अतः तत् बहिरङ्गात् बलीयः भवति। आट् – आगमस्य तथा च ततः परे विद्यमानस्य स्वरस्य स्थाने वृद्धिरेकादेशः भवति । अतः आ + (ङे)ए – ऐ, आ + (ङसि /ङस्) अस् – आस्, आ + (ङि) इ – ऐ । इत्येवं वृद्धिरेकादेशे प्रक्रियारूपं प्राप्यते।

साधनिका – बहुश्रेयस्यै – प्रातिपदिकात् दीर्घ – ईकारान्तपुँल्लिङ्गात् बहुश्रेयसीशब्दात् चतुर्थ्येकवचने ङे – प्रत्यये कृते अनुबन्धलोपे बहुश्रेयसी + ए इति जाते, प्रथमलिङ्गग्रहणं च इति वार्तिकसहकारेण यूस्त्र्याख्यौ नदी इति सूत्रेण बहुश्रेयसी – शब्दस्य नदीसंज्ञायाम्, नदीसंज्ञकात् परे ङित्प्रत्ययस्य आट्–आगमे अनुबन्धलोपे आद्यवयवे बहुश्रेयसी + आ ए इति जाते ''आटश्च'' इति सूत्रेण आट्–प्रत्यय– तदनुवर्तिनः स्वरस्य एकारस्य च वृद्धेकादेशे ऐकारे बहुश्रेयसी + ऐ इति जाते यणादेशे वर्णसम्मेलने बहुश्रेयस्यै इति रूपं सिद्धयति । इत्थमेव बहुश्रेयस्याः सिद्धयति।

बहुश्रेयसीनाम् – प्रातिपदिकात् दीर्घ– ईकारान्तपुँल्लिङगात् बहुश्रेयसीशब्दात् षष्ठीबहुवचने आम्–प्रत्यये कृते बहुश्रेयसी + आम् इति जाते, प्रथमलिङ्गग्रहणं च इति वार्तिकसहकारेण ''यूस्त्र्याख्यौ नदी'' इति सूत्रेण बहुश्रेयसी – शब्दस्य नदीसंज्ञायाम्, नदीसंज्ञकात् परे ''ह्रस्वनद्यापो नुट्'' इति सूत्रेण नुडागमे अनुबन्धलोपे वर्णसम्मेलने बहुश्रेयसीनाम् इति रूपं सिद्धयति।

**( (270) ) ङेराम्नद्याम्नीभ्यः । 7। 3। 116॥**

**वृत्तिः – नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्। इह परतत्वादाटा नुड् बाध्यते। बहुश्रेयस्याम्। शेषमीप्रत्ययान्तवातप्रमीवत्। अङ्यन्तत्वान्न सुलोपः – अतिलक्ष्मीः । शेषं बहुश्रेयसीवत्। कुमारीमिच्छन् कुमारीवाचरन् वा ब्राह्मणः कुमारी । क्यजन्तादाचारक्विबन्ताद्वा कर्तरि क्विप्। हल्ङ्याप् – ( सू.252 ) इति सुलोपः।**

पदच्छेदः – ङेः, आम्, नद्याम्नीभ्यः त्रिपदं सूत्रमिदम्।

समासः - नदी च आप् च नी च तेभ्यः नद्याम्नीभ्यः (द्वन्द्वः)।

अनुवृत्तिः - अङ्गस्य।

सूत्रप्रकारः- विधिसूत्रम्।

सरलार्थः - नद्यन्तात्, आबन्तात्, अङ्गात् नी-शब्दाच्च परस्य ङि-प्रत्ययस्य स्थाने आम् - आदेशः भवति।

विशेषार्थः - नद्यन्ताः - नित्यस्त्रीलिङ्गाः - ईकारान्त-ऊकारान्तशब्दाः, आबन्ताः - टाप्, डाप्, चाप् - प्रत्ययान्ताः शब्दाः।

साधनिका - बहुश्रेयस्याम् - प्रातिपदिकात् दीर्घ- ईकारान्तपुँल्लिङ्गात् बहुश्रेयसीशब्दात् सप्तम्येकवचने ङि-प्रत्यये कृते अनुबन्धलोपे बहुश्रेयसी + इ इति जाते, प्रथमलिङ्गग्रहणं च इति वार्तिकसहकारेण ''यूस्त्र्याख्यौ नदी'' इति सूत्रेण बहुश्रेयसी - शब्दस्य नदीसंज्ञायाम्, ''ङेराम्नद्याम्नीभ्यः'' इति सूत्रेण नद्यन्तात् परस्य ङि-प्रत्ययस्य स्थाने आम्-आदेशे बहुश्रेयसी + आम् इति जाते नदीसंज्ञकात् परे ''ह्रस्वनद्यापो'' नुट् इति सूत्रेण आमः नुडागमे प्राप्ते तं प्रबाध्य परत्वात् ''आण्नद्याः'' इति सूत्रेण आट्-आगमे बहुश्रेयसी + आ आम् इति जाते आटश्च इत्यनेन द्वयोः आकारयोः वृद्ध्येकादेशे आ-कारे, बहुश्रेयसी + आम् इति जाते यणि कृते वर्णसम्मेलने बहुश्रेयस्याम् इति रूपं सिद्ध्यति।

---

**(271) अचि श्नुधातुभ्रुवां य्वोरियङुवङौ। 6 ।4 । 77॥**

**वृत्तिः - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः भ्रू इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे । ङिच्च ( सू.43 ) इत्यन्तादेशः। आन्तरतम्यादेरियङ्, ओरुवङ्। इतीयङि प्राप्ते।**

---

पदच्छेदः - अचि, श्नुधातुभ्रुवां, य्वोः, इयङुवङौ चतुष्पदं सूत्रमिदम्।

समासः - श्नुश्च धातुश्च भ्रूश्च इति तेषाम् श्नुधातुभ्रुवां (द्वन्द्वः) इयङ्च उवङ्च इति इयङुवङौ।

अनुवृत्तिः - अङ्गस्य।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - अजादौ प्रत्यये परे सति श्नुप्रत्ययान्तं रूपं, इवर्ण-उवर्णान्तं धातुरूपं, भ्रू - इत्येतदङ्गम्, इत्येतेषां इयङ्- इत्येतौ आदेशौ भवतः।

विशेषार्थः - इयङ् - उवङ् - आदेशयोः प्रवृत्तिः स्थानकृत - आन्तरतम्यात् भविष्यति अतः यत्र इकारान्तम् अङ्गं भवेत् तत्र इयङ् - आदेशः, यत्र उकारान्तम् अङ्गं भवेत् तत्र उवङ् - आदेशः भविष्यति। आदेशस्य ङित्वात् उक्तस्य स्थानिनः अन्त्यवर्णस्य इकारस्य / उकारस्य स्थाने भविष्यति।

---

**(272) एरनेकाचोऽसंयोगपूर्वस्य ।6 ।4 । 82॥**

**वृत्तिः - धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे । इति यण्। कुमार्यौ । कुमार्यः। हे कुमारि अमि शसि च कुमार्यम्, कुमार्यः। कुमार्यै। कुमार्याः। कुमारीणाम्। कुमार्याम्। कुमार्योः। प्रधीः । प्रध्यौ। प्रध्यः प्रध्यम्। प्रध्यः उन्नयतीत्युन्नीः। धातुना संयोगस्य विशेषणादिह स्यादेव यण्-उन्न्यः। हे उन्नीः। उन्न्यम्। ङेराम् - उन्न्याम्। एवं ग्रामणीः। अनेकाचः किम् ? नीः। नियौ । नियः अमि शसि च परत्वादियङ् - नियम्। नियः। ङेराम् - नियाम्। असंयोगपूर्वस्य किम् ? सुश्रियौ। यवक्रियौ। गतिकारकेतरपूर्वपदस्य यण् नेष्यते। ( वा.4034 )। शुद्धधियौ। परमधियौ। कथं तर्हि दुर्धियः, वृश्चिकभियः इत्यादि? उच्यते। दुःखिता धीर्येषाम् इति विग्रहे दुर् इत्यस्य धीशब्दं प्रति गतित्वमेव नास्ति। यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाः। वृश्चिकशब्दस्य बुद्धिकृतमपादानत्वं नेह विवक्षितम्। वृश्चिकसम्बन्धिनी भीर्वृश्चिकभीरित्युत्तरपदलोपो वा।**

---

पदच्छेदः- एः, अनेकाचः, असंयोगपूर्वस्य त्रिपदं सूत्रमिदम्।

समासः - असंयोगः पूर्वो यस्मात् स असंयोगपूर्वः (बहुव्रीहिः), अनेकः अच् यस्य तस्य अनेकाचः (बहुव्रीहिः)।

अनुवृत्तिः - यण्, अचि, धातोः।

सूत्रप्रकारः - विधिसूत्रम्।

सरलार्थः - अचि परे सति, तादृशस्य इवर्णान्तस्य अनेकाचः अङ्गस्य यणादेशः भवति, यस्य अन्ते धातुः भवेत्, तस्य धातोः अन्ते तादृशः इवर्ण भवेत्, यतः पूर्वं धातोः अवयवः संयुक्तवर्णात्मकः न स्यात्।

सख्यौ। सुख्यौ । सुत्यौ। ख्यत्यात् - (सू.255) इति दीर्घस्यापि ग्रहणादुकारः। सख्युः। सुख्युः। सुत्युः। लूनमिच्छतीति लूनीः। क्षाममिच्छतीति क्षामीः। प्रस्तीममिच्छतीति प्रस्तीमीः। एषां ङसिङसोर्यण् । नत्वमत्वयोरसिद्धत्वात् ख्यत्यात् - (सू. 255) इत्युत्वम्। लून्युः। क्षाम्युः। प्रस्तीम्युः। शुष्कियः। इत्यादि। इति ईदन्ताः।

---

273) नभूसुधियोः **6 ।4 । 85॥**

**रुतयोर्यण् न स्यादिच सुपि। सुधियौ, सुधिय-इत्यादि। सखीयिमच्छित सखीयित। ततः क्विप्। अल्लोपयलौपो। अल्लौपस्य स्थानिक्त्वाद्यणि प्राप्ते- ''क्वौलुप्तं न स्थानिवत्'' (वा. 431)। एकदेशविकृतस्या नन्यतयानङ्णित्वे, सखा, सखायौ , सखायः। हे सखीः। अमि पूर्वरूपात्परत्वाघणि प्राप्ते ततोऽपि परत्वात् ''सख्युरससम्बुद्धौ'' (सू. 253) इति इति सूत्रं प्रवर्तते। सखायम्। रशायौ। शशियण्, सख्यः। सहऐन वर्तते इति सखः, तमिच्छतीति सखीः सुखमिच्छतीति सुखीः। सुतमिच्छतीतिनसुतीः**

---

पदच्छेदः - न, भूसुधियोः द्विपदं सूत्रमिदम्।

---

समासः - भूश्च सुधीश्च तयोः भूसुधियोः (द्वन्द्वः)।

अनुवृत्तिः - यण्, अचि, सुपि।

सूत्रप्रकारः - विधि (निषेध) सूत्रम्।

सरलार्थः - अजादौ सुप् - प्रत्यये परे भू-सुधी- इत्येतयोः यणादेशः न भवति।

वार्तिकार्थः (431) - क्विम् - प्रत्यये (परे) लुप्ते सति स्थानिवद्भावः न भवति।

विशेषार्थः - सूत्रमिदं एरनेकाचो - इत्यादिना सूत्रेण विधीयमानं यणादेशं नियमयति। अतः भू-सुधीशब्दयोः विषये अजादि-विभक्तिप्रत्यये परे सति यणादेशः न भवति।

साधनिका - सुधियौ - प्रातिपदिकात् दीर्घ - ईकारान्तपुँल्लिङ्गात् सुधीशब्दात् प्रथमाद्विवचने औ-प्रत्यये कृते सुधी + औ इति जाते अचिश्नुधातु- इत्यादिना सूत्रेण ईकारस्य स्थाने इयङ् - आदेशे प्राप्ते तं प्रबाध्य एरनेकाचो - इत्यादिना सूत्रेण यणि प्राप्ते ''न भूसुधियोः'' इति सूत्रेण तन्निषेधे कृते पुनः ''अचिश्नुधातु'' इत्यादिना सूत्रेण ईकारस्य स्थाने इयङ्- आदेशे कृते अनुबन्धलोपे वर्ण सम्मेलने सुधियौ इति रूपं सिद्ध्यति। इत्थमेव सुधियः इत्यपि।

वार्तिकसाधनिका (431) - सखायमिच्छतीति सखीयति इत्यत्र क्विपि सर्वापहारलोपे कृते सखी-शब्दः भवति। अत्र एकदेशविकृतस्यानन्यवत् इति परिभाषामनुसृत्य सखि- शब्द इव अत्रापि अनङ् - णिद्वद्भावौ भविष्यतः अतः - सखा, सखायौ, सखायः इत्यादीनि रूपाणि हरिशब्दवत् सिद्ध्यन्ति।

**स्वाध्याय**

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

(1) **आटश्च इति सूत्रेण किं भवति ?**

(क) यण्   (ख) भलोपः   (ग) वृद्धिः   (घ) गुणः

(2) **न भूसुधियोः इति सूत्रेण निषिध्यते -**

(क) पररूपम्   (ख) वृद्धिः   (ग) गुणः   (घ) यण्

(3) **त्रिशब्दस्य त्रय-आदेशः अस्मिन् प्रत्यये परे भवति.....**

(क) अम् (ख) जस् (ग) आम् (घ) भिस्

(4) **औडुलोमि - शब्दस्य द्वितीया बहुवचनं भवति .....**

(क) औडुलोमीः (ख) उडुलोमान् (ग) औहुलोमीन् (घ) औडुलोमिनः

(5) **अलोऽन्त्यात् पूर्व..........**

(क) अपृक्तम् (ख) गुणः (ग) उपधा (घ) यण्

**2. एकैकवाक्येन उत्तरं लिखत ।**

(1) हरीन् इत्यत्र कः प्रत्ययः ?

(2) आङो नाऽस्त्रियाम् इत्यत्र आङ्-इत्यस्य कोऽर्थः ?

(3) अच्च घेः सूत्रं किं करोति ?

(4) अपृक्तसंज्ञा कस्य भवति ?

(5) असमासे पतिशब्दस्य का संज्ञा न भवति ?

**3. सविस्तरम् उत्तरं लिखत ।**

(1) नदीसंज्ञायां विधीयमानाः प्रक्रियाः निर्दिशत।

(2) घिसंज्ञायां विधीयमानानि कार्याणि निर्दिशत।

**4. निम्नलिखितानि रूपाणि साधयत।**

(1) हे हरे (2) हरये (3) सखा (4) सख्यौ

(5) कति (6) उडुलोमाः (7) बहुश्रेयस्यै

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायन्ताम्।**

(1) अचिश्नुधातु ...............

(2) प्रत्ययलोपे ...............

(3) हल्ङ्याब्भ्यो ...............

(4) बहुगणवतु ...............

**6. अ विभागं ब विभागेन सह योजयत।**

| **अ विभाग** | **ब विभाग** |
|---|---|
| (1) हरयः | (अ) अचो ञ्णिति |
| (2) सखायौ | (ब) डति च |
| (3) णिद्वद्भावः | (क) यू स्त्र्याख्यौ नदी |
| (4) नदीसंज्ञा | (ड) सख्युरसम्बुद्धौ |
| (5) षट् संज्ञा | (ई) जसि च |

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाभाषितं विलिख्य तस्य पदच्छेदं, पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखत।

# 14 अथोकारान्ताजन्तपुँल्लिङ्गप्रकरणम्

**प्रस्तावना**

**पूर्वप्रकरणे वयम् इकारान्तशब्दान् पठितवन्तः। अथ उकारान्तशब्दानां विषये पठिष्यामः। प्रथमं वर्णक्रमेण अजन्तेषु अकारान्तः रामः, आकारान्तः विश्वपाप्रभृतयः, इकारान्ता हरिप्रभृतयः, दीर्घ ईकारान्त 'सुधी' शब्दः अधीताः तेषां सिद्धिप्रक्रियां सम्यक् अधीत्य इदानीम् - शम्भुशब्दं ह्रस्वोकारान्तं पठिष्यामः।**

---

शम्भुशब्दः शिववाचकः अतोऽस्य अर्थवत्वात् 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति प्रातिपदिक संज्ञायां 'सुपः' 'द्वयेकयो-र्द्विवचैकवचने' इति एकवचन- विवक्षायां सु-प्रत्यये 'शम्भु + सु' 'सुप्तिङन्त पदम्' इति पदत्वे, ससजुषोरुः इति रूत्वे शम्भुरु उकारस्य 'उपदेशेऽजनुनासिक इत' इति इत्संज्ञायां तस्य लोपः इति लोपे शम्भुर् विरामोऽवसानम् इत्यवसानसंज्ञायां खरवसानयोर्विसर्जनीयः इति विसर्गे, शम्भुः साधुः।

शम्भू द्विवचने प्रथमाद्वितीययोः 'औ औट्' इति द्वौ प्रत्ययौ, टकारस्ये-त्संज्ञालोपे शम्भु + औ 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे शम्भू इति साधुः।

शम्भुशब्दस्य अस्ति वैशिष्ट्यं तत्कारणात् अस्य घिसंज्ञा अनदीसंज्ञकः ह्रस्वः उकारान्तः, अतोऽस्य घि संज्ञा तत्कारणादेव आङोनाऽस्त्रियाम् इति ना आदेशे सति शम्भुना चतुर्थ्येकवचने शम्भुशब्दस्य उकारस्य ओ अवादेशे शम्भवे, पञ्चम्येकवचने शम्भोः तथैव षष्ठ्येकवचनेऽपि शम्भोः षष्ठीबहुवचने शम्भूनाम् सप्तम्येकवचने शम्भौ इति रूपं यथा शम्भुशब्दस्तथैव विष्णुः वायुः भानुः इति त्रयाणां रूपाणि भवन्ति।

**उकारान्तपुँल्लिंगः विष्णुशब्दः**

| | | | |
|---|---|---|---|
| विष्णुः | विष्णू | विष्णवः | प्रथमा |
| विष्णुम् | विष्णू | विष्णून् | द्वितीया |
| विष्णुना | विष्णु भ्याम् | विष्णुभिः | तृतीया |
| विष्णवे | विष्णुभ्याम् | विष्णुभ्यः | चतुर्थी |
| विष्णोः | विष्णुभ्याम् | विष्णुभ्यः | पञ्चमी |
| विष्णोः | विष्ण्वोः | विष्णूनाम् | षष्ठी |
| विष्णौ | विष्ण्वोः | विष्णुषु | सप्तमी |
| हे विष्णो। | हे विष्णू । | हे विष्णवः | संबोधनम् |

**उकारान्तपुँल्लिङ्गः वायुशब्दः**

| | | | |
|---|---|---|---|
| वायुः | वायू | वायवः | प्रथमा |
| वायुम् | वायू | वायून् | द्वितीया |
| वायुना | वायुभ्याम् | वायुभिः | तृतीया |
| वायवे | वायुभ्याम् | वायुभ्यः | चतुर्थी |
| वायोः | वायुभ्याम् | वायुभ्यः | पञ्चमी |
| वायोः | वाय्वोः | वायूनाम् | षष्ठी |
| वायौ | वाय्वोः | वायुषु | सप्तमी |
| हे वायो | हे वायू | हे वायवः | सबंधोनम्। |

**(274) तृज्वत्क्रोष्टुः 7/1/95/ क्रोष्टुस्तृजन्तेन तुल्यं वर्तते असम्बुद्धौ सर्वनामस्थाने परे । क्रोष्टु शब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः ।**

**(275) ऋतो ङिसर्वनामस्थानयोः 7/3/100/ ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात् । इति प्राप्ते ।**

(274) पदच्छेदः - तृज्वत्, क्रोष्टुः द्विपदमिदं सूत्रम्।

अनुवृत्तिः - सर्वनामस्थाने असम्बुद्धौ ।

सूत्रप्रकारः अतिदेशसूत्रम् ।

सरलार्थः सम्बुद्धिभिन्ने सर्वनामस्थानेपरे क्रोष्टुस्थाने क्रोष्टृ भवति ।

(275) पदच्छेदः - ऋतुः, ङिसर्वनामस्थानयोः ।

समासः - ङि च सर्वनामस्थानञ्च, तयोः ङिसर्वनामस्थानयोः ।

सरलार्थः - ऋदन्तस्य अङ्गस्य गुणः ङौ सर्वनामस्थाने च परे ।

अनुवृत्तिः अङ्गस्य गुणः ।

सूत्रप्रकारः विधिसूत्रम् ।

विशेषार्थः अङ्गस्य इत्यधिकारः प्रचलति ऋतः इति पदं विशेषणम् अतोऽत्र येन विधिस्तदन्तस्य च । इत्यनेन ऋदन्तः इति अर्थलाभः।

क्रोष्टु शब्दस्य स्थाने क्रोष्टृ कृते ततः सौ क्रोष्टु-सु अत्र गुणे प्राप्ते अनेन सूत्रेण ।

**(276) ऋदुशनस्पुरुदंसोऽनेहसां च । 7/1/94/ ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ परे।**

**(277) अप्तृन् तृच् स्वसृनप्तृनेष्टृत्वष्टृक्षतृ होतृ पोतृप्रशास्तृणाम् । 6/4/11/ वृतिः अबादीनामुपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे । नप्त्रादिग्रहणं व्युत्पत्तिपक्षेनियमार्थम् - उणादिनिष्पन्नानां तृन्तुजन्तानां संज्ञाशब्दानां चेद्भवति तर्हि नप्त्रादीनामेव। तेन पितृभ्रातृप्रभृतीनां न।**

(276) पदच्छेदः - ऋदुशनस्पुरुदंशोऽनेहसां च।

समासः - ऋत् च उशना च पुरूदंशश्च अनेहा च तेषाम्।

अनुवृतिः - अङगस्य, अनङ् सौ अम्बुद्धौ

सूत्रप्रकारः - विधि सूत्रम् ।

सरलार्थः - ऋदन्तस्य पुरूदंस्शब्दस्य अनेहसः शब्दस्य अनङ् आदेशः असम्बुद्धौ सर्वनामस्थाने परे।

(277) पदच्छेदः - अपतृन्तृच् -प्रशास्तृणाम् एकपदम्।

समासः - अप् च तृन् च तृच् च स्वसृच नप्तृ च नेष्टृ च त्वष्टृ च क्षतृ च होतृ च पोतृ च प्रशातृ च, अप्तृनतृ च प्रशास्तारः तेषां- प्रशास्तृणाम्

अनुवृत्तिः - उपधायाः, सर्वनामस्थाने, असम्बुद्धौ ।

सूत्रप्रकारः - नियम सूत्रम् ।

सरलार्थः - सम्बुद्धिभिन्न सर्वनामस्थाने प्रत्यये परे अबादीनाम् (सूत्रपठितानां शब्दानां) उपधादीर्घः भवति।

विशेषार्थः - उणादिशब्दानां विषये मतद्वयंवर्तते । प्रथमः व्युत्पत्तिपक्षः द्वितीयः अव्युत्पत्तिपक्षः । व्युत्पत्तिपक्षं मत्वा तृन् तृच प्रत्यययोः ग्रहणेन नप्त्रादीनां दीर्घः शब्दः पुनः तेषां पृथग्ग्रहणं ज्ञापयति यत् उणादिप्रत्ययेभ्यः निष्पन शब्दानां यदि उपधा दीर्घः स्यात् तर्हि नप्त्रादीनां सूत्रपठितानामेव । तत्फलं-पितृभ्रातृप्रभृतीनां शब्दानाम् उपधादीर्थों न भवति। ''समर्थ - ''(सू. ६४७) सूत्रे उद्गातारः'' इति भाष्य प्रयोगात्। क्रोष्टा, क्रोष्टारौ, क्रोष्टाटाः। क्रोष्टारम। क्रोष्टारौ, क्रोष्टून् उद्गातृशब्दस्य तु भवत्येव यतो हि भाष्यकारेण ''समर्थः पदविधिः'' इति सूत्रे उद्गातारः इति शब्दः प्रयुक्तः । इत्थं व्युत्पत्तिपक्षे इदं नियमार्थं सूत्रम् । अव्युत्पत्ति-पक्षे विधि सूत्रम् इति ।

**क्रोष्टा** – क्रोष्टु शब्दात् प्रातिपदिकात् प्रथमैकवचने सु प्रत्यये तृज्वत्क्रोष्टुः इति तृज्वद्भावेन क्रोष्टु सु ''ऋतो ङिसर्वनामस्थानयोः इति गुणे प्राप्ते'', ''ऋदुशनस्पुरुदंशोऽनेहसां च'' इति ङिच्च सूत्रसहकारेण ऋकारस्य 'अनङ्' क्रोष्टन्+सु अनुबन्धलोपे क्रोष्टन् स अप्तृन्तृच् इति उपधादीर्घे क्रोष्टान् स् हलङ्यादिना स् लोपे नलोपः प्रातिपदिकान्तस्येति नलोपे क्रोष्टा साधु ।

**क्रोष्टारौ**– क्रोष्टु शब्दस्य प्रातिपदिकत्वात् औ तृज्वद्भावे अनङादेशे प्राप्ते तं प्रबाध्य ऋतो ङिसर्वनामस्थानयो इति गुणे उरणरपरः इति रपरत्वे क्रोष्टर्+औ अप्तृन्–इति उपधादीर्घे क्रोष्टारौ ।

**क्रोष्टारः** जसि सर्वनामस्थाने तृज्वद्भावे गुणे उपधादीर्घे च रूपं सिद्धयति ।

**उकारान्त पुल्लिङ्ग क्रोष्टुशब्दः ।**

| | | | |
|---|---|---|---|
| क्रोष्टा | क्रोष्टारौ | क्रोष्टारः | प्रथमा |
| क्रोष्टारम् | क्रोष्टारौ | क्रोष्टून् | द्वितीया |
| क्रोष्ट्रा क्रोष्टुना | क्रोष्टुभ्याम् | क्रोष्टुभिः | तृतीया |
| क्रोष्ट्रे क्रोष्टुने | क्रोष्टुभ्याम् | क्रोष्टुभ्यः | चतुर्थी |
| क्रोष्टुः क्रोष्टुनः | क्रोष्टुभ्याम् | क्रोष्टुभ्यः | पञ्चमी |
| क्रोष्टुः क्रोष्टोः | क्रोष्ट्वोः | क्रोष्टूनाम् | षष्ठी |
| क्रोष्टरि क्रोष्टौ | क्रोष्ट्वोः | क्रोष्टुषु | सप्तमी |
| हे क्रोष्टो | हे क्रोष्टारौ | हे क्रोष्टारः | संबोधनम् |

**(278) विभाषातृतीयादिष्वचि 7/1/97/ अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत् । क्रोष्ट्रा । क्रोष्ट्रे ।**

**(279) ऋत उत् 6/1/111/ ऋदन्तान्ङसिङसोरति परे उकार एकादेशः स्यात् । रपरत्वम् ।**

(278) पदच्छेदः – विभाषा, तृतीयादिषु अचि त्रिपदमिदंसूत्रम्

अनुवृत्तिः तृज्वत् क्रोष्टुः ।

सूत्रप्रकारः – अतिदेशसूत्रम् ।

सरलार्थः – अजादिषु तृतीयादिषु क्रोष्टु स्थाने क्रोष्टृ आदेशः भवति विकल्पेन–1

(279) पदच्छेदः – ऋतः उत् द्विपदमिदंसूत्रम्।

अनुवृत्तिः – अङ्गस्य, ङसिङसोः, उत्।

सूत्रप्रकारः – विधिसूत्रम्।

सरलार्थः – ह्रस्वऋकारान्तात् अंगात् उसृप्रत्ययस्य यः अकारःङसिप्रत्ययस्य च यः अकारः (तयोः परयोः) पूर्व परयोः स्थाने उकारः एकादेशरुपेण भवति । यथा–

**क्रोष्टुः** क्रोष्टुशब्दात् पञ्चम्येकवचने क्रोष्टु+अस् (ङसि) विभाषा तृतीयादिष्वचि इति तृज्वद्भावे क्रोष्टृ+अस् 'ऋत उत्' अत्र अनेन उस्प्रत्ययस्य अकारे परे पूर्वस्य ऋकारस्य परस्य अकारस्य च द्वयोः स्थाने उकारे कृते उरण् रपरः इति रपरत्वे क्रोष्टुर् संयोगान्तस्यलोपः इतिसस्य लोपे रस्यविसर्गे क्रोष्टुः।

**विशेषार्थः** अचि इति विशेषणम्, विभक्तिः विशेष्यपदम् यस्मिन् विधिस्तदादावलग्रहणे इति अजादौ विभक्तौ लाभः।

**क्रोष्ट्रा** – क्रोष्टुशब्दात् प्रातिपदिकात् तृतीयैकवचने टा प्रत्ययेऽनुबन्ध लोपे क्रोष्टु+आ ''शेषो घ्यसखि'' इति घित्वात् 'आङोनाऽस्त्रियाम्' इति नित्यतया ना आदेशः प्राप्तः तमनेन टादावचि तृज्वद्भावे कृते क्रोष्टु+आ इको यणचि इति यणादेशे क्रोष्ट्रा तृज्वद्भावपक्षे घित्वात् नादेशे कृते क्रोष्टुना ।

**क्रोष्ट्रे** – क्रोष्टु शब्दात् चतुर्थ्येकवचने तृज्वद्भावःपक्षे यणि च कृते क्रोष्ट्रे तद भावपक्षे क्रोष्टवे हरये इतिवद् भवति ।

**(280) रात्सस्य 8/2//24/ रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य । इति रेफस्य विसर्गः क्रोष्टुः । आमि परत्वात् तृज्वद्भावे प्राप्ते नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन ( वा 4374 ) क्रोष्टूनाम् । क्रोष्टरि । क्रोष्टोः । पक्षे हलादौ च शम्भुवत् । इति । हूहूः । हूह्वौ । हुहूम् । हूहून् । इत्यादि । अतिचमू–शब्दे तु नदीकार्यं विशेषः । हे अतिचमु । अतिचम्वै । अतिचम्बा : । अतिचम्कः । अतिचमूनाम्।**

पदच्छेदः – रात्, सस्य द्विपदमिदं सूत्रम् ।

अनुवृत्तिः – संयोगान्तस्य लोपः ।

सूत्रप्रकारः – नियमसूत्रम्

सरलार्थः – रेफात् परस्य सस्य एव लोपो भवति नान्यस्य ।

विशेषार्थः – संयोगान्तस्यलोपेन क्रोष्टुः इत्यस्य सिद्धिः स्यात् अस्यारंभः, नियमार्थेम्। वर्तते ।

क्रोष्टु+आम् इति दशायाम्, तृज्वद्भावः प्राप्तः नुडपिप्राप्तः कः स्यात् इति विचारणायां ''नुमचिरतृज्वद् भावेभ्योनुट्पूर्वविप्रतिषेधेन'' इत्यनेन नुटिकृतेऽनुबन्धलोपे क्रोष्टु+न् आम् नामि इति दीर्घे कृते क्रोष्टूनाम् ।

वा 437– नुम्विधिः अचिपरेरभावः तृज्वद्भावः एषां त्रयाणामपेक्षया पूर्वविप्रतिषेधेन नुडागमो भवति ।

नुम्विधायकं सूत्रम् – इसोऽचि विभक्तौ – 7.1.73

रभावस्य सूत्रम अचिरऋतः – 7.2.100

तृज्वदभाव सूत्रम् तृज्वत्क्रोष्टुः – 7.1.95

**क्रोष्टरि** – क्रोष्टु शब्दात् सप्रभ्येकवचने ङिप्रत्यये लशक्वतद्धिते इति ङकारस्येत्संज्ञायां तस्य लोपः इति लोपे क्रोष्टु+इ विभाषा तृतीयादिष्वचि इति तृज्वद्भावे क्रोष्टृ+इ ऋतोङिसर्वनामस्थानयोः इति गुणे रपरे च कृते क्रोष्टरि तृऽवद्भावाभावपक्षेअच्च घेः इति इकारस्य अकारे अकारस्य औकारेच कृते क्रोष्टौ इति ।

हू हू शब्दः दीर्घ इकारान्तः (गन्धर्ववाचकः)

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| प्र. | हूहूः | हूह्वौ | ह्वः | प. | हूह्वः | हूहूभ्याम् | हूहूभ्यः |
| द्वि. | हूहूम् | हूह्वौ | हूहून् | ष. | हूह्वः | हूह्वोः | हूह्वाम् |
| तृ. | हूह्वा | हूहूभ्याम् | हूहूभिः | स. | हूह्वि | हूह्वोः | हूहूषु |
| च. | हूह्वे | हूहूभ्याम् | हूहूभ्यः | सं. | हेहूहूः। | हे हूह्वौ। | है हूह्वः। |

**(281) ओः सुपि 6/4/84/ धात्ववयव संयोगपूवौ न भवति य उवर्णस्तदन्तोयोधातुस्तदन्तस्यानेकाचोङ्गस्य यण स्यादजादौ सुपि ।**

पदच्छेदः – ओः, सुपि ।

सूत्रप्रकारः – विधिसूत्रम्

अनुवृत्तिः – अनेकाचः, असंयोगपूर्वस्य, अचि । विधिसूत्रम् ।

सरलार्थः – धातोरवयवः संयोगपूर्वो न स्यात्, एतादृशोयोधातुः, तदन्तः यः अनेकाच् अङ्गः तस्य यणादेश अजादौ सुपि प्रत्यये परे। खलपू+औ, पूधातुः, खलपूः तस्य उकारस्य यणादेशः ।

**वा. ( पू. 34 ) [ गतिकारकेतरपूर्वपदस्य यण् नेष्यते ]** गतिसंज्ञकः यः शब्दः कारकशब्दः तं विहाय पूर्वपदस्य यण्न भवति ।

**खलप्वः** अत्र कारकपूर्वपदं वर्तते अतो हेतोरत्र खलपू+अस् इति दशायां प्रथमयोः पूर्वसवर्णः इति दीर्घे प्राप्ते दीर्घाज्जसि च इति तन्निषेधे अचिश्नुधातुभ्रुवांमिति उवङ्प्राप्ते तं प्रबाध्य ''एरने काचोऽसंयोगपूर्वस्य'' इति यणि कृते खलप्वस् सस्य रुत्वे निसर्गे खलप्वः इति साधु चमूः सेना तम् अतिक्रान्तः अति चमूः अत्र नदीकार्यं ''यूस्त्राख्यो नदी'' इति सूत्रेण जायते अतः सम्बुद्धौ ह्रस्वेन हे अतिचमुः ङे विभक्तौ – अतिचम्वै आडागमे वृद्धौ च । नद्याः इति वत् अतिचम्वाः षष्ठयेकवचनेऽपि अतिचम्वाः, षष्ठीबहुवचने ह्रस्वनद्यावो इति नद्यन्तत्वान्नुट् – अतिचमूनाम् । (सप्तम्येकवचने) ङेराम्नद्याम्नीभ्यः इति आमि कृते अतिचम्वाम्।

**(281) गतिकारकेतरपूर्वपदस्य यण् नेष्यते ( वा. पू. 34 ) खलप्वौ । खलप्वः । इत्यादि । एवं सुल्वादयः । अनेकाचः किम् ? लूः लुवौ लुवः । धात्वयव – इति किम् ? उल्लूः । उल्ल्वौ । उल्ल्वः । असंयोगपूर्वस्य किम् ? कटप्रूः । कटप्रुवौ। कटप्रुवः । गति – इत्यादिकिम् ? परमलुवौ । सुपि किम् ? लुलुवतुः । स्वभूः न भूसुधियोः ( सू. 273 ) स्वभुवौ । स्वभुवः । एवं स्वयं भूः ।**

**खलपूः** खलं पुनाति इति विग्रहः ।

ऊकारान्त पुँल्लिङ्गः **खलपूः** शब्दः

| | | | |
|---|---|---|---|
| प्र. | खलपूः | खलप्वौ | खलप्वः |
| द्विः | खलप्वम् | खलप्वौ | खलप्वः |
| तृ. | खलप्वा | खलपूभ्या | खलपूभिः |
| च. | खलप्वे | खलपूभ्या | खलपूभ्यः |
| प. | खलप्वः | खलपूभ्या | खलपूभ्यः |
| ष. | खलप्वः | खलप्वोः | खलप्वाम् |
| स. | खलप्वि | खलप्वोः | खलपूषु |
| स. | हे खलपूः। | हे खलप्वौ। | हे खलप्वः। |

अनया रीत्या एव सुलूशब्दः सुष्ठुलुनाति इति विग्रहः अनेकाचः किम् ? लूः लुवौ– इत्यत्र लू+औ अत्र लू इति एकाच् अङ्ग अतः अजादौ प्रत्यये यण न अपितु अंचिश्नुधातुरिति सूत्रेण उवङादेशेऽनुबन्धलोपे वर्णसम्मेलने लुवौ साधु । धात्वयवः किम् ? उल्ल्वौ उल्लू+औ यणादेशेन उल्ल्वौ।

असंयोगपूर्वस्य किम् ? कटप्रूः अत्र संयोगपूर्वः उकारोवर्तते । अतोऽत्र कटप्रुवौ इत्यत्र यण् न अपितु उवङादेशः ।

गतिरित्यादि किम् ? गति ग्रहणाभावे परमलु+औ इत्यत्र यणादेशो भविष्यति, तन्नभवेदेतर्थं गतिग्रहणंसार्थकम् ।

सुपि किम् ? सुप्ग्रहणाभावे तिङ्स्थलेऽपि यण प्राप्तिः तेन लुलु+अतुस् इत्यत्र लुलुल्वतुः इति अनिष्टंरूपम् अतः सुप्ग्रहणं कर्तव्यम्।

स्वस्मात् भवति इति **स्वभूः** (माया)

स्वभूशब्दात् क्विप्प्रत्यये सर्वापहारिलोपे कृदन्तत्वात् कृत्तद्धितसमासाश्चेति प्रातिपदिकत्वे सुप्रत्यये अनुबन्धलोपे सुप्तिङन्तंपदम् इति पदत्वात् ''ससजुषोरुः'' इति रुत्वे अनुबन्धलोपे ''विरामोऽवसानम्'' इति अवसानसंज्ञायां ''खरवसानयोर्विसर्जनीयः'' इति विसर्गे स्वभूः।

**स्वभुवौ** स्वभू+औ इत्यत्र पूर्वसवर्णदीर्घः प्राप्तः तं प्रबाध्य ''दीर्घाज्जसि च'' इति निषेधः पुनश्च उवङादेशः तं

ओः सुपि इति यणादेशः तं प्रबाध्य न भूसुधियोरिति निषेधे उवङादेशे स्वभुवौ इति साधु ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| प्र. | स्वभूः | स्वभुवौ | स्वभुवः | प. | स्वभूवः | स्वभूश्याम् | स्वभूभ्यः |
| द्विव. | स्वभुवम् | स्वभुवौ | स्वभुवः | ष. | स्वभुवः | स्वभुवोः | स्वभुवाम् |
| तृ. | स्वभुवा | स्वभूभ्याम् | स्वभूभिः | स. | स्वभुवि | स्वभुवोः | स्वभुषु |
| च. | स्वभुवे | स्वभूभ्याम् | स्वभूभ्यः | सं. | हे स्वभूः। | हे स्वभूवौ। | हे स्वभुवः। |

अनया रीत्या एव स्वयंभूः शब्दः प्रचलति ।

वर्षायां भवतीति **वर्षाभूः** (दुर्दुरः)

| | | | |
|---|---|---|---|
| प्र. | वर्षाभूः | वर्षाभ्वौ | वर्षाभ्वः |
| द्विव. | वर्षाभ्वम् | वर्षाभ्वौ | वर्षाभ्वः |
| तृ. | वर्षाभ्वा | वर्षाभूभ्याम् | वर्षाभूभिः |
| च. | वर्षाभ्वे | वर्षाभूभ्याम् | वर्षाभूभ्यः |
| प. | वर्षाभ्वः | वर्षाभूभ्याम् | वर्षाभूभ्यः |
| ष. | वर्षाभ्वः | वर्षाभ्वोः | वर्षाभ्वाम् |
| स. | वर्षाभ्वि | वर्षाभ्वोः | वर्षाभूषु |
| सं. | हे वर्षाभूः। | हे वर्षाभ्वौ। | हे वर्षाभ्वः। |

**(282) वर्षाभ्वश्च 6/4/84/ अस्योवर्णस्य यण स्यादचि सुपि । वर्षाभ्वौ । वर्षाभ्वः । दृभतीतिदृम्भूः । अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूः ( उ. 93 ) इत्युणादिसूत्रेण निपातितः । दृम्भ्वौ । दृम्भ्वः । दृम्भूम् । दृम्भ्वौ । दृम्भून् । शेषं हूहूवत् । दृन् इति नान्ते हिंसार्थेऽव्यये भुवः क्विप् । दृन्भूः ।**

पदच्छेदः – वर्षाभ्वः च द्विपदमिदं सूत्रम् ।

अनुवृत्तिः – ओः सुपि, अचि यण्।

सूत्र प्रकारः – विधिसूत्रम्

सरलार्थः – वर्षाभूशब्दस्य उवर्णस्य यण भवति अजादिप्रत्यये परे । वर्षाभू+औ अनेन यणि कृते वर्षाभ्वौ

दृन्भूशब्दः दृन् इति नान्तात् भूधातोः कर्तरिक्विप् प्रत्यये ऽनुबन्धलोपे कृदन्तत्वात् प्रातिपदिकत्वे सौ रुत्वे विसर्गे दृन्भूः इति । दृन्भूः तरुविशेषः वा हिंसया उत्पन्नः जीवविशेषः।

**दृन्भूशब्दः अन्दूदृम्भूजम्बूकफेलू कर्कन्धूदिधिषूः**

**इति उणादिसूत्रेण व्युत्पादितः।**

**दृभ्वम्**– दृन्भू+अमि अमि पूर्वः तं प्रबाध्य ''दृन्करपुनः भुवो यण् वक्तव्यः'' इति यणि कृते दृन्भ्वम् । शसि दृन्भ्वः इत्यादि।

अस्य शेषरुपाणि खलपूवत् भवन्ति ।

करभूः करात् भवति इति विग्रहः (नखम्)

करः एव कारः स्वार्थे प्रज्ञादित्वात् अण प्रत्यये

कारभूः अपि भवितुमर्हति ।

करभूः कारभूः उभयोः रूपम् खलपूवत् विज्ञेयम् अपरञ्च पुनर्भवति इति विग्रहे पुनर्भूशब्दः क्रियानिमित्तक यौगिक शब्दः पुंल्लिङ्गे, वर्तते, अत एव पुल्लिङ्गे पाठः (कोशेस्त्रीलिंगे वर्तते) दृम्भू कारभूः शब्दौ स्वयं भूवत् भवतः ।

**स्वाध्यायः**

**1. योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) शम्भुशब्दस्य संज्ञा भवति ।
(क) नदी (ख) घि (ग) टि (घ) सर्वनाम

(2) क्रोष्टुशब्दस्य तृज्वद्भावः क्रियते अनेन सूत्रेण ?
(क) शेषोघ्यसखि (ख) तृज्वत्क्रोष्टुः (ग) अप्तृन्तृच् (ग) एकोऽपि न

(3) शम्भुशब्दस्य षष्ठीबहुवचने रूपं शुद्धं भवति–
(क) शम्भुनाम् (ख) शंभूनाम् (ग) शम्भूनाम् (ग) शंभुनाम्

(4) ऋत उत् अनेन क्रियते–
(क) अतादेशः (ख) ऋतादेशः (ग) उतादेशः (ग) रादेशः

(5) हूहू शब्दस्य अर्थोऽस्ति–
(क) विद्याधरः (ख) गन्धर्वः (ग) देवः (ग) राक्षसः

**2. एकैकवाक्येन उत्तरं लिखत ।**

(1) अतिचमू शब्दस्य को विग्रहः कश्चार्थः ?

(2) रात्सस्य इत्यस्य कोऽर्थः ?

(3) क्रोष्टु शब्दस्य चतुर्थ्यैकवचने किं रूपद्वयम् ?

(4) नुम् विधायकं सूत्रं किं वर्तते ?

(5) वर्षाभ्वौ इत्यत्र उवङादेशः कुतो न ?

**3. विस्तरम् उत्तरं लिखत ।**

नुमचिरतृज्वद्भावनुट्पूर्व विप्रतिषे धेन।

**4. निम्नलिखितानि रुपाणि साधयत ।**

क्रोष्टु । क्रोष्टाः । खलप्वौ । वर्षाभूः । शम्भुना । स्वयभुवा । दृम्भ्वौ ।

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायताम्**

(1) ओः सुपि ।

(2) रात्सस्य ।

(3) ऋदुशनस्पुरुदंशोऽनेहसां च ।

(4) विभाषा तृतीया दिष्वचि ।

(5) अप्तृन्तृच्स्वसृ.... ।

**6. अ विभागं ब विभागेन सह संयोजयतु ।**

| **विभाग अ** | **विभाग ब** |
|---|---|
| क. वर्षा भूः | क. खलस्यपारकः |
| ख. दृन्भूः | ख. दर्दुरः |
| ग. स्वभूः | ग. शृंगालः |
| घ. क्रोष्टा | घ. माया |
| ड. खलपूः | ड. हिंसकः |

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं, पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखत।

◆

# 15 अथ ऋकारान्त-अजन्तपुँल्लिङ्गप्रकरणम्

**प्रस्तावना**

पूर्व स्मिन् पाठे वयम् उकारान्तान् शब्दान् पठितवन्तः तत्पश्चाद् आगच्छति वर्णक्रमे:

ऋकार : यथा अ इ उ ण ऋ ऌ क् इत्यत्र ऋकार तद् अन्ते येषां ते, ऋकारान्ताः त एव पाठ्यविषयाः यथा नृ-शब्दः मनुष्यवाचकः तस्य कीदृशांनि रूपाणि इति वयं पश्यामः । धातृ नप्तृ उद्गातृ पितृ जामातृ भ्रातृ नृ इति ह्रस्व ऋदन्ताः कृ तृ इति दीर्घ ऋकारान्ताः तेऽपि अत्र पठनीयाः ।

**(283) नृ च 614161 नृ इत्यस्य नामि वा दीर्घः स्यात् ।**

**नृणाम् । नृणाम् ।**

पदच्छेदः - नृ, च, द्विपदमिदंसूत्रम् ।

अनुवृत्तिः - नामि दीर्घः उभयथा। + अत्र छन्दस्युभमथा इति सूत्रेण उभयथा इति पदेन विकल्पार्थः। प्रातियदिकत्व

सूत्रप्रकारः - विधिसूत्रम् (विकल्प सूत्रम्)

सरलार्थः - नृशब्दस्य नाम परे वा दीर्घः ।

साधनिका

**धाता** - डुधाञ् धारणपोषणयोः धातोः कर्तरि तृच् प्रत्ययेऽनुबन्धलोपे कृदन्तत्वात् प्राति-पदिकत्वं ततो धातृ शब्दात् प्रथमैक-वचने सुप्रत्ययेऽनुबन्ध लोपे धातृ+स "ऋदुशनस्पुरुदंशोऽनेहसाञ्च" इति अनङ अनुबन्धलोपे धा तन+स अप्तृनृतृच् - इत्यादिना उपधा दीर्घे हलङ्यादिना सलोपे, 'नलोपः प्रातिपदिकान्तस्येति' नलोपे धाता सिद्धम् ।

सम्बुद्धौ-**हे धातः** । अत्र गुणे धातर् + स् हङ्याभ्यो.... स्लोपः रस्य विसर्गः हेधातः ।

**धातारौ** - धातृशब्दात् प्रातिपदिकात् औप्रत्यये धातृ+औ ऋतोडि सर्वनामस्थानयोरिति गुणे धातर + औ अप्तृनृतच् - इत्यादिना उपधादीर्घे धातार् + औ वर्णसम्मेलने धातारो इति साधु ।

**ऋकारान्त पुल्लिंग धातृशब्दः**

| | | | | | | |
|---|---|---|---|---|---|---|
| प्रथमा | धाता | धातारौ | धातारः। | पं. धातुः | धातृभ्याम् | धातृभ्यः |
| द्वितीया | धातारम् | धातारौ | धातृन् | ष. धातुः | धात्रोः | धातृणाम् |
| तृतीया | धात्रा | धातृभ्याम् | धातृभिः | स. धातरि | धात्रोः | धातृषु |
| चतुर्थी | धात्रे | धातृभ्याम् | धातृभ्यः। | सं. हे धातः! | हे धातारौ! | हे धातारः! |

**धातृणाम्** - धातृशब्दात् षठ्ठीबहुचवने आम् प्रत्यये ह्रस्वनद्यापोनुट् इति नुटागमे धातृनाम् नामि इति दीर्घे धातृ नाम्। ऋवर्णान्नस्य णत्वं वाच्यम् । इति णत्वे धातृणाम् इति साधु।

नप्तृ शब्दः धातृवद् प्रचलति अस्यार्थः दौहित्रः

त्वष्टृ - तक्षकः काष्ठकार्य कर्ता

क्षतृ - सारथिः द्वारपालः ।

होतृ - होमकर्ता

पोतृ - पवित्रकारकः

प्रशास्तृ - प्रशासकः

नेष्टृ - दाता

एतषां सर्वाणि धातृव द्प्रचलति

**ऋकारान्तः पुल्लिङ्गः नप्तृशब्दः**

| | | | |
|---|---|---|---|
| प्र. | नप्ता | नप्तारौ | नप्तारः |
| द्वि. | नप्तारम् | नप्तारौ | नप्तॄन् |
| तृ. | नप्त्रा | नप्तृभ्याम् | नप्तृभिः |
| च. | नप्त्रे | नप्तृभ्याम् | नप्तृभ्यः |
| पं. | नप्तुः | नप्तृभ्याम् | नप्तृभ्यः |
| ष. | नप्तुः | नप्त्रोः | नप्तॄणाम् |
| स. | नप्तरि | नप्त्रोः | नप्तृषु |
| सं. | हे नप्तः | हे नप्तारौ | हे नप्तारः । |

त्वष्टृशब्दः क्षतृशब्दः होतृशब्दः प्वोतृशब्दः प्रशास्तृशब्दः नेष्टृशब्दः एते सर्वेऽपि शब्दाः नप्तृवज्ज्ञेयाः।

उद्‌गातृशब्दः ऋकारान्तो वर्तते

| | | | |
|---|---|---|---|
| प्र. | उद्‌गाता | उद्‌गातारौ | उद्‌गातारः |
| द्वि. | उद्‌गातारम् | उद्‌गातारौ | उद्‌गातॄन् |
| तृ. | उदगात्रा | उदगातृभ्याम् | उद्‌गातृभिः |
| प. | उद्‌गात्रे | उद्‌गातृभ्याम् | उद्‌गातृभ्यः |
| पं. | उद्‌गातुः | उद्‌गातृभ्याम् | उद्‌गातृभ्यः |
| ष. | उद्‌गातुः | उद्‌गात्रोः | उद्‌गातॄणाम् |
| स. | उदगातरि | उद्‌गात्रोः | उद्‌गातृषु |
| सं. | हे उद्‌गातः! | हे उद्‌गातारौ! | हे उद्‌गातारः! |

**ना–**

नृ शब्दो मनुष्य वाचकः तस्य अर्थवत्वात् अर्थवदिति प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे नृ+स ''ऋदृशनस्पुरुदंशोऽने'' हसां च इति अनङ् अनुबन्धलोपे नृन+स ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इति दीर्घे नान्+स हलड्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् इति सलोपः, ''नलोपः प्रातिपदिकान्तस्य'' इति नलोपे ना इति रूपम्।

**नरौ**

नृ + औ ऋतोडिसर्वनामस्थानयोः इति गुणे रपरत्वे नर + औ वर्णसम्मेलने नरौ इति साधुः । अत्र प्रश्नः उदेति अप्तृन् इति कथंन दीर्घः तदा उच्यते – अप्तृन्राधनन्तर्थावात् ।

**नरः** – नृ + जस् चूटू इति जकारस्येत्संज्ञाया तस्य लोपः । इति लोपे नृ + अस ऋतो डिसर्वनामस्थानयोः इति गुणे उरणरपरः इति रपरे नट् + अस् वर्णसम्मेलने नरस सस्य सत्वे विसर्गे नरः ।

**हे नः** । नृ + सु ''उपदेशेऽजनुनासिक इत्'' इति उकारस्य इत्संज्ञा–लोपे च कृत्वा नृ + स् ''ऋतो ङि सर्वनाम'' इति गुणे उरणरपरः इति रपरत्वे नर + स् हलड्यादिना सलोपे रस्य ''खरवसानयोविसर्जनीयः'' विसर्गे कृते हे नः इति रुप साधु ।

**नरम्** – नृ + अम् गुणे रपरत्वे वर्णसम्मेलने नरम् ।

**नॄन्** – नृशब्दात् प्रातिपदिकात् द्वितीया बहुवचने शस् प्रत्यये अनबन्धलोपे नृ + अस प्रथमयोः पूर्वसवर्णः इति दीधे नृस् ''तस्माच्छसो नः पुसि'' इति नत्वे नृन् इति साधु ।

**न्रा** – नृशब्दात् प्रातिपदिकात् तृतीयैकवचने टा प्रत्यये अनुबन्धलोपे नृ + आ इको यणचि इति यणादेशे न्रा ।

नृ + भ्याम् = नृभ्याम् / नृ + भिस् रुत्वे विसर्गे नृभिः चतुर्थ्येकवचने न्रे इति रूपम् । पञ्चमी षष्ठ्योरेकवचने नृ + असि अनुबन्धलोपे ''ऋत उत्'' इति उदेकार रपरः नुस् सस्य लोपेरस्य विसर्गे नुः इति रूपम्

**ऋकारान्तः पितृशब्दः जनकवाचकः**

| | | | |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरो | पितृन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितृणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| संबोधनम् | हे पितः | हे पितरौ | हे पितरः |

**पितरौ** – पितृशब्दात् प्रथमाद्वितीया द्विवचने औ प्रत्यये पितृ + औ ऋतो ङिसर्वनामस्थानयोः इति गुणे उरण रपरः इति रपरत्वे पितर् + ओ ऋकारान्तत्वात् अप्तृन्तृच् इति उपधा दीर्घे प्राप्ते नप्त्रादिग्रहणं व्युत्पत्ति पक्षे नियमार्थकत्वात् उपधादीर्घो न वर्णसम्मेलने सति पितरो इति प्रयोगः साधुः ।

**पितॄन्** – पितृ + शस् अनुबन्धलोपे पितृ + अस् प्रथमयोः पूर्वसवर्णः इति दीर्घे पितॄस् तस्माच्छसो नः पुंसि इति नत्वे पितॄम् न कारस्य हलन्त्यम् इति इत्संज्ञाया प्राप्तायां न विभक्तो तुस्माः इति निषेधे पितॄन् ।

पितृवद् – जामातृ भ्रातृ मातृ शब्दाः विज्ञेयाः। पिता – पाति इति पिता पापाने घातोः तृप्प्रत्ययः

इडागमे आकारलोपे पितृ ततः सौ पिता इति रूपम्।

**पिता** पितृ + सु, ''पित्+अन्+सु'' उपधादीर्घे अप्तृन्तृच्–इति पिता नलोपःप्रातिपदिकान्तस्य। इति नलोपः।

---

**(283) नृ च 6. 4. 6. नृ इत्यस्य नामि वा दीर्घः स्यात् नृणाम् । नॄणाम् इत्यृदन्ताः । कॄ तॄ अनयोरनुकरणे प्रकृतिवदनुकरणम् (प.7) इति वैकल्पिकातिदेशादित्वे रपरत्वे कीः किरौ किरः । तीः तिरौ तिरः इत्यादि । गीर्वत् ॥**

---

साधनिका

**नृणाम्** – नृशब्दात् प्रातिपदिकात् षष्ठीबहुचने आम् प्रत्यये नृ+आम् ह्रस्वनद्यापो नुट् इति नुडागमेऽनुबन्धलोये नृ+न +आम् नृ च इत्यनेन वैकल्पिके दीर्घे कृते नॄ नाम् ऋवर्णान्नस्य णत्वं वाच्यम् इति णत्वे नॄणाम् दीर्घाभावपक्षे नृणाम् । नरि न्रोः नृषु सप्तमी ।

**विशेषः** नामि इत्यनेन नित्यदीर्घविधानस्य वैकल्पिकार्थम् । इदम् सूत्रम्।

---

इदानी मॄदन्तानां शब्दानां प्रकरणम् – कॄविक्षेपे, तॄप्लवनतरणयो कॄ तॄ शब्दाच्यां अनुकरणे क्रियमाणे अनुकरण भूताच्यां ताभ्यां धातुपाठपठितौ कॄ तॄ इत्येतौ विवक्षितौ । अत एव अनुकरणस्य अनुकार्यमर्थः । अनुकार्यं च अनुकरणात् भिन्नम् आनुपूर्वी व्यत्यपेऽपि वाचकसादृश्यात् अर्थोपस्थापकत्वम् । ततश्च अनुकार्याभ्यां कॄ तॄ आभ्याम् अनुकरणभूतयोः कॄ तॄ इत्येतयोरर्थवत्वेन प्रातिपदिकावात् सुबुत्पत्तिः।

अत्र प्रश्नः अनुकरणभूतयोरनुकार्यशब्दवाचकत्वात् क्रियावाचकत्वाभावेन कथम् ऋत इद्धातोः इति इत्वम् प्रकृतिवदनुकरणम् इति वचनात् अनुकरणभूतयोः धातुत्वं वाच्यम् । एवं सति अधातुरिति धातुपर्युदासात् प्रातिपदिकत्वानुपपत्तेरिति अत उच्यते प्रकृतिवदनुकरणंभवति ।

**कीः** – कॄ इति प्रातिपदिकात् सुप्रत्यये अनबन्धलोपे कॄ स ऋत इद्धातोः इति इत्वे रपरत्वे किर् + स र्वोरूपधाया दीर्घ इकः इति दीर्घे कीर् + स हलङ्याभ्यो– इत्यादिना स्लोपः कीः ॥

**किरौ** – कॄ + औ इति दशायां ऋत इद्धातोः इति इत्वे रपरत्वे किर् + औ वर्णसम्मेलनेन किरौ साधुः । **किरः** कॄ +अस् इत्वे रपरत्वे किरस सस्य सत्वे विसर्गे किरः साधुः ।

**दीर्घऋकारान्त पुँलिङ्ग कॄ शब्दः**

| | | | |
|---|---|---|---|
| प्र. | कीः | किरौ | किरः |
| द्वि. | किरम् | किरौ | किरः |
| तृ. | किरा | कीर्भ्याम् | कीर्भिः |
| च. | किरे | कीर्भ्याम् | कीर्भ्यः |
| प. | किरः | कीर्भ्याम् | कीर्भ्यः |
| ष. | किरः | किरोः | किराम् |
| स. | किरि | किरोः | कीर्षु |
| सं. | हे कीः | हे किरौ | हे किरः । |

अनया रीत्यैव तॄ प्लवनतरणयोः धातोः अनुकरणे तीः तिरौ तिरः इति रूपम् ज्ञेयम्। गीर्वत् ।

---

**इत्वाभावपक्षे तु ऋदुशनस् - ( सू. 276 ) इति ऋतो ङि- ( सू. 275 ) इति च तपरकरणादनङ्गुणौ न। कॄः क्रौ कः। कृम् क्रौ, कृन् । क्रा । क्रे इत्यादि इतिऋृदन्ताः। गम्लृ शक्लृ अनयोरनुकरणे अनङ् । गमा । शका । गुणविषये तु लपरत्वम्। गमलौ । गमलः। गमलम्। गमलौ, गम्तृ गम्ला। गम्ले। ङसिङसोस्तु ऋत् उत् ( सू 279 ) इत्युत्वे तपरत्वे संयो गान्तस्य लोपः ( सू. 54 ) गमुल। शकुल् इत्यादि । इति लृदन्ताः ( अजन्तपुँल्लिगाः )**

न भवति तस्मिन् पक्षे ऋदुशनस्पुरदंशोऽनेहसां च इति अनङ् न भवति यतो हि तपरकरणात् ह्रस्वान्ते ऋकारान्ते एव अनङ एवमेव तपरकरणात् ऋतो ङिसर्वनामस्थानयोः इत्यस्यापि प्रवृत्तिर्न भवति ''प्रकृतिवदनुकरणम्'' अस्य अनित्यत्वाद् अनुकरणस्य धातुत्वाभावात् ''ऋत इद्धातोः'' कृ + सु अनुबन्धलोपे ऋत्वे विसर्गे कृः।

**क्रौ** – कृ + औ प्रथमयोः पूर्वसवर्णः इति पूर्वसमवर्णे प्राप्ते दीर्घाज्जसिच इति तन्निषेधे इकोयणचि इति यणि कृते क्रौ इति साधु।

**क्रः** कृ + जस् अनुबन्धलोपे पूर्वसवर्णदीर्घनिषेधे यणि कृते, सस्य रूत्वेविसर्गे क्रः ।

| | | | |
|---|---|---|---|
| प्र. | कृ | क्रौ | क्रः |
| द्वि. | कृम् | कौ | कृन् । |
| तृ. | क्रा | कृभ्याम् | कृभिः |
| च. | क्रे | कृभ्याम् | कृभ्यः |
| प. | क्रः | कृभ्याम् | कृभ्यः |
| ष. | क्रः | क्रोः | क्राम् |
| स. | क्रि | क्रोः | कृषु । |
| सं. | हे कृः । | हे क्रो । | हे क्रः । |

ऋलृवर्णयोर्मिथः सावर्ण्य वाच्यम् इति पक्षमादायैव ऋकारान्ते लृकारान्तस्य शब्दस्यापि प्रक्रियां दर्शयति तद्यथा– **गमा** – गम्लृ गतौ धातुः अनुकरणत्वात् प्रातिपदिकत्वात् सुप्रत्यये अनुबन्धलोपे गम्लृ+स् ऋदुशनस्पुरुदंशोऽनेहसां च इत्यनङि अनुबन्धलोपे गमन् + स् उपधादीर्घये गमान् + स हलङयाब्भ्यो – इति सलोपे नलोपः प्रातिप दिकान्तस्येति नलोपे गमा इति साधु ।

**शका** – शक्तृ शक्तौ धातुः पूर्वेक्तरीत्या शका ।

गमलौ – गम्लृ + औ ऋतोङिसर्वर्नामस्थानयोरिति गुणे लपरत्वे वर्णसम्मेलने गमलौ ।

शकलौ – शक्लृ + औ लृकारस्य लकारे रपरत्वेन अल् वर्जयोगे गमलौ।

गमलः – गम्लृ + जस अनुबन्धलोपे गम्लृ + अस् ऋतो ङिसर्वनामस्थानयोरिति गुणे रपरत्वे गमल् + अस् वर्णसम्मेलने सस्य सचे निसर्गे गमलः।

गमलम् – गम्लृ+अम् इत्यत्र ऋतो ङिसर्वनामस्थानयोरिति गुणे उरणरपरः इति लपरत्वे गमल्+अम् वर्णसम्मेलने गमलम् ।

गमृन् – गम्लृ + शस् अनुबन्धलोपे गम्लृ + अस् पूर्व सवर्णदीर्घेण ऋकारे गमृष् तस्याच्छसो नः पुंसि इति सस्यनत्वे गमृन् ।

गम्ला – गम्लृ + रा अनुबन्धलोपे गम्लृ + आ यणादेशेन गम्ला इति साधु ।

गम्ले – गम्लृ + ङे – गम्लृ + ए यणादेशे वर्णसम्मेलने गम्ले ।

गमुल् – गम्लृ + ङसि अनुबन्धलोपे गम्लृ + अस्
ऋत उत इति पूर्व परयोः लृकार–अकारयोः द्वयोः
स्थाने उकारादेशे उरणरपरः इति रपरत्वेन
लकारे गमुल्+स संयोगान्तस्य लोपः इति सलोपे
गमुल् + एवमेव शक्लृधातोः शकुल् इतिरूपम् ।

**लृकारान्त पुँल्लिङ्ग गम्लृशब्दः**

| | | | |
|---|---|---|---|
| प्र. | गमा | गमलौ | गमलः – |
| द्वि. | गमलम् | गमलौ | गमृन्ः – |
| तृ. | गम्ला | गम्लृभ्याम् | गम्लृभिः |
| च. | गम्ले | गम्लृभ्याम् | गम्लृभ्यः |
| प. | गमुल् | गम्लृभ्याम् | गम्लृभ्यः |
| ष. | गमुल् | गम्लोः | गमॄणाम् |
| स. | गमलि | गम्लोः | गम्लृषु |
| सं. | हे गमः! | हे गमलौ | हे गमलः |

इत्यृलूदन्ताः शब्दाः

## स्वाध्याय:

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

(1) धातृ इत्यत्र गुणो भवति अनेन-

(क) ऋदुशनस् - 1 (ख) ऋतो डि - 1 (ग) नृ च् (घ) एकमपि न

(2) नप्तृ शब्दस्य अर्थ: - भवति।

(क) दौहित्रम् (ख) तक्षक:। (ग) प्रशासक: (घ) हवनकर्ता ।

(3) पितृशब्दे क: प्रत्यय: ?

(क) तृन् (ख) तृच् (ग) ऋ (घ) इतृ

(4) नृ शब्दस्य संबोधने रुपम् ?

(क) ना (ख) नु: (ग) नरि (घ) न:

(5) कृ: इदं रुपं कस्य शब्दस्य अस्ति ?

(क) कृ (ख) कृ (ग) का (घ) स्ल- ।

**2. एकैकेन वाक्येन उत्तराणि लिखत-**

(1) गमुल् इत्यत्र सलोप: केन क्रियते ?

(2) कृम् इति सस्य शब्दस्य रुपम् ?

(3) शका इति रुपे मूल शब्द: क: ?

(4) प्रकृतिवदनुकरणं भवति अस्य कोऽर्थ: ?

(5) धातृशब्दस्य रूपाणि सप्तमी-द्वितीयाया: लिखत ।

(6) ऋत इद्धातो: अनेन किं संपाद्यते ?

(7) अनुकरणानुकार्ययो: को भेद: ?

**3. निम्नलिखितानि रुपाणि सा धयत**

धाता । उद्गातारौ । धातृणाम् । हे धात: नृणाम् । की: । कृम् । शका । गमुल्

**4. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायताम्**

(1) नृ च ।

(2) ऋवर्णान्तस्य णत्वं वाच्यम् । (वार्तिकम्)

(3) व्युत्पत्तिपक्षे नप्त्रादिग्रहणं नियमार्थम् (पंक्ति:)

(4) ऋतोरित्यस्यतपरकरण-फलम् ।

**5. अ विभागं ब विभागेन सह योजयत।**

| अ विभाग: | ब विभाग: |
|---|---|
| (क) धातृ | (क) उपधादीर्घाभाव: |
| (ख) पितृ | (ख) ब्रह्मा |
| (ग) नृ | (ग) अनङ् |
| (घ) कृ | (घ) गमा |
| (ङ) गम्लृ | (ङ) की: |

**छात्रप्रवृत्ति:**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदम्, पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखित।

◆

# 16 एकारान्ताजन्तपुंल्लिङ्गप्रकरणम्

**प्रस्तावना**

**अयमेकारः महेश्वरसूत्रेषु षष्ठे स्थाने पठितः स अन्ते यस्य भवति स एकारान्तः तेषाम् एकारान्तशब्दानां विषये अजन्तपुल्लिगप्रकरणे भट्टोजिदीक्षितेन यथा वैयाकरणसिद्धान्तकौमुद्यां मूले निरूपिताः तेषां पठनमत्र करिष्यामः यथा प्रथमः (1) शब्दः ''सेः'' अस्य व्युत्पत्तिः इना सः वर्तते य सः। (2) स्मृतेः - स्मृतः इः कामो येन। ''स्मृतेः'' यः जनः लक्ष्म्यर्थः स्तुतः।**

**इना सह वर्तते इति - सेः सयौ सयः । स्मृतेः स्मृतयौ स्मृतयः । इत्येदन्ताः ।**

एकारः अन्ते येषां ते एदन्ताः शब्दा तेषां प्रकरणम् । ते निरूप्यन्ते ।

अकारो भगवान् विष्णुः, तस्यापत्यम् इः । अ ङस् इञ् तद्धितान्तत्वा प्रातिपदिकत्वं ततः सुपो लु कि, सुपो धातुप्रातिपदिकयोः अनेन, ''यचि भम्'' इति भसंज्ञायां यस्येति च इति अकारलोपे एकदेशविकृतमनन्यत्वात् इकारात् सु प्रत्ययः रुत्वे विसर्गे इः इति रूपम् ।

तस्य तृतीयैकवचने इना सह इत्यर्थे तेन सह तुल्ययोगे इति बहुब्रीहिसमासः । वोपसर्जनस्य इति सह इत्यस्य स-भावे, आद्गुणः इति गुणे, 'से' इति रूपम् । ततः सौ रूत्वे विसर्गे, 'सेः' इति प्रथमैकवचने रूपं सम्पद्यते ।

साधनिका -

**सयौ** - से इति प्रातिपदिकात् प्रथमाद्विवचने सौ विभक्तौ 'से+औ' 'एचोऽयवायावः' इति अयादेशे, 'स्+अय+औ' वर्णसम्मेलने सयौ ।

**एकारान्तपुँल्लिङ्ग 'से' शब्दः**

| | | | |
|---|---|---|---|
| प्र. | सेः | सयौ | सयः |
| द्वि. | सयम् | सयौ | सयः |
| तृ. | सया | सेभ्याम् | सेभिः |
| च. | सये | सेभ्याम् | सेभ्यः |
| प. | सयः | सेभ्याम् | सेभ्यः |
| ष. | सयः | सयोः | सयाम् |
| स. | सयि | सयोः | सेषु |
| सं. | हे से | हे सयौ | हे सयः |

**स्मृतः** इः कामो येन इति स्मृते तस्यार्थकत्वात् सौ रूत्वे विसर्गे स्मृतेः । अस्य इमानि रूपाणि पूर्ववत् भविष्यन्ति यथा -

**एकारान्तपुँल्लिङ्ग 'स्मृते' शब्दः**

| | | | |
|---|---|---|---|
| प्र. | स्मृतेः | स्मृतयौ | स्मृतयः |
| द्वि. | स्मृतयम् | स्मृतयौ | स्मृतयः |
| तृ. | स्मृतया | स्मृतेभ्याम् | स्मृतेभिः |
| च. | स्मृतये | स्मृतेभ्याम् | स्मृतेभ्यः |
| प. | स्मृतयः | स्मृतेभ्याम् | स्मृतेभ्यः |
| ष. | स्मृतयः | स्मृतयोः | स्मृतयाम् |
| स. | स्मृतयि | स्मृतयोः | स्मृतेषु |
| सं. | हे स्मृते | हे स्मृतयौ | हे स्मृतयः |

इत्येदन्ताः शब्दाः

## स्वाध्यायः

**1. योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) अकारः कस्य वाचकः -

(क) शिवस्य (ख) ब्रह्मणः (ग) देव्याः (घ) विष्णोः

(2) अकारस्य लोपो भवति -

(क) यचि भम् (ख) स्वादिष्व (ग) सुपोधातु (घ) यस्येति

(3) सेः इत्यत्र मूलशब्दो वर्तते-

(क) सि (ख) से (ग) सु (घ) सो

(4) अस्मिन् प्रकरणे एकारान्ताः शब्दाः सन्ति -

(क) त्रयः (ख) चत्वारः (ग) द्वयम् (घ) षड्

**2. एकैकवाक्येन उत्तराणि लिखत-**

(1) सयः इति रूपम्, कस्यां विभक्तौ भवति ।

(2) स्मृते इति शब्दस्य द्वितीया बहुवचने किं रुपम् ?

(3) सह इत्यस्य स आदेशः केन क्रियते ।

(4) अयादेशः केन सूत्रेण क्रियते ।

**3. अधोलिखितानि रुपाणि साघयत।**

सेः । सयौ । हे से । स्मृतयः ।

**4. अधोलिखितानां सूत्राणां क्रमनिर्देशं कुरुत ।**

(1) यस्येति च ।

(2) यचि भम् ।

(3) तस्यापत्यम् ।

(4) सुपोधातुप्रातिपदिकयोः ।

(5) विरामोऽवसानम् ।

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखत।

◆

# 17 ओकारान्ताजन्तपुँल्लिङ्गप्रकरणम्

**प्रस्तावना**

**ओकारः अन्ते येषां ते सोऽकारान्ताः। ओकारान्ताश्च ते अजन्तपुँल्लिङ्ग इति ओकारान्ताजन्तपुंल्लिङ्ग तेषां प्रकरणम् अस्यविग्रहः। अस्मिन् प्रकरणे गोशब्दः। ''स्मृतो'' शब्दः उभौ अध्ययन विषयौ स्तः। प्रकरणस्य प्रारंभः गोशब्देन भवति, गच्छति इति गौः।**

---

**(284) गोतोणित् 7 1 50 गो शब्दात्परं सर्वनामस्थानं णिद्वत्स्यात् । गौः गावौ, गावः।**

**(285) औतोऽम्शसोः 16.1.93 आ ओतः इति च्छेदः। ओकारात् अम् शसोरचि परे अकार एकादेशः स्यात् । शसा साहचर्यात् सुबेव अम् गृह्यते । नेह - अचिनवम् । असुनवम् । गाम्, गावौ गाः**

---

(284) पदच्छेदः - गोतः णित् द्विपदमिदं सूत्रम् ।

अनुवृत्तिः - सर्वनामस्थाने ।

सूत्रप्रकारः - अतिदेशसूत्रम् ।

सरलार्थः - ओकारान्तात् गोशब्दात् सर्वनामस्थानप्रत्ययः णिद्वत् भवति ।

विशेषार्थः - तपरकरणात् चित्रगुः शब्दात् सर्वनामस्थानं न णिद्वत् ।

साधनिका- गौः - गोशब्दात् प्रातिपदिकात् सुप्रत्ययेऽनुबन्धलोपे 'गो + सु' गोतोणित् इति णित्वात् अचोऽञ्णिति इति वृद्धौ गौ + स सुपितिङन्तं पदम् इति पदान्ततत्वे ससजुषोरुः इति रूत्वे विरामोऽवसानम्। इति अवसाने खरवसानयोर्विसर्जनीयः इति विसर्गे गौः इति रूपं साधु ।

**गावौ** - गो + औ इति दशायां सर्वनामस्थानत्वात् औकाररस्य गोतोणित इति रहौ गो + औ एचोऽ्चवायावः इति आवादेशे वर्ण सम्मेलने गावौ साधु।

**गावः** - गोशब्दात् प्रातिपदिकात् प्रथमाबहुवचने जस् प्रत्ययेऽनुबन्धनलोपे गो + अस् गोतोणित् इति णिद्वद्भावे अचोञ्णिति इति वृद्धौ गौ + अस् आवादेशे ग् + आव् + अस् वर्णसम्मेलने सस्य रुत्वे विसर्गे गावः इति रुपं सिद्धम्।

(285) पदच्छेदः - च शस् च इति।

समासः - अम्शसौ तयोः अम्शसोः (इतरेतर द्वन्द्वसमासः)।

अनुवृत्तिः अचि एकः पूर्वपरयोः ।

सूत्रप्रकारः विधिसूत्रम् ।

सरलार्थः ओकारात्परं यदि अम्प्रत्ययस्य अकारः वा शस् प्रत्ययस्य अकारो भवति चेत् पूर्वपरयोः द्वयोः स्थाने आकार इत्येकार्दशः स्यात् ।

विशेषार्थः - अम् प्रत्ययः सुपप्रत्ययस्याहः यः तस्यैन ग्रहणम् नतु मिपः स्थाने आदिष्टस्य अमः ग्रहणम् अन्यथा अचिनवम् + अम् इव्यत्र एकादेशेन अचिनवम् इति रुपं भविष्यति । तदनिष्टम् । एवमेव असुनवम् इत्यत्रापि न भवेत् ।

साधनिका - **गाम्** - गोशब्दात् प्रातिपदिकात् द्वितीयैकवचने अम् प्रत्यये गो + अम् गो तो णित् इति णिद्वद्भावे औतोऽम्शसोः इति ओकारस्य अकारस्य च स्थाने आकार इति एकादशे गाम् इति साधु । गोशब्दात् शस् प्रत्यये कृते गो + अस् औतोऽम्शसोरिति जाते गास् स्य रूत्वे विसर्गे गाः ।

**गवा** - गो + टा चुटू इति अनुबन्धलोपे गो + आ अवादेशे ग् + अव् + आ - गवा । गवे गो + ङे अनुबन्धलोपे गो + ए अवादेशे गवे ।

**गोः** - गो + ङसि अनुबन्धलोपे गो + अस ङसिङसोश्च इति पूर्वरुपे सस्यरुत्वेविसर्गे गोः ।

---

**गवा । गवे । गोः इत्यादि । ओतो णिदिति वाच्यम् । विहितविशेषणं च । तेन सुद्यौः सुद्यावौ । सुद्यावः सुधाम् इत्यादि । ओकारान्तादि्वहितं सर्वनामस्थानम् इति व्याख्यानात् हे भानो । हे भानवः । उः शम्भुः स्मृतो येन सः स्मृतौः स्मृतावौ । स्मृतावः । स्मृताम् । स्मृतावौ स्मृताः । इत्यादि इत्योदन्ताः ।**

---

गो: गोभ्याम् गोभि: गो: गवो: गवाम्

गवि गवो: गोषु, हे गौ: । हे गावौ । हे गाव: ।

अत्र केचन् वदन्ति गोतोणित् इति स्थाने ओतोणित् इति वक्तव्यम् । तेन ओकारान्तात् शब्दात् सर्वनामस्थानं णिद्वत् स्यात् इत्यर्थ: सुद्यौ: सुशोभनाद्यौ:यस्येति विग्रहे पुंल्लिङ्गे सुद्यौ + स् सर्वनामस्थाने परे णिद्वत्भाव: अचोऽ ञ्णिति इति वृद्धौ सस्य सत्वे विसर्गे सुद्यौ: इति रूपम्।

विहितविशेषणम् – ओकाराद्विहितं सर्वनामस्थान मित्यर्थ:। हे भानो ! अत्र सुप्रत्ययस्य लोप: क्रियते एङ्ह्रस्वात्संबुद्धे:।

उकारान्तात् अत्र सुप्रत्यय, न तु ओकारान्तात् । अन्यथा हे भानौ: स्यात् । हे भानव: अत्रापि जस्प्रत्यय: उकारान्तादेव आगच्छति अतो न णिद्वद्भाव: गुणेऽवादेशे रूत्वे विसर्गे भानव: ।

उ: शम्भु: स्मृत: येन, स स्मृतो, अत्र बहुव्रीहि: समास: निष्ठा इति सूत्रेण स्मृतशब्दस्य पूर्वप्रयोगे स्मृता + उ = आद्गुण: इति गुणे स्मृतो तत: सौ णिद्वद्भावे वृद्धौ च कृते सति रूत्वे विसर्गे स्मृतौ: ।

स्मृतावौ–स्मृतो + औ ओतोणिदिति राच्यम् अनेन वृद्धौ स्मृतो + ओ आवादेशे कृते स्मृताव् + औ वर्णसम्मेलने स्मृतावौ । एवं असि स्मृताव: । अमि शसि च औतोऽम्शसोरचि इति आकार एकादेशे स्मृताम् स्मृता: ।

एकारान्ता: अजन्तपुँल्लिंगा:

---

**(286) रायो हलि 7-2- 85- रै शब्दस्य आकारोऽन्तादेश: स्याद्हलिविभक्तौ । रा: । अच्यायादेश स्याद्हलिविभक्तौ । रा: । अच्यायादेश: - रायौ, राय: । रायम् रायौ राय: । राया राभ्यामित्यादि । इत्येदन्ता: । ग्लौ: ग्लावौ, ग्लाव: । ग्लावम्, ग्लावौ, ग्लाव:, इत्यादि । औतोऽम्शसो: (स् 285) इतीह न प्रवर्तते (एऔच् । इति ओदौतो: सावर्ण्याभावज्ञापनात् । इत्यौदन्ता: ।**

**इत्यजन्तपुँल्लिंगप्रकरणम्**

---

(285) पदच्छेद: - राय: हलि । द्विपदमिदं सूत्रम् ।

अनुवृत्ति: - आ विभक्तौ ।

सूत्रप्रकार: - विधिसूत्रम् ।

सरलार्थ: - रै शब्दस्य धनवाचक: अत: अर्थवत्वात् प्रातिपदिकत्वम्, तत: सौ हलादित्वात् आकारान्तादेश: रा + सु अनुबन्ध लोपे रास् सस्यसत्वेविसर्गे रा: इतिरूपम् ।

अजादौ विभक्तौ आयादेशे – रायौ राय: । रायम् रायौ राय: । राया राभ्याम् राभि: । राये राभ्याम् राभ्य: राय:, राभ्याम्, राभ्य:। राय: रायो: रायाम् । रायि रायो: रासु । हे रा: । हे रायौ । हे राय:।

ग्लौ + अम् अत्र औतोऽमशसो: अनेन द्वयो:स्थाने आकार एकादेश: कुतो न तदुच्यते ओकारऔकारयो: सावर्ण्याभावात् तत्र प्रमाणम् ऐ औच् । इति पृथकसूत्रारम्भसामर्थ्यात् ज्ञायते ऐकारऔकारयो: न सावर्ण्यम् ।

**औकारान्त:पुँल्लिङ्ग: 'ग्लौ: चन्द्र:'**

| | | | |
|---|---|---|---|
| प्र. | ग्लौ: | ग्लावौ | ग्लाव: |
| द्वि. | ग्लावम् | ग्लावौ | ग्लाव: |
| तृ. | ग्लावा | ग्लौभ्याम् | ग्लौभि: |
| च. | ग्लावे | ग्लौभ्याम् | ग्लौभ्य: |
| प. | ग्लाव: | ग्लौभ्याम् | ग्लोभ्य: |
| ष. | ग्लाव: | ग्लावो: | ग्लौसु |
| स. | ग्लावि | ग्लावो: | ग्लौसु |
| सं. | हे ग्लौ: ! | हे ग्लावौ ! | हे ग्लाव: ! |

## स्वाध्याय:

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

(1) अस्मिन् प्रकरणे प्रथमः शब्दः-

(क) गो (ख) स्मृतो (ग) ग्लौ (घ) रै

(2) उः शब्दस्य अर्थः -

(क) विष्णुः (ख) देवी (ग) शम्भुः (घ) गणेशः

(3) णिद्वद्भावः क्रियते

(क) एचोऽयवा (ख) अचोञ्णिति (ग) रायो हलि (घ) गोतोणित्

(4) ग्लो शब्दस्य अर्थः -

(क) चन्द्रः (ख) धनम् (ग) आकाश (घ) देवः

(5) आ इत्येकादेशो भवति -

(क) द्वितीयैकवचने (ख) पञ्चमी एकवचने (ग) तृतिया बहुवचने (घ) पञ्चमी बहुवचने

**2. एकैकवाक्येन उत्तराणि लिखत -**

(1) गोतोणित् इति कीद्शं सूत्रम्

(2) रायः अत्र अयादेशः केन क्रियते ।

(3) ओकारान्ताद् विहितमस्य कोऽर्थः ?

**3. सविस्तरम् उत्तरम् लिखत -**

(1) अय् इति ग्रहणेन शसा साहचर्यात् कस्य न ग्रहणम् ?

(2) अचिनवम् अत्र सिद्धि प्रक्रियां प्रदर्श्यताम् ।

(3) औतोऽम्शसोः अत्रं कीदृशः पदविच्छेदः

(4) अच्यायादेशः अस्य कोऽर्थ ?

**4. निम्नलिखितानि रुपाणि साधयत -**

राः । स्मृतौः ग्लावम् । गौः । गोः ।

सुद्यौः

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायताम् ।**

गोतो णित् । औतोऽम्शसोः । रायो हलि ।

**6. अ विभागं ब विभागेन सह योजयत् ।**

| अ विभाग | ब विभाग |
|---|---|
| (क) प्रथमा | (क) रायौ |
| (ख) द्वितीया | (ख) स्मृतेः |
| (ग) तृतीया | (ग) स्मृताम् |
| (घ) चतुर्थी | (घ) सुधावा |
| (ड) सप्तमी | (ड) ग्लावि |

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखत ।

◆

| 18 | अजन्तस्त्रीलिङ्गप्रकरणम् |
|---|---|

**प्रस्तावना**

अच् अन्ते यस्य सोऽजन्तः, अजन्तश्चासौ स्त्रीलिङ्गश्च इति अजन्तस्त्रीलिङ्गः तस्य प्रकरणमन्तस्त्रीलिङ्गप्रकरणम्। अस्मिन् प्रकरणेऽपि पूर्ववत् प्रत्याहारक्रमेणै व शब्दानां विवेचनं वर्तते । किन्तु स्त्रीलिङ्गे अकारान्तशब्दाः न भवन्ति, तस्मादत्र आकारान्तैः शब्दैः प्रारंभः भवति । स्त्रीलिङ्गशब्दाः द्विविधाः भवन्ति । प्रथमः प्रकारो यथा तादृशः शब्दाः ये पुल्लिङ्गेऽपि सन्ति किन्तु स्त्रीत्वविवक्षया टाप्,- डाप्,- ङीष्,-आदिभिः प्रत्ययैः स्त्रीलिङ्गे भवन्ति । द्वितीयः प्रकारो ये स्वत एव स्त्रीलिङ्गे भवन्ति । स्त्रीप्रत्ययानां विवरणं तु स्त्रीप्रत्ययप्रकरणे वर्तते । अत्र स्त्रीलिङ्गगतशब्दानां विवरणं अस्ति तज्ज्ञास्यामः ।

## रमा

''रमते विष्णुना साकम् इति रमा'' ''रमु'' क्रीडायाम् इति धातोः णिच प्रत्यये उपधावृद्धौ ''राम्+इ'' इति स्थिते ''जनीजृषक्नसुरञ्जोद्मन्ताश्च'' इत्यनेन मित् ''मितां ह्रस्वः'' इत्यनेन सूत्रेण ह्रस्वे 'रम्+इ'' इति स्थिते सनाद्यन्ताधातवः इत्यनेन धातुसंज्ञायां ''नन्दिग्रहिपचादिभ्योल्युणिन्यचः'' इत्यनेन अच ''रम्+इ+अ'' इति स्थिते ''णेरनिटि'' इत्यनेन इलोपे ''रम्'' इत्यवस्थायाम् ''अजाद्यतष्टाप्'' इत्यनेन टाप् ''रम+टाप्'' इति स्थिते ''हलन्त्यम्'' इत्यनेन पकारस्य इत्संज्ञायां ''चुटू'' इत्यनेन टकारस्य ''इत्संज्ञायां तस्यलोपः'' इत्यनेन ट् एवं प् इत्युभयोः लोपे ''रम+आ'' इति स्थिते ''अकः सवर्णे दीर्घः'' इत्यनेन सवर्णदीर्घे ''रमा'' प्रातिपदिकत्वात् सु प्रत्येय ''रमा+सु'' इति स्थिते 'उपदेशेऽजनुनासिक इत्' इत्यनेन उकारस्य इत्संज्ञायां तस्यलोपः इत्यनेन उकारस्य लोपे रमा+स् इति स्थिते 'अपृक्त एकाल्प्रत्ययः' इत्यनेन अपृत्ससंज्ञायां 'हलङ्याभ्यो दीर्घात्सुतिस्यपृक्तं हल्' इत्यनेन स् लोपे रमा इति रूपं सिद्धम् ।

**(287) औङ आपः 7-1-18**

**आबन्तादङ्गात्परस्यौङः शी स्यात् । औङ् इत्यौकारविभक्तेः संज्ञा । रमे । रमाः ।**

पदच्छेदः औङः, आपः द्विपदमिदं सूत्रम् ।

अनुवृत्तिः - अङ्गस्य, शी

सूत्रप्रकारः - विधिसूत्रम्

सरलार्थः - आबन्तस्य शब्दस्य परतः यदि द्विवचनस्य प्रथमा द्वितीया च (औ औट् च) विभक्ती भवतः, तर्हि तत्र औकारस्य स्थाने **शी** इत्यादेशो भवति ।

विशेषार्थः प्राचीनैः आचार्यैः **औङ्इत्यौकारविभक्तेः** इति नियमेन औ एवम् औट् इति द्वयोः **औङ**इति संज्ञा कृता वर्तते । तथा च आप् इति शब्दात् टाप्, डाप्, चाप् इत्येतेषां ग्रहण भवति । अत्र **अंगस्य** इति सूत्रस्य अधिकारः वर्तते । आपः इत्येतत् पदमभिलक्ष्य अस्यापि पञ्चम्यन्तं जातम् ।

साधनिका -

**रमे** - ''रमा'' इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनवक्षायां ''औ'' प्रत्यये ''रमा+औ'' इति स्थिते ''औङ आपः'' इति सूत्रेण औ स्थाने शी आदेशे ''रमा+शी'' इति स्थिते ''लशक्वतद्धिते'' इति सूत्रेण शकारस्य इत्संज्ञायां ''तस्यलोपः'' इति सूत्रेण शकारस्य लोपे ''रमा+ई'' इति स्थिते ''प्रथमयोः पूर्वसवर्णः'' इत्यनेन पूर्वसवर्णदीर्घे प्राप्ते ''दीर्घाज्जसि च'' इत्यनेन निषेधे ''आद्गुणः'' इत्यनेन गुणे एकारे ''रमे'' इति रूपं सिद्धम् ।

**रमाः** - ''रमा'' इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाबहुवचनविवक्षायां ''जस्'' प्रत्यये ''रमा+जस्'' इति स्थिते ''चुटू'' इति सूत्रेण जकारस्य इत्संज्ञाया ''तस्यलोपः'' इति सूत्रेण जकारस्य लोपे ''रमा+अस्'' इति स्थिते ''प्रथमयोः पूर्वसवर्णः'' इत्यनेन पूर्वसवर्णदीर्घे ''रमास्'' इति स्थिते इति स्थिते ''ससजुषो रुः'' इति सूत्रेण स् स्थाने रू आदेशे ''रमारु'' इत्यवस्थायां ''उपदेशेऽजनुनासिक इत्'' इति सूत्रेण उकारस्य इत्संज्ञायां ''तस्यलोपः'' इति सूत्रेण उकारस्य लोपे ''रमार्'' इति स्थिते ''खरवसानयोर्विसर्जनीयः'' इति सूत्रेण रेफ़स्य स्थाने विसर्गे ''रमाः'' इति रूपं सिद्धम् ।

**(288) संबुद्धौ च 7-3- 106**

**आप एकारः स्यात्सम्बुद्धो । एङ्ह्रस्वात ( सू. 193 ) इति संबुद्धिलोपः । हे रमे । हे रमे । हे रमाः । रमाम् । रमे। रमाः। स्त्रीत्वान्त्वाभावः ।**

पदच्छेदः सम्बुद्धौ, च द्विपदमिदं सूत्रम् ।

अनुवृत्तिः अङ्ग स्य, आपः, एत्

सूत्रप्रकारः विधिसूत्रम्

सरलार्थः आबन्तस्य शब्दस्य परतः यदि सम्बोधनविभक्तेः एकवचनं भवति, तर्हि आबन्तस्य शब्दस्य आकारस्य एकारः भवति ।

विशेषार्थः स्त्रीत्वान्त्वाभावः इत्यत्र शस् इति द्वितीयायाः द्विवचनस्य परतः स्थिते सकारस्य नकारो तस्माच्छसो नः पुंसि इत्यत्र पुंग्रहणेन स्त्रीलिङ्गे न भवति । अंगस्य इत्यधिकारे तथा 'बहुवचने झल्येत् इत्यतः' एत् इत्यस्य अनुवृत्तौ आपः इति विशेषणम्, अतः तदन्तविधिः ।

साधनिका -

हे रमे - हे रमा इत्यस्मात् शब्दात् सम्बोधने सु प्रत्येय हे रमा+सु इति स्थिते एकवचनं सम्बुद्धिः इति सूत्रेण सम्बुद्धिसंज्ञायां संबुद्धौ च इत्यनेन आकारस्य स्थाने एकारे हे रमे+सु इति स्थिते उपदेशेडजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण उकारस्य लोपे हे रमे+स् इति स्थिते एङ्ह्रस्वात्सम्बुद्धेः इति सूत्रेण स् लोपे हे रमे इति रूपं सिद्धम् ।

हे रमे - हे रमा इत्यस्मात् शब्दात् सम्बोधने औ प्रत्येय हे रमा+औ इति स्थिते औङ आपः इति सूत्रेण औ स्थाने शी आदेशे हे रमा+शी इति स्थिते ''लशक्वतद्धिते'' इति सूत्रेण शकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण शकारस्य लोपे हे रमा+ई इति स्थिते प्रथमयोः पूर्वसवर्णः इत्यनेन पूर्वसवर्णदीर्घे प्राप्ते दीर्घाज्जसि च इत्यनेन निषेधे ''आद्गुणः'' इत्यनेन गुणे एकारे हे रमे इति रूपं सिद्धम् ।

हे रमाः हे रमा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् सम्बोधने जस् प्रत्येये हे रमा+जस् इति स्थिते चुइ इति सूत्रेण जकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण जकारस्य लोपे हे रमा+अस् इति स्थिते प्रथमयोः पूर्वसवर्णः इत्यनेन पूर्ववर्णदीर्घे हे रमास् इति स्थिते इति स्थिते ससुजुषो रुः इति सूत्रेण स् स्थाने रू आदेशे हे रमारु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण उकारस्य लोपे हे रमार् इति स्थिते खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफ़स्य स्थाने विसर्गे हे रमाः इति रूपं सिद्धम् ।

रमाम् - रमा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् द्वितीयाया एकवचनविवक्षायां अम प्रत्येय रमा+अम् इति स्थिते अमि पूर्वः इत्यनेन सूत्रेण पुर्वरूपे रमाम् इति रूपं सिद्धम् ।

रमे - रमा इत्यास्यात् शब्दात् प्रातिपदिकत्वात् द्वितीयाद्विवचनविवक्षायां औट् प्रत्यये रमा+औट् ति स्थिते हलन्त्यम् इत्यनेन ट् इत्यस्य इत्संज्ञायां तस्यलोपः इत्यनेन ट् इत्यस्य लोपे रमा+औ इति स्थिते औङ आपः इति सूत्रेण औ स्थाने शी आदेशे रमा+शी इति स्थिते लशक्वतद्धिते इति सूत्रेण शकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण शकारस्य लोपे रमा+ई इति स्थिते प्रथमयोः पूर्वसवर्णः इत्यनेन पूर्वसवर्णदीर्घे प्राप्ते दीर्घाज्जसि च इत्यनेन निषेधे आद्गुणः इत्यनेन गुणे एकारे रमे इति रूपं सिद्धम् ।

रमाः रमा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् द्वितीयाबहुवचनविवक्षायां शस् प्रत्यये रमा+शस् इति स्थिते ''लशक्वतद्धिते'' इति सूत्रेण शकारस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण शकारस्य लोपे रमा+अस् इति स्थिते ''प्रथमयोः पूर्वसवर्णः'' इत्यनेन पूर्वसवर्णदीर्घे रमास् इति स्थिते इति स्थिते 'ससजुषो रूः' इति सूत्रेण स् स्थाने रू आदेशे रमारु इत्यवस्थायां 'उपदेशेडजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण उकारस्य लोपे रमार् इति स्थिते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफ़स्य स्थाने विसर्गे रमाः इति रूपं सिद्धम् ।

(289) आङि चापः 7-3-105

आङि ओसि च परे आबन्तस्याङ्गस्यैकारः स्यात् । रमया । रमाभ्याम् । रमाभिः ।

पदच्छेदः - आङि च, आपः त्रिपदमिदं सूत्रम् ।

अनुवृत्तिः - अङ्गस्य, ओसि, एत्

सूत्रप्रकारः - विधिसूत्रम्

सरलार्थः – आबन्तस्य शब्दस्य परतः यदि आङ् (टा तृतीया एकवचनम्) एवं च ओस् (षष्ठी सप्तमी च द्विवचनम्) इत्येते भवतः तर्हि आबन्तस्य शब्दस्य आकारस्य एकारः भवति ।

विशेषार्थः – आङि ति टासंज्ञा प्राचात् इति प्राचीनैः आचार्यैः टा तृतीया एकवचनम् इत्यस्य आङ् संज्ञा कृता वर्तते ।

साधनिका

रमया – रमा इत्यस्मात शब्दात् प्रातिपदिकत्वात् तृतीयाया एकवचनविवक्षायां टा प्रत्येय रमा+टा इति स्थिते चुट्ट इति सूत्रेण टकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण टकारस्य लोपे रमा+आ इति स्थिते अकः सवर्णे दीर्घः इत्यनेन सवर्णदीर्घे प्राप्ते आङि चापः इत्यनेन आ स्थाने ए रमे+आ इति स्थिते एचोऽयवायावः इत्यनेन ए स्थाने अय् आदेशे रम्+अय्+आ वर्णसम्मेलने रमया इति रूपं सिद्धम् ।

रमाभ्याम् – रमा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् तृतीयाद्विवचनविवक्षायां भ्याम् प्रत्यये रमा+भ्याम् वर्णसम्मेलने रमाभ्याम् इति रूपं सिद्धम् ।

रमाभिः रमा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् तृतीयाबहुवचनविवक्षायां भिस् प्रत्यये रमा+भिस् इति स्थिते ससजुषो रुः इति सूत्रेण स् स्थाने रु आदेशे रमा+भिरु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण उकारस्य लोपे रमा+भिर् इति स्थिते खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफ़स्य स्थाने विसर्गे रमाभिः इति रूपं सिद्धम् ।

---

**(290) याडापः 7-3-113**

**आपः परस्य ङिद्वचनस्य याडागमः स्यात् । वृद्धिरेचि (सू.72) । रमायै । सवर्णदीर्घः । रमायाः । रमायाः । रमयोः । रमाणाम् । रमायाम् । रमयोः । रमासु । एवं दुर्गादयः ।**

---

पदच्छेदः – याड्, आपः द्विपदमिदं सूत्रम् ।

अनुवृत्तिः – अङ्गस्य, ङिति

सूत्रप्रकारः विधिसूत्रम्

सरलार्थः – आबन्तस्य शब्दस्य परतः यदि ङि त् (एकवचने चतुर्थी पंचमी षष्ठी सप्तमी च) विभक्तयः भवन्ति तर्हि तासां विभक्तिनां स्थाने याट् इति आगमः भवति ।

विशेषार्थः – ङ् इत् यस्य सः इति ङित् । अत्र ङे, ङसि, ङ्स्, ङि एताः चतस्त्रः विभक्तयः भवन्ति ।

साधनिका

रमायै – रमा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् चतुर्थ्यैकवचनविवक्षायां ङे प्रत्यये रमा+ङे इति स्थिते लशक्वतद्धिते इति सूत्रेण ङकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण ङकारस्य लोपे रमा+ए इति स्थिते वृद्धिरेचि इति सूत्रेण वृद्धौ प्राप्तायां याडापः इत्यनेन याट् आगमे हलन्त्यम् इत्यनेन ट् इत्यस्य इत्संज्ञायां तस्यलोपः इत्यनेन ट् इत्यस्य लोपे आद्यन्तावयवत्वेन रमा+या+ए इति स्थिते वृद्धिरेचि इति सूत्रेण वृद्धौ रमायै इति रूपं सिद्धम् ।

रमायाः रमा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् पञ्चम्यैकवचनविवक्षायां ङसि प्रत्यये रमा+ ङसि इति स्थिते लशक्वतद्धिते इति सूत्रेण ङकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण ङकारस्य लोपे उपदेशेऽजनुनासिक इत् इत्यनेन इकारस्य इत्संज्ञायां तस्यलोपः इत्यनेन इकारस्य लोपे रमा+अस् इति स्थिते याडापः इत्यनेन याट् आगमे हलन्त्यम् इत्यनेन ट् इत्यस्य इत्संज्ञायां तस्यलोपः इत्यनेन ट् इत्यस्य लोपे आद्यन्तावयवत्वेन रमा+या+अस् इति स्थिते अकः सवर्णे दीर्घः इत्यनेन सवर्णदीर्घे रमायास् इति स्थिते ससजुषो रूः इति सूत्रेण स् स्थाने रु आदेशे रमायारु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण उकारस्य लोपे रमायार् इति स्थिते खरवासनयोर्विसर्जनीयः इति सूत्रेण रेफ़स्य स्थाने विसर्गे रमायाः इति रूपं सिद्धम् ।

रमायाः रमा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् पञ्चम्येक वचनविवक्षायां ङसि प्रत्येय रमा+ ङसि इति स्थिते ''लशक्वतद्धिते'' इति सूत्रेण ङारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण ङारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण ङारस्य लोपे 'उपदेशेडजनुनासिक इत्' इत्यनेन इकारस्य इत्संज्ञायां 'तस्यलोपः' इत्यनेन इकारस्य लोपे रमा+अस् इति स्थिते ''याडापः'' इत्यनेन याट् आगमे ''हलन्त्यम्'' इत्यनेन ट् इत्यस्य इत्संज्ञायां 'तस्यलोपः' इत्यनेन ट् इत्यस्य लोपे आद्यन्तावयवत्वेन रमा+या+अस् इति स्थिते ''अकः सवर्णे दीर्घः'' इत्यनेन सवर्णदीर्घे रमायास् इति स्थिते ''ससजुषो रुः'' इति सूत्रेण स् स्थाने रु आदेशे रमायारु इत्यवस्थायां ''उपदेशेऽजनुनासिक इत्'' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण उकारस्य लोपे रमायार् इति स्थिते ''खरवसानयोर्विसर्जनीयः'' इति सूत्रेण रेफ़स्य स्थाने विसर्गे रमायाः इति रूपं सिद्धम् ।

रमयोः रमा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् षष्ठीद्विवचनविवक्षायां ओस् प्रत्येय रमा+ओस् इति स्थिते 'आङि चापः' इत्यनेन आ स्थाने ए रमे+ओस् इति स्थिते ''एचोऽयवायावनः'' इत्यनेन ए स्थाने अय् आदेशे रम्+अय्+ओस् इति स्थिते 'ससजुषो रुः' इति सूत्रेण स् स्थाने रु आदेशे रम+अय्+ओरु इत्यवस्थायां 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्सञ्ज्ञायां 'तस्यलोपः' इति सूत्रेण उकारस्य लोपे रम्+अय्+ओर् इति स्थिते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफ़स्य स्थाने विसर्गे रमयोः इति रूपं सिद्धम् ।

**रमाणाम्** – रमा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् षष्ठीबहुवचनविवक्षायां आम् प्रत्ये रमा+आम् इति स्थिते ह्रस्वनधापो नुट् इत्यनेन नुट् आगमे हलन्त्यम् इत्यनेन ट् इत्यस्य इत्संज्ञायां तस्यलोपः इत्यनेन ट् इत्यस्य लोपे उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण उकारस्य लोपे आधन्तावयवत्वेन रमा+न्+आम् इति स्थिते नामि इति सूत्रेण दीर्घे रमानाम् इत्यवस्थायां अट्कुप्वाङ्नुम्व्ययायेऽपि इत्यनेन सूत्रेण णत्वे रमाणाम् इति रूपं सिद्धम् ।

**रमायाम्** – रमा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् सप्तम्येकवचनविवक्षायां ङि प्रत्यये रमा+ङि इति स्थिते लशक्वतद्धिते इति सूत्रेण ङकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण ङकारस्य लोपे रमा+इ इति स्थिते याडापः इत्यनेन याट् आगमे हलन्त्यम् इत्यनेन ट् इत्यस्य इत्संज्ञायां तस्यलोपः इत्यनेन ट् इत्यस्य लोपे रमा+या+इ इति स्थिते ङेराम्नधामीभ्यः इत्यनेन सूत्रेण आम् रमा+या+आम इति स्थिते अकः सवर्णे दीर्घः इत्यनेन सूत्रेण सवर्णदीर्घे रमायाम् इति रूपं सिद्धम् ।

**रमासु** – रमा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् सप्तमीबहुवचनविवक्षायां सुप् प्रत्य रमा+सुप् इति स्थिते हलन्त्यम् इत्यनेन सूत्रेण प् इत्यस्य इत्संज्ञायां तस्यलोपः इत्यनेन प् इत्यस्य लोपे रमा+सु वर्णसम्मेलने रमासु इति रूपं सिद्धम् ।

**रमाशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| रमा | रमे | रमाः | प्रथमा |
| रमाम् | रमे | रमाः | द्वितीया |
| रमया | रमाभ्याम् | रमाभिः | तृतीया |
| रमायै | रमाभ्याम् | रमाभ्यः | चतुर्थी |
| रमायाः | रमाभ्याम् | रमाभ्यः | पञ्चमी |
| रमायाः | रमयोः | रमाणाम् | षष्ठी |
| रमायाम् | रमयोः | रमासु | सप्तमी |
| हे रमे ! | हे रमे ! | हे रमाः ! | संबोधनम् |

एवम् दुर्गा, अम्बा, अम्बिका, सीता, पद्मा, इत्यादयः ग्राह्याः ।

**(291) सर्वनाम्नः स्याड्ढ्रस्वश्च 7-3-114**

**आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः याटोऽपवादः सर्वस्यै । सर्वस्याः । सर्वस्याः । एकादेशस्य पूर्वान्तत्वेन ग्रहणात् आमि सर्वानाम्नः ( सू. 217 ) इति सुट् । सर्वासाम् । सर्वस्याम् । सर्वयोः । सर्वासु । एवं विश्वादयोऽप्याबन्ताः ।**

**पदच्छेदः** – सर्वनाम्नः, स्याट्, ह्रस्वः, च चतुष्पदमिदं सूत्रम् ।

**अनुवृत्तिः** – अङ्गस्य, आपः, ङिति

**सूत्रप्रकारः** – विधिसूत्रम्

**सरलार्थः** सर्वनामसंज्ञकस्य आबन्तस्य शब्दस्य परतः यदि ङित् (एकवचने चतुर्थी पंचमी षष्ठी सप्तमी च) विभक्तयः भवन्ति तर्हि तासां विभक्तीनां स्थाने स्याट् इति आगमः भवति, आबन्तशब्दः ह्रस्वः अपि भवति ।

विशेषार्थः इदं सूत्रं याडापः इत्यस्य अपवादसूत्रं वर्तते । सामान्यतया ये आकारान्ताः शब्दाः सन्ति तथा स्त्रीलिङे सर्वादयः सर्वनामशब्दाः सन्ति तेषु ङित्सु आमि (षष्ठी बहुवचने) च भेदो भवति । अत्र च 'आमि अन्तादिवच्च' इत्युपस्थितौ आमि सर्वनाम्नः सुट् अनेन सुडागमो भवति ।

साधनिका

**सर्वस्यै** – सर्वा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् चतुर्थ्येकवचनविवक्षायां ङे प्रत्यये सर्वा+ङे इति स्थिते 'लशक्तद्धिते' इति सूत्रेण ङ् इत्यस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण ङ लोपे सर्वा+ए इत्यवस्थायां 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति सूत्रेण स्याट् आगमे एवं ह्रस्वे 'हलन्त्यम्' इति सूत्रेण ट् इत्यस्य इत्संज्ञायां 'तस्यलोपः' इत्यनेन सूत्रेण ट् इत्यस्यलोपे आद्यन्तावयवत्वेन सर्व+स्या+ए इति स्थिते 'वृद्धिरेचि'इत्यनेन सूत्रेण वृद्धौ सर्वस्यै इति रूपं सिद्धम् ।

**सर्वस्याः** सर्वा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् पञ्चमीएकवचनविवक्षायां ङसि प्रत्येय सर्वा+ङसि इति स्थिते ''लशक्तद्धिते इति सूत्रेण ङ् इत्यस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण ङ् लोपे उपदेशेऽजनुनासिक इत् इति सूत्रेण इकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण इकारस्य लोपे सर्वा+अस् इत्यवस्थायां सर्वनाम्नः स्याड्ढ्रस्वश्च इति सूत्रेण स्याट् आगमे एवं ह्रस्वे हलन्त्यम् इति सूत्रेण ट् इत्यस्य इत्संज्ञायां तस्यलोपः इत्यनेन सूत्रेण ट् इत्यस्य लोपे आधन्तावयवत्वेन सर्व+स्या+अस् इति स्थिते अकः सवर्णे दीर्घः इत्यनेन सवर्णदीर्घे सर्वस्यास् इति स्थिते ससजुषो रुः इति सूत्रेण स् स्थाने रु आदेशे सर्वस्यारु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे सर्वस्यार् इति स्थिते खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफ़स्य स्थाने विसर्गे सर्वस्याः इति रूपं सिद्धम् ।

**सर्वासाम्** – सर्वा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् षष्ठीबहुवचनविवक्षायां आम् प्रत्यये सर्वा+आम् इति स्थिते आमि सर्वनाम्नः सुट् इत्यनेन सुट् आगमे हलन्त्यम् इति सूत्रेण ट् इत्यस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन सूत्रेण ट् इत्यस्यलोपे 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण उकारस्य लोपे आद्यन्तावयवत्वेन सर्वा+स्+आम् वर्णसंमेलने सर्वासाम् इति रूपं सिद्धम् ।

**सर्वस्याम्** – सर्वा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् सप्तम्येकवचनविवायां ङि प्रत्येय सर्वा+ङि इति स्थिते 'ङेराम्नद्याम्नीभ्यः' इति सूत्रेण ङि स्थाने आम् सर्वा+आम् इति स्थिते 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति सूत्रेण स्याट् आगमे एवं ह्रस्वे 'हलन्त्यम्' इति सूत्रेण ट् इत्यस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन सूत्रेण ट् इत्यस्यलोपे आधन्तावयवत्वेन सर्व+स्या+आम अकः सवर्णे दीर्घः इत्यनेन सवर्णदीर्घे सर्वस्याम् इति रूपं सिद्धम् ।

**सर्वयोः** – सर्वा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् सप्तमी द्विवचनविवक्षायाम् ओस् प्रत्येय सर्वा+ओस् इति स्थिते 'आङिचापः' इति सूत्रेण आ स्थाने ए सर्वे+ओस् इति स्थिते 'एचोयवायावः' इत्यनेन सूत्रेण अय् आदेशे सर्व+अय्+ओस इति स्थिते ससजुषो रुः इति सूत्रेण स् स्थाने रु आदेशे सर्वयोरु इत्यवस्थायां 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे सर्वयोर् इति स्थिते खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफ़स्य स्थाने विसर्गे सर्वयोः इति रूपं सिद्धम् ।

**सर्वासु** – सर्वा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् सप्तमीबहुवचनविवक्षायां सुप् प्रत्येय सर्वा+सूप् इति स्थिते हलन्त्यम् इति सूत्रेण प् इत्यस्य इत्संज्ञायां तस्य लोपः इत्यनेन सूत्रेण प् इत्यस्यलोपे सर्वासु इति रूपं सिद्धम् ।

**सर्वाशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| सर्वा | सर्वे | सर्वाः | प्रथमा |
| सर्वाम् | सर्वे | सर्वाः | द्वितीया |
| सर्वया | सर्वाभ्याम् | सर्वाभिः | तृतीया |
| सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः | चतुर्थी |
| सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः | पञ्चमी |
| सर्वस्याः | सर्वयोः | सर्वासात् | षष्ठी |
| सर्वस्याम् | सर्वयोः | सर्वासु | सप्तमी |

**(292) विभाषा दिक्समासेबहुव्रीहौ 1-1-28**

**अत्र सर्वनामता वा स्यात् । उत्तरपूर्वस्यै - उत्तरपूर्वायै । दिङ्नामान्यन्तराले- (सू.845) इति प्रतिपदोक्तस्य दिक्समासस्य ग्रहणान्नेह । योत्तरा सा पूर्वा यस्या उन्मुग्धायास्तस्यै उत्तरपूर्वायै । बहुव्रीहिग्रहणं स्पष्टार्थम् । अन्तरस्यै शालायै । बाह्यायै इत्यर्थः । अपुरि इत्युक्तेर्नेह । अन्तरायै नगर्यै ।**

पदच्छेदः - विभाषा, दिक्समासे, बहुव्रीहौ त्रिपदमिदं सूत्रम् ।

समासः - दिशां समासः दिक्स्मासः तस्मिन् दिकस्मासे षष्ठीतत्पुरुषः ।

अनुवृत्तिः सर्वादीनि, सर्वनाम

सूत्रप्रकारः - संज्ञासूत्रम्

सरलार्थः - दिशावाचकानां शब्दानां बहुव्रीहिसमासविषये विकल्पेन सर्वादीनि सर्वनामानि इति सर्वनामसंज्ञा भवति ।

विशेषार्थः - दिशावाचिनां शब्दानां बहुव्रीहिसमासः अन्यपदार्थेनापि भवति किन्तु अत्र साक्षादुक्तानां दिशावाचिनां

शब्दानामेव ग्रहण कर्तव्यम् । अस्य प्रतिपदोक्तस्य समावेशः बहुव्रीहिसमासे तु उत्तरपूर्वायै इत्येव साधु । उत्तरपूर्वा अर्थात् या उत्तरा सा पूर्वा यस्याः सा । अस्य प्रतिपदोक्तस्य समावेशः बहुव्रीहिसमासे वर्तत एव तर्हि सूत्रे बहुव्रीहिपदमनावश्यकं भवति किन्तु अधिकस्पष्टतायै अत्र बहुव्रीहिपदं साधु । नगरी इत्यर्थकात् अन्तराशब्दात् स्याट् न भवति किन्तु बाह्यार्थकात् परिधानार्थकात् अन्तराशब्दाद्भवति, तस्य सर्वनामत्वेन स्वीकारात् ।

साधनिका

**उत्तरपूर्वस्यै** – उत्तरपूर्वा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् चतुर्थ्यैकवचनविवक्षायां ङे प्रत्येय उत्तरपूर्वा+ङे 'सर्वादीनि सर्वनामानि' इति सूत्रेण सर्वनामसंज्ञाप्राप्तौ तां प्रबाध्य विभाषा दिक्समासे बहुब्रीहौ इति सूत्रेण विकल्पेन सर्वनामसंज्ञायां 'लशक्तद्धिते' इति सूत्रेण ङ् इत्यस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण ङ् लोपे उत्तरपूर्वा+ए इत्यवस्थायां सर्वनाम्नः स्याड्ढ्स्वश्च इति सूत्रेण स्याट् आगमे एवं ह्रस्वे 'हलन्त्यम् इति सूत्रेण ट् त्यस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन सूत्रेण ट् इत्यस्यलोपे 'आद्यन्तावयवत्वेन' उत्तरपूर्व+स्या+ए इति स्थिते 'वृद्धिरेचि' इत्यनेन सूत्रेण वृद्धौ उत्तरपूर्वस्यै इति रूपं सिद्धम् ।

उत्तरपूर्वायै – उत्तरपूर्वा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् चतुर्थ्यैकवचनविवक्षायां ङे प्रत्येय उत्तरपूर्वा+ङे इति स्थिते 'लशक्तद्धिते' इति सूत्रेण ङ् इत्यस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण ङ् लोपे उत्तरपूर्वा+ए इत्यवस्थायां 'वृद्धिरेचि' इत्यनेन सूत्रेण वृद्धौ प्राप्तायां याडापः इति सूत्रेण याट् आगमे उत्तरपूर्वा+याट्+ए इति स्थिति 'हलन्त्यम्' इति सूत्रेण ट् इत्यस्य इत्संज्ञायां तस्य लोपः इत्यनेन सूत्रेण ट् इत्यस्यलोपे गाधन्तावयवत्वेन उत्तरपूर्वा+या+ए इति स्थिते 'वृद्धिरेचि' इत्येने सूत्रेण वृद्धौ उत्तरपूर्वायै इति रूपं सिद्धम् ।

अन्तरस्यै – अन्तरा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् चतुर्थ्यैकवचनविवक्षायां ङे प्रत्येय अन्तरा+ङे 'सर्वादीनि सर्वनामानि' इति सूत्रेण सर्वनामसंज्ञाप्राप्तौ तां प्रबाध्य 'विभाषा दिक्समासे बहुव्रीहौ' इति सूत्रेण विकल्पेन सर्वनामसंज्ञायां लशक्वतद्धिते इति सूत्रेण ङ् इत्यस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण ङ् लोपे अन्तरा+ए इत्यवस्थायां 'सर्वनाम्नः स्वाड्ढ्स्वश्च' इति सूत्रेण स्याट् आगमे एवं ह्रस्वे 'हलन्त्यम्' इति सूत्रेण ट् इत्यस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन सूत्रेण ट् इत्यस्यलोपे आधन्तावयवत्वेन अन्तर+स्या+ए इति स्थिते 'वृद्धिरेचि' इत्यनेन सूत्रेण वृद्धौ अन्तरस्यै इति रूपं सिद्धम् ।

अन्तरायै – अन्तरा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् चतुर्थ्यैकवचनविवक्षायां ङे प्रत्येय अन्तरा+ङे इति स्थिते 'लशक्वतद्धिते' इति सूत्रेण ङ् इत्यस्य इत्संज्ञायां 'तस्य लोपः इति सूत्रेण ङ लोपे अन्तरा+ए इत्यवस्थायां 'वृद्धिरेचि' इत्यनेन सूत्रेण वृद्धौ प्राप्तायां 'याडापः' इति सूत्रेण याट् आगमे अन्तर+याट्+ए इति स्थिते 'हलन्त्यम् इति सूत्रेण ट् इत्यस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन सूत्रेण ट् इत्यस्य लोपे आद्यन्तावयवत्वेन अन्तरा+या+ए इति स्थिते 'वृद्धिरेचि' इत्यनेन सूत्रेण वृद्धौ अन्तरायै इति रूपं सिद्धम् ।

---

**(293) विभाषा द्वितीयातृतीयाभ्याम् 7-3-115**

**आभ्यां ङितः स्याट् स्यादापश्च ह्रस्वः । इदं सूत्रं त्यक्तुं शक्यम् । तीयस्य ङित्सूपसंख्यानात् । द्वितीयस्यै-द्वितीयायै । द्वितीयस्याः द्वितीयायाः । द्वितीयस्याः द्वितीयायाः । द्वितीयस्याम् द्वितीयायाम् । शेषं रमावत् । एवं तृतीया । अम्बार्थनद्योर्ह्रस्वः ( सू. 267 ) । हे अम्ब । हे अक्क । हे अल्ल । असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न ( वा. 4592 ) हे अम्बाडे । हे अम्बाले । हे अम्बिके । जरा । जरसौ । शीभावात्परत्वाज्जरस् । आमि नुटः परत्वाज्जरस् । जरसामित्यादि । पक्षे हलादौ च रमावत् । इह पूर्वविप्रतिषेधेन शीभावं कृत्वा संनिपातपरिभाषाया अनित्यतां चाश्रित्य जरसी इति केचिदाहुः । तन्निर्मूलम् । यद्यपि जस्सादेशस्य स्थानिवद्भावेनाबन्ततामाश्रित्य औङ आपः ( सू. 287 ) आङि चापः ( सू. 289 ) याडाप ( सू 290 ) ह्रस्वनद्यापः ( सू. 208 ) ङेराम ( सू. 270 ) इति । पञ्चापि विधयः प्राप्ताः । एवं नस्त्रिशपृत्सु । तथाप्यनल्विधावित्युक्तेर्न भवन्ति । आ आप् इति प्रश्लिष्याकाररूपस्यैवापः सर्वत्र ग्रहणात् एवं हल्ड्याप् ( सू. 252 ) सूत्रेडपि आ आप् डी ई इति प्रश्लेषात् अतिखद्वः निष्कौशाम्बिरित्यादिसिद्धेदीर्धग्रहणं प्रत्याख्येयम् । न चैवमपि अतिखट्शय इत्यत्र स्वाश्रयमाकारत्वं स्थानिवद्भावेनाप्त्वं चाश्रित्य याट् स्यादिति वाच्यम् । आबन्तं यदङ्ग ततः परस्य आड्विधानात् । उपसर्जनस्त्रीप्रत्येय तदादिनियमात् । पदन्न ( सू. 228 ) इति नासिकाया नस् । नसः नसा । नोभ्यामित्यादि । पक्षे सुटि च रमावत् । निशाया निश् । निशः निशा ।**

---

पदच्छेदः – विभाषा, द्वितीयातृतीयाभ्याम् द्विपदमिदं सूत्रम् ।

समासः – द्वितीया च तृतीया च तयोरितरेतरयोगद्वन्द्वः, द्वितीयातृतीये ताभ्यां द्वितीयातृतीयाभ्याम् ।

अनुवृत्तिः ङिति, आपः, ह्रस्वः

सूत्रप्रकार: विधिसूत्रम्

सरलार्थ: – द्वितीया तथा तृतीया इत्यनयो: शब्दयो: परत: यदि ङित् (एकवचने चतुर्थी पंचमी षष्ठी सप्तमी च) विभक्तय: भवन्ति तर्हि तासां विभक्तीनां स्थाने स्याट् इति आगम: भवति । तथा च अङ्गीभूतस्य आकारस्य ह्रस्व: अपि भवति ।

वार्तिकार्थ: – असंयुक्ता ये डलकास्तद्धतां ह्रस्वो न – अत्रे वार्तिके उक्तं यत् असंयुक्तात् डकारात् लकारात् ककारात् वा परस्य ह्रस्व: न भवति ।

विशेषार्थ: – वस्तुतस्तु अजन्तपुँल्लिङ्गे आगतं यत् तीयस्य ङित्सुवा अर्थात् तीयप्रत्ययान्तानां शब्दानां परत: यदि ङित् विभक्तय: स्युस्तर्हि विकल्पेन सर्वनामसंज्ञा भवति, इति दृष्ट्या अस्य सूत्रस्य उपयोगिता नैव दृश्यते ।

साधनिका

**द्वीतियस्यै** द्वितीया इत्यस्मात् शब्दात् प्रातिपदिकत्वात् चतुर्थ्यैकवचनविवक्षायां ङे प्रत्येय द्वितीया+ङे विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानम् इति वार्तिकेन विकल्पेन सर्वनामसंज्ञायां लशक्वतद्धिते इति सूत्रेण ङ् इत्यस्य इत्संज्ञायां तस्य लोप: इति सूत्रेण ङ् लोपे द्वितीय+ए इत्यवस्थायां 'विभाषा द्वीतियातृतीयाभ्याम्' इति सूत्रेण स्याट् आगमे एवं ह्रस्वे 'हलन्त्यम्' इति सूत्रेण ट् इत्यस्य इत्संज्ञायां तस्य लोप: इत्यनेन सूत्रेण ट् इत्यस्यलोपे आधन्तावयवत्वेन द्वितीय+स्या+ए इति स्थिते 'वृद्धिरेचि' इत्यनेन सूत्रेण वृद्धौ द्वितीयस्यै इति रूपं सिद्धम् ।

**द्वितीयायै** – द्वितीया इत्यस्मात् शब्दात् प्रातिपदिकत्वात् चतुर्थ्यैकवचनविवक्षायां ङे प्रत्यये द्वितीया+ङे इति स्थिते 'लशक्वतद्धिते' इति सूत्रेण ङ् इत्यस्य इत्संज्ञायां 'तस्य लोप:' इति सूत्रेण ङ लोपे द्वितीया+ए इत्यवस्थायां 'वृद्धिरेचि' इत्यनेन सूत्रेण वृद्धौ प्राप्तायां 'याडाप:' इति सूत्रेण याट् आगमे द्वितीया+याट्+ए इति स्थिते 'हलन्त्यम्' इति सूत्रेण ट् इत्यस्य इत्संज्ञायां 'तस्य लोप:' इत्यनेन सूत्रेण ट् इत्यस्य लोपे आधन्तावयवत्वेन द्वितीया+या+ए इति स्थिते 'वृद्धिरेचि' इत्यनेन सूत्रेण वृद्धौ द्वितीयायै इति रूपं सिद्धम् ।

**द्वितीयस्या:** – द्वितीया इत्यस्मात् शब्दात् प्रातिपदिकत्वात् पश्चम्यैकवचनविवक्षायां ङसि प्रत्येय द्वितीया+ङसि इति स्थिते लशक्कतद्धिते इति सूत्रेण ङ् इत्यस्य इत्संज्ञायां तस्यलोप: इति सूत्रेण ङ लोपे उपदेशेङजनुनासिक इत् इति सूत्रेण इकारस्य इत्संज्ञायां तस्यलोप: इति सूत्रेण इकारस्य लोपे द्वितीया+अस् इत्यवस्थायां विभाषा द्वितीयातृतीयाभ्याम् इति सूत्रेण स्याट् आगमे एवं ह्रस्वे हलन्त्यम् इति सूत्रेण ट् इत्यस्य इत्संज्ञायां तस्य लोप: इत्यनेन सूत्रेण ट् इत्यस्य लोपे आधन्तावयवत्वेन द्वितीय+स्या+अस् इति स्थिते अक: सवर्णे दीर्घ: इत्यनेन सवर्णदीर्घे द्वितीयस्यास् इति स्थिते ससजुषो रु: इति सूत्रेण स् स्थाने रु आदेशे द्वितीयस्यारु इत्यवस्थायं उपदेशेऽजनुनासिक इत इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोप: इति सूत्रेण उकारस्य लोपे द्वितीयायार् इति स्थिते खरवसानयोर्विसर्जनीय: इति सूत्रेण रेफ़स्य स्थाने विसर्गे द्वितीयाया: इति रूपं सिद्धम् ।

**द्वितीयस्याम्-द्वितीयायाम्** – सप्तम्यैकवचनविवक्षायां द्वितीया+ङि इत्यत्र ङि स्थाने आम् द्वितीया+आम् इति स्थिते स्याडागमे एवं ह्रस्वे द्वितीय+स्या+आम् इत्यत्र सवर्णदीर्घे द्वितीयस्याम् इति रूपं सिद्धम् । सप्तम्यैकवचनविवक्षायां द्वितीया+ङि इत्यत्र ङि स्थाने आम द्वितीया+आम् इति स्थिते याट् आगमे द्वितीया+या+आम् इत्यत्र सवर्णदीर्घे द्वितीयायाम् इति रूपं सिद्धम् । शेषं रमावत् रूपाणि भवन्ति ।

**हे अम्ब** हे अम्बा+सु इति स्थिते 'अम्बार्थनधोह्रस्व:'' इति सूत्रेण ह्रस्वे हे अम्ब+सु इति स्थिते 'उपदेशेङजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां "तस्यलोप: इति सूत्रेण उकारस्य लोपे हे अम्ब+स् इति स्थिते 'एङ्ह्रस्वात् संबुद्धे:' इत्यनेन सूत्रेण स् इत्यस्य लोपे हे अम्ब इति रूपं सिद्धम् । तदनुसारमेव के अक्क, हे अल्ल इत्यादीनि रूपाणि भवन्ति ।

**हे अम्बाडे**:– हे अम्बाडे+सु इति स्थिते 'अम्बार्थनधोह्रस्व:' इति सूत्रेण ज़्स्वे प्राप्ते असंयुक्ता ये 'डलकास्तद्धतां ह्रस्वो न'' इति वार्तिकेन ह्रस्वनिषेधे हे अम्बाडे+सु इति स्थिते 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोप:म इति सूत्रेण उकारस्य लोपे हे अम्बाडे+स् इति स्थिते 'एङ्ह्रस्वात् संबुद्धे:' इत्यनेन सूत्रेण स् इत्यस्य लोपे हे अम्बाडे इति रूपं सिद्धम् ।

**जरा:** जरा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथममैकवचनविवक्षायां सुप्रत्येय जरा+सु इति स्थिते 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोप: इति सूत्रेण उकारस्य लोपे जरा+स् इति स्थिते हल्ङयाभ्योदीर्धात्सुतिस्यपृक्तं हल्' इति सूत्रेण स् लोपे जरा इति रूपं सिद्धम् ।

जरसौ–जरे: जरा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां औ प्रत्यये जरा+औ इति स्थिते ''जराया जरसन्यतरस्याम्' इत्यनेन सुत्रेण जरास्थाने जरस् आदेशे जरस्+औ वर्णसंमेलने जरसौ इति रूपं सिद्धम् । पक्षे जरा इत्यस्मात्

शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां औ प्रत्येय जरा+औ इति स्थिते औङ आपः इत्यनेन औस्थाने शी आदेशे जरा+शी इति स्थिते ''लशक्वतद्धिते इति सूत्रेण श् इत्यस्य इत्संज्ञायां 'तस्य लोपः इति सूत्रेण श् लोपे जरा+ई इति स्थिते गुणे जरे इति रूपं सिद्धम् ।

नसःनासिकाः – नासिका इत्यस्मात् शब्दात् प्रातिपदिकत्वात् द्वितीयाबहुवचनविवक्षायां शस् प्रत्यये नासिका+शस् इति स्थिते 'लशक्कतद्धिते' इति सूत्रेण शकारस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण शकारस्य लोपे नासिका+अस् इत्यवस्थायां पदन्नोमा... (सू. 228) इति सूत्रेण विकल्पेन नासिकास्थाने नस् आदेशे नस+अस् इति स्थिते 'ससजुषो रुः' इति सूत्रेण स् स्थाने रु आदेशे नस+अरु इत्यवस्थायां 'उपदेशेऽजनुनासिक इत्न' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण उकारस्य लोपे नस्+अर् इति स्थिते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफ़स्य स्थाने विसर्गे नसः इति रूपं सिद्धम् । नस् आदेशाभावे नासिकाः इति रूपं सिद्धम् ।

नसः नासिका इत्यस्मात् शब्दात् प्रातिपदिकत्वात् पञ्चम्येकवचनविवक्षायां ङसि प्रत्यये नासिका+ङसि इति स्थिते 'लशक्ततद्धिते' इति सूत्रेण ङ् इत्यस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण ङ लोपे 'उपदेशेऽजनुनासिक' इत् इति सूत्रेण इकारस्य इत्संज्ञायां तस्यलोपः' इति सूत्रेण इकारस्य लोपे नासिका+अस् इत्यवस्थायां 'पदन्नोमा'... (सू. 228) इति सूत्रेण विकल्पेन नासिका स्थाने नस् आदेशे नस्+अस् इति स्थिते सस्य रुत्वविसर्गे नसः इति रूपं सिद्धम् ।

नासिकायाः – नासिका इत्यस्मात् शब्दात् प्रातिपदिकत्वात् पश्चमी एकवचनविवक्षायां ङसि प्रत्यये नासिका+ङसि इति स्थिते 'लशक्वतद्धिते' इति सूत्रेण ङ् इत्यस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण ङलोपे 'उपदेशेऽजनुनासिक' इत् 'इति सूत्रेण इकारस्य इत्संज्ञायां' 'तस्य लोपः' इति सूत्रेण इकारस्य लोपे नासिका+अस् इत्यवस्थायां याडापः' इति सूत्रेण याट् आगमे नासिका+याट्+अस इति स्थिते हलन्त्यम्' इति सूत्रेण ट् इत्यस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन सूत्रेण ट् इत्यस्य लोपे आधन्तावयवत्वेन नासिका+या+अस् इति स्थिते 'अकः सवर्णे दीर्घः' इत्यनेन सवर्णदीर्घे नासिकायास् इति स्थिते 'ससजुषो रुः' इति सूत्रेण स् स्थाने रु आदेशे नासिकायारु इत्यवस्थायां 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण उकारस्य लोपे नासिकायार् इति स्थिते ''खरवसानयोर्विसर्जनीयः'' इति सूत्रेण रेफ़स्य स्थाने विसर्गे नासिकायाः इति रूपं सिद्धम् ।

**द्वितीयाशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| द्वितीया | द्वितीये | द्वितीयाः | प्रथमा |
| द्वितीयाम् | द्वितीये | द्वितीयाः | द्वितीया |
| द्वितीयया | द्वितीयाभ्याम् | द्वितीयाभिः | तृतीया |
| द्वितीयस्यै, द्वितीयायै | द्वितीयाभ्याम् | द्वितीयाभ्यः | चतुर्थी |
| द्वितीयस्याः,द्वितीयायाः | द्वितीयाभ्याम् | द्वितीयाभ्यः | पञ्चमी |
| द्वितीयस्याः,द्वितीयायाः | द्वितीययोः | द्वितीयानाम् | षष्ठी |
| द्वितीयस्याम्,द्वितीयायाम् | द्वितीययोः | द्वितीयासु | सप्तमी |
| हे द्वितीये । | हे द्वितीये । | हे द्वितीयाः | सम्बोधनम् |

**जराशब्दस्य रूपाणी**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| जरा | जरसौ, जरे | जरसः, जराः | प्रथमा |
| जरसम्, जराम् | जरसौ, जरे | जरसः, जराः | द्वितीया |
| जरसा, जरया | जराभ्याम् | जराभि. | तृतीया |
| जरसे, जरायै | जराभ्याम् | जराभ्यः | चतुर्थी |
| जरसः, जरायाः | जराभ्याम् | जराभ्यः | पञ्चमी |
| जरसः जरायाः | जरसोः, जरयोः | जरसाम्, जराणाम् | षष्ठी |
| जरसि, जरायाम् | जरसोः, जरयोः | जरासु | सप्तमी |
| हे जरे ! | हे जरसौ, हे जरे! | हे जरसः, हे जराः! | सम्बोधनम् |

**नासिकाशब्दस्य रूपाणी**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| नासिका | नासिके | नासिकाः | प्रथमा |
| नासिकाम् | नासिके | नसः, नासिकाः | द्वितीया |
| नसा, नासिकायाः | नोभ्याम्, नासिकाभ्याम् | नोभिः, नासिकाभिः | तृतीया |
| नसे, नासिकायाः | नोभ्याम्, नासिकाभ्याम् | नोभ्यः, नासिकाभ्यः | चतुर्थी |
| नसः नासिकायाः | नोभ्याम्, नासिकाभ्याम् | नोभ्यःनासिकाभ्यः | पञ्चमी |
| नसः, नासिकायाः | नसोः, नासिकयोः | नासाम्, नासिकानाम् | षष्ठी |
| नसि, नासिकायाम् | नसोः, नासिकयोः | नः सु, नासिकासु | सप्तमी |
| हे नासिके । | हे नासिके । | हे नासिकाः! | सम्बोधनम् |

**(294) व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः 8-2-36**

**व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशः स्याज्झलि पदान्ते च । षस्य जश्त्वेन डकारः । निड्भयाम् । निड्भिः । सुपि डः सि धुट (सू. 131) इति पक्षे धुट् । चर्त्वम् । तस्यासिद्धत्वात् । चयो द्वितीया (वा) इति टतयोष्ठथौ न । न पदान्ताट्टोः - (सू. 114) इति ष्टुत्वं न। निट्त्सु । निट्सु।**

पदच्छेदः व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां, षः द्विपदमिदं सूत्रम् ।

समासः व्रश्चश्च भ्रस्जश्च सृजश्च मृजश्च यजश्च राजश्च भ्राजश्च छश्च श् च तेषामितरेतरद्वन्दो व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशः, तेषां व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशाम् ।

अनुवृत्तिः - झलि, अन्ते, पदस्य

सूत्रप्रकारः - विधिसूत्रम्

सरलार्थः - यदि झल् प्रत्याहारः परतः भवति तर्हि वा पदान्ते व्रश्च, भ्रस्ज्, सृज्, मृज्, यज्, राज्, भ्राज् एतेषां धातूनाम्, छकारान्तानां शकारान्तानां च स्थाने षकारः अन्तादेशो भवति ।

**साधनिका**

**निड्भयाम्** - निशा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् तृतीयाद्विवचनविवक्षायां भ्याम् प्रत्येय निशा+भ्याम् इति स्थिते 'पददन्नोमा...' (सू.228) इति सूत्रेण विकल्पेन निशा स्थाने निश आदेशे निश्+भ्याम् इति स्थिते 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इत्यनेन सूत्रेण शकारस्य स्थाने षकारे निष्+भ्याम् इति स्थिते 'झलां जशोऽन्ते' इत्यनेन सूत्रेण जश्त्वेन डकारे निड्+भ्याम् वर्णसम्मेलने निड्मयाम् इति रूपं सिद्धम् ।

**निड्भिः** - निशा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् तृतीयाबहुवचनविवक्षायां भिस् प्रत्यये निशा+भिस् इति स्थिते 'पदन्नोमा...'(सू. 228) इति सूत्रेण विकल्पेन निशा स्ताने निश् आदेशे निश+भूस् इति स्थिते 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः इत्यनेन सूत्रेण शकारस्य स्थाने षकारे निष्+भिस् इति स्थिते 'झलां जशोऽन्ते इत्यनेन सूत्रेण जश्त्वेन डकारे निड्+भिस् इति स्थिते 'ससजुषो रुः इति सूत्रेण स् स्थाने रु आदेशे निड्+भिरु इत्यवस्थायां 'उपदेशेडजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः इति सूत्रेण उकारस्य लोपे निड्+भिर् इति स्थिते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफ़स्य स्थाने विसर्गे निड्भि इति रूपं सिद्धम् ।

**निट्त्सुः** - निशा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् सप्तमीबहुवचनविवक्षायां सुप् प्रत्यये निशा+सुप् इति स्थिते 'हलन्त्यम्' इति सूत्रेण पकारस्य इत्संज्ञायां 'तस्य लोपः इति सूत्रेण पकारस्य लोपे निशा+सु इति स्थिते 'पदन्नोमा... (सू. 228) इति सूत्रेण विकल्पेन निशा स्थाने निश् आदेशे निश्+सु इति स्थिते 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इत्यनेन सूत्रेण शकारस्य स्थाने षकारे निष्+सु इति स्थिते 'झलां जशोडन्ते' इत्यनेन सूत्रेण जश्त्वेन डकारे निड्+सु इति स्थिते 'डः सि घुट्' इति सूत्रेण घुट् आगमे 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण उकारस्य लोपे 'हलन्त्यम्' इति सूत्रेण ट् इत्यस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन सूत्रेण ट् इत्यस्यलोपे आद्यन्तावयवत्वे निड्+ध्+सु इति स्थिते 'खरि च' इति सूत्रेण चर्त्वेन ट् एवं त् निट्+त्+सु वर्णसंमेलने निट्त्सु इति रूपं सिद्धम् । धुडागमाभावे निद्धु इति रूपं सिद्धम् ।

**निशाशब्दस्य रूपाणी**

| **एकवचन** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| निशा | निशे | निशाः | प्रथमा |
| निशाम् | निशे | निशः,निशाः | द्वितीया |
| निशा, निशया | निड्भ्याम, निशाभ्याम् | निड्भिः, निशाभिः | तृतीया |
| निशे, निशायै | निड्भ्याम, निशाभ्याम् | निड्भ्य, निशाभ्यः | चतुर्थी |
| निशः,निशायाः | निड्भ्याम, निशाभ्याम् | निड्भ्यः, निशाभ्यः | पञ्चमी |
| निशः,निशायाः | निशोः, निशयोः | निशाम्, निशानाम् | षष्ठी |
| निशि, निशायाम् | निशोः, निशयोः | निट्त्सु, निद्सु, निशासु | सप्तमी |
| हे निशे ! | हे निशे ! | हे निशाः! | सम्बोधनम् |

**(295) षढोः कः सि 8-2-41**

**षस्य स्य च कः स्यात्सकारे परे । इति तु न भवति जश्त्वं प्रत्यसिद्धत्वात् । केचितु व्रश्चादिसूत्रे दादेर्धातोः ( सू. 324 ) इति सूत्रात् धातोः इत्यनुवर्तयन्ति । तन्मते जश्त्वेन जकारे । निजभ्याम् । निज्भिः जश्त्वम् । श्चुत्वम् । चर्त्वम् । निच्शु । निच्छु । चोः कुः ( सू. 378 ) इति कुत्वं तु न भवति । जश्त्वस्यासिद्धत्वात् । ( मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शसादौ वा वा )। पृतः । पृता । पृद्भ्याम् । पक्षे सुटि च रमावत् । गोपा विश्वपावत् । मतिः प्रायेण हरिवत् । स्त्रीत्वान्नत्वाभावः । मतीः । नात्वं न । मत्या ।**

**पदच्छेदः** - षढोः, कः, सि त्रिपदमिदं सूत्रम् ।

**समासः** - षश्च ढ् च तयोरितरेतरयोगद्वन्द्वः षढौ, तयोः षढोः ।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - यदा सकारः परतः भवति तदा षकारस्य ढकारस्य च स्थाने ककारः भवति ।

**वार्तिकार्थः** - (मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शसादौ वा) यदि शसादि विभक्तिः परतः भवति तर्हि मांसशब्दस्य स्थाने मांसु, पृतनाशब्दस्य स्थाने पृत् तथा च सानुशब्दस्य स्थाने स्नु इत्यादेशाः भवन्ति ।

**विशेषार्थः** - सूत्रं स्वत एव पूर्णम् । अत्र षकारढकारौ स्थानिनौ, ककारश्च आदेशः, सकारस्य पश्चाद्वर्तित्त्वं निमित्तम् ।

**साधनिका**

**निज्भ्याम्** - निशा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् तृतीयाद्विचनविवक्षायां भ्याम् प्रत्यये निशा+भ्याम् इति स्थिते 'पदन्नोमा...'' (सू. 228) इति सूत्रेण विकल्पेन निशा स्थाने निश् आदेशे निश+भ्याम् इति स्थिते 'झलां जशोऽन्ते' इत्यनेन सूत्रेण जश्त्वेन जकारे निज्+भ्याम् वर्णसम्मेलने निजभ्याम् इति रूपं सिद्धम् । तदनुसारमेव निज्भिः रूपस्य सिद्धिः भवति ।

निच्शु, निच्छुः - निशा इत्यस्मात् शब्दात् प्रातिपदिकत्वात् सप्तमीबहुवचनविवक्षायां सुप् प्रत्येय निशा+सुप् इति स्थिते 'हलन्त्यम्' इति सुत्रेण पकारस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण पकारस्य लोपे निशा+सु इति स्थिते 'पदन्नोमा...' (सू. 228) इति सूत्रेण विकल्पेन निशा स्थाने निश् आदेशे निश्+सु इति स्थिते 'झलां जशोऽन्ते' इत्यनेन सूत्रेण जश्त्वेन जकारे निज्+सु इति स्थिते ''स्तोः श्चुना श्चुः इति सूत्रेण श्चुत्वेन शकारे निज्+शु इति स्थिते खरि च इत्यनेन सूत्रेण चर्त्वेन चकारे निच्+शु इति स्थिते 'शश्छोडटि' इत्यनेन विकल्पेन छकारे निच्छु इति रूपं सिद्धम् । छत्वस्याभावे निच्शु रूपस्य सिद्धिः भवति ।

पृतः, पृतनाः पृतना इत्यस्मात् शब्दात् प्रातिपदिकत्वात् द्वितीयाबहुवचनविवक्षायां शस् प्रत्यये पृतना+शस् इति स्थिते 'लशक्कतद्धितेन' इति सूत्रेण शकारस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण शकारस्य लोपे पृतना+अस् इति स्थिते 'मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः' शासादौ वा इत वार्तिकेन पृतना स्थाने पृत् आदेशे पृत्+अस् इति स्थिते 'नससजुषो रुः' इति सूत्रेण स् स्थाने रु आदेशे पृत्+अरु इत्यवस्थायां 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्यलोप' इति सूत्रेण उकारस्य लोपे पृत्+अर् इति स्थिते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफ़स्य स्थाने विसर्गे पृतः इति रूपं सिद्धम् । पक्षे पृतना+अस् इत्यत्र सवर्णदीर्घे एवं सस्य रुत्वविसर्गे पृतनाः इति ।

पृताः पृतना इत्यस्मात् शब्दात् प्रातिपदिकत्वात् तृतीयैकवचनविवक्षायां टा प्रत्येय पृतना+टा इति स्थिते चुड़ इति सूत्रेण टकारस्य इत्संजायां 'तस्य लोपः' इति सूत्रेण टकारस्य लोपे पृतना+आ इति स्थिते 'मांसपृतनासानूनां मांस्पृत्रुवो वाच्याः'' 'शासादौ वा'' इति वार्तिकेन पृतना स्थाने पृत् आदेशे पृत्+आ वर्णसंमेलने पृता इति रूपं सिद्धम् ।

पृद्भ्याम् : पृतना इत्यस्मात् शब्दात् प्रातिपदिकत्वात् तृतीयाद्विवचनविवक्षायां भ्याम् प्रत्यये पृतना+भ्याम् इति स्थिते 'मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शासादौ व' इति वार्तिकेन पृतना स्थाने पृत् आदेशे पृत्+भ्याम् इति स्थिते 'झलां जशोऽन्ते' इत्यनेन सूत्रेण अश्त्वेन पृद्+भ्याम् वर्णसंमेलने पृद्भ्याम् इति रूपं सिद्धम् ।

**पृतनाशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| पृतना | पृतने | पृतनाः | प्रथमा |
| पृतनाम् | पृतने | पृतः, पृतनाः | द्वितीया |
| पृता, पृतनया | पृद्भ्याम्, पृतनाभ्याम् | पृद्भिः, पृतनाभिः | तृतीया |
| पृते, पृतनायै | पृद्भ्याम्, पृतनाभ्याम् | पृद्भ्यः पृतनाभ्यः | चतुर्थी |
| पृतः, पृतनायाः | पृद्भ्याम्, पृतनाभ्याम् | पृद्भ्यः, पृतनाभ्यः | पञ्चमी |
| पृतः, पृतनायाः | पृतः, पृतनयोः | पृताम्, पृतनानाम् | षष्ठी |
| पृति, पृतनायाम् | पृतः, पृतनयोः | पृत्सु, पृतनासु | सप्तमी |
| हे पृतने ! | हे पृतने ! | हे पृतनाः! | सम्बोधनम् |

**(296) ङिति ह्रस्वश्च 1-4-6**

**इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ चेवर्णोवर्णो स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे । आण् नद्याः ( सू. 286 ) । मत्यै मतये । मत्याः मतेः । मत्याः मतेः । नदीत्वपक्षे औत् ( सू. 256 ) इति ङेरौत्त्वे प्राप्ते ।**

पदच्छेदः - ङिति, ह्रस्व, च त्रिपदमिदं सूत्रम् ।

अनुवृत्तिः - यू, स्त्राख्यौ, नदी, इयङुवङस्थान, अस्त्री, वा

सूत्रप्रकारः - संज्ञासूत्रम्

सरलार्थः - यदा ङि त् (एकवचने चतुर्थी पंचमी षष्ठी सप्तमी च) विभक्त्यः परतः भवन्ति तदा स्त्रीशब्दमन्तरेण नित्यस्त्रीलिङ्गे विद्यमानस्य इयङः उवङ-श्च स्थानिनः ईकारस्य ऊकारस्य तथा च वर्तमानस्त्रीलिङ्गे विद्यमानस्य इकारस्य उकारस्य च विकल्पेन नदीसंज्ञा भवति ।

विशषार्थः - इह हि स्त्रीलिङ्गं द्विविधं बोध्यम् । वर्तमानस्त्रीलिङ्गं नित्यस्त्रीलिङ्गञ्च । ईकारान्ताः ऊकारान्ताः शब्दाः नित्यस्त्रीलिङ्गाः, इकारान्ताः उकारान्ताः शब्दाः वर्तमानस्त्रीलिङ्गाः ।

साधनिका

मत्यै, मतये: - मति इत्यस्मात् शब्दात् प्रातिपदिकत्वात् चतुर्थ्यैकवचनविवक्षायां ङे प्रत्यये मति+ङे इति स्थिते लशक्वतद्धिते इति सूत्रेण ङ् इत्यस्य इत्संत्रायां तस्यलोपः इति सूत्रेण ङ् इत्यस्य लोपे मति+ए इति स्थिते ङिति ह्वश्च इत्यनेन विकल्पेन नदीसंज्ञायाम् आण्नद्याः इत्यनेन आट् आगमे अनुबन्धलोपे मति+आ+ए इति स्थिते आटश्च इत्यनेन वृद्धिः मति+ए इति स्थिते इको यणचि इत्यनेन यणादेशे मत्+य्+ए वर्णसंमेलन मत्यै इति रूपं सिद्धम् । पक्षे मति+ए इत्यत्र गुणे मते+ए अयादेशे मतये इति रूपं सिद्धम् ।

मत्याः, मतेः :- मति इत्यस्मात् शब्दात् प्रातिपदिकत्वात् पञ्चम्यैकवचनविवक्षायां ङसि प्रत्यये मति+ङसि इति स्थिते लशक्वतद्धिते इति सूत्रेण ङ् इत्यस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण ङ् लोपे उपदेशेऽजनुनासिक इत् इति सूत्रेण इकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण इकारस्य लोपे मति+अस् इति स्थिते ङिति ह्रस्वश्च इत्यनेन विकल्पेन नदीसंज्ञायाम् आण्नद्याः इत्यनेन आट् आगमे अनुबन्धलोपे मति+आ+अस् इति स्थिते आटश्च इत्यनेन वृद्धिः मति+आस् इति स्थिते इको यणचि इत्यनेन यणादेशे मत्+य्+आस् इति स्थिते ससजुषो रुः इति सूत्रेण स् स्थाने रु आदेशे मत्+य्+आरु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे मत्+य्+आर् इति स्थिते खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफ़स्य स्थाने विसर्गे मत्याः इति रूपं सिद्धम् । पक्षे मति+अस् इत्यत्र गुणे मते+अस् इत्यत्र पूर्वरूपे मतेस् सस्य रुत्वविसर्गे मतेः इति रूपं सिद्धम् ।

((297) इदुद्भ्याम् 7-3-117

नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेराम् स्यात् । पक्षे अच्च घेः (सू. 247) । मत्याम् मतो । एवं श्रुतिस्मृत्यादयः।

पदच्छेदः - इदुद्भ्याम् एकपदमिदं सूत्रम् ।

**समासः** इच्च उच्च इदुतौ, ताभ्याम् इदुद्भ्याम्, इतरेतरद्वन्द्वः ।

**अनुवृत्तिः** - नदी, ङेः, आम्

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - नदीसंज्ञकस्य इकारस्य उकारस्य परतः यदि ङि (सप्तमी विभक्तिः एकवचनम्) भवति, तर्हि ङे स्थाने आम् आदेशः भवति ।

**साधनिका**

**मत्याम्, मतौ :** मति इत्यस्मात् शब्दात् प्रातिपदिकत्वात् सप्तम्यैकवचनविवक्षायां ङि प्रत्यये मति+ङि इति स्थिते ङिति ह्रस्वश्च इत्यनेन विकल्पेन नदीसंज्ञायाम् इदुद्भ्याम् इति सूत्रेण ङि स्थाने आम् मति+आम् इति स्थिते आण्नद्याः इत्यनेन आट् आगमे अनुबन्धलोपे मति+आ+आम् इति स्थिते आटश्च इत्यनेन वृद्धिः मति+आम् इति स्थिते इको यणचि इत्यनेन यणादेशे मत्+य्+आम् वर्णसंमेलने मत्याम् इति रूपं सिद्धम्। पक्षे मति+इ इत्यत्र अच्च घेः इत्यनेन औ मत+औ वृद्धिः मतौ इति रूपं सिद्धम् ।

**मतिशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| मतिः | मती | मतयः | प्रथमा |
| मतिम् | मती | मतीः | द्वितीया |
| मत्या | मतिभ्याम् | मतिभिः | तृतीया |
| मत्यै, मतये | मतिभ्याम् | मतिभ्यः | चतुर्थी |
| मत्याः, मतेः | मतिभ्याम् | मतिभ्यः | पञ्चमी |
| मत्याः, मतेः | मत्योः | मतीनाम् | षष्ठी |
| मत्याम्, मतौ | मत्योः | मतिषु | सप्तमी |
| हे मते ! | हे मती ! | हे मतयः ! | सम्बोधनम् |

(298) त्रिचतुरोः स्त्रियां तिसृचतसृ 7-2-99

स्त्रीलिङ्गयोरेतयोरेतावादेशौ स्तो विभक्तो परतः, ।

पदच्छेदः त्रिचतुरोः, स्त्रियाम्, तिसृचतसृ त्रिपदमिदं सूत्रम् ।

**समासः** त्रिश्च, चतुश्च तयोरितरेतरद्वन्द्व, त्रिचतुरौ तयोः त्रिचतुरोः । तिसु च चतसृ तयोः समाहारद्वन्द्व ।

**अनुवृत्तिः** - विभक्तौ

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - यदि स्वादिविभक्तिः परतः भवति तर्हि स्त्रीलिङ्गे विद्यमानस्य त्रिशब्दस्य चतुःशब्दस्य च स्थाने क्रमशः तिसृ एवं चतसृ एतौ आदेशौ भवतः ।

(299) अचि र ऋतः 7-2-100

तिसृ चतसृ एतयोर्ग कारस्य रेफादेशः स्यादचि । गुणदीर्घोत्त्वानामपवादः । तिस्रः । तिस्रः । तिसृभिः । तिसृभ्यः । तिसृभ्यः । आमि नुमचिर (वा) इति नुट् ।

**पदच्छेदः** - अचि, रः, ऋतः त्रिपदमिदं सूत्रम् ।

**अनुवृत्तिः** - तिसृचतसृ

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - यदा अच् परतः भवति, तदा तिसृचतसृशब्दयोः ऋकारस्य स्थाने रेफादेशः भवतिः ।

**विशेषार्थः** - इदं सूत्रं ऋतो ङि सर्वनामस्थानयोः इत्यस्य गुणकार्यस्य प्रथमयोः पूर्वसवर्णः इत्यस्य दीर्घस्य तथा च ऋत् उत् इत्यस्य उकारस्य बाधकं वर्तते ।

**साधनिका**

**तिस्रः** – त्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाबहुवचनविवक्षायां जस् प्रत्यये त्रि+जस् इति स्थिते चुटू इति सूत्रेण ज् इत्यस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण ज् इत्यस्य लोपे त्रि+अस् इति स्थिते 'त्रिचतुरोः स्त्रियां' तिसृचतसृ इत्यनेन सूत्रेण त्रि स्थाने तिसृ आदेशे तिसृ+अस् इत्यत्र पूर्वसवर्णदीर्घे प्राप्ते तं प्रबाध्य ऋतो ङिसर्वनामस्थानयोः इत्यनेन गुणे प्राप्ते तं प्रबाध्य 'अचि र ऋतः' इत्यनेन ऋकारस्य स्थाने र् आदेशे तिस्+र्+अस् इति स्थिते 'ससजुषो रुः' इति सूत्रेण स् स्थाने रु आदेशे तिस्+र्+अरु इत्यवस्थायां 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण उकारस्य लोपे तिस्+र्+अर् इति स्थिते 'खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफ़स्य स्थाने विसर्गे **तिस्रः** इति रूपं सिद्धम्

**तिसृभिः** – त्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् तृतीयाबहुवचनविवक्षायां भिस् प्रत्यये त्रि+भिस् इति स्थिते 'त्रिचतुरोः तिसृचतसृ इत्यनेन सूत्रेण त्रि स्थाने तिसृ आदेशे तिसृ+भिस इति स्थिते 'ससजुषो रुः' इति सूत्रेण स् स्थाने रु आदेशे तिसृ+भिरु इत्यवस्थायां 'उपदेशेऽजनुनासिक इत्'' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण उकारस्य लोपे तिसृ+भिर् इति स्थिते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफ़स्य स्थाने विसर्गे तिसृभिः इति रूपं सिद्धम् ।

**तिसृभ्यः** त्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् तृतीयाबहुवचनविवक्षायां भ्यस् प्रत्येय त्रि+भ्यस् इति स्थिते 'त्रिचतुरोः स्त्रियां' तिसृचतसृ इत्यनेन सूत्रेण त्रि स्थाने तिसृ आदेशे तिसृ+भ्यस् इति स्थिते 'ससजुषो रुः' इति सूत्रेण स् स्थाने रु आदेशे तिसृ+भ्यरु इत्यवस्थायां 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण उकारस्य लोपे तिसृ+भ्यरु इति स्थिते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफ़स्य स्थाने विसर्गे तिसृभ्यः इति रूपं सिद्धम् ।

---

**(300) न तिसृचतसृ 6-4-4**

**एतयोर्नामि दीर्घो न स्यात् । तिसृणाम् । तिसृषु । स्त्रियाम् स्त्रियाम् इति त्रिचतुरोर्विशेषणान्नेह । प्रियास्त्रयस्त्रीणि वा यस्याः सा प्रियत्रिः । मतिवत् । आमि तु प्रियत्रयाणाम् इति विशेषः प्रियास्तिस्रो यस्य सः इति विग्रहे तु प्रयतिसा । प्रियतिस्रौ । प्रियतिस्रः । प्रियतिस्रमित्यादि । प्रियास्तिस्रो यस्य तत्कुलं प्रियत्रि । सोर्लुका ( सू. 311 ) लुप्तत्वेनवेन प्रत्ययलक्षणाभावन्न तिस्रादेशः । न लुमता- ( सू. 263 ) इति निषेधस्यानित्यत्वापक्षे नुम्रभावौ । प्रियतिस्रा । प्रियतिसृणेत्यादि । द्वेरत्वे सत्याप् । द्वे । द्वे । द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम । द्वयोः । द्वयोः । गौरी गौर्यौ । गौर्यः । नदीकार्यम् । हे गौरि । गौर्ये इत्यादि । एवं वाणीनघादयः । प्रातिपदिकग्रहणे लिङ्विशिष्टस्यापि ग्रहणादनङिणिद्वद्भावे च प्राप्ते । विभक्तौ लिङ्विशिष्टाग्रहणम् ( वा ) सखी । सखी । सख्यः इत्यादि गौरीवत् । अङ्यन्तत्वान्न सुलोपः । लक्ष्मीः । शेषं गौरीवत् । एवं तरीतर्त्यादयः । स्त्री । हे स्त्रि ।**

---

**पदच्छेदः** – न, तिसृचतसृ द्विपदमिदं सूत्रम् ।

**समासः** – तिसृ च चतसृ च तयोः समाहारद्वन्द्वः तिसृचतसृ ।

**अनुवृत्तिः** – दीर्घः, नामि

**सूत्रप्रकारः** – विधिसूत्रम् (निषेधविधायकम्)

**सरलार्थः** – यदि नाम् (नुटा सहितः आम्) परतः भवति, तर्हि तिसृचतसृशब्दयोः दीर्घः न भवति ।

वार्तिकार्थः – रत्वात्पूर्वविप्रतिषेधेन नुम्  र् – आदेशं अपेक्ष्य पूर्वविप्रतिषेधात् नुम् भवति ।

**परिभाषार्थः** – विभक्तौ लिङ्गविशिष्टाग्रहणम् – विभक्तौ लिङ्गविशिष्टस्य ग्रहणं न भवति । अत्र हि प्रातिपदिकस्य यदा ग्रहणं भवति तदा लिङ्गविशिष्टस्यापि ग्रहणं भवति येन च अनङ् अपि भवति, णिद्धद्भावेऽपि भवति । तस्मादत्र कथितं यत् विभक्तौ लिङ्गविशिष्टस्य ग्रहणं न भवति ।

साधनिका –

**तिसृणाम्** :– त्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् षष्ठीबहुवचनविवक्षायां आम प्रत्यये त्रि+आम् इति स्थिते 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इत्यनेन सूत्रेण त्रि स्थाने तसृ आदेशे तिसृ+आम् इति स्थिते 'ह्रस्वनद्यापो नुट्' इति सूत्रेण नुट् आगमे प्राप्ते 'अचि र ऋतः' इति सूत्रेण रेफ़ादेशे प्राप्ते 'नुमचिरतृज्वद्भावेभ्यो नुट्' 'पूर्वविप्रतिषेधेन' इति वार्तिकेन नियमेन नुट् अनुबन्धलोपे न् आधन्तवयवत्वेन तिसृ+न्+आम् इति स्थिते नामि इत्यनेन सूत्रेण दीर्घे प्राप्ते न तिसृचतसृ इति सूत्रेण निषेधे ऋवर्णान्नस्य णत्वं वाच्यम् इत्यनेन णत्वे तिसृ+ण्+आम् वर्णसंमेलने तिसृणाम् इति रूपं सिद्धम्

**तिसृषु** – त्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् षष्ठीबहुवचनविवक्षायां सुप् प्रत्यये त्रि+सुप् इति स्थिते 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इत्यनेन सूत्रेण त्रि स्थाने तिसृ आदेशे तिसृ+सुप् इति स्थिते प् इत्यस्य लोपे तिसु+सु इत्यत्र षत्वे तिसृषु

इति रूपं सिद्धम् ।

**प्रियत्रिः** प्रियास्त्रयत्रीणि वा यस्याः सा प्रियत्रिः । प्रियत्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सु प्रत्यये प्रियत्रि+सु इति स्थिते 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण उकारस्य लोपे प्रियत्रि+स् इति स्थिते ससजुषो रुः इति सूत्रेण स् स्थाने रु आदेशे प्रियत्रि+रु इत्यवस्थायां 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण उकारस्य लोपे प्रियत्रि+र् इति स्थिते खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफ़स्य स्थाने विसर्गे प्रियत्रिः इति रूपं सिद्धम् ।

**प्रियत्रयाणाम् :** प्रियत्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् षष्ठीबहुवचनविवश्रायां आम् प्रत्यये प्रियत्रि+आम् इति स्थिते त्रेस्त्रयः इति सूत्रेण त्रि स्थाने त्रय आदेशे प्रियत्रय+आम् इति स्थिते 'ह्रस्वनद्यापो नुट्' इति सूत्रेण नुट् आगमे 'हलन्त्यम्' इति सूत्रेण टकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण टकारस्य लोपे 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे आधन्तावयवत्वेन प्रियत्रय+न्+आम् नामि इति सूत्रेण दीर्घे, णत्वे प्रियत्रयाणाम् इति रूपं सिद्धम् ।

**प्रियतिसा** प्रियत्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सु प्रत्यये प्रियत्रि+सु इति स्थिते त्रिचतुरोः स्त्रियां तिसृचतसृ इत्यनेन सूत्रेण त्रि स्थाने तिसृ आदेशे प्रियतिसृ+सु इति स्थिते 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण उकारस्य लोपे प्रियतिसृ+स् इति स्थिते 'ऋदुशनस्पुरुदंसोऽनेहसां च' इत्यनेन अनङ् प्रियतिसन्+स् इत्यत्र सर्वनामस्थाने चासंबुद्धौ इत्यनेन उपधादीर्धे, सलोपे, नलोपे प्रियतिसा इति रूपं सिद्धम्

**प्रियतिस्त्रौ :-** प्रियत्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां औ प्रत्यये प्रियत्रि+औ इति स्थिते 'त्रिचतुरोः स्त्रियां तिसृचतसृ इत्यनेन सूत्रेण त्रि स्थाने तिसृ आदेशे प्रियतिसृ+औ इति स्थिते इको यणचि इत्यनेन यणादेशे प्राप्ते तं प्रबाध्य 'ऋतो ङिसर्वनामस्थानयोः इत्यनेन गुणे प्राप्ते तं प्रबाध्य 'अचि र ऋतः इत्यनेन ऋकारस्य स्थाने र् आदेशे प्रियतिस्+र्+औ वर्णसंमेलने प्रियतिस्त्रौ इति रूपं सिद्धम्

**प्रियतिस्त्रः** - प्रियत्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाबहुवचनविवक्षायां जस् प्रत्यये प्रियत्रि+जस् इति स्थिते इति स्थिते चुटू इति सूत्रेण ज् इत्यस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण ज् इत्यस्य लोपे प्रियत्रि+अस् इति स्थिते 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इत्यनेन सूत्रेण त्रि स्थाने तिसृ आदेशे प्रियतिसृ+अस् इति स्थिते 'इको यणचि' इत्यनेन यणादेशे प्राप्ते तं प्रबाध्य 'ऋतो ङिसर्वनामस्थानयोः' इत्यनेन गुणे प्राप्ते तं प्रबाध्य 'अचि र ऋतः' इत्यनेन ऋकारस्य स्थाने र् आदेशे प्रियतिस्+अस् इति स्थिते 'ससजुषो रुः' इति सूत्रेण स् स्थाने रु आदेशे प्रियतिस्+र्+अरु इत्यवस्थायां 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण उकारस्य लोपे प्रियतिस्+र्+अर् इति स्थिते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफ़स्य स्थाने विसर्गे प्रियतिस्त्रः इति रूपं सिद्धम् ।

**प्रियतिसृणी** - प्रियत्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां औ प्रत्यये प्रियत्रि+औ इति स्थिते 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इत्यनेन सूत्रेण त्रि स्थाने तिसृ आदेश प्रियतिसृ+औ इति स्थिते 'नपुंसकाच्च' इत्यनेन औ स्थाने शी आदेशे प्रियतिसृ+शी इति स्थिते 'लशक्वतद्धिते' इति सूत्रेण शकारस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण शकारस्य लोपे प्रियतिसृ+ई इति स्थिते 'नपुंसकस्य झलचः' इत्यनेन नुमागमे प्राप्ते रादेशात् पूर्वविप्रतिषेधेन नुम् इत्यनेन वार्तिकेन नुम् अनुबन्धलोपे आद्यन्तावयवत्वेन प्रियतिसृ+न्+ई इति स्थिते णत्वे प्रियतिसृ+ण+ई वर्णसंमेलने प्रियतिसृणी इति रूपं सिद्धम्

**द्विशब्दवत् नित्यद्विवचनान्तम् ।** द्वे, द्वे, द्वाभ्याम्, द्वाभ्याम्, द्वाभ्याम, द्वयोः द्वयोः

**द्वे :-** द्वि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां औ प्रत्यये द्वि+औ इति स्थिते 'त्यदादीनामः' इत्यनेन अत्वे 'अजाद्यतष्टाप्' इत्यनेन टाप् अनुबन्धलोपे सवर्णदीर्घे द्वा+औ इति स्थिते 'औङ आपः' इति सूत्रेण औ स्थाने शी आदेशे द्वा+शी इति स्थिते 'लशक्वतद्धिते' इति सूत्रेण शकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण शकारस्य लोपे द्वा+ई इति स्थिते गुणे द्वे इति रूपं सिद्धम् ।

**द्वाभ्याम् :** - द्वि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् तृतीयाद्विवचनविवक्षायां भ्याम् प्रत्यये द्वि+भ्याम् इति स्थिते 'त्यदादीनामः' इत्यनेन अत्वे अजाद्यतष्टाप् इत्यनेन टाप् अनुबन्धलोपे सवर्णदीर्घे द्वा+भ्याम् वर्णसंमेलने इति रूपं सिद्धम् ।

**द्वयोः** – द्वि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् षष्ठीद्विवचनविवक्षायां ओस् प्रत्यये द्वि+ओस् इति स्थिते 'त्यदादीनामः' इत्यनेन अत्वे 'अजाद्यतष्टाप्' इत्यनेन टाप् अनुबन्धलोपे सवर्णदीर्धे द्वा+ओस् इति स्थिते 'आङि चापः' इत्यनेन एत्वे द्वे+ओस् इति स्थिते 'एचोऽयवायावः' इत्यनेन अयादेशे द्वय्+ओस् इति स्थिते 'ससजुषो रुः' इति सूत्रेण स् स्थाने रु आदेशे द्वय्+ओरु इत्यवस्थायां 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण उकारस्य लोपे द्वय्+ओर् इति स्थिते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफ़स्य स्थाने विसर्गे द्वयोः इति रूपं सिद्धम् ।

**गौरी** – गौरी इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सु प्रत्यये गौरी+सु इति स्थिते सुलोपे गौरी इति रूप सिद्धम् ।

**गौर्य्यौ** – गौरी इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां औ प्रत्यये गौरी+औ इति स्थिते 'इको यणचि' इत्यनेन यणादेशे गौर+य्+औ ति स्थिते 'अचो रहाभ्यां द्वे' इत्यनेन द्वित्वे गौर+य्+य्+औ वर्णसंमेलने गौर्य्यौ इति रूपं सिद्धम् ।

**सखी** – सखी इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सु प्रत्यये सखी+सु इति स्थिते सुलोपे सखी इति रूपं सिद्धम् ।

**सख्यौ** – सखी इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां औ प्रत्यये सखी+औ इति स्थिते 'इको यणचि' इत्यनेन यणादेशे सख्+य्+औ वर्णसंमेलने सख्यौ इति रूपं सिद्धम् ।

**सख्यः** – सखी इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाबहुवचनविवक्षायां जस् प्रत्यये सखी+जस् इति स्थिते चुटू इति सूत्रेण ज् इत्यस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण ज् इत्यस्य लोपे सखी+अस् इति स्थिते 'इको यणचि' इत्यनेन यणादेशे सख्+य्+अस् इति स्थिते 'ससजुषो रुः' इति सूत्रेण स् स्थाने रु आदेशे सख्+य्+अरु इत्यवस्थायां 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे सख्+य्+अर् इति स्थिते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफ़स्य स्थाने विसर्गे सख्यः इति रूपं सिद्धम् ।

**इकारान्त स्त्रीलिङ्ग प्रियत्रिशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| प्रियत्रिः | प्रियत्री | प्रियत्रयः | प्रथमा |
| प्रियत्रिम् | प्रियत्री | प्रियत्रीः | द्वितीया |
| प्रियत्र्या | प्रियत्रिभ्याम् | प्रियत्रिभिः | तृतीया |
| प्रियत्र्यै, प्रियत्रये | प्रियत्रिभ्याम् | प्रियत्रिभ्यः | चतुर्थी |
| प्रियत्र्याः, प्रियत्रेः | प्रियत्रिभ्याम् | प्रियत्रिभ्यः | पञ्चमी |
| प्रियत्र्याः, प्रियत्रेः | प्रियत्र्योः | प्रियत्रयाणाम् | षष्ठी |
| प्रियत्र्याम्, प्रियत्रौ | प्रियत्र्योः | प्रियत्रिषु | सप्तमी |
| हे प्रियत्रे । | हे प्रियत्री । | हे प्रियत्रयः! | सम्बोधनम् |

**ह्रस्व ऋकारान्त प्रियतिसृशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| प्रियतिसा | प्रियतिस्रौ | प्रियतिस्रः | प्रथमा |
| प्रयितिस्रम् | प्रियतिस्रौ | प्रियतिस्रः | द्वितीया |
| प्रियतिस्रा | प्रियतिसृभ्याम् | प्रियतिसृभिः | तृतीया |
| प्रियतिस्रे | प्रियतिसृभ्याम् | प्रियतिसृभ्यः | चतुर्थी |
| प्रियतिस्रः | प्रियतिसृभ्याम् | प्रियतिसृभ्यः | पञ्चमी |
| प्रियतिस्रः | प्रियतिस्रोः | प्रियतिसृणाम् | षष्ठी |
| प्रियतिस्रि | प्रियतिस्रोः | प्रियतिसृषु | सप्तमी |
| हे प्रियतिसः! | हे प्रियतिस्रौ! | हे प्रियतिस्रः! | सम्बोधनम् |

**सखीशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| सखी | सख्यौ | सख्यः | प्रथमा |
| सखीम् | सख्यौ | सखीः | द्वितीया |
| सख्या | सखीभ्याम् | सखीभिः | तृतीया |
| सख्यै | सखीभ्याम् | सखीभ्यः | चतुर्थी |
| सख्याः | सखीभ्याम् | सखीभ्यः | पञ्चमी |
| सख्याः | सख्योः | सखीनाम् | षष्ठी |
| सख्याम् | सख्योः | सखीषु | सप्तमी |
| हे सखि! | हे सख्यौ! | हे सख्यः! | सम्बोधनम् |

**(301) स्त्रियाः 6-4-79**

**स्त्री शब्दस्येयङ् स्यादजादौ प्रत्यये परे । स्त्रियौ । स्त्रियः ।**

**पदच्छेदः** – स्त्रि एकपदमिदं सूत्रम् ।

**अनुवृत्तिः** – इयङ्, अचि

**सूत्रप्रकारः** विधिसूत्रम्

**सरलार्थः** – यदि अजादिप्रत्ययाः परतः भवन्ति, तर्हि स्त्रीशब्दस्य ईकारस्य स्थाने इयङ् आदेशो भवति ।

**साधनिका**

स्त्रियौः – स्त्री इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां औ प्रत्यये स्त्री+औ इति स्थिते 'इको यणचि' इत्यनेन यणादेशे प्राप्ते 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे प्राप्ते 'दीर्घज्जसि च' इत्यनेन निषेधे स्त्रियाः इति सूत्रेण इयङ् आदेशे अनुबन्धलोपे स्त्र्+इय्+औ वर्णसंमेलने स्त्रियौ इति रूपं सिद्धम् ।

स्त्रियः – स्त्री इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाबहुवचनविवक्षायां जस् प्रत्यये स्त्री+जस् इति स्थिते चुइ इति सूत्रेण ज् इत्यस्य इत्संज्ञायां 'तस्यलोपः' इति सूत्रेण ज् इत्यस्य लोपे स्त्री+अस् इति स्थिते 'इको यणचि' इत्यनेन यणादेशे प्राप्ते स्त्रियाः इति सूत्रेण इयङ् आदेशे अनुबन्धलोपे स्त्र+इय्+अस् इति स्थिते 'ससजुषो रुः' इति सूत्रेण स् स्थाने रु आदेशे स्त्र+इय्+अरु इत्यवस्थायां 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण उकारस्य लोपे स्त्र्+इय्+अर् इति स्थिते खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफस्य स्थाने विसर्गे स्त्रियः इति रूपं सिद्धम् ।

**(302) वाम्शसोः 6-4-80**

**अमि शसि च स्त्रिया इयङ् वा स्यात् । स्त्रियम् स्त्रीम् । स्त्रियौ । स्त्रियः स्त्रीः । स्त्रिया । स्त्रियै । स्त्रियाः । स्त्रियाः । स्त्रियोः । परत्वान्नुट् । स्त्रीणाम् । स्त्रियाम् । स्त्रियोः स्त्रीषु । स्त्रियमतिक्रान्तोऽतिस्त्रिः । अतिस्त्रियौ । गुणनाभावौत्त्वनुङ्भिः परत्वात्पुंसि बाध्यते । क्लीबे नुमा च स्त्रीशब्दस्येयङित्यवधार्यताम् । जसि च ( सू. 241 )अतिस्त्रियः । हे अतिस्त्रे । हे अतिस्त्रियौ। हे अतिस्त्रयः । वाम्शसोः ( सू. 302 )। अतिस्त्रियम् अतिस्त्रिम् । अतिस्त्रियौ । अतिस्त्रियः अतिस्त्रीन् । अतिस्त्रिणा । घेर्ङिति ( सू. 245 )अतिस्त्रये । अतिस्त्रेः । अतिस्त्रोः । अतिस्त्रियोः । अतिस्त्रीणाम् । अच्च घ ( सू. 247 )। अतिस्त्रौ । अतिस्त्रियोः। ओस्यौकारे च नित्यं स्यादम्शसोस्तुविभाषया इयादेशोऽचिनान्यत्र स्त्रियाः पुंस्युपसर्जने । क्लीबे तु नुम् । अतिस्त्रि । अतिस्त्रिणी। अतिस्त्रीणि । ङिति ह्रस्वश्च ( सू. 296 )इति ह्रस्वान्तत्वप्रयुक्तो विकल्पः । अस्त्री इति तु इयङुवङ्स्थानावित्यस्यैव पर्युदासः, तत्संबद्धस्यैवानुवृत्तेः । दीर्घस्यायं निषेधः न तु ह्रस्वस्य । अतिस्त्रियै अतिस्त्रये । अतिस्त्रियाः अतिस्त्रोः । अतिस्त्रियाः अतिस्त्रेः। अतिस्त्रीणाम् । अतिस्त्रियाम् अतिस्त्रौ । श्रीः श्रियौ । श्रियः ।**

**पदच्छेदः** – वा, अम्शसोः द्विपदमिदं सूत्रम् ।

**समासः** – अम् च शस् च, अम्शसौ, तयोः अम्शसोः ।

**अनुवृत्तिः** – स्त्रि, इयङ्

**सूत्रप्रकारः** – विधिसूत्रम्

**सरलार्थः** – अम् (द्वितीया एकवचनम्) शस् (द्वितीया बहुवचनम्) च यदि परतः भवतः तर्हि स्त्रीशब्दस्य ईकारस्य स्थाने विकल्पेन इयङ् आदेशः भवति ।

कारिकार्थः – (गुणनाभावौ..) पुलिङ्गे गुणस्य, ना-भावस्य, औत्त्वस्य, तथा नुडागमस्य, किञ्च नपुंसकलिङ्गे नुमागमस्य च परतः स्थिते सति स्त्रीशब्दस्य स्थाने इयङ्गादेशः बाधितो भवति ।

(औस्यौकारे...) समासे यदि स्त्रीशब्दः उपसर्जनेन पुलिङ्गे जातः तर्हि अजादिषु विभक्तिषु ओस् (द्विवचने षष्ठीसप्तम्योः) इत्यस्य तथा च औङ् (द्विवचने प्रथमाद्वितीययोः) इत्यस्य च परतः स्थिते इयङादेशः नित्यं भवति, तथा अम् – शस् विभकत्योः परतः स्थिते विकल्पेन भवति । अन्यासु अजादिषु विभक्तिषु (जस्-टा-ङ-ङसि-ङस्-ङि-आम्-विभक्तिषु) परतः स्थिते इयङ्गादेशो नैव भवति ।

विशेषार्थः – यदि स्त्रीशब्दः उपसर्जनीभूय नपुँसकलिङ्गे जातः तर्हि परत्वात् इकोऽचि विभक्तौ इति नुमागमः इयङादेशस्य वाधको भवति ।

**साधनिका-**

स्त्रियम् – स्त्रीम् स्त्री इत्यस्मात् शब्दात् प्रातिपदिकत्वात् द्वितीयैकवचनविवक्षायां अम् प्रत्यये स्त्री+अम् इति स्थिते 'इको यणचि' इत्यनेन यणादेशे प्राप्ते 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे प्राप्ते 'दीर्धाज्जसि च' इत्यनेन निषेधे स्त्रियाः इति सूत्रेण इयङ् आदेशे प्राप्ते वाम्शसोः इत्यनेन विकल्पेन इयङ् आदेशे अनुबन्धलोपे स्त्र्+इय्+अम् वर्णसंमेलने स्त्रियम् इति रूपं सिद्धम् । पक्षे स्त्री+अम् इत्यत्र अमि पूर्वः इत्यनेन पूर्वरूपे स्त्रीम् इति रूपं सिद्धम् ।

स्त्रियः, स्त्रीः – स्त्री इत्यस्मात् शब्दात् प्रातिपदिकत्वात् द्वितीयाबहुवचनविवक्षायां शस् प्रत्यये स्त्री+शस् इति स्थिते 'लशक्वतद्धिते' इति सूत्रेण शकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण शकारस्य लोपे स्त्री+अस् इति स्थिते 'इको यणचि' इत्यनेन यणादेशे प्राप्ते स्त्रियाः इति सूत्रेण इयङ् आदेशे प्राप्ते 'वाम्शसोः' इत्यनेन विकल्पेन इयङ् आदेशे अनुबन्धलोपे स्त्र्+इय्+अस् इति स्थिते 'ससजुषो रुः' इति सूत्रेण स् स्थाने रु आदेशे स्त्र्+इयू+अरु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण उकारस्य लोपे स्त्र्+इय्+अर् इति स्थिते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफ़स्य स्थाने विसर्गे स्त्रियः इति रूपं सिद्धम् । पक्षे स्त्री+अस् इत्यत्र पूर्वसवर्णदीर्धे सस्य रुत्वविसर्गे स्त्रियाः इति रूपं सिद्धम् ।

स्त्रीणाम् : स्त्री इत्यस्मात् शब्दात् प्रातिपदिकत्वात् षष्ठीबहुवचनविवक्षायां आम् प्रत्यये स्त्री+आम् इति स्थिते 'ह्रस्वनद्यापो नुट्' इति सूत्रेण नुट् आगमे हलन्त्यम् इति सूत्रेण टकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण टकारस्य लोपे 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण उकारस्य लोपे आद्यन्तावयवत्वेन स्त्री+न्+आम् नामि इति सूत्रेण दीर्घे, णत्वे स्त्रीणाम् इति रुपं सिद्धम् ।

स्त्रियाम् :स्त्री इत्यस्मात् शब्दात् प्रातिपदिकत्वात् सप्तम्यैकवचनविवक्षायां ङि प्रत्यये स्त्री+ङि इति स्थिते 'ङेराम्नद्याम्नीभ्यः' इति सूत्रेण आम् स्त्री+आम् इति स्थिते आट् एवं स्त्रियाः इत्यनेन इयङ् आदेशे स्त्रियाम् इति रूपं सिद्धम् ।

**स्त्रीशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| स्त्री | स्त्रियौ | स्त्रियः | प्रथमा |
| स्त्रियम्, स्त्रीम् | स्त्रियौ | स्त्रियः, स्त्रीः | द्वितीया |
| स्त्रिया | स्त्रीभ्याम् | स्त्रीभिः | तृतीया |
| स्त्रियै | स्त्रीभ्याम् | स्त्रीभ्यः | चतुर्थी |
| स्त्रियाः | स्त्रीभ्याम् | स्त्रीभ्यः | पञ्चमी |
| स्त्रियाः | स्त्रियोः | स्त्रीणाम् | षष्ठी |
| स्त्रियाम् | स्त्रियोः | स्त्रीषु | सप्तमी |
| हे स्त्रि । | हे स्त्रियौ । | हे स्त्रियः ! | सम्बोधनम् |

**अतिस्त्रियौः** अतिस्त्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां औ प्रत्यये अतिस्त्रि+औ इति स्थिते 'इको यणचि' इत्यनेन यणादेशे प्राप्ते 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे प्राप्ते 'दीर्घाज्जसि च' इत्यनेन निषेधे 'स्त्रियाः' इति सूत्रेण इयङ् आदेशे अनुबन्धलोपे अतिस्त्र्+इय्+औ वर्णसंमेलने अतिस्त्रियौ इति रूपं सिद्धम् ।

**अतिस्त्रियम् अतिस्त्रिम् :** – अतिस्त्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् द्वितीयैकवचनविवक्षायां अम् प्रत्यये अतिस्त्रि+अम् इति स्थिते इको यणचि इत्यनेन यणादेशे प्राप्ते प्रथमयोः पूर्वसवर्णः इत्यनेन पूर्वसवर्णदीर्घे प्राप्ते दीर्घज्जसि च इत्यनेन निषेधे स्त्रियाः इति सूत्रेण इयङ् आदेशे प्राप्ते वाम्शसोः इत्यनेन विकल्पेन इयङ् आदेशे अनुबन्धलोपे अतिस्त्र्+इय्+अम् वर्णसंमेलने अतिस्त्रियम् इति रूपं सिद्धम् । पक्षे अतिस्त्रि+अम् इत्यत्र अमि पूर्वः इत्यनेन पूर्वरूपे अतिस्त्रिम् इति रूपं सिद्धम्

**अतिस्त्रियः, अतिस्त्रीन् :** अतिस्त्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् द्वितीयाबहुवचनविवक्षायां शस् प्रत्यये अतिस्त्रि+शस् इति स्थिते लशक्कतद्धिते इति सूत्रेण शकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण शकारस्य लोपे अतिस्त्रि+अस् इति स्थिते इको यणचि इत्यनेन यणादेशे प्राप्ते स्त्रियाः इति सूत्रेण इयङ् आदेशे प्राप्ते वाम्शसोः इत्यनेन विकल्पेन इयङ् आदेशे अनुबन्धलोपे अतिस्त्र्+इय्+अस् इति स्थिते ससजुषो रुः इति सूत्रेण स् स्थाने रु आदेशे अतिस्त्र्+इय्+अरु इत्यवस्थायां उपदेशेडजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण उकारस्य लोपे अतिस्त्र्+इय्+अर् इति स्थिते खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफ़स्य स्थाने विसर्गे अतिस्त्रियः इति रूपं सिद्धम् । पक्षे अतिस्त्रि+अस् इत्यत्र पूर्वसवर्णदीर्घे तस्माच्छसो नः पुंसि इत्यनेन स् स्थाने न् अतिस्त्रीन्इति रूपं सिद्धम् ।

**अतिस्त्रयेः** इत्यस्मात् शब्दात् प्रातिपदिकत्वात् चतुर्थ्यैकवचनविवक्षायां ङे प्रत्यये अतिस्त्रि+ङे इति स्थिते लशक्वतद्धिते इति सूत्रेण ङकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण ङकारस्य लोपे अतिस्त्रि+ए इति स्थिते कारिकानुसारं इयङ् प्रबाध्य घेर्ङिति इत्यनेन गुणे एकारे अतिस्त्रे+ए इति स्थिते एचोपवायावः इति सूत्रेण अयादेशे अतिस्त्र्+अय्+ए वर्णसंमेलने अतिस्त्रये इति रूपं सिद्धम् ।

**अतिस्त्रेः** – अतिस्त्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् पञ्चम्यैकवचनविवक्षायां ङसि प्रत्यये अतिस्त्रि+ङसि इति स्थिते लशक्वतद्धिते इति सूत्रेण ङकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण ङकारस्य लोपे अतिस्त्रि+अस् इति स्थिते कारिकानुसारं इयङ् प्रबाध्य घेर्ङिति इत्यनेन गुणे एकारे अतिस्त्रे+अस् इति स्थिते ङसिङसोश्च इत्यनेन सूत्रेण पूर्वरूपे अतिस्त्रेस् इति स्थिते ससजुषो रुः इति सूत्रेण स् स्थाने रु आदेशे अतिस्त्रिरु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे अतिस्त्रेर् इति स्थिते खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफ़स्य स्थाने विसर्गे अतिस्त्रे इति रूपं सिद्धम् ।

**अतिस्त्रीणाम् :** अतिस्त्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् षष्ठीबहुवचनविवक्षायां आम् प्रत्यये अतिस्त्रि+आम् इति स्थिते ह्रस्वनद्यापो नुट् इति सूत्रेण नुट् आगमे हलन्त्यम् इति सूत्रेण टकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण टकारस्य लोपे उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे आद्यन्तावयवत्वेन अतिस्त्रि+न्+आम् नामि इति सूत्रेण दीर्घे, णत्वे अतिस्त्रीणाम् इति रूपं सिद्धम् ।

**अतिस्त्रौ, अतिस्त्रिणिः** – अतिस्त्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् सप्तसम्यैकवचनविवक्षायां ङि प्रत्यये अतिस्त्रि+ङि इति स्थिते लशक्वतद्धिते इति सूत्रेण ङकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण ङकारस्य लोपे अतिस्त्रि+इ इति स्थिते अच्च घेः इत्यनेन अत्वे एवं औत्वे, वृद्धिरेकादेशे अतिस्त्रौ इति रूपं सिद्धम् । पक्षे अतिस्त्रि+ङि इति स्थिते लशक्वतद्धिते इति सूत्रेण ङकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण ङकारस्य लोपे अतिस्त्रि+इ इति स्थिते इकोचि विभक्तो इत्यनेन सूत्रेण नुमागमे अनुबन्धलोपे, णत्वे अतिस्त्रिणि इति रूपं सिद्धम् ।

**अतिस्त्रिये, अतिस्त्रये :** अतिस्त्रि इत्यस्मात् शब्दात् प्रातिपदिकत्वात् चतुर्थ्यैकवचनविवक्षायां ङे प्रत्यये अतिस्त्रि+ङे इति स्थिते लशक्वतद्धिते इति सूत्रेण ङकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण ङकारस्य लोपे अतिस्त्रि+ए इति स्थिते ङिति ह्रस्वश्च इत्यनेन नदीसंज्ञायाम् आण्नद्याः इत्यनेन आट् अतिस्त्रि+आ+ए इति स्थिते आटश्च इत्यनेन वृद्धौ अतिस्त्रि+ए इति

स्थिते स्त्रियाः इत्यनेन इयङ् आदेशे अतिस्त्र+इय्+ए वर्णसम्मेलने अतिस्त्रियै इति रूपं सिद्धिम् । नदीसंज्ञाभावे अतिस्त्रि+ए इति स्थिते गुणे एवं अयादेशे अतिस्त्रये इति रूपं सिद्धम् ।

**पुल्लिङ्गः अतिस्त्रिशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| अतिस्त्रिः | अतिस्त्रियौ | अतिस्त्रियः | प्रथमा |
| अतिस्त्रियम्, अतिस्त्रीम् | अतिस्त्रियौ | अतिस्त्रयः, अतिस्त्रीन् | द्वितीया |
| अतिस्त्रिणा | अतिस्त्रिभ्याम् | अतिस्त्रभिः | तृतीया |
| अतिस्त्रये | अतिस्त्रिभ्याम् | अतिस्त्रिभ्यः | चतुर्थी |
| अतिस्त्रेः | अतिस्त्रिभ्याम् | अतिस्त्रिभ्यः | पञ्चमी |
| अतिस्त्रेः | अतिस्त्रियोः | अतिस्त्रीणाम् | षष्ठी |
| अतिस्त्रौ | अतिस्त्रियोः | अतिस्त्रिषु | सप्तमी |
| हे अतिस्त्रे । | हे अतिस्त्रियौ । | हे अतिस्त्रि! | सम्बोधनम् |

**नपुंसकलिङ्गः अतिस्त्रिशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| अतिस्त्रि | अतिस्त्रिणी | अतिस्त्रीणी | प्रथमा |
| अतिस्त्रि | अतिस्त्रिणी | अतिस्त्रीणी | द्वितीया |
| अतिस्त्रिणा | अतिस्त्रिभ्याम् | अतिस्त्रिभिः | तृतीया |
| अतिस्त्रये, अतिस्त्रिणे | अतिस्त्रिभ्याम् | अतिस्त्रिभ्यः | चतुर्थी |
| अतिस्त्रेः, अतिस्त्रिणः | अतिस्त्रिभ्याम् | अतिस्त्रिभ्यः | पञ्चमी |
| अतिस्त्रेः, अतिस्त्रिणः | अतिस्त्रियोः | अतिस्त्रीणाम् | षष्ठी |
| अतिस्त्रौ, अतिस्त्रिणि | अतिस्त्रियोः, अतिस्त्रिणोः | अतिस्त्रिषु | सप्तमी |
| हे अतिस्त्रो । अतिस्त्रि | हे अतिस्त्रिणी । | हे अतिस्त्रीणि । | सम्बोधनम् |

**स्त्रीलिङ्गः अतिस्त्रिशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| अतिस्त्रिः | अतिस्त्रियौ | अतिस्त्रिः | प्रथमा |
| अतिस्त्रियम्, अतिस्त्रीम् | अतिस्त्रियौ | अतिस्त्रयः, अतिस्त्रीः | द्वितीया |
| अतिस्त्रिया | अतिस्त्रिभ्याम् | अतिस्त्रिभिः | तृतीया |
| अतिस्त्रियै, अतिस्त्रये | अतिस्त्रिभ्याम् | अतिस्त्रिभ्यः | चतुर्थी |
| अतिस्त्रियाः, अतिस्त्रेः | अतिस्त्रिभ्याम् | अतिस्त्रिभ्यः | पञ्चमी |
| अतिस्त्रियाः, अतिस्त्रेः | अतिस्त्रियोः | अतिस्त्रीणाम् | षष्ठी |
| अतिस्त्रियाम्, अतिस्त्रौ | अतिस्त्रियोः, | अतिस्त्रिषु | सप्तमी |
| हे अतिस्त्रे । | हे अतिस्त्रियौ । | हे अतिस्त्रियः । | सम्बोधनम् |

**श्रीः** – श्री इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सु प्रत्यये श्री+सु इति स्थिते उपदेशऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे श्री+स् इति स्थिते ससजुषो रुः इति सूत्रेण स् स्थाने रु आदेशे श्री+रु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे श्री+इति स्थिते खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफ़स्य स्थाने विसर्गे श्री इति रूपं सिद्धम्

**श्रीयौः** – श्री इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां औ प्रत्यये श्री+औ इति स्थिते इको यणचि इत्यनेन यणादेशे प्राप्ते प्रथमयोः पूर्वसवर्णः इत्यनेन पूर्वसवर्णदीर्धे प्राप्ते दीर्धाज्जसि च इत्यनेन निषेधे अचि श्नुधातुभ्रुवांय्वोरिङुवङौ इति सूत्रेण इयङ् आदेशे अनुबन्धलोपे श्र्+इय्+औ वर्णसंमेलने श्रियौ इति रूपं सिद्धम् ।

(303) **नेयङुवङ्स्थानावस्त्री** 1-4-4

इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तः, न तु स्त्री । हे श्रीः । श्रियः श्रियै–श्रिये । श्रियाः श्रियः ।

पदच्छेदः - न, इयङुवङ्स्थानौ, अस्त्री त्रिपदमिदं सूत्रम् ।

समासः - इयङ् च उवङ् च तेषामितरेतरद्वन्द्वः, इयङुवङौ, इयङुवङौ स्थितिः ययोस्तौ इयङुवङ्स्थानौ बहुव्रीहिः । न स्त्री इति अस्त्री, नञ्तत्पुरुषः ।

अनुवृत्तिः - यू, नदी

सूत्रप्रकारः - सञ्ज्ञासूत्रम्

**सरलार्थः** - इयङ : अवङश्च स्थानीभूतौ ईकारः ऊकारश्च नदीसंज्ञकौ न भवतः ।

साधनिका

**हे श्रीः** - हे श्री इत्यत्र हे श्री+सु इति स्थिते यू स्त्राख्यौ नदी इत्यनेन नदीसंज्ञाप्राप्ते नेयङुवङ्स्थानावस्त्री इत्यनेन निषेधे उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण उकारस्य लोपे हे श्री+स् इति स्थिते ससजुषो रुः इति सूत्रेण स् स्थाने रु आदेशे हे श्री+रु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे हे श्री+र् इति स्थिते खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफ़स्य स्थाने विसर्गे श्री इति रूपं सिद्धम् ।

**श्रियै, श्रिये** :- श्री इत्यस्मात् शब्दात् प्रातिपदिकत्वात् चतुर्थ्यैकवचनविवक्षायां ङे प्रत्यये श्री+ङे इति स्थिते लशक्वतद्धिते इति सूत्रेण ङकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण ङकारस्य लोपे श्री+ए इति स्थिते यूस्त्राख्यौ नदी इत्यनेन नदीसंज्ञायाम् प्राप्तायां नेयङुवङ्स्थानावस्त्री इत्यनेन निषेधे ङिति ह्रस्वश्च इत्यनेन विकल्पेन नदीसंज्ञायाम् आण्नद्याः इत्यनेन आट् आगमे श्री+आ+ए इति स्थिते आटश्च इत्यनेन वृद्धौ श्री+ए इति स्थिते अचि श्नुधातुभ्रुवांय्वोरियङुवङौ इति सूत्रेण इयङ् आदेशे अनुबन्धलोपे श्र्+इय्+ऐ वर्णसंमेलने श्रियै इति रूपं सिद्धम् । नदीसंज्ञाभावे इयङ् श्र्+इय्+ए वर्णसंमेलने श्रिये इति रूपं सिद्धम्

**श्रियाः, श्रियः** :- श्री इत्यस्मात् शब्दात् प्रातिपदिकत्वात् पञ्चम्यैकवचनविवक्षायां ङसि प्रत्यये श्री+ङसि इति स्थिते लशक्वतद्धिते इति सूत्रेण ङकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण ङकारस्य लोपे श्री+अस् इति स्थिते यूस्त्राख्यौ नदी इत्यनेन नदीसंज्ञायाम् प्राप्ते नेयङुवङ्स्थानावस्त्री इत्यनेन निषेधे ङिति ह्रस्वश्च इत्यनेन विकल्पेन नदीसंज्ञायाम् आण्नद्याः इत्यनेन आट् आगमे श्री+आ+अस् इति स्थिते आटश्च इत्यनेन वृद्धौ श्री+आस् इति स्थिते अचि श्नुधातुभ्रावांय्वोरियङुवङौ इति सूत्रेण इयङ् आदेशे अनुबन्धलोपे श्र्+इय्+आस् इति स्थिते ससजुषो रुः इति सूत्रेण स् स्थाने रु आदेशे श्र्+इय्+आरु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण उकारस्य लोपे श्र्+इय्+आर् इति स्थिते खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफ़स्य स्थाने विसर्गे श्रियाः इति रूपं सिद्धम् । पक्षे नदीसंज्ञाभावे इयङ् श्र्+ङ्य+अस् सस्य रुत्व विसर्गे श्रियः इति रूपं सिद्धम् ।

(304) वामि 1-4-5

इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तः, न तु स्त्री । श्रीणाम्-श्रियाम् । श्रियाम् श्रियि । प्रधी शब्दस्य तु प्रकृष्ट ध्यातीति विग्रहे वृत्तिकारादीनां मते, लक्ष्मीवद्रूपम् । पदान्तरं विनापि स्त्रियां वर्तमानवत्वं नित्यस्त्रीत्वम् इति स्वीकारात्। लिङ्गान्तरानभिधायकत्वं तत् इति कैयटमते तु पुंवद्रूपम् । प्रकृष्टा धीः इति विग्रहे तु लक्ष्मीवत् । अमि शसि च प्रध्यम् प्रध्यः इति विशेषः सुष्ठु ध्यायति इति विग्रहे तु वृत्तिकारमते सुधीः श्रीवत् । मतांन्तरे पुंवत् । सुष्ठुधीर्यस्याः सुष्ठु वेति विग्रहे तु श्रीवदेव । ग्रामणीः पुंवत् । ग्रामनयनस्योत्सर्गतः पुंधर्मतया पदान्तरं विनापि स्त्रियामप्रवृत्तेः । एवं खलपवनादेरपि पुंधर्मत्वमौत्सर्गिकं बोध्यम् । धेनुः मतिवत् ।

पदच्छेदः - वा, आमि द्विपदमिदं सूत्रम् ।

अनुवृत्तिः - यू, स्त्राख्यौ, नदी, इयङुवङ्स्थानौ, अस्त्री

सूत्रप्रकारः - सञ्ज्ञासूत्रम्

सरलार्थः - स्त्रीशब्दमन्तरेण यदि आम् प्रत्ययः परतः भवति तर्हि इयङः उवङश्च स्थानीभूतौ नित्यस्त्रीलिङ्गे वर्तमानौ च ईकारः ऊकारश्च विकल्पेन नदीसंज्ञकौ भवतः

साधनिका

**श्रीमाण, श्रियाम्** :- श्री इत्यस्मात् शब्दात् प्रातिपदिकत्वात् षष्ठीबहुवचनविवक्षायां आम् प्रत्यये श्री+आम् इति स्थिते वाङडमि इत्यनेन नदीसंज्ञायां नुट् आगमे अनुबन्धलोपे न् आधवयवत्वेन श्री+न्+आम इति स्थिते णत्वे श्रीणाम् इति रूपं सिद्धम् । पक्षे नदीसंज्ञाभावे इयङ् श्र+इयू+आम वर्णसंमेलने श्रियाम् इति रूपं सिद्धम् ।

**श्रियाम्, श्रियि:** – श्री इत्यस्मात् शब्दात् प्रातिपदिकत्वात् सप्तम्यैकवचनविवक्षायां ङि प्रत्यये श्री+ङि इति स्थिते ङिति ह्रस्वश्च इत्यनेन विकल्पेन नदीसंज्ञायाम् इति स्थिते ङेराम्नद्याम्नीभ्य: इत सूत्रेण आम् श्री+आम् इति स्थिते इयङ् आदेशे श्र्+इय्+आम् वर्णसंमेलने श्रियाम् इति रूपं सिद्धम् । पक्षे इयङ् आदेशे श्र्+इय्+इ वर्णसंमेलने श्रियि इति रूपं सिद्धम्

**श्रीशब्दस्य रूपाणी**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्ति:** |
|---|---|---|---|
| श्री: | श्रियौ | श्रिय: | प्रथमा |
| श्रियम् | श्रियौ | श्रिय: | द्वितीया |
| श्रिया | श्रीभ्याम् | श्रीभि: | तृतीया |
| श्रियै, श्रिये | श्रीभ्याम् | श्रीभ्य: | चतुर्थी |
| श्रिया:, श्रिय: | श्रीभ्याम् | श्रीभ्य: | पञ्चमी |
| श्रिया:, श्रिय: | श्रियो: | श्रीणाम्, श्रियाम् | षष्ठी |
| श्रियाम्, श्रियि | श्रियो: | श्रीषु | सप्तमी |
| हे श्री: । | हे श्रियौ । | हे श्रिय: । | सम्बोधनम् |

**प्रध्यम् :** – प्रधी इत्यस्मात् शब्दात् प्रा तिपदिकत्वात् द्वितीयैकवचनविवक्षायां अम प्रत्यये प्रधी+अम् इति स्थिते अमि पूर्व: इत्यनेन सूत्रेण पूर्वरूपे प्राप्ते एरनेकाचोडसंयोगपूर्वस्य इत्यनेन यणादेशे प्रध्+य्+अम् वर्णसंमेलने प्रध्यम् इति रूपं सिद्धम् ।

**प्रध्य:** – प्रधी इत्यस्मात् शब्दात् प्रतिपदिकत्वात् द्वितीयाबहुवचनविवक्षायां शस् प्रत्यये प्रधी+शस् इति स्थिते लशक्कतद्धिते इत्यनेन सूत्रेण शकारस्य इत्संज्ञायां तस्य लोप: इत्यनेन शकारस्य लोपे प्रधी+अस् इति स्थिते प्रथमयो: पूर्वसवर्ण: इत्यनेन पुर्वसवर्णे प्राप्ते नादिचि इत्यनेन निषेधे एरनेकाचोडसंयोगपूर्वस्य इत्यनेन यणादेशे प्रध्+य्+अस् इति स्थिते ससजुषो रु: इति सूत्रेण स् स्थाने रु आदेशे प्रध्+य्+अरु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोप: इति सूत्रेण उकारस्य लोपे प्रध+य्+अर् इति स्थिते खरवसानयोर्विसर्जनीय: इति सूत्रेण रेफ़स्य स्थाने विसर्गे प्रध्य: इति रूपं सिद्धम् ।

**प्रधीशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्ति:** |
|---|---|---|---|
| प्रधी: | प्रध्यौ | प्रध्य: | प्रथमा |
| प्रध्यम् | प्रध्यौ | प्रध्य: | द्वितीया |
| प्रध्या | प्रधीभ्याम् | प्रधीभि: | तृतीया |
| प्रध्यै | प्रधीभ्याम् | प्रधीभ्य: | चतुर्थी |
| प्रध्या: | प्रधीभ्याम् | प्रधीभ्य: | पञ्चमी |
| प्रध्या: | प्रध्यो: | प्रधीनाम् | षष्ठी |
| प्रध्याम् | प्रध्यो: | प्रधीषु | सप्तमी |
| हे प्रधी: । | हे प्रध्यौ। | हे प्रध्य: । | सम्बोधनम् |

सुष्ठु धीर्यस्या:, सुष्ठु ध्यायति वेति विग्रहे सुधी: ।

सुधी: – सुधी इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सु प्रत्यये सुधी+सु इति स्थिते उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोप: इति सूत्रेण उकारस्य लोपे सुधी+स् इति स्थिते ससजुषो रु: इति सूत्रेण स् स्थाने रु आदेशे सुधी+रु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोप: इति सूत्रेण उकारस्य लोपे सुधी+र् इति स्थिते खरवसानयोर्विसर्जनीय: इति सूत्रेण रेफ़स्य स्थाने विसर्गे सुधी: इति रूपं सिद्धम् । सुधीशब्दस्य रूपाणि श्रीवत्

धेन्वै, धेन्वे: – धेनु इत्यस्मात् शब्दात् प्रातिपदिकत्वात् चतुर्थ्यैकवचनविवक्षायां ङे प्रत्यये धेनु+ङे इति स्थिते लशक्वतद्धिते इति सूत्रेण ङ् इत्यस्य इत्संज्ञायां तस्यलोप: इति सूत्रेण ङ् इत्यस्य लोपे धेनु+ए इति स्थिते ङिति ह्रवश्च इत्यनेन विकल्पेन नदीसंज्ञायाम् आण्नद्या: इत्यनेन आट् आगमे अनुबन्धलोपे धेनु+आ+ए इति स्थिते आटश्च इत्यनेन वृद्धि धेनु+ए इति स्थिते

इको यणचि इत्यनेन यणादेशे धेन्+व्+ऐ वर्णसंमेलने धेन्वै इति रूपं सिद्धम् । पक्षे धेनु+ए इत्यत्र गुणे धेनो+ए अवादेशे धेनवे इति रूपं सिद्धम् ।

**धेनुशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| धेनुः | धेनू | धेनवः | प्रथमा |
| धेनुम् | धेनू | धेनूः | द्वितीया |
| धेन्वा | धेनुभ्याम् | धेनुभिः | तृतीया |
| धेन्वै, धेनवे | धेनुभ्याम् | धेनुभ्यः | चतुर्थी |
| धेन्वाः, धेनोः | धेनुभ्याम् | धेनुभ्यः | पञ्चमी |
| धेन्वाः, धेनोः | धेन्वोः | धेनूनाम् | षष्ठी |
| धेन्वाम्, धेनौ | धेन्वोः | धेनुषु | सप्तमी |
| हे धेनो । | हे धेनु । | हे धेनवः। | सम्बोधनम् |

**(305) स्त्रियां च 7-1-96**

स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते ।।

पदच्छेदः - स्त्रियां, च द्विपदमिदं सूत्रम् ।

अनुवृत्तिः - तृज्वत्, क्रोष्टुः

सूत्रप्रकारः - अतिदेशसूत्रम्

सरलार्थः - स्त्रीवाची क्रोष्टुशब्दः तृज्प्रययान्तवत् भवति, अर्थात् तस्य तृज्ववद्भावः भवति ।

(306) ऋन्नेभ्यो ङीप् 4-1-5

ऋदन्तेभ्यो नान्तेभ्यश्चस्त्रियां ङीप् स्यात् । क्रोष्ट्री । क्रोष्ट्रयौ । क्रोष्ट्रयः । इत्युदन्ताः वधू गौरीवत् । भ्रूः श्रीवत्। हे सुभ्रूः । कथं तर्हि हा पितः कासि हे सुभ्रु इति भट्टिः । प्रमाद एवायमिति बहवः । खलपूः पुंवत् । पुनर्भूः दृन्करभूः (व. 4118) इति यणा उवङो बाधनात् नेयङुवङ्- नेयङुवङ (सू. 303) इति निषेधो न । हे पुनर्भु । पुनर्भ्वम् । पुनर्भ्वम्। पुनर्भ्वौ । पुनर्भ्वः ।

पदच्छेदः - ऋन्नेभ्यः, ङीप् द्विपदमिदं सूत्रम् ।

समासः ऋतश्च, नाश्च तेषामितरेतरद्वन्द्वः, ऋनास्तेभ्यः ऋन्नेभ्यः ।

अनुवृत्तिः - स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः परश्च

सूत्रप्रकारः विधिसूत्रम्

सरलार्थः - ऋकारान्तान् नकारान्ताश्च प्रातिपदिकात् स्त्रीत्वविवक्षायां ङीप् प्रत्ययो भवति।

**साधनिका-**

क्रोष्ट्रीः - क्रोष्टु इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सु प्रत्यये क्रोष्टु+सु इति स्थिते उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे क्रोष्टु+स् इति स्थिते स्त्रियां च इत्यनेन तृज्वद्भाव क्रोष्ट+स् इति स्थिते ऋनेभ्यो ङीप् इति सूत्रेण ङीप् हलन्त्यम् इत्यनेन प् इत्यस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण प् इत्यस्य लोपे लशक्वतद्धिते इति सूत्रेण ङकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण ङकारस्य लोपे क्रोष्ट+ई+स् इति स्थिते इको यणचि इत्यनेन यणादेशे क्रोष्टी+स् इति स्थिते हलङ्याभ्यो... इत्यनेन स् लोपे क्रोष्ट्री इति रूपं सिद्धम् ।

**क्रोष्ट्रयौः** - क्रोष्टु इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां औ प्रत्यये क्रोष्टु+औ इति स्थिते स्त्रियां च इत्यनेन तृज्वद्भाव क्रोष्ट+औ इति स्थिते ऋनेभ्यो ङीप् इति सूत्रेण ङीप् हलन्त्यम् इत्यनेन प् इत्यस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण प् इत्यस्य लोपे लशक्वतद्धिते इति सूत्रेण ङकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण ङकारस्य लोपे क्रोष्ट+ई+औ इति स्थिते इको यणचि इत्यनेन यणादेशे क्रोष्ट्री+औ इति स्थिते पुनः इको यणचि इत्यनेन यणादेशे क्रोष्ट्रयौ इति रूपं सिद्धम् ।

**क्रोष्ट्रयः** - क्रोष्टु इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाबहुवचनविवक्षायां जस् प्रत्यये क्रोष्टु+जस् इति स्थिते चूटु

इति सूत्रेण जकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण जकारस्य लोपे क्रोष्टु+अस् इति स्थिते स्त्रियां च इत्यनेन तृज्वद्भाव क्रोष्ट+अस् इति स्थिते ऋन्नेभ्यो ङीप् इति सूत्रेण ङीप् हलन्त्यम् इत्यनेन प् इत्यस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण प् इत्यस्य लोपे लशक्वतद्धिते इति सूत्रेण ङकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण ङकारस्य लोपे क्रोष्ट्र+ई+अस् इति स्थिते इको यणचि इत्यनेन यणादेशे क्रोष्ट्री+अस् इति स्थिते पुनः इको यणचि इत्यनेन यणादेशे क्रोष्ट्र+ई+अस इति स्थिते इको यणाचि इत्यनेन यणादेशे क्रोष्ट्री+अस् इति स्थिते पुनः इको यणचि इत्यनेन यणादेशे क्रोष्ट्र्यस् इति स्थिते सस्य रुत्वविसर्गे क्रोष्ट्र्यः इति रूपं सिद्धम् ।

**क्रोष्टुशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| क्रोष्ट्री | क्रोष्ट्र्यौ | क्रोष्ट्र्यः | प्रथमा |
| क्रोष्ट्रीम् | क्रोष्ट्र्यौ | क्रोष्ट्रीः | द्वितीया |
| क्रोष्ट्र्या | क्रोष्ट्रीभ्याम् | क्रोष्ट्रीभिः | तृतीया |
| क्रोष्ट्र्यै | क्रोष्ट्रीभ्याम् | क्रोष्ट्रीभ्यः | चतुर्थी |
| क्रोष्ट्र्याः | क्रोष्ट्रीभ्याम् | क्रोष्ट्रीभ्यः | पञ्चमी |
| क्रोष्ट्र्याः | क्रोष्ट्र्योः | क्रोष्ट्रीणाम् | षष्ठी |
| क्रोष्ट्र्याम् | क्रोष्ट्र्योः | क्रोष्ट्रीषु | सप्तमी |
| हे क्रोष्ट्रि । | हे क्रोष्ट्र्यौ । | हे क्रोष्ट्र्यः | सम्बोधनम |

पुनर्भूः – पुनर्भू इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सु प्रत्यये पुनर्भू+सु इति स्थिते उपदेशेडजनुनासिक इत् सूत्रेण उकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण उकारस्य लोपे पुनर्भू+स् इति स्थिते ससजुषो रुः इति सूत्रेण स् स्थाने रु आदेशे पुनर्भू+रु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण उकारस्य लोपे पुनर्भू+र् इति स्थिते खरवसानर्विसर्जनीयः इति सूत्रेण रेफ़स्य स्थाने विसर्गे पुनर्भूः इति रूपं सिद्धम् ।

पुनर्भ्वौ – पुनर्भू इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां औ प्रत्यये पुनर्भू+औ इति स्थिते दृन्करपुनः पूर्वस्य भुवो यण् वक्तव्यः इत्यनेन वार्तिकेन यणादेशे पुनर्भ्+व्+औ वर्णसंमेलने पुनर्भ्वौ इति रूपं सिद्धम् ।

(307) एकाजुत्तरपदे णः 8-4-12

एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात् । आरम्भसामर्थ्यान्नित्यत्वे सिद्धे पुनर्णग्रहणं स्पष्टार्थम् । यणं बाधित्वा परत्वान्नुट् । पुनर्भूणाम् । वर्षाभूः । भेकजातौ नित्यस्त्रीत्वाभावात् हे वर्षाभूः कैयटमते । मतान्तरे तु हे वर्षाभु । भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमान् इति यादवः वर्षाभ्वश्च (सू. 282) । वर्षाभ्वौ । वर्षाभ्वः । स्वयम्भूः पुंवत् ।

पदच्छेदः – एकाजुत्तरपदे, णः द्विपदमिदं सूत्रम् ।

समासः एकोऽज् यस्मिन् स् एकाच्, एकाच् उत्तरपदं यस्य तद् एकाजुत्तरपदम्, तस्मिन् एकाजुत्तरपदे ।

अनुवृत्तिः – रषाभ्यां, नः, पूर्वपदात्, प्रतिपदिकान्तनुम्, विभक्तिषु, च

सूत्रप्रकारः – विधिसूत्रम्

सरलार्थः – यस्मिन् समासे उत्तरपदं एकेनैव स्वरेण युक्तं भवति, तादृशे समासे पूर्वपदे स्थितस्य निमित्तस्य ऋकारस्य रेफस्य षकारस्य च परतः स्थिते प्रातिपदिकान्तस्य, नुमागमस्य तथा च विभक्तौ स्थितस्य नकारास्य णकारः भवति ।

विशेषार्थः रषाभ्यां नो णः समानपदे इति णः इत्यस्य अनुवृत्तिरायाणात्येव, किन्तु तथापि णकारनिर्देशः स्पष्टार्थकः।

साधनिका

पुनर्भूणाम् पुनर्भू इत्यस्मात् शब्दात् प्रातिपदिकत्वात् षष्ठ्यैकवचनविवक्षायाम् आम् प्रत्यये पुनर्भू+आम् इति स्थिते ह्रस्वनद्यापो नुट् इति सूत्रेण नुट् आगमे हलन्त्यम् इति सूत्रेण टकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण टकारस्य लोपे उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे आधन्तावयवत्वेन पुनर्भू+न्+आम् इति स्थिते एकाजुत्तरपदे णः इत्यनेन सूत्रेण णत्वे पुनर्भु+ण्+आम् वर्णसंमेलने पुनर्भूणाम् इति रूपं सिद्धम्

वर्षाभूः – वर्षाभू इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सु प्रत्यये वर्षाभू+सु इति स्थिते

उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्यलोपः इति सूत्रेण उकारस्य लोपे वर्षाभू+स् इति स्थिते ससजुषो रुः इति सूत्रेण स् स्थाने रु आदेशे वर्षाभू+रु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे वर्षाभू+र् इति स्थिते खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफस्य स्थाने विसर्गे वर्षाभूः इति रूपं सिद्धम्

वर्षाभ्वौ– वर्षाभू इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां औ प्रत्यये वर्षाभू+औ इति स्थिते वर्षाभ्वश्च इत्यनेन सूत्रेण यणादेशे वर्षाभ्+व्+औ वर्णसंमेलने वर्षाभ्वौ इति रूपं सिद्धम् ।

वर्षाभूणाम् – वर्षाभू इत्यस्मात् शब्दात् प्रातिपदिकत्वात् षष्ठयैकवचनविवक्षायाम् आम् प्रत्यये वर्षाभू+आम् इति स्थिते ह्रस्वनद्यापो नुट् इति सूत्रेण नुट् आगमे हलन्त्यम् इति सूत्रेण टकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण टकारस्य लोपे उपदेशेऽजनुनासिक इत् सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे आद्यन्तावयवत्वेन वर्षाभू+न्+आम् इति स्थिते एकाजुत्तरपदे णः इत्यनेन सूत्रेण णत्वे वर्षाभू+ण्+आम् वर्णसंमेलने वर्षाभूणाम् इति रूपं सिद्धम् ।

**वर्षाभूशब्दस्य रूपाणी**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| वर्षाभूः | वर्षाभ्वौ | वर्षाभ्वः | प्रथमा |
| वर्षाभ्वम् | वर्षाभ्वौ | वर्षाभ्वः | द्वितीया |
| वर्षाभ्वा | वर्षाभूभ्याम् | वर्षाभूंमिः | तृतीया |
| वर्षाभ्वै | वर्षाभूभ्याम् | वर्षाभूभ्यः | चतुर्थी |
| वर्षाभ्वः | वर्षाभूभ्याम् | वर्षाभूभ्यः | पञ्चमी |
| वर्षाभ्वः | वर्षाभ्वोः | वर्षाभूणाम् | षष्ठी |
| वर्षाभ्वि | वर्षाभ्वोः | वर्षाभूषु | सप्तमी |
| हे वर्षाभूः । | हे वर्षाभ्वौ । | हे वर्षाभ्वः। | सम्बोधनम् |

(308) न षट्स्वस्त्रादिभ्यः 4-1-10

षड्संज्ञकेभ्यः स्वस्त्रादिभ्यश्च ङीप् टापौ न स्तः । स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा । याता मातेति सप्तैते स्वस्त्रादय उदाहृताः ।। अप्तृन् (सू. 277)इति दीर्घः । स्वसा । स्वसारौ । स्वसारः । माता पितृवत् । शसि मातृः द्यौः गोवत् । राः पुंवत् । नौः ग्लौवत् ।

---

पदच्छेदः – न, पट्स्रस्त्रादिभ्यः द्विपदमिदं सूत्रम् ।

समासः – षट् च स्वस्त्रादयश्च षट्स्वस्त्रादयः इतरेतरद्वन्द्वः, तेभ्यः षट्स्वस्त्रादिभ्यः ।

अनुवृत्तिः ङीप्, टाप्

सूत्रप्रकारः – विधिसूत्रम् (निषेधविधायकम्)

सरलार्थः – षकारान्ताः नकारान्ताश्च (षट्संज्ञकाः) स्वस्त्रादिगणपठिताः ये शब्दाः तेभ्यः ङीप् टाप् च एतौ द्वौ प्रत्ययौ न भवतः ।

विशेषार्थः – ष्णान्ता षट् इति सूत्रात् षकारान्ताः नकारान्ताश्च शब्दाः षट्संज्ञकाः ।

कारिकार्थः – (स्वसा तिस्रश्चतस्त्रः) स्वसा, तिस्त्रः, चतस्त्रः, ननान्दा, दुहिता, याता, माता एते सप्त स्वस्त्रादिगणपठिताः शब्दाः ।

साधनिका–

स्वसा – स्वसृ इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सुप्रत्यये स्वसृ+सु इति स्थिते उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्सज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे स्वसृ+स् इति स्थिते ऋन्नेभ्यो ङीप् इत्यनेन ङीप् प्राप्ते न षट्स्वस्त्रादिभ्यः इत्यनेन निषेधे स्वसृ+स् इति स्थिते अनङ् आदेशे स्वस्+अन्+स् इति स्थिते अप्तृन्तृच्.... 277 इत्यनेन सूत्रेण दीर्घे स्वसान्+स् इति स्थिते नलोपे, सलोपे स्वसा इति रूपं सिद्धम् ।

स्वसारौ – स्वसृ इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां औ प्रत्यये स्वसृ+औ इति स्थिते ऋन्नेभ्यो ङीप् इत्यनेन ङीप् प्राप्ते न पट्स्त्रादिभ्यः इत्यनेन निषेधे स्वसृ+स् इति स्थिते गुणे स्वसर्+औ इति स्थिते अप्तृन्तृच्.... 277 इत्यनेन सूत्रेण दीर्घे स्वसार्+औ वर्णसंम्मेलने स्वसारौ इति रूपं सिद्धम् ।

स्वसारः – स्वसृ इत्यस्मात् शब्दात् प्रातिपदिकत्वात् प्रथमाबहुवचनविवक्षायां जस् प्रत्यये स्वसृ+इति स्थिते ऋन्नेभ्यो ङीप् इत्यनेन ङीप् प्राप्ते न षद्धस्त्रादिभ्यः इत्यनेन निषेधे स्वसृ+जस् इति स्थिते चूटु इत्यनेन सूत्रेण जकारस्य इत्संज्ञायां तस्य लोपः इत्यनेन जकारस्य लोपे स्वसृ+अस् स्थिते गुणे स्वसर्+अस् इति स्थिते अप्तृन्तृच... 277 इत्यनेन सूत्रेण दीर्घे स्वसार+अस्

इति स्थिते इति ससजुषो रुः इति सूत्रेण स् स्थाने रु आदेशे स्वसार्+अरु इत्यवस्थायां उपदेशेऽजनुनासिक इत् इति सूत्रेण उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण उकारस्य लोपे स्वसार्+अर् इति स्थिते खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफ़स्य स्थाने विसर्गे सवसारः इति रूपं सिद्धम् ।

**ऋ कारान्तस्त्रिलिङ्गः स्वसृशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| स्वसा | स्वसारौ | सवसारः | प्रथमा |
| सवसारम् | स्वसारौ | स्वसृः | द्वितीया |
| सवस्रा | स्वसृभ्याम् | स्वसृभिः | तृतीया |
| स्वस्रे | स्वसृभ्याम् | स्वसृभ्यः | चतुर्थी |
| स्वसुः | स्वसुभ्याम् | स्वसृभ्यः | पञ्चमी |
| स्वसुः | स्वस्त्रोः | स्वसृणाम् | षष्ठी |
| स्वसरि | स्वस्त्रोः | स्वसृषु | सप्तमी |
| हे स्वसः | हे स्वसारौ । | हे स्वसारः। | सम्बोधनम् |

**ऋकारान्तस्त्रिलिङ्गः मातृशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| माता | मातरौ | मातरः | प्रथमा |
| मातरम् | मातरौ | मातृः | द्वितीया |
| मात्रा | मातृभ्याम् | मातृभिः | तृतीया |
| मात्रे | मातृभ्याम् | मातृभ्यः | चतुर्थी |
| मातुः | मातृभ्याम् | मातृभ्यः | पञ्चमी |
| मातुः | मात्रोः | मातृणाम् | षष्ठी |
| मातरि | मात्रोः | मातृषु | सप्तमी |
| हे मातः | हे मातरौ । | हे मातरः। | सम्बोधनम् |

**ओकारान्तस्त्रिलिङ्गः द्यौशब्दस्य रुपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| द्यौः | घावौ | द्यावः | प्रथमा |
| द्याम् | द्यावौ | द्याः | द्वितीया |
| द्यवा | द्योभ्याम् | द्योभिः | तृतीया |
| द्यवे | द्योभ्याम् | द्योभ्यः | चतुर्थी |
| द्योः | द्योभ्याम् | द्योभ्यः | पञ्चमी |
| द्योः | द्यवोः | द्यवाम् | षष्ठी |
| द्यवि | द्यवोः | द्योषु | सप्तमी |
| हे घौः । | हे द्यावौ । | हे द्यावः। | सम्बोधनम् |

**औकारान्तस्त्रिलिङ्गः नौशब्दस्य रूपाणि**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** |
|---|---|---|---|
| नौः | नावौ | नावः | प्रथमा |
| नावम् | नावौ | नावः | द्वितीया |
| नावा | नौभ्याम् | नौभिः | तृतीया |
| नावे | नौभ्याम् | नौभ्यः | चतुर्थी |
| नावः | नौभ्याम् | नौभ्यः | पञ्चमी |
| नावः | नावोः | नावाम् | षष्ठी |
| नावि | नावोः | नौषु | सप्तमी |
| हे नौः । | हे नावौ । | हे नावः | सम्बोधनम् |

**इति अजन्तस्त्रीलिङ्गप्रकरणम्**

## स्वाध्याय

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

(1) औङ आपः सूत्रेण किं भवति ?

(क) टाप् (ख) शी (ग) याट् (घ) एकार

(2) संबुद्धौ च सूत्रेण किं भवति ?

(क) याट् (ख) एकारः (ग) टाप् (घ) शी

(3) विभाषा दिक्समासे बहुव्रीहौ सूत्रे कति पदानि सन्ति ?

(क) 1 (ख) 3 (ग) 2 (घ) 4

(4) द्वितीया च तृतीया च अत्र कः समासः ?

(क) तत्पुरुष (ख) इतरेतरयोगद्वन्द्व (ग) बहुव्रीहिः (घ) कर्मधारयः

(5) इदुद्भ्याम् सूत्रेण किं भवति ?

(क) आम् (ख) डाप् (ग) शी (घ) रुकारः

(6) अचि र ऋतः सूत्रे कति पदानि सन्ति ?

(क) 2 (ख) 1 (ग) 3 (घ) 4

(7) स्त्रीशब्दे इयङ् केन सूत्रेण भवति ?

(क) इदुद्भ्याम् (ख) स्त्रियाः (ग) न तिसृचतसृ (घ) अचि र ऋतः

(8) स्त्रियां च सूत्रे कति पदानि सन्ति ?

(क) 2 (ख) 3 (ग) 4 (घ) 1

(9) स्त्रीलिङ्ग कतिविधम् ?

(क) 3 (ख) 4 (ग) 2 (घ) 1

(10) अधस्तनेषु शब्देषु कः शब्दः स्वस्रादिगणे न आगच्छति ?

(क) यातृ (ख) ननान्दृ (ग) पितृ (घ) स्वसृ

**2. एकैकवाक्येन उत्तराणि लिखत ।**

(1) आङि चापः सूत्रेण किं भवति ?

(2) विभाषा दिक्समासे बहुव्रीहौ सूत्रेण किं भवति ?

(3) षढोः कः सि सूत्रस्य कार्यं किम् ?

(4) न तिसृचतसृ सूत्रेण किं भवति ?

(5) स्त्रियां च सूत्रेण किं भवति ?

**3. सविस्तरम् उत्तरं लिखत ।**

(1) याडापः सूत्रस्य सरलार्थं, अनुवृत्तिं, सूत्रार्थं च लिखत ।

(2) ङिति ह्रस्वश्च सूत्रस्य सरलार्थं, अनुवृत्तिं, सूत्रार्थं च लिखत ।

(3) इदुद्भ्याम् सूत्रस्य सरलार्थं, अनुवृत्तिं, सूत्रार्थं च लिखत ।

(4) त्रिचतुरोः स्त्रियां तिसृचतसृ सूत्रस्य सरलार्थं, अनुवृत्तिं, सूत्रार्थं च लिखत ।

(5) वाऽमि सूत्रस्य सरलार्थं, अनुवृत्तिं, सूत्रार्थं च लिखत ।

**4. निम्नलिखितानि रूपाणि साधयत ।**

(1) रमा (2) हे रमे (3) रमया (4) रमायाम्

(5) निङ्गिः (6) तिसृभ्यः (7) द्वयोः (8) वर्षाभूः

(9) पुनर्भूणाम् (10) स्वसा

**5. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायन्ताम् ।**

(1) विभाषा दिक्समासे बहुव्रीहौ ।

(2) गुणनाभवौ... कारिकायाः पूर्तिं कृत्वा भावार्थं च लिखत ।

(3) ओस्यौकारे... कारिकायाः पूर्तिं कृत्वा भावार्थ च लिखत ।

**6. अ विभागं ब विभागेन सह संयोजयत ।**

| **अ विभाग** | **ब विभाग** |
|---|---|
| (1) रमायै | (1) ओस् |
| (2) द्वयोः | (2) ङे |
| (3) वर्षाभूः | (3) सु |
| (4) स्वसा | (4) औ |
| (5) स्वसारौ | (5) सु |

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं, पदपरिचयं, अन्वयं, सरलसंस्कृतेन भावार्थं च लिखत ।

◆

# 19 अथाजन्तनपुंसकलिङ्गप्रकरणम्

**प्रस्तावना**

**पूर्वं वयं अजन्तस्त्रीलिङ्गशब्दान् पठितवन्तः । अस्मिन् प्रकरणे ये शब्दाः अजन्ताः किन्तु नपुंसकलिङ्गे विधीयमानाः तेषामध्ययनं कुर्मः यथा ज्ञानदधिवारिप्रभृतयः।**

**(309) अतोऽम् 7-1-24। अतोङ्गात् क्लीबात् स्वमोरम् । अमि पूर्वः ( सू. 124 ) ज्ञानम् । एङ्ह्रस्वात्- ( सू. 193 ) इति हल्मात्रलोपः हे ज्ञान ।**

309 पदच्छेदः - अतः अम् द्विपदिमंसूत्रम् ।

अनुवृत्तिः - अंगस्य स्वमोः, नपुंसकात्,

सूत्रप्रकारः विधिसूत्रम् ।

सरलार्थः - अकारान्तात् अंगात् परयोः स्वमोः स्थाने अमादेशः नपुंसकलिङ्गे ।

अमि पूर्वः इति सूत्रेण अमि परे पूर्वरूपं क्रियते यथा साधनिका - ज्ञान+सु इति दशायामनुबन्धलोपे कृते ज्ञान+स् रुव्यस्ये प्राद्रौ अंतोद्म् इत्यनेन अमावेशे ज्ञान+अम् अमि पूर्वः अनेन अमोऽकारस्य पूर्वाकारस्य रूपे कृते ज्ञानम् इति रुपम्

विशेषार्थः अदन्तादकाति इति कथमर्थः तदा उच्चयते अतः इति पश्चमीअन्तंवदम् अंकास्य इत्यधिकारः तस्य विपरिणामः पञ्चभ्यावेन क्रियते तदा अकाति इत्यर्थोभवति अकात् इति विशेष्यपदम् अत इति विशेषणम् अतो विशेषणे तदन्त विधिः, येन विधिस्त दन्तस्यैति नियमात् तदा अकारान्तात् अङात् क्लीबात स्वमोरम् स्पादित्यथो भवति ।

अत्र प्रश्नः समुदेति सोरमविधानं तु वरम्, किन्तु अमोऽम् विधानस्य किं फलम् इति.

तदा उच्यते - अमोडम् विधानस्य फलं स्वमोर्नपुंसकाच्च इति अमो लुक् न स्यातदर्थेम् अम विधानं क्रियते ।

साधनिका - हे ज्ञान । ज्ञानशब्दात् प्रातिपदिकात् प्रथमे कवचने सुप्रत्ययेडनुबन्धलोपे ज्ञान+स् एकवचन सम्बुद्धिः इति सम्बुद्विसंज्ञायाम् एङ्ह्रस्वात्सुम्बुद्धेः इति सकारलोपे हे इति प्रयोगे हे ज्ञान । इति साधु ।

**(310) नपुंसकाच्च 7-1-18 क्लीबात्परस्यौङः शी स्यात् भसंज्ञायाम् ।(311)यस्येतिच 6.4.148 ।। भस्येवर्णावर्णयोलोपः स्यादीकारे तद्धिते च परे । इत्यकारलोपे प्राप्ते औङः श्यां प्रतिषेधो वाच्यः ( वा. 4189 ) ज्ञाने ।**

310 पदच्छेदः नपुंसकात्, च द्विपदमिदं सूत्रम्

अनुवृत्तिः औङः, शी ।

सूत्रप्रकारः - विधिसूत्रम् ।

सरलार्थः नपुंसकात् अकात् परस्य औ इत्यस्य शी आदेशः। शकारस्य लशक्वतद्धिते इति इत्संज्ञायाम् ईकारे परे भसंज्ञा।

औङः इति किम् ? इति प्रश्ने-उच्यते औकारविभक्तेः संज्ञा।

311 पदच्छेदः - यस्येति च यस्य, ईतिच त्रिपदमिदंसूत्रम् ।

अनुवृत्तिः भस्य, लोपः तद्धिते ।

सूत्रप्रकारः विधिसूत्रम् ।

सरलार्थः - भसंज्ञकस्य पदस्य योऽकारः तस्य त्तोपः ईकारे अथवा तद्धिते प्रत्यये परे ।

'ज्ञान+औ' इति दशायां नपुंसकाच्च इति शी आदेशे ज्ञान+शी शकारस्य लशक्वतद्धिते इति इसंज्ञायां लोपे च कृते अंगसंज्ञक वात् यचि भम् इति भसंज्ञायाम् यस्येतिव इति अकार लोपे प्रापे-

औङः श्यां प्रतिषेधो वाच्यः - औङस्थाने आगतः यः शी आदेशः तस्मिन् पर यस्येतिच इति प्राप्तः अकारलोपः स न भवति । अतः ज्ञान+ई इति दशायां अकारलोपो न प्रवर्तते । आ इगुण अपेन सूत्रेण गुणे कृते ज्ञाने इति रूपम् ।

**(312) जश्शसोः शिः 7-1-2011कलीबादनयोः शिः स्यात्।**

**(313) शि सर्वनामस्थानम् 1.1.4211 शि इत्येतदुक्त संज्ञ स्यात्।**

**(314) नपुंसकस्य झलचः 7-1-72 झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात् सर्वनामस्थाने परे। उपधादीर्घः। ज्ञानानि। पुनस्तद्वत् । शेषं रामवत् । एवं धनवनफलादयः ।**

(312) पदच्छेदः जश्शसोः, शि, द्विपदमिदंसूत्रम् ।

अनुवृत्तिः - नपुंसकात् । समासः जस च शस् च जश्शशो

सूत्रप्रकारः - विधिसूत्रम् । तयोः जश्शसोः द्वन्द्वसमासः ।

सरलार्थः नपुंसकात् अङ्गत परयोः जश्शसोः स्थाने शि इति आदेशो भवति ।

313 शि, सर्वनामस्थानम्, द्विपदमिदं सूत्रम् ।

सूत्रप्रकारः संज्ञा सूत्रम् ।

सरलार्थः शि इत्यस्य सर्वनामस्थान संज्ञा भवति ।

विशेषार्थः सुडनपुंसकस्येति नपुंसकलिङ्गो अप्राप्ते, अनेन सर्वनामस्थानत्वं विधीयते ।

314 पदच्छेदः नपुंसकस्य, झलचः, द्विपदमिदंसूत्रम् ।

समासः झल च अच्चेति समाहारद्वन्द्वः तस्य झलचः ।

अनुवृत्तिः अकास्य, नुम्, सर्वनामस्थाने ।

सूत्रप्रकारः विधिसूत्रम् ।

सरलार्थः - झलन्तस्य अजन्तस्य च अंगस्य नुमागमो भवति सर्वनामस्थाने प्रत्यये परे ।

उपधादीर्घः अलोडन्त्यात् पूर्व उपधा अनेन उपान्त्य वर्णस्य उपधासंज्ञाभवति । तस्य फलम् उपधा दीर्घः सर्वनामस्थाने चाडसम्बुद्धौ अनेन क्रियते ।

साधनिका ज्ञानानि ज्ञान शब्दात प्रातिपदिकात् प्रथमा - बहुवचने जस प्रत्ययेडनुबन्धलोपे ज्ञान+अस् जश्शसो शि इतिशि नपुंसकस्य झलचः इति मिदचोऽन्त्यात्परः इति सहकारेण नुमागमेडनुबन्धलोपे ज्ञानन ई सर्वनामस्थाने चाऽसम्बुद्धौ इति उपधा दीर्धे.

ज्ञानानि इति साधु । धनं धने धनानि । वने वने वनानि । फल फले फलानि । (352)

**(315) अदड्डुतरादिभ्यः पञ्चभ्यः 7-1-15 ।**

**एभ्यः क्लीबेभ्यः स्वमोरदड्डादेशः स्यात् ।**

**(316) टेः 6-4-143 ।। डिति परे भस्य टेर्लोपिः । वाऽवसाने (206)**

**कतरत् - कतरद, कतरे, कतराणि। भंस्य इति किम् ? पञ्चमः टेर्लुप्तत्वात् प्रथमयो (सू. 164) इति पूर्वसवर्णदीर्घः एङ्ह्रस्वात् - (सू. 173) इति सम्बुद्धिलोपश्च न भवति हे कतरत् ।**

315 - पदच्छेदः अदड्, डतरादिभ्यः पञ्चभ्यः ।

अनुवृत्तिः - स्वमोः नपुंसकात् ।

सूत्रप्रकार : - स्वमोः नपुंसकात् ।

सूत्रप्रकारः विधिसूत्रम् ।

सरलार्थः - उतरादिपञ्चभ्यः शब्देभ्यः स्वमोः स्थाने अदङ्ग आदेशो भवति ।

विशेषार्थः - इतरादि के शब्दाः इति जिज्ञासायामुञ्चते-

उतर, उतमः उभौप्रत्ययौ । अन्यः, अन्यतरः इतरश्च इति पञ्चशब्दाः उतरादिवाच्याः ।

316 टे - इत्येकपदंसूत्रम् ।

अनुवृत्ति - भस्य, लोपः डिति ।

सूत्रप्रकारः - विधिसूत्रम् ।

सरलार्थः इति प्रत्यये परे भसंज्ञकस्य अकास्या टेः लोपः ।

साधनिका – कातरत् कतरद् किम् शब्दात् उतरप्रत्यये अनुबन्धलोपे किम+अतर डित्वात् अकारेपे भत्वाच्य टिभागस्य इम् इत्यस्य टेः इत्यनेन लोपे भतर अस्यार्थः द्वयोः कः एक इति निर्धाणार्थः ततः प्रातिपदिकात् सुप्रत्यये कतर+सु अनुबन्धलोपे कतर+स् अंदइतरादिभ्यः

पञ्चश्यः अनेन अदड आदेशे अनुबन्धलोपे टिलोपे कतद्+अद् वर्णसम्मेलने कतरद् वाऽवसाने इति चत्वे कतरत् साधु । चर्त्वाभावपक्षे कतरद् ।

कतरे – कतरशब्दात् + औ प्रत्यये कतर+औ नपुंसकाच्य इति शी आदेशे अनुबन्धलोपे कतर+ई आदगुणः इति गुणे कतरे इति साधु ।

कतराणि – कतरशब्दात् प्रातिपदिकात् प्रथमा बहुवचने जस् प्रत्ययेडनु बन्धलोपे कतर+अस जश्शसोः शिः इति शि आदेशे अनुबन्धझलापे कतर+इ शि सर्वनामस्थानम् इति सर्व नामस्थानत्वे नपुंसकस्य झलयः इत्यनेन मिदचोडन्त्या त्परः इति सहकारेण नुमागमेडनु बन्धलोपे कृते कतर न् इ सर्वनामस्थाने चाडसम्बुद्धौ इत्यनेन उपधादीर्घे कतरान्+इ अट्कुटय्वाड्नुम्ऽव्यवायेडपि रूति णत्वे कतराणि साधु ।

भस्यग्रहणेन भसंझकास्येवेटेः लोपः पञ्चन्+भः अत्र स्वादिष्वसर्वनाम स्ताने इति पदत्वात् नलोपः प्रातिपदि – कान्तस्पेति नलोपः । यदि भस्य इति नस्यात् तदा अत्र अन्भागस्थ लोपेन पञ्चमः इति अनिष्टसंपम् ।

हे कतरत् । कतर+सु अदडावेशे डनुबन्ध–लोपे

कतर+अ टिलोपे कतर+अद् अत्र प्रथमयोः पूर्वसवय इति दीर्धो न एडह्रस्वादिति सम्बुद्धिलोपोऽपि न यतो हि

अरदादे शत्वात् खरिच इति चत्वेन तमारे कुतेह कतरत कतरद् ।

---

**पुनस्तद्वत् । शेषं पुंवत् । कतमत् । इतरत् । अन्यत् । अन्यतरत् । अन्यतमशब्दतु अन्यतममित्येव । एकतरात्प्रतिषेधो वक्तव्यः ( वा. 4287 ) एकतरम् । सोरमादेशे कृते सन्निपातपरिभायषया न जरस् । अजरम् । अजरसी – अजरे । परत्वाज्जरसिकृते झलन्तत्वान्नुम् । (317) सान्तमहतः संयोगस्य 16-4-10 ।। सान्तसंयोगस्य महतश्च यो नकारः तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे । अजरांसि अजराणि । अमि लुकोऽपवादमम्भावं बाधित्वा परत्वा ज्जरस् । ततः सन्निपातपरिभाषया न लुक्।**

---

पुनः द्वितीयांया विभक्तौ कतरत् कतरय कतरे कतराणि । कतरेण कतराभ्याम् कतरेः । कतरस्मै कतराभ्याम् कतरेभ्यः

कतरस्मात् ।। कतरेभ्यः । कतरस्य कतरयोः कतरेषाम् ।

कतरस्मिन् कतरयोः कतरेषु । कतमत इति किमशब्दात् डतम् प्रत्ययेऽनुबन्धलोपे कतमशब्दात् सुप्रत्यये, अदडादेशे टि लोपे वर्णसम्मेलने कतमद् वाऽवसाने इति पर्वेन तकारे कतमत – कतमद ।

साधनिका इतरत् इतरशब्दन्यावाचकः ततः सौ तत्स्थाने अडदोदशे भत्वात् अकारलोपे वर्णसम्मेलने इतरत् चर्त्वाभावे इतरद । अन्यशब्दात् अदडादेशेडनुबन्धलोपे भत्वात् अलोपे अन्यत् पूर्ववज्जेयम् ।

अन्यतरत् – अन्यतर शब्दात प्रातिपदिसात् सुप्रत्ययेडनु बन्धलो – पे अंन्यतर+स सस्य अदङ्गादेशेडनुबन्धलोपे अन्यतर+अत भसंज्ञायाम् अलोपे अन्यतर+अत वर्णसंयोगे अन्यतरत जशत्वचर्त्वे अन्यतरद अन्यतरत इति रुपद्वयम्

अन्यतमम् अन्यतमशब्दोडकारान्तोडव्युत्पनप्रातिपदि कः ततः सुप्रत्ययः तस्य अमादेशे अमिपूर्वः इति पूर्वरूपे अन्यतमम् । अन्यतमे अन्यतमानि इति रूपाणि ।

(वा. 4287) एकतरात्प्रतिषेधो एकतरशब्दात् वरयो – स्वमो स्थाने अदड् आदेशो न भवति ।

एकतरम् – एकतरशब्दात् प्रातिपदिकात् सुप्रत्यये उतरप्रत्यान्तवात अदडायेशः प्राप्तः एकतरात्प्रतिषेधो वाच्यः जनेन वार्तिकेन निषेधे अंतोडम् इति समावेशे अमिपूर्वः इति पूर्वरूपे कृते एकतरम इति साधु । द्वयोरेकः

अजरम् नविधते जरायस्य इति विग्रहे नमोडस्त्यर्थानां वाच्य इति विधमान पदस्यलोपे कृते अजरशब्यः अकारान्तः कुलवाचकः प्रातिपदिकत्वात् सुप्रत्यये अमादेशे अजर+अम् अजादौ अमि जरसादेशस्य प्राप्तिः सन्नियातपरिभा षाबलात्

जरसादेशो न. अमि पूर्वः इति पूर्व रूपे अजरम् इति साधु ।

अजरसी – अजरशब्दात् प्रातियदिकात् औप्रत्यये अंजर+औ जरायाः जरसन्य तरस्याम् इति जरसादेशे अजरस+औ नपुंसकाच्य इति शी आदेशेडनुबन्धलोध अजरस+ई वर्णसम्मेलने अंजरसी जरस भावपक्षे अंजर+ई आंदगुण इति गुणे अंजरे इति रुपदय सिद्धयति ।

अजरांसि अजराणि इति रुपद्वयं प्रथमा बहुवचने अजरशब्दात् जस प्रत्येडनु बन्धलोपे अंजर+अस् जश्शसोः शि इत्यनेन शित्वात् सम्पूर्णादेशे कृते अंजर+इ जरायाः जरसन्यतरस्याम् इति जरस इति जरसादेशे अंजरस्+इ शि–सर्वनामस्थानम् इति सर्वनामस्थान संज्ञायां नपुंसकस्य झलचः इति मिदचोडन्त्यात्परः सहकारेण नुमागमे अंजर न स+इ सान्महतः संयोगस्य इति सकारान्तस्य संयोगस्य तकारस्य उपधायाः अकारस्य दीर्घे कृते वर्णसम्मेलने नश्चापदान्तस्य झलि इति अनुस्वारे कृते अजरासि बरसभावपक्षे ज्ञानावित् अजराणि ।

(317) सान्तमहतः संयोगस्य द्विपदमिदंसूत्रम् ।

समासः सान्तसंयोगः इति पृथकपदम् लुप्तषव्यीकम्, तस्य सामर्थ्या भावात् न समासः महत् इत्यपि, अवयवषष्ठी तच्च नकारे अन्वेति । अत एव असामर्थ्यात महत शब्देन तस्य नसमासः ।

अनुवृत्तिः सर्वनामस्थाने, च, असम्बुद्धौ, न, उपधाया, दीर्घः ।

सूत्रप्रकारः विधि–सूत्रम् ।

सरलार्थः – सकारान्तस्य संयोगस्य तथा च महत् इति शब्दस्य नकारस्योपधायाः दीर्घः सम्बुद्धिमिजो सर्व नामस्थाने परे ।

साधनिका–अजरसम् अंजर+अम् स्वमोर्नपुंसकादिति लोपे प्राप्ते अतोऽम् इति अमोदशे प्राद्रे परत्वाज्जरसादेशे

---

**अजरसम् अजरम् । अजरसी अजरे । अजरांसि अजराणि । शेषं पुंवत् । पदन्न इति हृदयोदकास्यानां हृद उदन आसन् । हन्दि हृदा । हृद्भ्यामित्यादि । उदानि उद्ना उद्भ्यामित्यादि । आसानि । आस्ना आसभ्यामित्यादि। मांसि। मांसा, मान्भ्यामित्यादि । वस्तुतस्तु प्रभृतिग्रहणं प्रकारार्थमित्युक्तम् । अत एव भाष्ये मांस पचन्या उखायाः इत्युदाहृतम् । अयस्मयादित्वेन भत्वात्संयोगान्तलोपो न ।**

---

अजरसम – अजरस्+अम वर्णसम्मेलने अजरसम् । अत्र अमो लोपः प्राप्नोति सन्निपातपरिभाषया तन्न भवति । जरसभावपक्षे अजरम् इति साधु । अजरेण अजरसा तृतीयैकवयने, अजरसे अजराय चतुर्थ्यैरुवयेन अजरसः – अजरात् पञ्चम्यैकवचने, अजरसः अजरस्य षष्ठयाम् अजरसोः अजस्योः षष्ठीसप्नमीद्विवचने । अजरसि–अजरे सस्तम्मेकयने

(चित्त)

हृदयशब्दः हृदयवाचकः उपकरशब्दोजलावयकः आस्यशब्दोमुखवाचक एतेषां सुटि ज्ञानवद् रूपणि–भवन्ति हृदयम् हृदये हृदयानि । उदसम् उदके उपसानि । आस्यम् । आस्ये । आस्यामि

शसि प्रक्रिया विशिष्यते साधनिका हन्दि हृदयशब्दात् प्रातियदिकात् शस प्रत्यये अनुबन्धलोपे हृवय+अस् जश्शसोः शि इति शिशावेडतुबन्धलोपे हृदय+इ पदलोमास इत्यादिना हृदादेशे हृद + इ नपुंसकस्य झलचः इति नुमागमे डनुबन्धालोपे अनुस्वारे परसवर्णे यकते वर्णसम्मेलने हन्दि साधु ।

चतुर्थ्येकवचने – हृदे, पञ्चम्येकवचने हृदः । षष्ठीद्विवचने हृदोः बहुवचने हटाम हुत्सु, इति सप्तमी बहुवचने ।

उदानि – उपका शब्दः शस् प्रत्ययेडनुबन्धलोपे उयक+अस जश्शसौः शिः इतिशि अनुबन्धलोपे उपसइ पदन्नोमास् इति उदोदेशे उप इ नपुंसकस्य झलत इति नुमागेडनुबन्यालोपे कृते उदन ई उपधा दीर्घे उदानि ।

उद्ना – उदक शब्दात तृतीयैकवचने टाप्रत्ययेडनुबन्धलोपे उदक+आ मसंज्ञायां उदन् आदेशे अल्लोपेकृते उदना इति साधु ।

आसानि आस्य शब्दस्य आस आदेशे डोश्शीसो शि इति शिकृते सर्वनामस्थाने नुमिकृते. उपधादीर्घे पूर्ववत आसानि ।

मांसि – मांस शब्दात द्वितीया बहुवचने शस्प्रत्ययडनुबन्धलोपे जश्शसोः शिः इति शि कृते शि सर्वनाम स्थानम् इति सर्वनामस्थान संज्ञामां मांसपृतनासानूनांम । इति वार्तिकेन हलन्तमांस+ई वर्णसम्मेलने मांसि ।

तृतीयैकवचने मांसा इति रुपम् ।

तृतीयैकवचने मांसा इति रूपम ।

तृतीयाद्विवयने मान्श्याम इति रुपम् ।

मान्भ्याम–मांस+भ्याम इति दशायां अत्र स्वाडितवसर्व–नामस्थाने इति पदान्तवात संयोगोनास्य लोप: इति सलोपे मान्भ्याम् अत्र सकारं मावा नकारस्य अनुस्वार: नकारत्वेन परिणत: निमितापाये नैमितिकस्याप्ययाय: अत्र न लोप: प्रातिपदिकात्तस्येति तलोषा: प्राप्तोति किन्तु संयोगान्त लोपस्यासिद्धवात् न लोपो न ।

–मान्भि: मांसे मान्भ्याम्, भान्भ्य: मांस: मान्भ्यान मान्भ्य:, मांस, मांसो: मांसाम् मांसि मांसो: मान्सु । मानसु । मांसादेशामावपक्षे ज्ञानवद्पाणि संभवन्ति ।

–पदण्णोमास इति सूत्रे प्रभृतिग्रहणं प्रसारार्थम् इत्युस्तम् प्रभृतिशब्द: साट्टश्यार्थक: विभक्ति भिजोर्थेडपि सादश्य ग्रहितुं शक्यते । अर्थात् पाददन्तादिशब्देश्य: अव्यहितपरे ये पद यन आदि आदेशा संभविष्यन्ति । अतएव भष्येकारेण मांसपचन्या: उरवाया इत्यत्र मांस शब्दात् विभक्तिपरे न भवति तदापि मांस आदेश, युक्त एव केवले विभक्तो परे पदादिशीना संभावनायां प्रयोग: भक्तो नास्ति । कारणं सत मांसपचनी अस्य विग्रह: मांसस्य पचनी इति समासे कृते विभक्तिलोपे सति मांस, आदेशस्त्र संभावना नासित् ।

---

**(318) ह्रस्वो नपुंसके प्रातिपदिकस्य 1.2.47।।**

**क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्व: स्यात् । श्रीपं ज्ञानवत् । श्रीपाय । अत्र सन्निपातपरिभाषया आतो धातो: इत्याकारलोपो न । इत्यदन्ता: ।**

**(319) स्वमोर्नपुंसकात् 7.1.23 ।। कलीबादङ्गात् परयो: स्वमोर्लुक्स्यात् वारि ।**

---

318 – पदच्छेद: ह्रस्व:, नपुंसके, प्रातिपदिकस्य, त्रिपदमिदं सूत्रम् ।

अनुवृत्ति: – न अपेक्षते ।

सूत्रप्रकार: – विधि सूत्रम् ।

सरलार्थ: – नपुंसकलिङो विधमानस्य अजन्तस्य प्रातिपदिकेस्य ह्रस्वो भवति । यथा–श्रियंपाति इति श्रीपा अस्यअनेन कुलस्य विशेषणत्वात् नपुंसकमादाय ह्रस्वे अद्वारे कृते श्रीप तत: सौ, अभावेदेशे पूर्वसपे कृते श्रीषम साधु ।

–श्रीपम् श्रीपे श्रीपाणि, द्वितीयां प्रथमावत्,

श्रीपेण श्रीपाभ्याम् श्रीपै:,

श्रीपाय श्रीपाभ्याम् श्रीपेभ्य:,

श्रीपात् श्रीपेभ्य: श्रीपस्य

श्रीपयो: श्रीपाणाम, श्रीपे श्रीपयो: क्षीषेषु ।

–श्रीपाय श्रीपा+डे अनुबन्धलोपे ह्रस्वो नपुंसके प्रातिषदिकस्यं इति ह्रस्वे श्रीप+ए डेर्यादेशे श्रीप+य सुधि च इति दीर्धे श्रीपाय । विशेष कष्टाय क्रमणे इति निर्देशात् सन्निपातपरिभाषा न प्रवर्तते । अत्र शंका भवति यत् ह्रस्वो नपुंसके इति ह्रस्वे कृतऽपि एकदेशविकृत मनन्यवद इति न्यायेन धातुत्वाना पायात् दीर्घे कृते आकारान्तव्याच्य तोधातो – इत्याल्लोप: स्पात, यादेशस्य स्व तो यसारदितया स्थानिवत्वेन स्वादिप्रत्यय तया च तस्मिन् परे भत्वस्यापि सत्वाद् इति अत आह सन्निपात परिभाषेति । अन्ते तक्षण प्रतिपदोक्तपरिभाषया अस्य वारणं क्रियते ।

पदच्छेद – स्वमो: नपुंसकात् द्विपदमियंसूत्रम् । समास: सुच अम च स्वमौ तयो: स्वमो: द्वन्द्व:

अनुवृत्ति – लुक ।

सूत्रप्रकार: – विधिसूत्रम्

सरलार्थ: – नपुंसकात् उङ्गात् स्वमो: लुक् भवति ।

साधनिका – वारिशब्दात् प्रातिपदिकात् प्रथमैकवयने सुप्रत्ययेडनुबन्धलोपे वांरि+स् स्वमोनुपुंसकाडिति सलोपे वांरि इति साधु ।

**(320) इकोऽचि विभक्तौ 7-1-73 ।। इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ । वारिणी । वारीणि । नलुमता-( सू. 263 )इति निषेधस्यानित्यावात्पक्षे सम्बुद्धिनिमित्तो गुणः । हे वारे । हे वारि । आङोना ( सू. 244 ) वारिणा । घेर्ङिति ( स्. 245 ) इति गुणे प्राप्ते वृद्ध्यौत्तृज्वद्भावगुणेभ्यो नुम पूर्व विप्रतिषेधेन ( वा. 4373 ) वारिणे वारिणः वारिणः वारिणोः नुमचिर् ( वा 4374 ) इति नुट्, नामि ( सू. 209 ) इति दीर्घः वारीणाम्**

-320 - पदच्छेदः - एकः, अचि, विभक्तौ त्रिपदमिदंसूत्रम् ।

अनुवृत्तिः - अङ्गस्य, नपुंसकस्य, नुम् ।

सूत्रप्रकारः - विधिसूत्रम् ।

सरलार्थः - अजादौ विभक्तौ परे ङ्गन्तस्य अङ्गस्य नुमागम : ।

विशेषार्थ : अंङ्गस्य इत्यधिकारः इक इति विशेषणपदं त तो ङ्गन्तस्य इति, अर्थलाभः ।

साधनिका - वारिणी वारिशब्दात् प्रातिपदिकात् प्रथमाद्वितीया द्विवचने औप्रत्यये वारि+ई मिदच डन्त्यात्परः इति सहकारेण इकोडयि वि भक्तो इति नुमागमेडनुबन्याभोवे वारिन+ई एटकुप्वाडनुम्ब्यवायेडपि इति पात्वे वारिणी इति साधु ।

वारीणि वारि शब्दात प्रथमा बहुवचने अस प्रत्ययेडनु बन्यालोपे वारि+अस् जसिय इति गुणे प्राप्ते ते प्रबादय इसोडचिविभक्तो । इति नुमागमे वारिन इ शि सर्वनामस्थानम् इति सर्वना मस्थानसं5यां सर्वनामस्थाने चाडसम्बुद्धो इत्युपदाधीये वारीनि एटकुवाडनुम्बव्यवायेडपि इति णत्वे वोरीणि साधु ।

विशेषार्थ : न भुलताङ्गस्येति इसोडचि विभक्तौ इति सूत्रे अजग्रहणं न लुमताङ्गस्य अनित्यत्व ज्ञापयति । हलादिषु सुरभ्यामभिसादिषु विभक्तिषु नुमग्रहण नलोपः प्रातिप दिकान्तस्येतिन लोपो भदिष्य तित्र अय् ग्रहण व्यर्थम् । सम्बुद्धौ तु नडिसम्बुद्धयोरिति निषेधे सति नकारश्रवण प्रसंगोदिति वष्ट्यम् । सम्बुद्धौ लुका लुप्ततया प्रत्ययलक्षणाभावेन तत्र नुमः प्रा पेरेवा भावात् न लुमता-इति निषेधस्यानित्यत्वे तु सम्बुद्धौ प्रत्यय लक्षणत्वेन प्राप्तं नुम वारयितुम् अजग्रहणं अजग्रहणं न लुमता इत्यस्यानि त्यत्वे लिङ्गमाहुः अत एव भाष्ये त्रपु शब्दस्य संबोधने हे त्रपु । हे त्रपो इति रूपम् । अत्रापि गुणे पक्षे हे वारे । पक्षे हे वारि । इति अपइय भवति ।

वारिणा - वारिशब्दात् प्रातिपरिकात् तृतीयैकवचने टाप्रत्ययेऽनुबन्धलोपे वारि+आ शेषोध्यसरिव इति घिसंज्ञायां आङोनास्त्रियाम् इति नाडदेशे परत्वात् कृते पाणे वारिणा इति साधु । अत्र नुम् प्राप्तः किन्तु परत्वात् आडोना इति बाध्यते

वारिणे - वारिशब्दात् प्रातिपदिसात् चतुर्थेकवचने डे. प्रत्ययेऽनुबन्धलोपे वारि+ए शेषोध्यसरित इति धिरवात् घेडिति इति गुजःप्राप्तः इकोडचि विभक्तो इति नुम् प्राप्तः वृद्धयौत्डतृज्दभावगुणेभ्योजुम पूर्ववि-प्रतिषेधेन इत्यनेन नुमि णत्वे च कृते वारिणे ।

वारिणः पञ्चमी-षष्ठी- द्वयोरेकवचने रूपम् । वत्रिणोः वत्रि+ओस् नुमागमेडनुबन्यलोपे सस्यसावे विसर्गे वारिणोः ।

वारीणाम् - वारिशश्चात् षष्ठीबहुवचने आमः प्रत्यये वारि+आम अत्र युम् प्राप्तः ते नुमचिरतृजवद् भावेभ्यो नुट पूर्व विप्रतिषेधेन इति नुट अनुबन्योलोपे नामि इति दीर्घे पारवे च कृते वारीणाम् साधु हलादौ हरिवत् ।

**(321) तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य, 7-1-74 भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा स्याट्टादावचि । अनादये-अनादिने इत्यादि । शेषं वारिवत् । पीलु वृक्षः, तत्फलं पीलु, तस्मै पीलुने । अत्र न पुंवत्, प्रवृत्तिनिमित्तभेदात् ।**

वारि शब्दस्य रूपाणि हलादिषु भिसादिषु हरिवत् प्रयलति । प्रथमायां हरिः वारि अत्र न विसर्गः हरिभिः, हरिभ्यः हरिभ्यः हरिषु ।

(321) पदच्छेदः - तृतीयादिषु, भाषितपुंस्कं, पुंवद्, गालवस्य ।

समासः - भाषितः पुमान् येन तत् भाषितपुंस्कम् ।

अनुवृत्तिः - एकः, अचि, नपुंसकस्य ।

सूत्रप्रकारः अतिदेशसूत्रम् ।

सरलार्थः - प्रवृत्तिनिमित्तो यदा एकः भवति तदा भाषि तपुंस्क शब्दस्य टकारादिप्रत्यये (टाद्यजादि) परे पुंवद्भावो भवति ।

उदाहरणं यथा - अनादि शब्दः त्रिषु लिकोषु प्रवर्तते । न विद्यते

आदिः - उत्पत्ति सस्य ईश्वरः । स्त्रीलिको माया, नपुंसके-ब्रह्मा अस्य पुल्लिंगे रूप प्रचलति अले भाषित पुंस्कोवर्तते । अ तो हेतो - तृतीयैकवचने - टादि - अजादि प्रत्यये पुंवदभावे अनादये हरिवत् घेडिति गुणे कृते । तदभावे

अनादिने अनादिशब्दात् प्रातिपदिकात् तृतीयैकवयने तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य अनेन पुंवदभावे कृते हरिवत्, अनादये तदभावे अनादि - डे अनुब-धलोये धिसंज्ञा द्येर्ङिति इति गुणे अयादेशे वर्णसम्मेलने कृते अनादये । शेषं वारिवत् रूपाणि भवन्ति ।

पीलु शब्द वृक्षवाचकः पुल्लिङ्गः । फल वायसो नपुंसके वर्तते अतोऽत्र वृक्षफलयोः मिजाप्रवृत्ति निमित्त कारणात् पपुंवरभावो न भवति । वृक्षे वृक्षत्वव्याजाति विशेषात्मकं पीलुत्वं प्रवृत्त निमित्तम् ।

फलविशेषे तुवाच्ये फलत्वव्याव्य जातिविशेषात्मसं पीलुत्व प्रवृत्तिनिमित्तमिति प्रवृत्ति निमित्र मेदा दित्यर्थः ।

---

**(322) अस्थिदधि-सक्थ्यक्ष्णामनङुदात्तः 7-1-75 ।। एषामनङ् स्याट्टादावचि स चोदात्तः । अल्लोपोऽनः ( सू. 234 ) । दध्ना । दध्ने । दध्नः । दध्नोः । दध्नाम् । दध्नि । दधिन । दध्नोः । शेषं वारिवत् । एवमस्थिसक्थ्यक्षीणि। तदन्तस्याप्यनङ अतिदध्ना। इति इदन्ताः सुधि ( सुधिनी । सुधीनि ।)**

---

(322) पदच्छेदः आस्थिदधिसक्थ्यण्णाम, अनङ्, उदात्तः ।

समासः अस्थिय, दधिय साबिथय अक्षिच, अस्थिरयचिसक्थ्य क्षीणि. इतरेतरयोग द्वन्द्वः तेषां अस्थिदधिसकथ्क्ष्णाम्।

अनुवृत्तिः तृतीयादिषु, अचि ।

सूत्रप्रकारः - विधिसूत्रम् ।

सरलार्थः टादिषु अजादिषु विजातिषु अस्थ्यादि-शब्दाना मनङ्, आदेशो भवति । किरवात् अनड डिच्य इति सहकारेण अन्त्यस्यैव भवति । अनड आदेश उदात्तो भवति ।

अल्लोपोडनः अनेन भसंज्ञकस्य अकस्य अनोऽकारस्य लोपः जायते ।

दघ्ना - दधि शब्दात् तृतीयैकवचने टाप्रत्यये अनुबन्धलोवे दधि+आ डिच्चेति सहकारेण अस्थिदधिसक्थ्यक्षणामनदुदात्तः अनेन इकारस्य अनडावेशेडनुबन्चलोपे यदान+आ अल्लोपीडनः इति मसंगकरवात् धकारोत्तरवर्तिनः अकारस्य लोपे नर्यासम्मेतने दघ्ना रूति रूपं साधु ।

चतुर्थेकवचने दधि+डे अनडि, भत्वात् अनोऽकार लोपे दघ्ने इति साधु । सप्तम्येकवचने विभाषा ङिश्योः इति वैकल्पिक अकारलोपे दहिन, दधनि इति रूपध्यम । दधिवत् सक्थि, अक्षि अस्थिशब्दाः सेयाः ।

---

**हे सुधे हे सुधि । सुधिया सुधिना । सुधियाम् सुधीनाम् । प्रध्या प्रधिना । इति ईदन्ताः । मधु । मधुनी। मधूनि । हे मधो । हे मधु । एवमम्ब्वादयः । सानुशब्दस्य स्नुर्वा । स्नूनि-सानूनि । प्रियकोष्टु, प्रियक्रोष्टूनि । तृज्वद्भावा त्पूर्वविप्रतिषेधेन नुम, प्रियक्रोष्टू नि । टादौ पुंवत्पक्षे प्रियक्रोष्ट्रा-प्रियक्रोष्टुना । प्रियक्रोष्ट्रे प्रियक्रोष्टवे ।**

---

यथा यधि शब्दाय् अनड तथैव अस्थि-अस्थि- अक्षिशब्देभ्योडपि तवन्तेभ्योडपि जायते । अतोडत्र दधि अतिक्रान्तः अतिदधि तदन्तादपि अनज्कृते अतिद धि+अनड+आ, अकारलोपे अंतियदना । अतिदधिकुलम् इव्यर्थः ।

साधनिका सुधि सुष्ठुध्यायति इति सुधी वा शोभना धीर्यस्य इति विग्रहे सुधी शब्देः कुलस्य विशेषणत्वेन प्रयुस्त्रः । तस्य प्रातिपदिकरवात् प्रथमैकक्यने सुप्रत्ययेऽनु बन्धलोपे 'हस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वेन सुधि+स् स्वमोर्नपुंसकादिति सलोपे सुधि इतिसाधु । सुधिनी सुधीनि इति रूपद्वयं वारिवद्ज्ञेयम् । संबोधने संबुद्धिनिमितको गुणः हे सुधे । पक्षे हे सुधि इति रुपद्वयंभवति ।

सुधिया सुधिना सुधी शब्यात् तृतीयैकवचने टा अनुबन्धलोपे हस्वो नुपंसके प्रातिपदिकस्येति हस्वे सुधि+आ इकोडचि विभक्तो इति नुमागमेडनुवन्योलोपे सुधिना तृतीयादिषु माषितपुंस्कपुवंडगालवस्य इति पुंवदभावे अचिश्नुधातुभुवांय्वोरिङ्गवङौ । इति इयडायेशे सुविधा इति रूपम् - डे सुधिये सुधिने । डसिडसो

सुधियः सुधिनः । ओस्विभक्तौ सुधियोः सुधिनोः आमि इयडक्रते सुधियाम्, नुटिदीर्धेकृते सुधीमाम डौ – सुचियि सुचिनि शेषरूपाणि दवियभवन्ति।

**अन्यत्र तृज्वद्भावात्पूर्वविप्रति षेधेन नुमेव । प्रियक्रोष्टुना । प्रियक्रोष्टुने । ( नुमचिर ( वा. 4374 ) इति नुट् प्रियक्रोष्टूनाम्। इत्युदन्ताः । धातृ । धातृणी, धातृणि । हे धातः । हे धातृ । धात्रा-धातृणा । एवं ज्ञातृकर्त्रादयः । इव्ययन्ताः ।**

प्रकृष्टाधीर्यस्य तत्वा

प्रधि – प्रकृष्टं ध्यायति इति प्रधी हस्वो नपुंसके प्रातिपदिकस्यं इति हस्वे स्वमोर्नपुंसकात् इति स. लोपे प्रधि । प्रधिनी, प्रधीनि वारिवत् ।

प्रध्या – प्रधिना प्रधी शब्दस्यनपुंसक हस्वे कृति सति तृतीयादिषुभाषितपुंस्कगालवस्य इति पुंवइमावे टाप्रत्यये अनुबन्ध लोपे एरने कायोडसंयोगपूर्वस्य इति यणादेशे प्रध्या पुंवदभावामानपक्षे इकोडचिविमत्को इति नुमागमेडनुबन्धभावे प्रधिना इति रूपम् ।

मधुशब्द – पुष्परस्य वाचकः भ्रमरैः यनिर्मित भवति । मधु+सु स्वमोर्नपुंसकात् इतिसलोपे मधु । मधुनी मधूनि वारिवत् तथैव अम्बुचन्द्रः जतवाचकः अम्बु अम्बुनी अम्बूनि । अम्डवा अम्बुभ्याम् अम्बुभिः । इत्यादिरूपाणिभवन्ति ।

सानूशब्दस्य स्नूर्वा– सानु सानुनी सानूनि ।

सानु सानूनी शसि किं रूपम् इति जिज्ञासायां मांसपृतसानूनां मांसपृत्सनवो इति वार्तिकेन स्नु आदेशे स्नु+अस् जरशसौः शि इति शि आदेशे सर्व नामस्थानसंज्ञायां स्नु+ई नपुंसकस्य झलचः इति नुमागजेडनुबन्धलोपे स्नुन्+इ सर्वनामस्थाने पाडसेम्बुद्धौ इत्युवधाचे स्नूनि स्नु आदेशाभावे सानूनि । स्नूने सानुने चतुभ्या रूपम स्नुनः सानूनः । स्नूनाम् सानूनाम् । स्नूनि सानूनि।

प्रियकोष्टु – प्रियः कोष्टु यस्य कुलस्य तत्

प्रियक्रोष्टु – ततः औ स्वमोर्नपुंसकात् इति सलोपे प्रियक्रोष्टु । औडि–शी आदेशे प्रियकोष्टुनी ।

**(323) एच इग्घ्रस्वादेशे 1.1.48। आदिश्यमानेषु ह्रस्वेषु एच इगेव स्यात् । प्रद्यु प्रद्यूनी प्रद्यूनि । प्रद्यूनेत्यादि । इह न पुंवत् यद्गिन्तं प्रद्यु इति तस्य भाषितपुंस्काभावात् । एवम ग्रेऽपि इत्योदन्ताः । प्ररि, प्ररिणी, प्ररीणि। प्ररिणा। एकदेशविकृतस्यानन्यत्वात् रायो हलि इत्यात्वम्। प्रराभ्याम्। प्रराभिः नमचिरेति नुट्यात्वे प्रराणाम् इति माधवः। वस्तुतस्तु सन्निपातपरिभाष्या नुट्यात्वं न। नामि ( सू. 209 ) इति दीर्घस्यारम्भसामर्थ्यात् सनिपातपरिभाषां बाधते इत्युक्तम्। प्ररीणाम् इत्यैदन्ता । सुनु, सुनुनी, सुनूनि । सुनुना, सुनुने । इत्यादि । इत्यौदन्ताः इत्यजन्तनपुंसक लिङ्गप्रकरणम्**

साधनिका प्रियक्रोष्टूनि– प्रियक्रोष्टु–शब्दात् प्रथमा बहुवचने शस् प्रत्ययेडनुबन्धलोपे प्रियक्रोष्टु+अस, जरशसो शिः इति शि आदेशे शिसर्व नाम स्थानम् इति सर्वना मस्थानसंज्ञायां तृडवत्क्रोष्टु तृडवदभावे प्राप्ते पूर्व विप्रतिषेधेन इकोढचि विभक्तौ इत्यने नुमि कुते अनुबन्ध लोपे प्रियक्रोष्टु नई उपधादीर्धे प्रियक्रोष्टूनि इति साधु । यादावचिनिमत्कौ तृतीयादिषु भाषितपुंष्क पुवंङ्गालवस्य इति पुवद्भावे कृते तृत्व भावे प्रियकोष्ट्रा । नुपंसकलिङ्गे नुमि कृते प्रियक्रोष्टुना चतुर्थ्येकवचने पुंदभावपक्षे प्रियक्रोष्टे पक्षे प्रियकोष्टेन ङसि ङसोः प्रियक्रोष्टु प्रियक्रोष्टोः । ङौ प्रियक्रोष्टरि प्रिय क्रोष्टौ । तृज्वद्भावपक्षे क्रोष्टुवद् द्रूपम् । तृज्वदभावस्य अभावपक्षे उकारान्त पुहिहाकावत् प्रक्रिया भवति टादौ पुंवदभाव स्य अभावे तृज्वदमावापेक्षया नुम, परो भवति अतः तृतीयं रूपं भवति प्रिय क्रोष्टुना, प्रियक्रोष्टुने, प्रिय क्रोष्टुनः। प्रियक्रोष्टुनः, प्रियक्रोष्टुनोः प्रियक्रोष्टुनि ।

सुष्ठु लुनाति इति सुलु, सुलु सुलुनी सुलूनि पुनरपि सुलु सुलुनी, सुलूनि। अजादिषु तृतीयादिषु पुंवदमावे ओः सुपि इत्यनेन यणिक्रते. सुल्वा पक्षे सुलुना, सुल्वे–सुलुने । सुहनः सुलुनः सुल्वोः सुलुनोः। सुल्वाम् सूलूनाम् डौ सुल्वि, सुलुनि। सुल्वोः। सुलुषु। हेसुलो हेसुलु

विमर्शः डे. प्रभृतिषु वृद्धयौतृडबदमावगुणेभ्यो नुम, पूर्वविप्रतिषेधेन इति नुम्, तया सुलुने पक्षे सुहवे।

पराभिः। नुमयिर– (वा. 4374)इति नुट्यात्वे प्रराणाम इति माधवः । वस्तुतस्तु सन्निपात परिभाषयानुट्यात्वने ।

दधातीति धातु । धारणसर्तृकः। धातृ+सु तस्य स्वमोर्नपुंसकात इति लुका धात इति रुपम । धातृणी, धातृणि । द्वियायामपि प्रथमा वद्रूपम् ।

संबोधने नलुमताडास्यानित्यत्वात् हे धातः। हे धातृ। यदावचि धात्रा धातृणा । धात्रे धातृणे । धातुः धातृणः। धात्रोः धातृणोः। धातृणाम्। धातरि धातृणि। अनया रीत्यैव ज्ञार्द् कर्तृप्रभृतिशब्दाः ज्ञेयाः ।

(323) एच इग्रहस्वादेशे–

पदच्छेदः रुचः इक ह्रस्वादेशे।

समासः ह्रस्वस्य औसा आदेशः ह्रस्वादेशः तस्मिन्।

सूत्रप्रकारः – नियमसूत्रम्।

सरलार्थः – रुचः स्थाने यदि ह्रस्वादेशो भवति तर्हि इक रुव स्यात्।

साधनिका – प्रद्यु प्रकृष्टा धौः यस्य इति बहुब्रीहौ प्रधोशब्दः हस्वो नपुंसके प्राति पदिकस्य इति ओकारस्य स्थाने के स्यात् इति जिज्ञासायाम डच्यते हक एव तदा ओकार–उसारयो स्थान साम्यात् उकारः कृते प्रचु ततः सौ स्वमोर्नपुंसकात् इति सुलोपे प्रधु सिंद्धम् ।

प्रधुनी – प्रधु+औ नपुंसकाच्येति शी अनुब–धलोपे नुमागमे अनुबन्ध लोपे वर्णसम्मेलने प्रधुनी साधु ।

प्रधूनि – अत्र सर्वनामस्थाने चाडसम्बुद्धो इति दीर्घः ।

तृतीयैकवचने प्रधु+य आ इत्यस्य ना आदेशे प्रधुना । अत्र पुंवरभावो न भवति यतो हि रगन्तस्य पुंवदभाव अयन्तथा नास्ति – यङ्गिन्त प्रधु इति तस्य भाषितपुंस्कवाभावात् ।

प्रधोशब्दः पुल्लिंगः इति केषाचिन्मतम् ।

स एवेर्यानी नपुंसकः तस्य हस्वा नावेडपि एक देश विकृतस्यानन्यत्वात् पुरत्वविकल्पोसत्येव । एवमग्रेडपि

ओदन्ताः शब्दाः ज्ञेयाः । एकारान्तः प्रैशब्दः प्रकृष्टोर धनं यस्य इति बहुब्रीहिसमासः नपुंसके लिको ह्रस्वेकृते प्ररि वारिवद्रूपम् प्ररि प्ररिणी प्रीणि पुनरवि । यादावनुमि कृते प्ररिणा इति रूपम् ।

साधनिका प्राभ्याम् – प्रै+भ्याम् नपुंसक ह्रस्वे रायोइति इति आकारान्तादेशे अय्यते रे शब्दस्य आकारान्तः अत्र तु प्ररि अस्ति तया एकदेश विकृतमनस्यवत आत्वे कृते पराभ्याम् ।

साधनिका प्राणाम् प्रै श्यात् नपुंसकह्रस्वे प्ररि षष्ठी बहुव आम प्रत्यये परि+आम नुटनुमोः सहैव प्राप्तिः नुमटि तृज्यवमावेभ्यो नुट, पूर्वविप्रतिषेधेन इति नुटकते प्ररि नाम रायोहलि इति आत्वम् प्रशनाम अटकुप्वाङ्नुम्ऽ व्यवायेडपि इति णत्वं प्राणाम् ।

विशेषार्थः वस्तुतः सन्निपातपरिभायाः उत्पत्तेः नुङ्गमे ए इत्यस्य आटवंन । कि कारणम् इति प्रश्ने अति उच्चते से इत्यस्य आत्वं उलादौ भवति नुङ्गमात् पूर्व आम् इति तु अजादि । अतः हस्वान्तः प्ररिशब्दः तं मत्वा जायमानोनुट हस्वान्तस्य (इकारस्य) विधातको न भविष्यति । नामि इति सूत्रेण प्रारम्भः यददीर्धविधिः स सनिपातपरिभाष बाघते । प्ररिशब्दः सम्पूर्णः ।

सुनुशब्दः सुष्ठु शोभना नौर्यस्य तत्कुलम् सुनु सौ विभक्तौ स्वमोर्नपुंसकात् इति सुलोपे नपुंसके ह्रस्वेच कृते सुनु । सुनु+औ सी आदेशे कृते अनुबन्धलोपे सुनु+ई इकोडचि इति नमागमे सुनुनी इति सिद्धम् ।

साधनिका– सुनूनि सुनौ नपुंसक हस्वे सुनु+जस् जरशसोः शिः इति शिकृते शिसर्वनामस्थनम् इति सर्वनामस्थानसंज्ञायां सुनु+इ नपुंसकस्य झलच इति नुमागमेडनुबन्धलोपे सुनुन ई सर्वनामस्थाने पाडसम्बुद्रौ इति उपधादीर्घे सुनूनि । इति सिद्धम् ।

चतुर्थैकवचने सुनुने । सुनुनः । सुनुनः सुनुनोः । सुनूनाम् । सुनुनि । इत्यादि

।। इत्यजन्तनपुंसकलिडप्रकरणम् ।।

हे सुधे हे सुधि । सुधिया–सुधिना । सुधियाम्–सुधीनाम । प्रध्या प्रधिना । इति ईदन्ताः । मधु । मधुनी । मधूनि । हे मधो । हे मधु । एवमब्वादयः । सानुशब्दस्य स्नुर्वा स्नूनि–सानूनि । प्रियकोष्टु, प्रियक्रोष्टूनि । तृज्वदभातपूर्वविप्रतिबेधेन नुम प्रियक्रोष्टूनि । टाढौ पुंवत्पक्षे प्रियक्रोष्टा–प्रियक्रोष्टुना । प्रियक्रोष्ट्रे–प्रिय क्रोष्टवे ।

यथा दधि शब्दाय् अनङ तथैव अस्थि–सहिथ अक्षिशब्देभ्योडपि तवन्तेभ्योडपि जायते । अतोडः दधि–अतिक्रान्तः अतिदधि तदन्तादपि अनडकृते अतिदाधि+अनड+आ, अकारलोपे अंतियदना अतिदधिकुलम् इत्यर्थः

साधनिका–सुधि – सुष्ठुध्यायति इति सुधी वा शोभना वीर्यस इति विग्रहे सुधी शब्दः कुलस्य विशेषणत्वेन प्रयुक्तः

तस्य प्रातिपदिकत्वात् प्रथमैकक्यमे सुप्रत्ययनुबन्ध हस्वो नपुंसके प्रातिपदकिस्य इति ह्रस्वेन सुधिनय् स्वमोर्नपुंसकादिति सोपे सुधि इतिसाधु ।

सुधिनी सुधीनी इति रूप द्वयं वारिवद् ज्ञेयम् ।

संबोधने संबुद्धिनिमितको गुणः हे सुधे पक्षे ते सु इति रूपद्वयंभवति ।

सुधिया-सुधिना - सुधी शब्यात् तृतीयैकवचने टा अनुबन्धलोपे वृतीह्रस्वो नपुंसके प्रातिपदिकस्येति हस्वे सुधि+आ इकोडचि विभक्तो इति नुमागमेडनुबन्धतो सुधिना तृतीयादिषु - मा,थपुंस्क पुवंडगालवस्य इति पुंवदभावे अचि श्नुधातुभ्रुवाहवाङ्गउवडौ । इति द्‌यडादेशे सुधिया इति रूपम् ङे सुधिये सुधिने । ङसिडसोः सुधियः सुधिनः। ओस्विभक्तौ सुधियोः सुधिनोः आमि इयडक्ते सुधियाम्, नुटिदीर्घकृते सुधीनाम डौ - सुधियि सुधिनि शेषरूपाणि ....

अन्यत्रतृज्वद्भावात्पूर्वविप्रतिषेधेन नुमेव । प्रियक्रोष्टुना । प्रियक्रोष्टुने । (नुमचिर (वा. 4374) इति नुट् प्रियक्रोष्टनाम् । इत्युदन्ताः । धातृ । धातृणी, धातृणि ।

प्रकृष्टाधीर्यस्य तत्वा

प्रधि - प्रकृष्टं ध्यायति इति प्रधी ह्रस्वो नपुंसके प्रातिपदि कस्य इति ह्रस्वे स्वमोर्नपुंसकात इति स् लोपे प्रधि । प्रधिनी - प्रधीनि वारिवत् ।

प्रध्या - प्रधिना - प्रधीशब्दस्यनपुंसकह्रस्वे कृति सति तृतीयादिषुभाषितपुंस्कगालवस्य इति पुंवद्भावे .... अनुबन्ध लोपे रुरनेकायोडसंयोगपूर्वस्य इति यणादेशे प्रध्य पुंवदभावामावपक्षे इकोडचिविभक्तो इति नुमागमेडनुबन्धलो र्नप्रधिना इति रूपम ।

मधुशब्दः पुष्परस्य वाचकः भ्रमरैः यजिर्भित् भंवति ।

मधु+सु स्वनोर्मपुंसकात इतिसलोपे मधु ।

मधुनी मधूनी वारिवत् तथैव अम्बुशब्दः जलवाचकः अम्बु अम्बुनी अम्बूनि । अम्बवा - अम्बुभ्याम् अम्बुभिः इत्यादिरूपाणिभवन्ति ।

सानूशब्दस्य स्नूर्वा सानु सानुनी सानूनि ।

सानु सानूनी शसि कि रूपम् । इति जिज्ञासाय मांसपृतसानूनां सांसपृत्स्नवो- इति वार्तिकेन स्नु आदेशे स्नु+अस् जरशसोः शि इति शि आदेशे सर्वनामस्थानसं स्नु+इ नपुंसकस्यझलय इति नागमेडबुबन्धलोपे स्नुन्+इ सर्वनामस्थाने पाडसम्बुद्धौ इत्युपधादीये स्नूनि स्नु आदेशामावे सानूनि । स्नूने सानुने चतुर्थ्या रूपम स्नुनः सानूनः । स्नूनाम सानूनाम् । स्नूंनि सानूंनि ।

प्रियकोष्टु - प्रियः कोष्टु मस्य कुतल्यसत्

प्रियक्रोष्टु - ततः सौ स्वमोर्नपुसंकात् इति सलौपे प्रियक्रोष्टु । औडि-शी आदेशे प्रिय कोष्टुनी

हे धातः । हे धातृ । धात्रा-धातृणा । एवं ज्ञातृकत्रादयः इत्थदन्ताः ।

(323) एच इग्ध्रस्वादेशे 1.1.48। आदिश्यमानेषु ह्रस्वेषु एच द्‌गेव स्यात् । प्रद्यु प्रद्युनी प्रद्यूनि । प्रद्यूनेत्यादि । एह न पुंवत् यदिगन्तं प्रद्यु इति तस्य भाषितपुंस्कत्माभावात् । एवमग्रेऽपि इत्योदत्ताः ।

साधनिका - प्रियक्रोष्टूनि - प्रियक्रोष्टु-शब्दात् प्रथमा बहुवचने सस् प्रत्ययेडनुबन्धलोपे प्रियक्रोष्टु+अस् जरशसौः शिः इति शि आदेशे शिसर्व नामस्थानम् इति सर्वमस्थान संज्ञायां तृडवत्क्रोष्टुः तृडवदभावे प्राप्ते पूर्व विप्रतिषेधेन इकोडयिविभक्तौ इत्यनेन नुत्रि कृते अनुब लोपे प्रियक्रोष्टुनइ उपधादीर्धे प्रियक्रोष्टूनि इति साधु । यादावचिभक्तौ- तृतीया भाषितपुष्कंपुवङ्गालवस्य इति पुवदभावे कृते तृव भावे प्रियक्रोष्टा । नपुंसकलिङ्गो नुमि कृते प्रियक्रोष्टु चतुर्थ्येकवचने पुंवदभावपक्षे प्रियक्रोष्टे पणे प्रियङसिडसोः प्रियक्रोष्टुः प्रियक्रोष्टोः । ओसि-प्रिय क्रोष्ट प्रिचक्रोष्टवोः । आमि प्रियक्रोष्टनाम् । डौ प्रियक्रोष्टरि प्रिय क्रोष्टौ । तृज्वद्भावपक्षे क्रोष्टशब्दद्रूपम् । तृडवमत अभावपक्षे उकारान्तपुलिकावत प्रक्रिया भवति यदौपुवंद स्य अभावे तृज्वदभावापेक्षया नुम पटो भवति अतः तृतीयारूपे भवति प्रिय क्रोष्टुना, प्रियक्रोष्टुने, प्रिय क्रोष्टुनः । प्रियवनः, प्रियक्रोष्टुनोः । प्रियक्रोष्टुनि ।

सुष्ठु लुनाति इति सुलु, सुलु सुलुनी सुलूंनि पुनशी सुलु सुलुनी सुलूनि । अजादिषु तृतीयादिषु पुंवदभाव औः सुपि

इत्यनेन यणिकृते, सुल्वा पक्षे सुलुना, सुऱ्वे सुलेन । सुल्व सुलुनः सुल्वोः सुलुनोः । सुल्वाम् सूत् डौ. सुल्वि, सुलुनि । सुल्वोः । सुलुषु । हे सुलो हेसु विमर्शः डे प्रभुतिषु वृदयौडबदमावगुणेभ्योनुम, पूर्वविप्रतिषेधेन इति नम तदा सलने पक्षे सभ्ये ।

---

प्ररि, प्ररिणी, प्रीणि । प्ररिणा । एकदेशविकृतानयत्वात् रायो हलि (सूशब्द) इति इत्यात्म–प्राभ्याम् । प्राभिः नुमचिर (वा. 4374)इति नुट्यात्वे प्राणाम् इति माधवः वस्तुतस्तु सन्निपातपरिभाषयानुट्यात्वंन ।

दधातीति धातृ । धारणरूर्तुकः । धात्+सु तस्य स्वमोर्नपुंसकात् इति लुक । धातृ इति रूपम् । धातृणी, धातृणि । द्वियायामदि प्रथमावद्रूपम् । संबोधने न लुमताङ्गस्यानित्यवात् हे धातः । हे धातृ । दादावचि धात्रा धातृणा । धात्रे धातृणे । धातुः धातृणः। धात्रोः धातृणोः। धातृणाम्। धातरि धातृणि। अनया रीत्यैव ज्ञातृकर्तृप्रभृतिशब्दाः ज्ञेयाः ।

(323) रुच ङ्गह्रस्वादेशे–

पदच्छेदः एचः इक ह्रस्वादेशे ।

समासः – ह्रस्वस्य औसा आदेशः ह्रस्वादेशः तस्मित् ।

सूत्रप्रकारः – नियमसूत्रम् ।

सरलार्थः – एचः स्थाने यदि ह्रस्वादेशो भवति तर्हि डक स्यात् ।

साधनिका – प्रधु – प्रकृष्टा धौः यस्य इति बहुब्रीहौ प्रधोराब्दः ह्रस्वो नपुंसके प्रातिपदिकस्य इति ओकारस्य स्थाने स्यात् इति जिज्ञासासायम् उच्चते इक्र एव तदा ओकार–उकारस स्थान साम्यात् उकारः कृते प्रद्युतत सौ स्वमोर्नपुंसकात् इति सुलोपे प्रदु सिद्धम् ।

प्रधुनी – प्रधु+औ नपुंसकाच्येति शी अनुबन्धलोपे नुमागमे अनुबन्धलोपे वर्णसम्मेलने प्रचुनी साधु प्रधूनि – अत्र सर्वनामस्थाने याडसम्बुलौ इति दीर्घः ।

तृतीयैकवचने प्रधु+या आ इत्यस्य ना आदेशे प्रधुना । अत्र पुंवद्भावोन भवति यतो हि ङ्गन्तस्य पुंवदभाव अयन्तथा नास्ति – यङ्गिन्त प्रदुहति तस्य भाषितपुंस्कावाभावात् ।

प्रधोशब्दः पुल्लिंगः इति केषाम्पिन्मतम् । स एवदानी नपुंसकः तस्य हस्वान्त्रत्वेडपि एकदेश विक्रतस्यान्यत्वात् पूस्त्वविकल्पोस्त्येव । एवमग्रेडपि

---

नामि (सू. 209) इति दीर्घत्वारम्भसामर्थ्यात् सन्तिपातपरिभाषां बाधत इत्युक्त म् । इत्यैदन्ता । सुनु, सुनुनी, सुनूनि । सुनुना, सुनुने । इत्यादि । इत्यौदन्ताः ।

इत्यजन्तनपुंसकलिङ्गप्रकरणम् ।

---

ओदन्ताः शब्दाः ज्ञेयाः । एकारान्तः प्रैशब्दः । प्रकृष्टोराः धनं यस्य इति बहुब्रीहिसमासः नपुंसके लिको ह्रस्वेकृते प्ररि वारिवद्रूपम् परिप्ररिणी प्रीणि पुनरवि । यादावम्बि नुमि कृते प्ररिणा इति रूपम् ।

साधनिका पराभ्याम् प्रै+भ्याम नपुंसक ह्रस्वे रायोहलि इति आकारान्तादेशे उय्यते रैशब्दस्य आकारान्तिः अत्र तु प्ररि अस्ति तया एकदेश विकृतभनन्यवत् आत्वे कृते प्राभ्याम् ।

साधनिका प्राणाम् प्रै शब्यात् नपुंसकह्रस्वे प्ररि षष्ठीबहुवचने आम् प्रत्यये परि+आम नुट्नुमोः सहैवप्राप्तिः नुमचिर तृज्वदभावेभ्योनुट् पूर्वविप्रतिषेधेन इति नुट् कृते प्ररि+नाम रायोहलि इति आत्वम् प्रशनाम् अटकुत्वाउनुम व्यवायेडपि इति णत्वं प्राणाम् ।

विशेषार्थः वस्तुतः सन्नि पातपरिभायाः उत्पत्तेः नुङ्गमे सति से इत्यस्य आत्वं उलादौ भवति नुङ्गमात् पूर्वं आम इति तु अजादि । अतः हस्वान्तः प्ररिशब्दः तं नत्वा जायमानोनुट् हस्वान्तस्य (इकारस्य) विधातोन भविष्यति । नामि इति सूत्रेण प्रारम्भः यद्दीर्धनिधिः स सन्निपातपरिभाषां बाघते । प्ररिशब्दः सम्पूर्णः ।

सुनुशब्दः सुष्ठु शोभना नौर्यस्य तत्कुलम् सुनु सौ विभक्तौ स्वमोर्नपुंसकात् इति सुलोपे नपुंसके ह्रस्वेच कृते सुनु । सुनु+औ शी आदेशे कृते अनुबन्धलोपे सुनु+ई इकोडचि इति नुमागमे सुनुनी इति सिद्धम् ।

साधनिका सुनूनि सुनौ नपुंसक हस्वे सुनु+जस् जरशसोः शिः रूति शिकृते शिसर्वनामस्थनम् इति सर्वनामस्थानसंज्ञायां सुनु+ई नपुंसकस्य झलयः इति नुमागमेडनुबन्धलोपे सुनुन इ सर्वनामस्थाने चाडसम्बुद्धौ इति उपधादीर्वे सुनूनिक इति सिद्धम् ।

चतुर्थ्यैकवचने सुनुने । सुनुनः सुनुनः सुनुनोः सुनूनाम । सुनुनि । इत्यादि ।

## स्वाध्याय

**1. योग्यविकल्पं चित्वा उत्तरं लिखत ।**

(1) नपुंसकाच्च इति प्रवर्तते

(क) प्रथमैकवचने (ख) प्रथमाद्विवचने (ग) प्रथमाबहु (घ) स्वापिन

(2) भस्य इकारारयोलोपि क्रियते

(क) अतोडम् (ख) जरशसोः शिः (ग) अल्लोपोडनः (घ) पस्येतिय ।

(3) नपुंसकस्यझलयः अस्यकार्यम्

(क) अदड् (ख) टेर्लोपः (ग) शी (घ) नुमागमः

(4) कतरे इति रूपमस्ति-

(क) अप्रभ्याः (ख) प्रथमाजसि (ग) औविभक्तौ (घ) भ्वापिन

(5) श्रीपम् अत्र मूल शब्दोडस्ति ।

(क) श्रीप (ख) श्रीपा (ग) श्रीपै (घ) श्रीपौ

(6) बारिशब्दस्य चतुर्थ्येकवचने रूपम

(क) वारये (ख) वार्ये (ग) वारिणे (घ) एतेष्वेकोडपिन

**2. एकैकवाक्येन उत्तर लिखत।**

(1) न लुमताङ्गस्य अनित्यत्वात्पक्षे के रूपे भवतः ।

(2) वारीणाम् अत्र नुम् कुतो न ?

(3) यदौ अजादौ पुवमबावस्म कि फहाम ?

(4) यदना अत्र केन सूत्रेण अकारलोपः ?

(5) अनअदेश विधायकंसूत्रं किम् ?

(6) स्नूनि अत्र मूल शब्दः कः ?

(7) सुधिया कस्यां विभक्तौ रूपम् ?

(8) अतिदधिशब्दस्य कोडर्थः ?

**3. सविस्तरम् उत्तरं लिखत ।**

(1) तृज्वदभावात्पूर्व विप्रतिबेधेन नुम्-प्रियक्रोष्टूनि ।

(2) एकदेशविकृतस्यान्यत्वात् शयो हलि इत्यात्वम्-प्राभ्याम् ।

(3) नामि इति दीर्घर-त्वारम्भसामर्थ्यात् सभिपातपरिभाषां बाधते ।

(4) अमि तुकोडपबादंमभ्भावं बाधित्वा परत्वाज्जरस् ।

**4. निम्न लिखितानि सूत्राणि सविस्तरं व्यारव्यायन्ताम् ।**

(1) सान्त महतः संयोगस्य ।

(2) अदडड्तरादिभ्यः पञ्चभ्यः ।

(3) तृतीयादिषुभाषित पुंस्कंपुंवदगातवस्य ।

(4) अस्थियदि - सस्थ्यक्ष्णामनहुदात्तः ।

(5) एच इग्ध्रस्वादशे।

**5. अविभागं ब विभागेन सह योजयत ।**

| **अ विभागः** | **ब विभाग** |
|---|---|
| (क) प्रधु | रायोहलि |
| (ख) प्राभ्याम् | एच इग्घ्रस्वादशे |
| (ग) प्रियक्रोष्टनाम् | स्वमोर्नपुंसकात् |
| (घ) यद्ना | स्वमोर्नपुंसकात् |
| (ड) वारि | अस्थिदधिसय |

**6. अधोतिखितानि रूपाणि साधयतः ।**

सुधिया । सानूंनि । यदनि । वारीणाम् । ज्ञाने । हेमधु हेमघो । श्रीपाय ।

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं, पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखत् ।

◆

# 20 विशिष्ट परिभाषाणां दिग्दर्शनम्

**प्रस्तावना**

महर्षिणा पतंजलिना महाभाष्ये सूत्राणां व्याख्यानसमये कानिचन नियमनवाक्यानि प्रोक्तानि । वाक्यानीमानि पाणिनीयव्याकरणे परिभाषासूत्रवत कार्यं कुर्वन्ति । अतः तेषां कार्यानुगुणं नामकरणं जातम्। अतैर्वाक्यैः समग्रव्याकरणतन्त्रे अनियमस्थितौ नियमविधानं क्रियते अतः तानि वाक्यानि परिभाषा इति नाम्ना प्रसिद्धानि जातानि । एतादृशानां परिभाषाणां संग्रहं कृत्वा श्रीमान् नागेशभट्टः परिभाषेन्दुशेखरनाम्नि ग्रन्थे तासां व्याख्यानमकरोत् ।

अत्र अस्मिन् व्याकरण 1 पाठ्यक्रमे यावान् अभ्यासः छात्रैः विधयः तत्र तेषां विशेष बोधाय सूत्रमध्ये पठितानां परिभाषाणां संग्रहं कृत्वा अत्र दिग्दर्शनं कार्यते । अस्मिन् पाठे परिभाषेन्दुशेखरक्रमेण परिभाषाणां निरूपणं विहितम् । अत्र परिभाषा, तस्याः सिद्धान्तकौमुधाः सूत्रसन्दर्भः, सरलार्थः, विमर्शश्चेति निरूपितानि । छात्राणां सरलबोधाय, व्याकरणशास्त्रे प्रवेशाय च यथाशक्यं शास्त्रार्थपद्धतिरत्र निवारिता ।

---

**(1) परि. 6 नानुबन्धकृतमनेकालत्वम् ।**

सन्दर्भः - परिभाषेयं सिद्धान्तकौमुधां जसः शी (सू. 214) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः - अनेकाल्-रूपं निमित्तं मत्वा विधीयमाने कार्ये इत्संज्ञकानां गणना न भवति ।

विमर्शः - अत्र जसः शी इत्यस्मिन् सूत्रे प्रश्नः भवति यत् जसः स्थाने क्रियमाणे शी आदेशे अनुबन्धानन्तरं ई-कारः अवशिष्यते अतः तत्र अनेकाल् नास्ति । अतः समग्रस्य जस्-प्रत्ययस्य न अपि तु अन्त्यस्य स्थाने आदेशः भवतु इति । कारणं अनेकाल्-ग्रहणे अनुबन्धानां इत्संज्ञकानां गणना आदेशे न विधीयते इति अनया परिभाषया ज्ञापितम् । किन्तु अत्र स्थितिः भिन्ना विधते । जस्-प्रत्यये विहिते सति अनुक्षणं तस्य स्थाने शी-आदेशो विधीयते । अत्र श्-कारस्य इत्संज्ञाप्रसक्तिः स्थानिवद्भावं विना न सम्भवति यतो हि शी-इत्यत्र श्-कारस्य इत्संज्ञायां प्रत्ययत्वम् आवश्यकम् । अतः शी-आदेशप्रसंगे इत्संज्ञारूपः अनुबन्धः न मन्यते ।

अस्याः परिभाषायाः चरितार्थत्वम् अर्वन्तौ इत्यत्र दृश्यते । तत्र अर्वन् + औ इत्यत्र न्- कारस्य स्थाने अर्वणस्त्रसावनञः इति सूत्रेण तृ-आदेशः विधीयते तत्र यदि ऋ-कारस्यापि समावेशः क्रियते तर्हि अनेकाल्त्वात् समग्रस्य अर्वनशब्दस्य स्थाने तृ-आदेशः भवेत् इति अनिष्टरूपापत्तिः उत्पद्यते तत्र अस्याः परिभाषायाः निर्देशेन इत्संज्ञकस्य ग्रहणाभावे सति त्-कारादेशः अनेकाल् न गण्यते अतः अन्त्यस्य स्थाने आदेशस्य प्रवृत्तिः तेन अर्वत् + औ भवति अग्रे च नुमागमे कृते अर्वन्तौ इति रूपसिद्धिः सम्भवति ।

**(2) परि. 12 निर्दिश्यमानस्यादेशा भवन्ति ।**

सन्दर्भः - परिभाषेयं सिद्धान्तकौमुद्यां जराया जरसन्यतरस्याम् (सू.227) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः - सूत्रे यं स्थानिनम् उद्दिश्य आदेशस्य विधानं भवति तस्यैव स्थाने आदेश- भवति ।

विमर्शः - अत्रेयमवधेयं यत् जराया जरसन्यतरस्याम् इत्येतत् सूत्रं जरा-शब्दस्य स्थाने जरस्-आदेशस्य विधानं करोति किन्तु निर्जर + औ इत्यस्याम् अवस्थायां जरा-शब्दः साक्षात् न दृश्यते अतः प्रश्नः भवति यत् निर्जर-शब्दे जरा-शब्दाभावे सत्यपि किं तत्र जरस्-आदेशः शक्यते खलु ? तत्र परिभाषेयं निर्दिशति यत् यम् उद्दिश्य आदेशः कथ्यते तत्रैव क्रियते अतः अत्र अनया परिभाषया सूत्रप्रवृत्तिः न शक्यते ।

अस्याः परिभाषायाः चरितार्थत्वं सुपदः इत्यत्र दृश्यते यथा सुपदः इत्यत्र सुपाद् + शस् (अस्) इत्यस्यामवस्थायां पादः पत् इति सूत्रेण विधीयमानः पाद्-शब्दस्य स्ताने पद्-आदेशः सुपाद्-शब्दे अस्याः परिभाषायाः निर्देशमनुसृत्य न प्रवर्तते ।

**(3) परि. 13 यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः ।**

सन्दर्भः - परिभाषेयं सिद्धान्तकौमुधां स्थानेडन्तरतमः (सू. 39) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः – यत्र अनेकप्रकारकं साम्यं भवेत् तत्र स्थानकृतं साम्यं बलवत्तमं भवति ।

विमर्शः स्थानेऽन्तरतमः इत्यस्मिन् सूत्रे निर्दिष्टम् आन्तर्यं चतुष्प्रकारकं भवति, स्थानकृतं, अर्थकृतं, गुणकृतं, प्रमाणकृतं चेति ।

इको यणचि इत्यनेन यण्–विधाने इग्वर्णानाम् स्थानिनां कृते आदेशरूपाः वर्णाः स्थानसादृश्यवन्तः स्युः ते एव प्रयोक्तव्याः यथा इ य्, उ व्, ग र्, लृ ल् अत्र उच्चारणस्थानकृतं समानत्वं सर्वत्र दृश्यते । सदृशतमः आदेशः इति विधानेन गुणैकादेशे अ + इ इत्यनयोः गुणैकादेशे कर्तव्ये कण्ठ्य + तालव्य–उच्चारणवान् गुणसंज्ञकः वर्णः प्रयोक्तव्यः अतः एकारः यस्य उच्चारणस्थानम् कण्ठतालू वर्तते सः आदेशरूपेण भवति ।

**(4) परि. 14 अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ।**

सन्दर्भः – परिभाषेयं सिद्धान्तकौमुद्यांम् एत्येधत्यूठसु (सू. 73) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः – अर्थवतः ग्रहण यदा भवति तदा अर्थरहितस्य ग्रहणं न क्रियते ।

विमर्शः अस्याः परिभाषायाः प्रसङ्गः निर्दिष्टसूत्रपठिते प्रादूहोढोढ्येषैष्येषु इति वार्तिके दृश्यते यदा प्र + ऊढ इत्यत्र ऊढ–शब्दे क्त–प्रत्ययान्तस्य ग्रहणं कृत्वा प्रौढः इत्यत्र वृद्धिः भवति इति निर्देशः लभ्यते तदा प्र + ऊढवान् इत्यत्र क्तवतु–प्रत्ययान्तेऽपि क्त–प्रत्ययस्तु अस्ति इति आक्षिप्य वृद्धेः प्रसङ्ग कश्चित् निर्दिशति तर्हि परिभाषेयं तस्य निषेधं करोति ।

अस्याः परिभाषायाः ज्ञापकम् अस्ति व्रश्चभ्रस्ज – इति सूत्रे तत्र सूत्रकारेण राज् एवं भ्राज् इत्यनयोः ग्रहणं कृतमस्ति । अत्रे भ्राज् इत्यत्रापि राज्–इत्यस्य पठनं भवति यदि सूत्रकारस्यैतदभिमतं स्यात् तर्हि सः राज्–इत्यस्यैव ग्रहणं कुर्यात् न खलु भ्राज् इत्यस्यापि यतो हि राज् इति ग्रहणेन भ्राज् इत्यस्यापि ग्रहणं भवेत् ? किन्तु सूत्रकारः द्वयोः भिन्नं ग्रहणं कृत्वा ज्ञापयति यत् यदा अर्थवतः ग्रहणं क्रियते तदा तादृशः निरर्थकः अंशः न ग्रहणीयः अथ च तादृशेन निरर्थक–अंशग्रहणेन अनिष्टसिद्धेः आक्षेपः न करमीयः ।

**(5) परि. 23 प्रत्ययग्रहणे तदन्ता ग्राह्याः ।**

सन्दर्भः – परिभाषेयं सिद्धान्तकौमुद्यांम् आमि सर्वनाम्नः सुट् (सू. 217) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः – यत्र प्रत्ययस्य ग्रहणं क्रियते तत्र तत्प्रत्ययान्तस्य ग्रहणं कर्तव्यम् ।

विमर्शः – सर्वाङ्गिणे सर्वनामसंज्ञकशब्दानां परिगणने डतर, डतम प्रत्ययग्रहणं विधते । न केवला प्रकृतिः प्रयोक्तव्या न चापि केवलः प्रत्ययः इति न्यायेन केवलः प्रत्ययः व्यवहारे प्रयुक्तः न भवति । अस्याम् अवस्थायाम् सर्वाङ्गिणपठितप्रत्ययाः निरर्थकाः भवेयुः अतः अनया परिभाषया निर्दिष्टानुसारं यदा प्रत्ययानां ग्रहणं भवति तदा तत्प्रत्ययान्तशब्दानां ग्रहणं विधीयते । तेन डतर, डतम – प्रत्ययग्रहणेन तदन्तशब्दानां सर्वनामसंज्ञा भवति ।

**(6) परि. 27 – संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ।**

सन्दर्भः – परिभाषेयं सिद्धान्तकौमुद्यांम् आमि सर्वनाम्नः सुट् (सू. 217) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः – यदा संज्ञाकरणं भवति तदा यदि प्रत्ययग्रहणं क्रियते तर्हि तत्र तत्प्रत्ययान्तस्य ग्रहणं न करणीयम्

विमर्शः – सर्वादिगणे सर्वनामसंज्ञकशब्दानां परिगणने डतर, डतम प्रत्ययग्रहणं विधते । तस्मिन्नेव प्रसङ्गे प्रत्ययग्रहणे तदन्ता ग्राह्याः इति परिभाषा अनयोः प्रत्यययोः ग्रहणेन तदन्तशब्दानां ग्रहणं कर्तव्यमिति निर्दिशति । किन्तु अनया परिभाषया तस्याः निषेधः निर्दिश्यते । यदि इमां परिभाषामनुसरामः तर्हि डतर–डतम–प्रत्यययोः सर्वनामसंज्ञा भवेत् । किन्तु तदन्तानां सर्वनामसंज्ञा निषिद्धा स्यात् अथ च प्रत्ययौ अपि निरर्थको भवेताम् । अतः एषा परिभाषा अत्र चरितार्था न भवति ।

अस्याः परिभाषायाः चरितार्थत्वं तरप्तमपौ घः इत्यत्र विधते । कुमारी ब्राह्मणितरा इत्यस्मिन्नुदाहरणे कुमारी–शब्दानन्तरं ब्राह्मणितरा–शब्दो विधते अयं शब्दः तरप्–प्रत्ययान्तः अस्ति । अतः यदि प्रत्ययग्रहणेन तदन्तानां संज्ञाविधानं क्रियते तर्हि ब्राह्मणितरा–शब्दः तरप् प्रत्ययान्तत्वात् घ–संज्ञकः गण्यते तेन च घ–संज्ञके परे सति घरूपकल्प 6/3/43 इत्यादिना सूत्रेण ह्रस्वापत्तिः आपघते । अतः इयं परिभाषा संज्ञाविधौ तदन्तग्रहणं न भवति इति व्यवस्थां सूचयति तस्मात् कुमारी ब्राह्मणितरा इत्यत्र ह्रस्वो न भवति इष्टरूपं च प्राप्यते ।

**(7) परि. 29 - पदाङ्गाधिकारे तस्य च तदन्तस्य च ।**

सन्दर्भः - परिभाषेयं सिद्धान्तकौमुद्यां जराया जरसन्यतरस्याम् (सू. 227) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः - पदस्य अधिकारे अङ्गस्य अधिकारे च यत् कार्यं यम् उद्दिश्य निर्दिष्टं तत् तस्य अन्त्यस्य स्थाने भवति ।

विमर्शः जराया जरसन्यतरस्याम् इत्येतत् सूत्रं जरा-शब्दस्य स्थाने जरस्-आदेशस्य विधानं करोति किन्तु निर्जर + औ इत्यस्याम् अवस्थायां जरा-शब्दः साक्षात् न दृश्यते अतः प्रश्नः भवति यत् निर्जर-शब्दे जरा-शब्दाभावे सत्यपि जरस्-आदेशः शक्यते खलु ? तत्र परिभाषेयं मार्गदर्शनं करोति यत् पदस्य वा अङ्गस्य अधिकारे स्थानी यदि स्वकीयेन रूपेण पदस्य अन्ते भवति तर्हि तम् उदिश्य आदेशः भवितुम् अर्हति ।

अस्याः परिभाषायाः निर्देशानुसारं निर्जर-शब्दे जरा-शब्दस्य अस्तित्वम् अस्ति अतः अत्र जरस्-आदेशः भवितुम् अर्हति ।

**(8) परि. 36 - प्रकृतिवदनुकरणं भवति ।**

सन्दर्भः परिभाषेयं सिद्धान्तकौमुद्यां नु च (सू. 283) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः - प्रकृतेः समानम् अनुकरणं भवति ।

विमर्शः - कृ, तृ-इत्यादीनां दीर्घग कारान्तधातूनां शब्दरूपत्वे गृहीते सति धातुम् आश्रित्य यत्कार्यं भवति स्म तदत्र भवितुमर्हति किम् ? यतो हि इदानी तत्र धातुरूपं नास्ति अपि तु प्रातिपदिकम् अस्ति पुनः ऋत इद्धातोः इत्यत्र धातुमाश्रित्य कार्यं भवति इति निर्दिष्टम् अतः प्रश्नोऽयं जायते । तदानीम् परिभाषेयं निर्दिशति यत् प्रकृतिवत् अनुकरणं क्रियते अथ च ऋत इद्धातोः इत्यनेन धातुवदनुसरणं कृत्वा इ-कारादेशः रपरत्वं च क्रियते ।

**(9) परि. 37 - एकदेशविकृतमनन्यवत् ।**

सन्दर्भः - परिभाषेयं सिद्धान्तकौमुद्यां जराया जरसन्यतरस्याम् (सू. 227) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः - एकस्मिन् अंशे विकारे सत्यपि पदार्थस्य स्वत्वं न हन्यते । सः पदार्थः विकृतौ अपि स एव गण्यते इत्यर्थः ।

विमर्शः - जराया जरसन्यतरस्याम् इत्येतत् सूत्रं जरा-शब्दस्य स्थाने जरस्-आदेशस्य विधानं करोति कन्तु निर्जर + औ इत्यस्याम् अवस्थायां जरा-शब्दः साक्षात् न दृश्यते अतः प्रश्नः भवति यत् निर्जर-शब्दे जरा-शब्दाभावे सत्यपि किं तत्र जरस्-आदेशः शक्यते खलु ? तत्र परिभाषेयं निर्दिशति यत् एकांशेन विकृतः सन्नपि पदार्थः स्वारस्यं न जहाति। यथा छिन्ने पुच्छे श्वा श्वैव भवति नाश्वो न गर्दभः तद्वत् अत्रापि ज्ञेयम् । अतः इमां परिभाषामनुसृत्य निर्जर-शब्दे जरस् आदेशः भवति ।

**(10) परि. 38 - परनित्यान्तरङ्गपवादानामुत्तरोत्तरं बलीयः ।**

सन्दर्भः - परिभाषेयं सिद्धान्तकौमुद्यां स्वरितेनाधिकारः (सू. 46) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः - (पूर्वसूत्रात्) परसूत्रम्, नित्यसूत्रम्, अन्तरङ्गसूत्रम्, अपवादसूत्रम् इति प्रथमात् द्वितीयं, द्वितीयात् तृतीयम् इति क्रमशः बलवत् गण्यते । (अतः अपवादः सर्वतः बलीयान् गण्यते ।)

विमर्शः सपादसप्ताध्यायीम् अनुलक्ष्य परिभाषेयं व्यवस्थां निर्दिशति अतः सपादसप्ताध्यायां - पूर्वसूत्रात् परसूत्रं बलवत् भवति यथा - रामेभ्यः इत्यत्र सुपि च (7/3/02) इत्येतत् सूत्रं बाधित्वा बहुवचने झल्येत् (7/3/103) इति सूत्रेण परत्वात् एत्वं विधीयते ।

परकार्यात् नित्यकार्यं बलवत् भवति यथा - तुदति इत्यत्र तुद् + ति इत्यस्याम् अवस्थायां तुदादिभ्यः शः (3/1/77) इत्यनेन श-प्राप्यते तद्वत् पुगन्तलघूपधस्य च (7/3/86) इति सूत्रेण लघूपधगुणः प्राप्यते । अत्र लघूपधगुणविधायकं सूत्रं परसूत्रं विधते तथापि तस्य गुणे कृतेऽपि श-प्रत्ययविधायकसूत्रस्य प्रवृत्तिः तु भवत्येव अतः तत् सूत्रं नित्यसूत्रं कथ्यते । अतः परसूत्रापेक्षया तस्य प्रवृत्तिः भवति ।

नित्यकार्यात् अन्तरङ्गकार्यं बलवत् भवति यथा ग्रामणिने (नपुं. चतुर्थी ए. व.) इत्यत्र ग्रामणि + ङे इत्यवस्थायाम्

ह्रस्वो नपुंसके प्रातिपदिकस्य इति सूत्रेण णी इत्यत्र ह्रस्वं प्राप्यते, अपरत्र इकोऽचि विभक्तौ इति सूत्रेण नुमागमः प्राप्यते । अत्र ह्रस्व-नुमागमयोः ह्रस्वकार्यम् नुमागमापेक्षया अल्पापेक्षत्वात् अन्तरङ्गम् अस्ति अतः तदेव भवति । (अल्पापेक्षम् अन्तरङ्गम्) ।

अन्तरङ्गकार्यात् अपवादकार्यं बलवत् भवति यथा - श्रीशः इत्यत्र - श्री + ईशः इत्यवस्थायां अन्तरङ्गत्वात् इको यणचि इति सूत्रेण यणि प्राप्ते किन्तु अकः सवर्णे दीर्घः इति सूत्रेण अपवादत्वात् तस्य बाधं कृत्वा सवर्णदीर्घः विधीयते । (निरवकाशो विधिरपवादः ।)

**(11) परि. 50 - असिद्धं बहिरङ्गमन्तरङ्गे ।**

सन्दर्भः - परिभाषेयं सिद्धान्तकौमुद्यां स्वरितेनाधिकारः (सू. 46) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः - यदा अन्तरङ्गकार्यविधायकं सूत्रं भवति तदा तत् प्रति बहिरङ्गकार्यविधायकं सूत्रम् असिद्धं गण्यते ।

विमर्शः - अस्याः परिभाषायाः ज्ञापकं वाह ऊठ् इत्यस्मिन् सूत्रे ऊठ पदम् अस्ति । विश्वौहः इत्यत्र (विश्ववाज् + अस् (एत्येधत्यूठ्सु इत्यनेन वृद्धिः) विश्वौहः ।) विश्ववाह + अस् इत्यवस्थायां व्-कारस्य सम्प्रसारणेन उ-कारे, पूर्वरूपे (विश्व उज्+अस्) कृते लघूपधगुणेन विश्व + ओज् + अस् इत्यवस्थायां वृद्धिरेचि इति सूत्रेण वृद्धिं विधायापि कार्यं साधयितुं मार्गः आसीत् । किन्तु अत्र वृद्धिरेचि इत्यनेन विधीयमाना वृद्धिः अन्तरङ्गकार्यम्, गण-सन्धिः बहिरङ्गकार्यम्, अतः ओकाररूपं गुणकार्यं वृद्धौ विधीयमानायां सत्याम् असिद्धं भवति अतः वृद्धेः अप्रवृत्तिः भवेत् । अतः ऊठ्-आदेशस्य सार्थकत्वम् । वाह ऊठ् इति सूत्रेण अन्तरङ्गशास्त्रस्य प्राथमिकता सूचिता ।

**(12) परि. 56 - अकृतव्यूहाः पाणिनीयाः ।**

सन्दर्भः - परिभाषेयं सिद्धान्तकौमुद्यां स्वरितेनाधिकारः (सू. 46) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः - पाणिनीय-शास्त्रस्य अध्येतारः (शास्त्रप्रवृत्तेः निमित्तं विनाशोन्मुखं दृष्ट्वा तदनुलक्ष्य) प्रवृत्ति न कुर्वन्ति ।

विमर्शः - परिभाषेयं पूर्वपरिभाषामनुवर्तते । तदनुसारम् अन्तरङ्गकार्ये कर्तव्ये सति बहिरङ्गकार्यम् असिद्धं गण्यते इत्येतत् समर्थितं पूर्वपरिभाषया । किन्तु अन्तरङ्गकार्यमपि परीक्ष्य विधेयमिति अनया परिभाषया सूच्यते । यथा सेदुषः । अत्र सेद् + वस् (कसु) + (शस्) इत्यवस्थायां वस्-प्रत्ययस्य व्-कारं मत्त्वां विधीयमानः इडागमः अन्तरङ्गकार्यम् अस्ति तथापि न विधीयते यतो हि इडागमे कृते तन्निमित्तरूपस्य वकारस्य सम्प्रसारणेन विनाशः अवश्यम्भावी विधते । अतः तत्कार्यं न विधीयते । यथोक्तं सूक्त्याम् प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ।

**(13) परि. 59 - पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरान् ।**

सन्दर्भः - परिभाषेयं सिद्धान्तकौमुद्यां तो गुणे (सू. 191) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः - पूर्वपठितः अपवादः निजसमीपवर्तिनः विधेः बाधं करोति दूरस्थस्य शास्त्रस्य बाधं कर्तुं समर्थः न भवति ।

विमर्शः - परिभाषेयम् अपवादानां बाधकत्वं नियमयति । निर्दिष्टानुसारं विधिसूत्रं यदा प्रवृत्तिं करोति तदा तत्र (पूर्व) परनित्यान्तरङ्गापवादानाम् उत्तरोत्तरं बलीयः इति परिभाषया अपवादकार्यं सर्वतः बलीयः भवति इति निश्चितम् । किन्तु अपवादस्य बलं कियत् भवितुमर्हति इत्यपि निर्णेतव्यम् अतः अनया परिभाषया तन्नियम्यते यत् - अपवादः समीपस्थस्य विधिकार्यस्य बाधं करोति किन्तु दूरस्थस्य बाधं कर्तुं तस्य सामर्थ्यं न भवति । यथा रामाः । राम + अस् (जस्) इत्यत्र अतो गुणे (6/1/97) इत्यनेन पररूपस्य तथा च प्रथमयोः पूर्वसवर्णः (6/1/102) इत्यनेन पूर्वसवर्णदीर्घैकादेशस्य प्राप्तिः सममेव भवति अत्र विप्रतिषेधे परं कार्यम् इति परिभाषासूत्रकृतनियमेन परत्वात् प्रथमयोः पूर्वसवर्णः इति सूत्रं प्रवृत्तं भवितुमर्हति । किन्तु कश्चित् प्रश्नमुत्पादयति यत् अतो गुणे सूत्रम् अपवादसूत्रं विद्यते अतः तस्य प्रवृत्तिः कर्तव्या इति । तर्हि तत्र परिभाषेयं निर्दिशति यत् अतो गुणे तस्य समीपवर्तिनः अकः सवर्णे दीर्घः (6/1/101) इति सूत्रस्य बाधं कृत्वा चरितार्थमस्ति अतः दूरवर्तिनः पूर्वसवर्णदीर्घस्य बाधकं न भवति । तेन रामाः इत्यस्य सिद्धिः भवति ।

**(14) परि. 71  प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ।**

सन्दर्भः - परिभाषेयं सिद्धान्तकौमुद्यां ङ्याप्प्रातिपदिकात् (सू. 182) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः - यदा प्रातिपदिकस्य ग्रहणं क्रियते तदा लिङ्गविशिष्टस्य अपि ग्रहणं स्वतः भवति ।

विमर्शः - कुमारः श्रमणादिभिः इत्यस्मिन् सूत्रे प्रयुक्तं श्रमणा-इति स्त्रीलिङ्गपदं अस्याः परिभाषायाः ज्ञापकम् । स्त्रीप्रत्ययान्तानां श्रमणा-आदीनां सामानाधिकरण्यं कुमारी-आदिभिः शब्दैः सहैव भवितुम् अर्हति न तु कुमार-आदिभिः शब्दैः सह इत्येतत् वाक्यम् अत्र परिभाषायां ज्ञापकम् । इयं परिभाषा अनित्या विद्यते । यत्र समासान्तविधौ अवयवग्रहणं तत्र अस्याः प्रवृत्तिः न भवति । यत्र पूर्णसामासिकशब्देषु समासाश्रयविधिः कर्तव्यः तत्र अस्याः परिभाषायाः प्रवृत्तिः भवति ।

**(15) परि. 72 - विभक्तौ लिङ्गविशिष्टाग्रहणम् ।**

सन्दर्भः - परिभाषेयं सिद्धान्तकौमुद्यां न तिसृचतसृ (सू. 300) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः - विभक्तिनिमित्तकेषु कार्येषु लिङ्गविशिष्ट (परिभाषायाः) ग्रहणं न भवति ।

विमर्शः - दीर्घ-ईकारान्त-सखीशब्दस्य प्रसङ्गे इदम् प्रस्तूयते यत् लिङ्गविशिष्टपरिभाषानुसारं यत्कार्यं पुल्लिङ्ग-सखिशब्दे विहितं तत् स्त्रीलिङ्गे प्राप्तं न भवति । तस्य समाधानं कुर्वती एषा परिभाषा निर्दिशति यत् - विभक्तिनिमित्तानि कार्याणि यदा उपतिष्ठन्ते तदा तत्र प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषा प्रवृत्ता न भवति । अतः स्त्रीलिङ्गसखीशब्देऽपि सखिशब्द इव सूत्रप्रवृत्तिः भवति ।

**(16) परि. 85 - सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ।**

सन्दर्भः - परिभाषेयं सिद्धान्तकौमुद्यां डेर्यः (सू. 204) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः - उपकार्यविधिः स्व-उपकारकस्य विनाश-कार्यस्य निमित्तं न भवति ।

विमर्शः - परिभाषेयं निर्दिशति यत् प्रक्रियायां कार्यस्य निमित्तं भवति यथा इको यणचि इत्यत्र यणादेशस्य निमित्तम् अच् वर्तते । इत्थम् विधीयमाने कार्ये यत् निमित्तभूत उपकारकम् इति कथ्यते । अथ उपकार्यं कदापि उपकारकस्य विनाशः भवेत् तादृशं न करोति यतो हि तेन स्वस्यापि नाशः भवति । यथा  शतानि इत्यत्र । शत + जस्  शि - इ, शत + इ इत्यवस्थायां शि सर्वनामस्थानम् इत्यनेन शि - इ-कारस्य सर्वनामस्थानसंज्ञायां, नपुंसकस्य झलचः इति सूत्रेण नुमागमे, सर्वनामस्थाने चासम्बुद्धौ इत्यनेन दीर्घे कृते शतानि इति सिद्ध्यति । अत्र शतन् + इ इत्यवस्थायां ष्णान्ता षट् इति सूत्रेण शतन् इत्यस्य षट्-संज्ञायां, षड्भ्यो लुक् इत्यनेन शि-प्रत्ययस्य लोपो विधेयः इति प्रस्तावे जाते सति सन्निपातलक्षण 0 परिभाषया तथा कर्तुं निषिद्ध्यते यतो हि यदि सर्वनामस्थानसंज्ञकस्य शि-प्रत्ययस्य लोपः भवेत् तर्हि नुमागमस्य निमित्तमपि नष्टं भवेत् अनिष्टापत्तिश्च स्यात् । अतः नुमागमः स्वयं षट्संज्ञाद्वारा स्व-उपजीव्यभूतस्य सन्निपातस्य शि-इ-प्रत्ययस्य नाशकः भवितुं नार्हति । परिभाषेयम् अनित्या विधते अतः डेर्यः इत्यत्र अस्याः प्रवृत्तिः न भवति ।

**(17) परि. वाक्यम् - यथोत्तरं मुनीनां प्रामाण्यम् ।**

सन्दर्भः परिभाषेयं सिद्धान्तकौमुद्यां  न बहुब्रीहौ (सू. 222) इत्यस्मिन् सूत्रे पठिता ।

सरलार्थः - (त्रिमुनि व्याकरणम् इत्यत्र) उत्तरोत्तरं मुनीनां प्रामाण्यम् इत्यर्थः ।

विमर्शः - पाणिनीयव्याकरणस्य त्रयः मुनयः पाणिनिः, कात्यायनः, पतञ्चलिश्चेति । अत्र तैः विहितेषु कार्येषु प्रमाणभूतं किम् ? कस्य कियत् प्रामाण्यमिति प्रश्ने समुपस्थिते सति उत्तरमिदं यत्  पाणिनेः कार्यं महनीयं किन्तु यदि तत्र वार्तिकं नूतनां व्यवस्थां निर्दिशति तर्हि तदनुसारं विधिः प्रामाणिकः गण्यते । वार्तिककारादपि परिभाषाः बलवत्यः गण्यन्ते । इत्थम् अत्र सूत्रेभ्यः वार्तिकानि वार्तिकेभ्यश्च परिभाषावाक्यानि इति व्याकरणशास्त्रे प्रामाण्यव्यवस्था विहिता ।

## स्वाध्याय

**1. अधोलिखिताः परिभाषाः स्पष्टीकुरुत ।**

(1) यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः ।

(2) निर्दिश्यमानस्यादेशा भवन्ति ।

(3) एकदेशविकृतमनन्यवद्भवति ।

(4) परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ।

(5) अकृतव्यूहाः पाणिनीयाः ।

(6) प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ।

(7) यथोत्तरं मुनीनां प्रामाण्यम् ।

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं, पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखत् ।

◆

# 21 सूत्रगणपाठः

**प्रस्तावना**

**पाणिनीयव्याकरणे पञ्चाङ्गानि सन्तीति सर्वविदितम् । तत्र धातु सूत्र गण उणादि लिङ्गानुशासनम् इति पञ्चाङ्गानि स्वीक्रियन्ते । पाणिनिः सूत्राष्टाध्यायीमतिरिच्य अन्येषु चतुःषु अङ्गेषु तत्तद्विषयकं संग्रहणं कृतवान् यथा – धातुपाठे धातूनां संग्रहः । एकमेव गणपाठद्वारा शब्दसमूहानां ग्रथनं व्यधात् ।**

---

अस्मिन् पाठे व्याकरण–1 मध्ये समागतानां गणसूत्राणां परिगणनं कृत्वा तत्र विद्यमानानां शब्दानां निदर्शनं छात्रोपयोगाय विधीयते । अत्र सिद्धान्तकौमुदीसूत्रक्रममनुसृत्य गणपाठः प्रदत्तः ।

गणः इत्युक्ते समूहः । गण संख्याने इत्यस्माद्धातोः कर्तरि कर्मणि वा अच् प्रत्यये कृते निष्पन्नोऽयं शब्दः गणयतीति गणः, गण्यते असौ गणः इत्यर्थं प्रकटयति । अत्र गण्यन्ते शब्दाः येन असौ गणः इत्यर्थः स्वीक्रियते । तादृशानां गणानां पाठः गणपाठः ।

सुप्तिङ्न्तं पदमिति सूत्रमनुसरामश्चेत् पदसाधनं द्विधा तत्र – सुबन्तपदं साधयितुं प्रातिपदिकानाम् आवश्यकता, तिङ्न्तपदं साधयितुं धातूनाम् आवश्यकता भवति । लाघवप्रियः पाणिनिः समानप्रत्ययान्तानां शब्दानां समाहरणं कर्तुं शब्दगणनिर्माणं कृतवान्। ताँश्च गणान् सूत्रेषु निबद्ध्य साधनिकातन्त्रेण समायोजयत् । येन सूत्रे मणिगणा इव व्याकरणस्याङ्गानि समेकितान्यभवन्।

गणपाठे द्विप्रकारकाः गणाः भवन्ति । ते यथा 1) निश्चितगणः 2) आकृतिगणः

**(1) निश्चितगणः** यस्मिन् गणे केषाञ्चन शास्त्रीयशब्दानां, निश्चितशब्दानामेव परिगणनं भवति सः गणः निश्चितगणः नियतगणः वेत्युच्यते । यथा सर्वादिगणः, चादिगणः । अत्र पाणिनिः इति सर्वादि, इति चादयः, इति वृत् इत्यादिकं विधाय इति करणेन बोधयति यदेष गणः पूर्णः अत्रैतदतिरिच्य योजयितुं न शक्यते ।

**(2) आकृतिगणः** यस्मिन् गणे समानप्रत्ययान्तशब्दानां परिगणनं स्यात् यत्र अन्येऽपि समानप्रकृतयः शब्दाः योजयितुम् शक्यन्ते तादृशी गणव्यवस्था आकृतिगणः इति नाम्ना बोध्यते । अत्र पाणिनिः सः गणः आकृतिगणोऽयम् इति निर्दिशति। यथा शकन्ध्वादिगणः । एतादृशे गमे ये शब्दाः गणे अनुल्लिखिताः तेषामपि संख्यानं विधातुं शक्यते । यथा शकन्ध्वादिगणे शकन्धुः, इत्यादिशब्दानां गणना विधते किन्तु मार्तण्डः इति शब्दस्य गणना नास्ति तथापि समानप्रकृतिवशात् मार्तण्डशब्दस्य सिद्धिर्भवति । (मृतम् अण्डं यस्य सः मृतण्डः कश्चिद् ऋषिः । तस्यापत्यम् इत्यणि कृते आदिवृद्धौ मार्तण्ड इति रूपं भवति । अत्र मृत+अण्ड इत्यत्र सवर्णदीर्घं बाधित्वा शकन्ध्वादिषु पररूपं वाऽयमिति वार्तिकेन आकृतिगणवशात् अस्य शब्दस्य समावेशं कृत्वा पररूपं भवति ।)

इत्थमेव अजाद्यतष्टाप् इत्यस्मिन् सूत्रे अजादिः आकृतिगणः इति विधानेन ये शब्दाः अजादिगणे न स्युः किन्तु अजादिगणपठितशब्दैः साम्यं धारयन्ति तेषाम् अजादिगणे समावेशः भवितुमर्हति येन च स्त्रीत्वविवक्षायां तत्र टाप् प्रत्ययोपस्थितिः शक्या भवति । अनया आकृतिगणयुक्त्या पाणिनिः भाषायाः प्रारूपं चिरस्थायि व्यधात् । यतः पाणिन्यनन्तरं व्यवहारे समाविष्टानां समानप्रकृतीनां शब्दानां प्रत्ययनिर्धारणे सौकर्यं जातम् । अनया पद्धत्या अद्यापि पाणिनीयं व्याकरणतन्त्रं नूतनान् शब्दान् निर्माय भाषायाः प्रवाहितत्त्वं, जीवितत्त्वं च रक्षति ।

अत्र केचन गणाः ये पाठ्यक्रमे उपयोगिनः सन्ति तेषां गणपाठः प्रस्तूयते ।

चादयोऽसत्त्वे । 1/4/57 ।

च । वा । ह । अह । एव । एवम् । नूनम् । शश्चत् । युगपत् । भूयस् । कूपत् । सूपत् । कुवित् । नत् ।

चेत् । चण् । कच्चित् । यत्र । नह । हन्त । माकिः । माकिम् । नकिः । (आकिम् । नाकिम् ।) माङ् । नञ् । यावत् । तावत् । त्वै । द्वै । न्वै । रै । श्रौषट् । वौषट् । स्वाहा । स्वधा । वषट् । तुम् । तथाहि । खलु । किल । अथो । अथ । सुष्ठु । स्म । आदह । उपसर्गविभक्तिस्वरप्रतिरूपकाश्च (ग. 16) । अवदत्तम् । अहंयुः । अस्तिक्षीरा । अ । आ । इ । ई । उ । ऊ । ए । ऐ । ओ । औ । पशु । शुकम् । यथाकथाच् । पाट् । प्याट् । अङ्ग । है । हे । भोः । अये । ध । विषु । एकपदे । युत् । आतः चादिराकृतिगणः । इति चादयः ।

प्रादयः । 1-4-58 ।

प्र । परा । अप । सम् । अनु । अव । निस् । निर् । दुस् । दुर् । वि । आङ् । नि । अधि । अपि । अति । सु । उत् । अभि । प्रति । परि । उप । एते प्रादयः ।

(वा. 3632) शकन्ध्वादिषु पररूपं वाच्यम् ।

शकन्धुः । कर्कन्धुः । कुलटा । सीमन्तः केशवेशे (वा. 3633) । मनीषा । हलीषा । लाङ्गलीषा । पतञ्जलिः । सारङ्ग पशुपक्षिणोः (ग. 136) । आकृतिगणोऽयम् ।

(वा.) अहरादीनां पत्यादिषु वा रेफः ।

अहरादि - अहर् । गीर् । धुर् । पत्यादिः पति । गण । पुत्र ।

सर्वादीनि सर्वनामानि । 1 1 17।

सर्व । विश्व । उभ । उभय । डतर । डतम । अन्य । इतर । त्वत् । त्व । नेम । सम । सिम । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् (ग. 1) । स्वमज्ञातिधनाख्यायाम् (ग.2) ।

अन्तरं बहिर्योगोपसंव्यानयोः (ग. 3) । त्यद् । तद् । यद् । एतद् । इदम् । अदस् । एक । द्वि । युष्मद् । उस्मद्। भवतु । किम् । इति सर्वादिगणः ।

न षट्स्वस्रादिभ्यः । 8-1-10।

स्वसा तिस्त्रश्चतस्त्रश्च ननान्दा दुहिता तथा ।
याता मातेति सप्तैते स्वस्त्रादय उदाहृताः ।।

## स्वाध्याय

**1. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

(1) नकिम् इति शब्दः अस्मिन् गणे विधते ।

(क) सर्वादि (ख) स्वस्त्रादि (ग) चादि (घ) भ्वादि

(2) प्रादिषु अस्य गणना न भवति ।

(क) परा (ख) ह (ग) अप (घ) वि

(3) सर्वादिगणस्य गणसूत्रमिदं नास्ति ।

(क) उपसर्गविभक्तिस्वरप्रतिरूपकाश्च (ख) स्वमज्ञातिधनाख्यायाम्

(ग) अन्तरं बहिर्योगोपसंव्यानयोः (घ) पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्

(4) स्वस्त्रादिगणे एषः शब्दः परिगणितः ।

(क) डतर (ख) डतम (ग) अन्यतर (घ) तिस्त्रः

(5) धनुष्कपालम् इति शब्दः अत्र विधते ।

(क) सर्वादि (ख) स्वस्त्रादि (ग) चादि (घ) कस्कादि

**2. एकैकवाक्येन उत्तराणि लिखत ।**

(1) गणपाठः कति प्रकारकः ?

(2) नियतगणस्य अर्थः कः ?

(3) नियतगणस्य अर्थः कः ?

(4) प्रादयः अन्येन केन नाम्ना प्रसिद्धाः ?

(5) आकृतिगणस्य अर्थः कः ?

**3. सविस्तरम् उत्तरं लिखत ।**

गणपाठस्य अर्थं ज्ञापयित्वा तस्य पाणिनीयव्याकरणे महत्त्वं निर्दिशत ।

गणपाठस्य उपयोगिता का ? सविशदं व्याख्यात् ।

**4. अ विभागं ब विभागेन सह योजयत ।**

| अ विभागः | ब विभागः |
|---|---|
| (1) कच्चित् | कस्कादिषु च |
| (2) सद्यस्कालः | सर्वादीनि सर्वनामानि |
| (3) सिम | चादयोऽसत्त्वे |
| (4) कुलटा | अहरादीनां पत्यादिषु वा रेफः |
| (5) गीर् | शकन्ध्वादिषु पररूपं वाच्यम् |

**छात्रप्रवृत्तिः**

प्राध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य तस्य पदच्छेदं, पदपरिचयं, अन्वयं सरलसंस्कृतेन भावार्थं च लिखत् ।

◆

# 22 सूत्रसूचिः

- निशांत महेता

**अकारादिक्रमेण सूत्रानुक्रमणिका**

| क्रमः | सूत्रम् | सूत्र संख्या |
|---|---|---|
| 11. | अ अ | 8/4/68 |
| 85. | अकः सवर्णे दीर्घः | 6/1/101 |
| 200. | अङ्गस्य | 6//4/1 |
| 50. | अयः परिस्मिन् । | 1/1//57 |
| 35. | अचश्च | 1/2/28 |
| 299. | अचि र ऋतः । | 7/2/100 |
| 271. | अचि श्नुधातुभु...। | 6/4/77 |
| 254. | अचो ञ्णिति | 7/2//115 1/2/28 |
| 79. | अचोऽन्त्यादि टि | 1//1//64 |
| 247. | अच्च घेः | 7/3//119 |
| 197.. | अटकुप्वाङ्ग....। | 8/4//2 |
| 110. | आणोऽप्रगृह्यस्या....। | 8/4/57 |
| 14. | आणुदित्सवर्णस्य...। | 1//1//69 |
| 160. | अतः कृकमिकंस...। | 8-3-46 |
| 191. | अतो गुणे | 6-1-97 |
| 203. | अतो भिस् सेस् | 7-1-9 |
| 309. | अतोऽम् | 7-1-24 |
| 163. | अतो रोरप्लुता....। | 7-1-9 |
| 136. | अत्रानुनासिकः... | 8-3-2 |
| 53. | अदर्शनं लोपः | 1-1-60 |
| 101. | अदसो मात् | 1-1-12 |
| 17. | अदेङ्ग गुणः | 1-1-2 |
| 315. | अद्ड्डतरादिभ्यः...। | 7-1-25 |
| 161. | अधः शिरसी पदे | 8-3-40 |
| 248. | अनङ् सौ | 7-1-93 |
| 48. | अनचि च | 8-4-47 |
| 137. | अनुनासिकात्परोऽनुस्वारः | 8-4-3 |
| 124. | अनुस्वारस्य ययि...। | 8-4-48 |
| 45. | अनेकाल् शित्सर्वस्य | 1-1-55 |
| - | अन्तादिवच्च | 6-1-85 |
| 210. | अपदान्तस्य | 8-3-55 |

| | | |
|---|---|---|
| 231. | अपृक्त एकालप्र...। | 1-2-41 |
| 277. | अपतृन् तृच...। | 6-4-11 |
| 98. | अप्लुतवदुप...। | 6-1-129 |
| 194. | अमि पूर्वः | 6-1-107 |
| 267. | अम्बार्थनद्योर्हस्वः | 7-3-107 |
| 178. | अर्थवदधातुरप्र...। | 1-4-45 |
| 42. | अलोऽन्त्यस्य | 1-1-52 |
| 249. | अलोऽन्त्यात्पूर्व...। | 1-1-65 |
| 234. | अल्लोपोऽनः । | 6-4-134 |
| 88. | अवङ् स्फोटाय....। | 6-1-123 |
| 81. | अव्यक्तानुकरणस्या...। | 6-1-98 |
| 322. | अस्थिदधि.... | 7-1-75 |

**( आ )**

| | | |
|---|---|---|
| 232. | आकडारादेका संज्ञा | 1-4-1 |
| 289. | आङि चापः | 7-3-105 |
| 244. | आङो नास्त्रियाम् | 7-3-120 |
| 147. | आऽमाडोश्च | 6-1-74 |
| 269. | आटश्य | 6-1-90 |
| 240. | आतो द्यातोः | 6-4-1440 |
| 2.. | आदिरन्त्येन सहेता | 1-1-71 |
| 44. | आदेः परस्य | 1-1-54 |
| 212. | आदेशप्रत्ययोः | 8-3-59 |
| 69. | आद्गुणः | 6-1-87 |
| 36. | आद्यन्तौ टकितौ | 1-1-46 |
| 217. | आमि सर्वनाम्नः सुट् | 7-1-52 |

**( इ )**

| | | |
|---|---|---|
| 34. | इको गुणवृद्धी | 1-1-3 |
| 320. | इकोऽचि विभक्तौ | 1-1-73 |
| 47 | इको याणचि | 6-1-77 |
| 91.. | इको सवर्णेः...। | 6-1-127 |
| 153. | इणः षः । | 8-3-39 |
| 211. | इण्कोः | 8-3-57 |
| 155. | इदुदुपधस्य चाप्...। | 8-3-41 |
| 297. | इदुद्ध्याम् | 7-3-117 |
| 89. | इन्द्रे च | 6-1--124 |
| 158. | इसुः सो सामर्थ्ये । | |

| | | |
|---|---|---|
| | **( ई )** | |
| 109. | ईद्तौ च सप्तम्यर्थे | 1-1-19 |
| 110. | ईऽुदे द्विवचनं प्रगृह्यम् | 1-1-11 |
| 99.. | ई 3 चाक्रवमणिस्य | 6-1-130 |
| | **( उ )** | |
| 5 | उच्चैरुदात्तः | 1-2-29 |
| 106. | उञः | 1-1-17 |
| 170.. | उझि च पदे | 8-3-21 |
| 118. | उदः स्थास्तम्भोः...। | 8-4-61 |
| 3. | उपदेशेजनुऽनसिक...। | 1-3-2 |
| 22. | उपसर्गाः क्रियायोगे | 1-4-59 |
| 74. | उपसर्गादिति... | 6-1-91 |
| 70. | उरण रपरः | 1-1-51 |
| | **( ऊ )** | |
| 101. | ऊँ | 1-1-18 |
| 4. | ऊकालोऽज्...। | 1-2-27 |
| | **( ऋ )** | |
| 279. | ऋत उत् | 6-1-111 |
| 275. | ऋतो ङि...। | 7-3-110 |
| 92. | ऋत्यकः | 6-1-128 |
| 276. | ऋदुशनस्पुरु....। | 7-1-94 |
| 306. | ऋन्नेभ्यो ङीप् | 4-1-5 |
| | **( ए )** | |
| 68 | एकः पूर्वपरयोः | 6-1-84 |
| 192. | एकवचनम् सम....। | 2-3-49 |
| 307. | एकाजुत्तरपदेणः | 8-4-12 |
| 86. | एङ पदान्ता...। | 6-1-109 |
| 78. | एङि पररुपम् | 6-1-94 |
| 166. | एडह्रस्वात्सम्बुद्धेः | 6-1-69 |
| 323. | एच इग्रध्रस्वा...। | 1-1-68 |
| 61. | एचोडयवायावः । | 6-1-78 |
| 176. | एक्तदोः सु...। | 6-1-132 |
| 73. | एत्येधत्युठसु । | 6-1-89 |
| 272. | एरनेकायोढसंयोग...। | 6-4-82 |
| | **( ओ )** | |
| 281. | ओः सुपि | 6-4-83 |
| 104. | ओत् | 1-1-15 |

| | | |
|---|---|---|
| 169. | ओतो गार्ग्यस्य | 8-3-20 |
| 80. | ओमाङोश्च | 6-1-85 |
| 207. | ओसि च | 7-3-104 |
| | ( औ ) | |
| 287. | औङ आपः । | 7-1-18 |
| 256. | औत | 7-3-118 |
| 285. | औतोऽम्शसोः | 6-1-93 |
| | ( क ) | |
| 144. | कस्कादिषु च | 8-3-48 |
| 143. | कानाम्रेडिते | 8-3-12 |
| 142. | कुप्वो...। | 8-3-37 |
| 179. | कृत्तद्धितसमासाश्च | 1-2-46 |
| 60. | क्रय्यस्तदर्थे | 6-1-82 |
| 65. | क्षय्यणैय्यौ शयार्थे | 6-1-81 |
| | ( ख ) | |
| 76 | खरवसानयोः...। | 8-3-15 |
| 121. | खरि च | 8-4-55 |
| 255. | ख्यत्यात्परस्य | 6-1-112 |
| | ( ग ) | |
| 23. | गतिश्च | 1-4-60 |
| 97. | गुरोरनृतौ...। | 8-2-86 |
| 284. | गोतो णित् | 7-1-90 |
| | ( घ ) | |
| 245. | घेर्ङिति | 7-3-111 |
| | ( ङ ) | |
| 134. | ङमो ह्रस्वादिचि... | 8-3-32 |
| 246. | ङसिङसोश्च | 6-1-110 |
| 216. | ङसिङयोः स्मात्... | 7-1-15 |
| 43. | ङिच्च | 1-1-43 |
| 296. | ङिति ह्रस्वश्च | 1-4-6 |
| 217. | ङे राम्नद्याम्नीभ्यः | 1-3-116 |
| 204. | ङेर्यः | 7-3-116 |
| 130. | ङ्णोः कुकुटुक् शरि | 8-3-28 |
| 182. | ङ्यापप्रतिपदिकात् | 4-1-1 |
| | ( च ) | |
| 20. | चादयोऽसत्वे | 1-4-57 |
| 189. | चुटू | 1-3-7 |

| | | |
|---|---|---|
| | ( छ ) | |
| 146. | छे च | 6-1-73 |
| | ( ज ) | |
| 312. | जश्शसोः शिः | 7-1-20 |
| 227. | जराया जरसन्य...। | 7-2-101 |
| 214. | जसः शी | 7-1-17 |
| 241 | जसि च | 7-3-109 |
| | ( झ ) | |
| 119. | झयो होऽन्यतरस्याम् | 8-4-62 |
| 71. | झरो झरि...। | 8-4-65 |
| 52. | झलां जश झशि | 8-4-53 |
| 84. | झलां जशोऽन्ते | 8-2-39 |
| | ( ट ) | |
| 201.. | टाङसिङसा... | 7-1-12 |
| 316. | टेः | 6-4-143 |
| | ( ड ) | |
| 131. | डः सि धुट् | 8-3-395 |
| 259. | डति च | 1-1-25 |
| | ( ढ ) | |
| 147. | ढ्रलोपे पूर्वस्य दीर्घोऽणः | 6-3-111 |
| | ( त ) | |
| 15 | तपरस्तत्कालस्य | 1-1-70 |
| 196. | तस्माच्छसो नः पुसि | 6-1-103 |
| 41. | तस्मादित्युतरस्य | 1-1-67 |
| 40. | तस्मिन्निति...। | 1-1-66 |
| 83. | तस्य परमामे...। | 8-1-2 |
| 62. | तस्य लोपः...। | 1-3-9 |
| 8. | तस्यादित...। | 1-3-32 |
| 156. | तिरसोऽन्यतरस्याम् | 8-3-42 |
| 10. | तुल्यास्य...। | 1-1-9 |
| 274. | तृज्वत्क्रोष्टुः | 7-1-95 |
| 223. | तृतीयासमासे | 1-1-30 |
| 115. | तोः षि | 8-4-43 |
| 117. | तोर्लि | 8-4-43 |
| 265. | त्यदादीनामः | 7-2-99 |
| 298. | त्रिचतुरोः...। | 7-2-99 |
| 56. | त्रिप्रभृतिषु शाकटा...। | 8-4-50 |
| 264. | त्रेस्त्रस्यः | 7-1-53 |

| | | |
|---|---|---|
| | ( द ) | |
| 33. | दीर्घ च | 1-4-12 |
| 239. | दीर्घाज्जसि च | 6-1-105 |
| 148. | दीर्घात् | 6-1-75 |
| 58. | दीर्घादाचार्याणाम् | 8-4-52 |
| 95. | दूराद्धूते च | 8-2-84 |
| 224. | द्वन्द्वे च | 1-1-31 |
| 157. | द्विस्त्रिश्चतुरिति | 8-3-43 |
| 186. | द्वयेक्यौर्दिवचनैकवयने । | 1-4-22 |
| | ( ध ) | |
| 64. | धातोस्तन्निमित्त... | 6-2-80 |
| | ( न ) | |
| 300. | न तिसृचतसृ | 6-4-4 |
| 51. | न पदान्तद्विर्वचन... | 1-1-58 |
| 114. | न पदान्ताट्टोरनाम् | 8-4-42 |
| 129. | नपरे नः | 8-3-27 |
| 314. | नपुंसकस्य झलच | 7-1-72 |
| 310. | नपुंसकाच्च | 7-1-19 |
| 222. | न बहुव्रीहौ | 1-1-29 |
| 273. | न भूसुधियोः | 6-4-85 |
| 154. | नमस्पुरसो | 8-3-40 |
| 263. | न लुमताङ्स्य | 1-1-63 |
| 236. | नलोपः प्रातिपदिकान्तस्य | 8-2-7 |
| 190. | न विभक्तौ | 1-3-4 |
| 24. | न वेति विभाषा | 1-1-44 |
| 132. | नश्च | 8-3-30 |
| 123. | नश्चापदान्तस्य झलि | 8-3-24 |
| 140. | न श्छव्यप्रशान् | 8-3-7 |
| 114. | न षट्स्वस्रादिभ्यः | 4-1-10 |
| 13. | नाज्झलौ | 1-1-10 |
| 165. | नादिचि | 6-1-104 |
| 55. | नादिन्याक्रोशे | 8-4-48 |
| 209. | नामि | 6-4-13 |
| 82. | नाम्रेडितस्या– | 6-1-99 |
| 159. | नित्यं समासे– | 8-3-45 |
| 103. | निपात एकाज– | 1-1-14 |
| 6. | नीचैरनुदात्तः | 1-2-30 |

| | | |
|---|---|---|
| 283. | नृच | 6-4-6 |
| 141. | नृन पे | 8-3-10 |
| 303. | नेयङुवङ्- | 1-4-4 |
| | **( प )** | |
| 247. | पतिः समास एव | 1-4-8 |
| 198. | पदान्तस्य | 8-4-37 |
| 149. | पदान्ताद्वा | 6-1-76 |
| 228. | पदभोमास्हृभि | 6-1-63 |
| 28. | परः सन्निकर्षः संहिता | 1-4-109 |
| 181. | परश्च | |
| 139. | पुमः खय्यम्परे | 8-3-6 |
| 12. | पूर्वत्रासिद्वम् | 8-2-1 |
| 218. | पूर्वपरावरदक्षिणोतर- | 1-1-34 |
| 221. | पूर्वादिश्यो नवभ्योना | 7-1-16 |
| 94. | परत्यभिवादेडशूद्रे- | 8-2-83 |
| 180. | प्रत्ययः | 3-1-1 |
| 262. | प्रत्ययलोवे- | 1-1-62 |
| 260. | प्रत्ययस्य लुक् - | 1-1-61 |
| 226. | प्रथमचरम | 1-1-33 |
| 164. | प्रथमयोः | 6-1-102 |
| 19. | प्राग्रीश्वरान्निपाताः | 1-4-56 |
| 21. | प्रादयः | 1-4-58 |
| 90. | प्लुत प्रगृह्या- | 6-1-25 |
| | **( ब )** | |
| 258. | बहुगणवतुडति | 1-1-23 |
| 205. | बहुवचने झल्येत | 7-3-103 |
| 187. | बहुषु बहुवचनम् | 1-1-21 |
| 233. | भस्य | 6-4-129 |
| 18. | भूवादयोद्यातवः | 1-3-1 |
| 167. | भो भागे अघो- | 8-3-17 |
| | **( म )** | |
| 108. | मय उञो वो वा | 8-3-33 |
| 47. | मिदचोऽभ्यात्परः | 1-1-47 |
| 9. | मुखनासिकावचनो | 1-1-8 |
| 121. | मोऽनुस्वादः | 8-3-23 |
| 126. | मो राजिसमः क्वौ | 8-3-35 |

| | | |
|---|---|---|
| | **( य )** | |
| 231. | यचि भम् | 1-4-18 |
| 128. | यथासंख्यंमनुदेशः | 1-3-10 |
| 116. | यरोऽनुनासिके | 8-4-45 |
| 199. | यस्मात्प्रत्यय् | 1-4-13 |
| 311. | यस्येति च | 6-4-148 |
| 290. | याऽपिः | 7-3-113 |
| 266. | यू स्त्राख्यौ नदी | 1-4-3 |
| 26. | येन विधिस्तदन्तस्यय | 1-1-72 |
| | **( र )** | |
| 235. | रषाभ्यां नोणः समानपदे | 8-4-1 |
| 380. | रात्सस्य | 8-2-24 |
| 286. | रायो हलि | 7-2-85 |
| 137. | .रोरि | 8-3-14 |
| 172. | रोऽसुपि | 8-2-69 |
| 195. | भरावतद्धिते | 1-3-8 |
| 67. | लोपः शाकल्यस्य | 8-3-19 |
| | **( व )** | |
| 282. | वर्षाभ्वश्च | 6-4-84 |
| 93. | वाक्यस्पटेःप्लुत | 8-2-82 |
| 63. | वान्तोयिप्रत्यये | 6-1-79 |
| 125. | नामि | 8-4-59 |
| 304. | वाऽवसाने | 1-4-5 |
| 302. | वाम्शसोः | 6-4-80 |
| 206.. | वाऽवसाने | 8-4-56 |
| 154. | वा शरि | 8-3-36 |
| 77. | वा सुप्यापिशले | 6-3-92 |
| 175. | विप्रतिषेधेपरकार्यम् | 1-4-102 |
| 184. | विभक्तिश्च | 1-4-2 |
| 239. | विभाषाङिश्योः | 6-4-136 |
| 278. | विभाषा जसि | 1-1-32 |
| 292. | विभाषा तृतीया | 7-1-97 |
| 293. | विभाषा दिक्समासे | 7-1-27 |
| 27. | विभाषा द्वितीया | 7-3-115 |
| 138. | विसर्जनीयस्य सः | 1-4-10 |
| 16. | वृद्धिरादैच | 1-1-1 |
| 72. | वृद्धिरेचि | 6-1-88 |

| | | |
|---|---|---|
| 168. | व्योर्लघुप्रयत्न | 8-3-18 |
| 294. | व्रश्चभ्रस्जसृज | 8-2-36 |
| | **( श )** | |
| 150. | शर्परे विर्सनीय | 8-3-35 |
| 120. | शरछोऽटि | 8-4-63 |
| 112. | शात् | 8-4-44 |
| 13. | शितुक | 8-3-31 |
| 102. | शे | 1-2-92 |
| 243.. | शेषोघ्यसरिच | 1-47 |
| | **( ष )** | |
| 261. | षड्भ्योलुक | 7-1-22 |
| 295. | षढोः कः सि | 8-2-418 |
| 38. | षष्ठी स्थाने योगा | 1-1-49 |
| 113. | ष्टुना ष्टुः | 8-4-41 |
| | **( स )** | |
| 54. | संयोगान्तस्य | 8-2-23 |
| 32. | संयोगे गुरुः | 1-4-11 |
| 145. | संहितायाम् | 6-1-72 |
| 253. | सख्युरसम्बुद्धौ | 7-1-92 |
| 238. | संख्याविसाय- | 6-3-110 |
| 131. | समः सुटि | 8-3-5 |
| 7. | समाहारः स्वरितः | 1-2-31 |
| 288. | सम्बुद्धौच | 7-3-106 |
| 125. | सम्बुद्धौ शाकल्यस्ये- | 1-1-16 |
| 118. | सरुपाणोमड़- | 1-2-64 |
| 87. | सर्वत्रविभाषा | 6-1-122 |
| 57. | सर्वत्र शाकल्यस्य | 8-4-51 |
| 250. | सर्वनामस्थाने चाऽसम्बुद्धौ | 8-4-81 |
| 215. | सर्वनाम्नः स्या | 7-3-144 |
| 213. | सर्वादीनि | 1-1-27 |
| 162. | ससजुषो सः | 8-2-66 |
| 317. | सान्तमहतः संयोगस्य | 6-4-10 |
| 229. | सुडनपुंसकस्य | 1-1-43 |
| 195. | सुपः | 1-4-103 |
| 202. | सुपिच | 7-3-102 |
| 29. | सुप्तिङन्तं पदम् | 1-4-14 |
| 177. | सोडचि लोपे- | 6-1-134 |

| | | |
|---|---|---|
| 152. | सोऽपदादौ | 8-3-38 |
| 111. | स्तोःश्चुना | 8-4-40 |
| 301. | स्त्रियाः | 6-4-79 |
| 305. | स्त्रियांच | 2-1-96 |
| 49. | स्थानिवदादेशो | 1-1-56 |
| 39. | स्थानेऽन्तरतम् | 1-1-50 |
| 25. | स्वंरूपं शब्दस्या | 1-1-68 |
| 129. | स्वमज्ञातिधना | 1-1-35 |
| 319. | स्वमोर्नपुंसकात् | 7-1-23 |
| 46. | स्वरितेनाधिकार | 1-3-11 |
| 230. | स्वादिष्वसर्व | 1-4-17 |
| 183. | स्वौजसमौट् | 4-12 |

**( ह )**

| | | |
|---|---|---|
| 01. | हलन्त्यम् | 1-3-3 |
| 173. | हलि सर्वेषाम् | 8-3-22 |
| 30. | हलोऽनन्तरा | 1-1-7 |
| 60. | हलोयमां | 8-4-64 |
| 252. | हलउयाव्यभ्यो | 6-1-68 |
| 166. | हशिच | 6-1-114 |
| 27. | हे मपरेवा | 8-3-23 |
| 96. | है हे प्रयोगे है हयोः | 8-2-85 |
| 31. | ह्रस्वं लघु | 1-4-10 |
| 208. | ह्रस्वनद्यापोनुट् | 7-1-54 |
| 242. | ह्रस्वस्य गुणः | 7-3-108 |
| 318. | ह्रस्वो नपुंसके | 1-2-47 |

◆ ◆ ◆